॥६०॥ ऐं नमः अर्हं॥ प्रणम्य परमं ज्योतिः पंचपरमेष्ठिनः दीक्षाज्ञानगुरूनपि मनोपकृतिकारका
न् १ वक्ष्येहं कल्पसूत्रस्य व्याख्यानानि नवस्फुटं सुगमानि सुबोधानि नानाग्रंथानुसारतः २ तत्सूत्रं न
वहुशिष्य तद्वृत्तिर्नास्य पुस्तकं यादृग् व्याख्यानवेलायां पुस्तके स्मिन्करस्थिते ३ प्रतिसंघाटकं प्राज्ञैः
शाख्याव्याख्यानपद्धतिः कृता तथा हमपितां आर्जस्त्वछानुसारिणीं ४ नीमयलासी लीलविलासी त
तोलीमपलासी राजगण श्रीपर्युषणापर्वव्याख्यानं कर्त्तव्यमिति श्रीखरतरगच्छाम्नायः २ ॥नमः श्रीवर्द्ध
मानाय श्रीमते च सुधर्मणे सर्वानुयोगवृद्धेभ्यो वा ण्यै सर्वविदस्तथा १ अज्ञानतिमिरांधानां ज्ञानां
जिनशलाकया नेत्रमुन्मीलितं येन तस्मै श्री गुरवे नमः २ अतः परं स्वस्वगच्छीयाः स्वस्व
संघाटकीयागुर्वावलीवाच्या तस्या अग्रे अ ष्टिलिष्ठिकदवकस्थतिलकातिशाषसूर्या १
वलणथः काव्यवाच्य ३ वेदामिसहृबाक्रुपा ईणं चरमसयलसुयनाणि सुत्तस्स कारगमि
सिं दसाणकप्पं अववहारं ४ अर्हं तत्तगवंत उ त्पन्नदिव्यविमलाकेवलज्ञान श्रीमन्महावीरस्वा
मी पंचमगतिगामी तदुपदिष्टविधिः श्रीपर्युषणापर्व तेहतणा समागमनिगामिश्गामिट नगरि २ श्री
कल्पसिद्धांतवंचायइ यथासमाधि अत्र श्रीकल्पसूत्रे अधिकारत्रयं वाच्यं वर्त्तते तथाहि जिना
नां चरितानि १ स्थविरावली २ श्रीपर्युषणापर्वसामाचारी च ३ तत्रापि श्रीमहावीरदेवो वर्द्धमान
तीर्थस्य स्वामी उतः आसन्नोपकारी ततः श्रीभद्रबाहुस्वामिनः पूर्वं श्रीमहावीरदेवस्य चरितं कथ २
यंति तत्रापि पूर्वं साधूनां दसप्रकारः कल्पः कथ्यते तथाहि श्रीआदिनाथ श्रीमहावीरसाधूनां व

स्त्रं मानप्रमाणसहितं जीर्णप्रायं धवलं च कल्पते श्रीअजितादि २२ तीर्थंकरसाधूनां तु पंचवर्णं १ श्रीआ
दिनाथ श्रीमहावीरसाधूनां एकस्यापि साधोर्निमित्तं कृतं आधाकर्मादि तत्सर्वेषां साधूनां न कल्प
ते अथ च अजितादि २२ तीर्थंकरसाधूनामेवं यस्यैव साधोर्निमित्तं आधाकर्मादि कृतं तत्तस्यैव सा
धोर्न कल्पते अन्येषां साधूनां कल्पते एव २ सय्यातर उपाश्रयदाता तस्य पिंडः चतुर्विंशतितीर्थंकर
साधूनामपि न कल्पते तत्रापि अयं विशेषो यथा शय्यातरगृहे साधुभिर्द्वादशप्रकारः पिंडो न ग्राह्यः द्वाद
शभेदा यथा अशन १ पान २ खादिम ३ स्वादिम ४ वस्त्र ५ पात्र ६ कंबल ७ रजोहरण ८ सूची ९ पि
प्पलक १० नखरदन ११ कर्णशोधन १२ तृ पाः एते अकल्प्याः तृण १ तस्म २ डगल ३ मल्लक
४ पीठ ५ फलक ६ शय्या ७ संस्तारक ८ ले पादि ९ वस्तूनां सोपधिकशिष्यस्य च ग्रहणं
कल्पते यतो बाहुपरिसोग्यं न तेषां तत्र व ता आज्ञादत्तास्ति शय्यातरगृहं च ऽहं न भवति य ×न्न+६
स्य गृहे साधवो रात्रौ चतुरः प्रहरान् तिष्ठति जा ग्रति च पर्यंते प्राभातिकं आवश्यकं प्रतिक्रमणं अन्य
+न्न+ आसन्नं कस्यचित् गृहे कुर्वंति तदा यस्य गृहे रात्रौ स्थिता स्तस्य गृहं शय्यातरं न भवति किंतु यत्र प्रतिक्र
मणं कृतं तत् शय्यातरगृहं स्यात् अथ च एकस्य गृहे सुप्तं अन्यस्य गृहे प्रतिक्रमणं कृतं तदा द्वावपि श
य्यातरगृहे भवतः ३ राजा भद्रं अधस्तस्य पिंडः श्रीआदिनाथ श्रीमहावीरसाधूनां न कल्पते अजितादि २
२ तीर्थंकरसाधूनां तु कल्पते ४ २४ तीर्थंकराणामपि लघुसाधुना वृद्धसाधूवंदनकानि देयानि ५ ×वंदनीयो+२
श्रीआदिनाथ श्रीमहावीरसाधूनां पंचमहाव्रतानि भवंति अजितादि २२ तीर्थंकरसाधूनां तु चत्वारि

महाव्रतानि ६ सर्वेषां तीर्थंकराणां [illegible] डेर्दे [illegible] सर्वदीक्षितस्य अपि साधोः अथ दीक्षि
तोपि साधुः ईदृशीयः पतितस्य सप्तदि[illegible] आए॥ ३ [illegible] श्री आदिनाथश्रीमहावीरसाधूनां ज्येष्ठत्वं उप
स्थापनापर्यायेण वृद्धदीक्षापर्यायः २२ तीर्थंकरसाधूनां तु मूलदीक्षया ज्येष्ठत्वं ७ श्री आदिनाथश्रीमहा
वीरसाधुभिर्नित्यमेव उभयकालं प्रतिक्रमणं कर्त्तव्यं २२ तीर्थंकरसाधुभिस्तु अतिचारकारणे जा
ते प्रतिक्रमणं नो जाते न क्रियते ८ श्री आदिनाथश्रीमहावीरसाधुभिः शेषकाले अष्ट मासान् मासकल्पः
क्रियते २२ तीर्थंकरसाधुभिस्तु न मासकल्पः क्रियते ९ श्री आदिनाथश्रीमहावीरसाधूनां व
र्षाया आसाढचतुर्मासके [illegible] उत्कृष्टचतुर्मा सकस्थितिरूपः पर्युषणाकल्पः जघन्यतः कार्त्ति
क आसाढचतुर्मासाद् [illegible] आगम्य सप्ततिः ७० दिनस्थितिरूपो द्वेधापि कर्त्तव्य एव
तत्राप्ययं विशेषः यद्यकदाचित् अशिवं स्यात् १ भिक्षा वा न लभ्यते २ राजा वा दुष्टो न
भवति ३ ज्ञानवृद्धिर्वा न जायते ४ तदा सप्ततिदिनस्थो र्वाग् अपि अन्यत्र गमने कारणे नास्ति दोषः अथ च क
दाचित् चतुर्मासस्य उपरि वर्षा न विरमति १ मार्गो वा कर्दमपानीयाकुलो भवति २ विरुद्धं वा प्रवृत्तं स्यात् ३ तदा अ
धिकमपि तिष्ठतां न दोषः २२ तीर्थंकरसाधूनां तु सप्ततिदिन [illegible] स्थितिरूपा नियमा नास्ति वर्षायां अना
वृष्टिकाले वर्तन्ते विहारं कुर्वन्ति १० मध्यम २२ तीर्थंकरसाधूनां कल्पास्तथा महाविदेहसाधूनामपि
कल्पाः स्युः मध्यम २२ तीर्थंकराणां महाविदेहसाधूनां [illegible] अचेलत्वं १ औद्देसिककर्म २ प्रतिक्रमणं ३ २
राजपिंडः ४ मासकल्पः ५ पर्युषणाकल्पश्च ६ एतत् षट् कल्पा अस्थितिरूपा ज्ञातव्याः शय्यातरपिंडः

१ चतुर्महाव्रतरूपो धर्मः २ पुरुषज्येष्ठो धर्मः ३ वंदनकदानं च ४ एते ४ कल्पास्तु स्थितिरूपाः इति १० कल्पा
: एषः कल्पः अनेन पालितः सन् तृतीयौषधसदृशो ज्ञातव्यः तथाहि एकस्यापि राज्ञ एकः पुत्रो अतिवल्लभो
भूत् तेन राज्ञा विचारितं यदि पुत्रस्य अनागते रोगो भविष्यति किं तस्य कार्यं इति तदा पुत्रश्चिरंजीवी भवति तस्मिन् प्रस्ता
वे त्रयो वैद्या राज्ञा आकारिताः पृष्टाश्च तदा त्रयाणां मध्ये एकः प्राह मम औषधं व्याधिसद्भावे व्याधिं गमयति
व्याधिर्न स्यात् तदा नवं व्याधिं उत्पादयति करोति तदा राज्ञा प्रोक्तं अनेन औषधेन सुप्तसिंहोत्थापनकल्पेन अलं १
द्वितीयो वैद्यः प्राह ममौषधं यदि व्याधिः स्यात् तदा तं व्याधिं गमयति न स्यात् तदा दोषं न करोति राज्ञा वि
चारितं अनेनापि औषधेन भस्मनि हुतकल्पेन अलं २ तृतीयो वैद्यः प्राह ममौषधं यदि व्याधिर्भ
वेत् तदा तं व्याधिं गमयति न [illegible]वेत् तदापि सो रूपबुद्धिपुष्टिदीप्तिपराक्रमादीन् अतिकान्
गुणान् करोति राज्ञा प्रोक्तं [illegible]दं औषधं श्रेष्ठं इति सर्वं ततः पुत्रस्य कारितं एवमयं कल्पोपि तृती
योषधसदृशो यदि कर्मरूपव्याधिर्भवेत् तदा तं गमयति न भवेत् तदा कर्मव्याधिं आगच्छंतं निवारयति॥
सौख्यं संपत्तिं च करोति ३ इति प्रथमोपि अयं कल्पः श्री आदिनाथसाधूनां ऋजुजडत्वात् दुर्विशोध्यो
भवति यथा केचित् श्री आदिनाथतीर्थंकरवारके साधवः स्थंडिले गता गुरुसमीपे चिरात् समागताः
गुरुणा पृष्टाः किं चिराद् आगताः ऋजुजडत्वात् ते प्राहुः नटं नृत्यंतं प्रेक्षमाणा वयं स्थिताः तदा गुरुभिः प्रो
क्तं नायमाचारः साधूनां अतःपरं नटनृत्यं न विलोकनीयं इति शिक्षा तदैव पुनरन्यदा ते एव साधवस्त
थैव दृष्टाः किं चिराद् आगतास्ते ऋजुजडत्वात् प्रोचुः नटीं नृत्यंतीं पश्यन्तो वयं स्थितास्तदा गुरुणा निर्भर्त्सितास्ते

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चूर्यंतं कृत्वा नष्टानीय यदि न दत्तास्तं साधवः तदा हन्तं तदा नर्त्तकी नाटकं ... [illegible] निषिद्धमेव १ अथ द्वि
तीयः कोंकणदेशीयसाधुदृष्टांत स्तथाहि एकः कश्चित् कोंकणदेशनामा प्रसिद्धः कोंकणो वणिकपुत्रादि
कुटुंबं त्यक्त्वा वैराग्याद्दीक्षां स्थविरसमीपे गृहीत्वा दीक्षां ... एकदा स्थंडिलादागत्य ईर्यापथिकीकायोत्सर्गे
चिरं तस्थौ गुरुणा पृष्टं भो कोंकणसाधो किं ... ध्यातं कायोत्सर्गे तदा कोंकणसाधुः कथयति २
स्माद् देशे स्वामिन् मया अधुना जीवदया ध्याता गुरुणा प्रोक्तं कथं साधुः प्राह यदा वयं गृहे अवसाम तदा व
र्षाकाले सर्वत्र क्षेत्रे ... निरूपितं अकरिष्याम ... नदीव अपमोचयाम ... अरवट्टयाम निदान अग्नि
ज्वालाम तेन ... अस्माकं क्षेत्रे अभवत् सां ... [illegible] ... शाद्वलानि ...
निष्पन्नाः संतः ... [illegible] ... इति तदा सुखिनो भवंति अन्यथा
बराकाः क्षुधया मरिष्यंति इति जीवदया चिंति ... ता तातो गुरुः ... साधुरयं ... तिष्ठति
जीवसंहारं विना क्षेत्रकार्यं न स्यात् ... मिथ्यादुःकृ ... तं ददाति तेन ... इति द्वितीयो दृष्टांतः
२ श्रीमहावीरतीर्थंकरवारकस्य साधवो वक्रजडा भवंति तेषां कल्याणकं ... अत्रापि
सप्तनटनर्त्तकीदृष्टांत स्तथाहि केचित् किल चरमजिनसाधवः ... गुरुणा पृष्टाः कुत्र यूयं नटनटवी
क्ष्यमाणाः स्थिताः ततो गुरुणा निषिद्धाः पुनः अन्यदा नर्त्तकीं वीक्ष्यमाणाः स्थिताः चिरादागता गुरुणा पृष्टाः व
क्रतया उत्तरांतराणि ददुः निर्बन्धे च नर्त्तकी ... ३
त्यस्मात् सिद्धो न तथा सीदिति द्वितीयः श्रेष्ठिपुत्रदृष्टांतः २ अजितादितीर्थंकरवारकस्य मध्यस्थ

करमेव दृष्टांत स्तु नटनृत्यावलोकेन कस्याश्चिद्विवक्षया केचित् अजितनाथादिवारकस्य साधवो नटन २
र्त्तकं दृष्ट्वा चिरादागता गुरुणा पृष्टाः ऋजुत्वात् ऊचुः ... अस्माभिर्दृष्टस्तेन वेला लग्ना गुरु
णा प्रोक्तं अतः परं नटनृत्यं न विलोकनीयं रागहेतुत्वात् पुनरेकदा तैरेव साधुभिर्नर्त्तकीनृत्यं ती
ष्टापरं न तत्र विलोकनार्थं स्थिताः यतः प्राज्ञत्वाद्विचारितं गुरुभिर्नटनृत्यमपि निवारितं ततो नर्त्तकी
नृत्यं विशेषतो निषिद्धमेव तस्य विशेषतो रागहेतुत्वात् ... इति अथ च साधवश्च
तुर्मासावासमिति ... यत्र क्षेत्रे ... गुणा विलोक्यंते ते चामी यत्र
क्षेत्रे न ... भवति १ पुनर्यत्र न प्र ... प्राणा भवंति २ पुनर्यत्र स्थं
डिलस्थानं ... भवति ३ पुनर्यत्र वसतिः स्त्रीपशुपंडकादिरहितास्
वति ४ पुनर्यत्र गोरसप्रचुरो भवति ५ पुनर्यत्र ... भवति ... पतीव सद्भकः स्यात्
६ पुनर्यत्र वैद्यास्सद्भकाः भवंति ७ पुनर्यत्र सा ... निमित्तं ति ८ पुनर्यत्र कौटुंबिका
नां गृहाणि धनधान्यादिभिर्निभृतानि ... भवंति ९ पुनर्यत्र राजा अतीव सद्भको यति
... भवेत् १० पुनर्यत्र ब्राह्मणतापससरजस्कभिक्षुकाः साधूनां ... न कुर्वंति ११ पुनर्य
त्र क्षेत्रे भिक्षा सुलभा भवति १२ पुनर्यत्र स्वाध्यायः सुकरो भवति तथाविध त्रसजीवसद्भावात् १३ इ
ति अथ कदाचित् एते त्रयोदश गुणाः कथंचित् न भवंति तथापि ... गुणचतुष्टयं विलोक्य
नीय तद्भेदं महती विहार भूमिः १ पुनः शुद्धा स्थंडिलभूमिः २ पुनः ... सुलभा भिक्षा ३ पुनः स्वा

ध्यायः श्रुकर ४ इति द्वयोर्दोघनोत्कृष्टगुणयोर्मध्यवर्त्तिनो मध्यमगुणाः इति अथ च साधवो यत्र चतुर्मा
सीं तिष्ठंति तत्र अस्मिन् पर्वणि आगते सति मंगलार्थं इदं कल्पसूत्रमवश्यं वाचयंति तत्तादृक्माहात्म्यमपि वा
च्यते अथ तस्य महिमा कथ्यते ॥ मंत्रमांहि जिम परमेष्ठिमंत्र मोटउ १ तीर्थमांहि जिम शत्रुंजय २
दानमांहि जिम अभयदान ३ गुणमांहि जिम विनयगुण ४ व्रतमांहि जिम ब्रह्मचर्यव्रत ५ नियममांहि
जिम संतोष ६ तपमांहि जिम उपशम ७ दर्शनमांहि जिम जिनदर्शन ८ वलीक्षीरमांहि जिम गोक्षीर
९ जलमांहि जिम गंगानीर १० पट्टमांहि जिमद १२११ वस्त्रमांहि जिम चीर १२ अलंकारमांहि जि
म चूडामणि १३ ज्योतिषीमांहि जिम निशाम णि १४ तुरंगममांहि जिम पंचवल्लभकिशोर १
५ नृत्यकलावंतमांहि जिम मोर १६ गजम ांहि जिम ऐरावण १७ दैत्यमांहि जिम राव
ण १८ वनमांहि जिम नंदनवन १९ काष्ठमांहि जिम चंदन २० तेजवंतमांहि जिम आदित्य २
१ साहसीकमांहि जिम श्रीविक्रमादित्य २२ न्याय वंतमांहि जिम श्रीराम २३ रूपवंतमांहि जिम
काम २४ सतीमांहि जिम सीता २५ शास्त्रमांहि जिम गीता २६ वाजित्रमांहि जिम भंभा २७ स्त्रीमांहि
जिम रंभा २८ सुगंधमांहि जिम कस्तूरी २९ वृक्षमांहि जिम कल्पतरु ३० पुण्यश्लोकमांहि जिम नल
३१ पुष्पमांहि जिम सहस्रदलकमल ३२ धनुर्धरमांहि जिम अर्जुन ३३ इंद्रियांमांहि जिम नयन ३४
धातुमांहि जिम सुवर्ण ३५ दातारमांहि जिम कर्ण ३६ गाइमांहि जिम कामधेनु ३७ स्नेहमांहि जिम घृ
त ३८ रसमांहि जिम अमृत ३९ तिम लोकीकलोकोत्तर सकलपर्वमांहि तिम पर्युषणापर्व मोटउ। ४

जाणिवउं ॥ अनर्थघातात् भाद्रपदसुदिपंचमीपर्व श्रीजिनशासने मान्यं वर्त्तते तथा परशासने पि ऋषिपंचमीपर्वेति
मान्यं तत्संबंधी यथा ॥ उष्ठवत्यां नगर्यां एको विप्रोऽभूत् तस्य पितरौ मृतौ कालमरणेन तत्र गृहे पिता बलीवर्दो
जातः माता च शुनी बभूव अथ च तस्य पितुः श्राद्धदिनं समागतं तस्मिन् दिने बलीवर्दः पुत्रेण क्षेत्रे यो
जितः तिलिकस्य दत्तः पुत्रेण दुग्धमानाय्य क्षैरेयी राद्धिता पितृश्राद्धकरणाय ब्राह्मणभोजनार्थं अस्मिन्
प्रस्तावे गृहस्थपत्न्या मार्जारीवेन कथंचित् ज्ञानविप्रोषात् सर्पगरलं क्षैरेय्यां मध्ये पतत् दृष्टं ज्ञातं च मात्रा शुन
योक्ताविति श्रुत्वा स्वपुत्रस्य च अयं कृतं ब्राह्मणा च राघात् शुन्याः क्षैरेयी स्पृष्टा सा शुनी गमागि स्थाने
बद्धा क्षैरेयी नवा राद्धा ब्राह्मणा भोजिताः संध्यायां स बलीवर्दः सर्वदिने वाहितः क्षुधातुरः
तृषव्यापी हि ता गमागि स्थाने बद्धस्तैलिकेन ततः शुनी दुःखितां दृष्ट्वा बलीवर्देन प्रोक्तं
एपि हन मम पुत्रेण अद्य ... दत्तं पीडितोस्मि तदा सापि स्वकष्टं जगाद ... तेन सुतेन
पार्श्वे सुतेन द्वयोः परिवचनं श्रुतं तदा ज्ञातं अहो मम मदीयौ पितरौ ततस्तादेव ... क्षीरान्नं दत्तं
ततस्तयोर्मातृपित्रोर्गतिं पृष्टवान् विदेशे गत्वा ऋषयः पृष्टास्तैः प्रोक्तं अस्य अप्रस्तावकाम ... तेन बली
वर्दे शुन्यो जातो अथ च आरवदिता ... ऋषिपंचम्यां पुण्यं यथा तयोर्गतिः स्यात् तेन तथा कृतं ततो दनंतरं
लोके ऋषिपंचमीनाम महापर्व प्रवृत्तं अथास्मिन् श्रीपर्युषणापर्वणि साधूनां धर्मकृत्यानि संवत्सरप्रति
क्रांतिः १ लोचकरणं २ अष्टमतपःकरणं ३ सर्वचैत्येषु अर्हद्भक्तिः ४ संघस्य परस्परं क्षामणाकर
णं ५ अमीषां पंचानां कारणानां कृते तीर्थकृद्गणधरैः श्रीपर्युषणापर्व प्रवर्तितं ॥ पुनरस्मिन् श्री

इतरजर्वतीपतिता

पर्युषणापर्वणि श्रावकाणां अष्टादिधर्मकृत्यानि अत्र ज्ञानस्वशक्तिः क्रियते १ अष्टमादितपो यथाशक्ति क
र्तव्यं २ नगरे सर्वत्र अमारिघोषणा दापयितव्या ३ सुपात्रे दानं दातव्यं ४ ... लिकेरादिभिः प्रभावना
कर्तव्या ५ श्रीवीतरागदेवस्य प्रतिमा पूजनीया ६ श्रीसंघस्य भक्तिः कर्तव्या ७ सचित्तपरिहारः कार्यः ८
कायोत्सर्गः कर्मक्षयार्थं कर्तव्यः ९ ब्रह्मचर्यं पालयितव्यं १० आरंभो वर्जनीयः ११ निजवित्तानुसारे
ण द्रव्यव्ययः कार्यः १२ महोत्सवः कर्तव्यः १३ कल्पपुस्तकं ... श्रमणदानपूर्वं गृहे समानीय रात्रिजा
गरणं कृत्वा प्रातर्नागरिकजनानां कार्यकारमी ... गजस्कंध
कुमारकरस्थं विधाय गीतगानतालमानपूर्वं गुरूणां हस्ते दत्त्वा वाचना कारयितव्या १४ वाच
नायां च साधुभ्यो दानं दातव्यं १५ अनेन विधिना अयं कल्पः सर्वैः श्रावकैः आराधितः सन्
अष्टभवानां मध्ये मोक्षदाता भवति पुनरयं कल्पः पापस्य क्षयकरः मनोवांछितपूरणे कल्पवृक्ष
समानः ये सम्यक् वाचनं कल्पं तावत् पूर्वकाः ... अष्टमं तपः कृत्वा विधिना वाचयं
ति श्रीचवंदनपूर्वं प्रमादनिद्रादिविकथापरिहारेण विधिना शृण्वंति ते द्वादशकल्पपुस्तकं विधिना तत्सुखानि भु
क्त्वा मुक्तिस्त्रीसुखं लभंते पुनरपि श्रीजीवाभिगमे प्रोक्तमस्ति चातुर्मासिकत्रये अस्मिन् श्रीपर्युषणापर्व
णि च सुरेंद्रा अपि संभूय नंदीश्वरादिषु अष्टाह्निको त्सवं कुर्वंति पुनरपि यतीनां ब्रह्मचर्येण तपसा कृतकर्द
मेन तीर्थयात्रया च कर्मक्षयो भवति सकलसुखप्राप्तिश्च भवति पुनरपि अस्मिन् श्रीपर्युषणापर्वणि
समागते नागकेतुवदष्टमं तपः कार्यं नागकेतुसंबंधो यथा चंद्रकांता नामनगरी विजयसेनो राजा श्री

कांतः श्रेष्ठी श्रीसखी तस्य भार्या तयोः पुत्रो जातः एकदा कुटुंबेन प्रोक्तं श्रीपर्युषणापर्व समागतं वयं अष्टमं
तपः करिष्यामः इति वचनं श्रुत्वा तस्य पुत्रस्य जातिस्मरणं ज्ञानं उत्पन्नं तेन बालेनापि अष्टमं तपः कृतं स्त
न्यं न पिबति मात्रादिभिर्बहवः उपचाराः कृताः परं तथापि न पिबति ततो मूर्छया बालो निश्चेष्टो जातो मृत इ
ति ज्ञात्वा पिता दुःखात् हृदयस्फोटनेन मृतः तत्स्वजनैर्बालो भूमौ निक्षिप्तः राज्ञा श्रुतं श्रेष्ठी अपुत्रो
मृतस्तस्य लक्ष्मीर्ग्राह्या ... तस्मिन्नवसरे धरणेंद्रो दिव्यज्ञानेन विज्ञाय तत्रागत्य
अष्टमतपो नेन अपर्याप्तपुत्रेणेति ... राजसुभटान् ... निवारयति स्म तातो
धरणेंद्रो ... द्विजरूपं कृत्वा ... राज्ञः पूर्वभवसंबंधं प्राह तथाहि अस्य बालस्य
पूर्वभवे बाल्यावस्थायां माता मृता विमाता अपमा
नितः स च नित्यं दुःखितः स्थित इति स्वमित्र
स्य श्राद्धस्य वचनेन सर्वदुःखापहारि तपः कुर्व इति एकदा श्रीपर्युषणापर्वणि समागते स्वमित्रश्रा
द्धवचनेन अष्टमं तपः कृत्वा एकस्मिन् तृणगृहे सुप्तः स्थितः आसन्नप्रदीपेन लग्नं तदा विमात्रा तन्मारणा
य तस्मिन् गृहे अग्निः क्षिप्तस्ततः स तापाध्याने कायं विमुच्य अविज्ञातशुभेन अत्र तस्य श्रेष्ठिनो
गृहे पुत्रो जातः ततः पूर्वभवसंस्कारात् पर्युषणापर्वदिनं श्रुत्वा जातिस्मरणेन अष्टमं कृतवान् स्तन्यमपि
अपिबन् मूर्छया मृत इति ज्ञात्वा स्वजनैर्भूमौ निक्षिप्तोऽयं अष्टमतपो नेन जीवित इति ततो धरणेंद्रो बालस्य
हारं दत्त्वा स्वस्थानं गतः राजा इति विस्मयकारिणीं बालकथां श्रुत्वा बालस्य मातुः कथयति स्म अयं बा
लो सम्यक् रीत्या रक्षणीय इति तदादितः स्वजनैर्बालकस्य नागकेतुरिति नाम दत्तं अथ स बालो वर्धमानश्च

…आषाढादिचतुर्मासिक त्रये॥ ॥८ ॥७

ङ्कः पर्व्वणि चतुर्थं चतुर्मासके षष्ठं पर्युषणायां अष्टमं कुर्वन् सामायिकपौषधदेवपूजादिधर्मं कुर्वन् तत्परः सन् यौ
वनेपि जितेंद्रियो बभूव अन्यदा राज्ञा एकश्चौरो व्यापादितः स मृत्वा व्यंतरो जातस्तेन व्यंतरेण अदृश्यीभूतेन
पादेनाहत्य सिंहासनात् राजा भुवि पातितः लोकश्च सर्वोपि व्याकुलीभूतः पुनरपि व्यंतरेण नगरोपरि महती शि
लां विकुर्व्य दुर्वचनैस्तल्लोकान् त्रासयामास ततो नागकेतुः श्रावकश्चतुर्विधसंघभक्तिनः प्रासादप्रतिमारक्षार्थं उ
च्चैः प्रासादोपरि चटित्वा तां पतंतीं महतीं शिलां करेण धृतवान् तस्य तेजसा तत्तपसा व्यंतरः शिलां संहृत्य
नागकेतुं नत्वा राजानं समाधिमंतं कृत्वा स्वस्थानं ग तः ततो नागकेतुः श्रावको राजादीनां विशेषमान्यो
जातः अन्यदा नागकेतुर्जिनप्रतिमापूजां कुर्व न् पुष्पमध्यस्थेन सर्पेण दष्टः शुभध्यानेन केव
लज्ञानं प्राप्तवान् शासनदेव्या च साधुवेषो द त्तः ततश्चिरकालं स केवली विहृत्य प्रतिबोध्य मोक्षं
गतः इति अष्टमतपसि नागकेतुकथा ६: त थानाचंद्रं श्रीजिनशासनं अर्वाचीनं वेदे पुराणे स्मृ
तौ च सर्वत्र तस्य अधिकारदर्शनात् तत्र याजुष्मन् लमंत्रा यथा सामवेदे ऋग्वेदे धनिनास्वस्ति नस्ताक्ष्योसेन
चवक्रमः ॐ त्रैलोक्यप्रतिष्ठितान् चतुर्विंशतितीर्थंकरान् ऋषभादीन् वर्द्धमानांतान् सिद्धान् शरणं प्रपद्यामहे
अथर्वणवेदे ॐ पवित्रमग्निमुपस्पृशामहे येषां जातं सुजातं येषां धीरं सुधीरं येषां नग्नं सुनग्नं ब्रह्म सुब्र
ह्मचारिणा उदितेन मनसा अनुदितेन मनसा देवस्य महर्षयो महर्षिभिर्जुहोति याजकस्य यजंतस्य च सा
एषा रक्षा भवतु शांतिर्भवतु तुष्टिर्भवतु वृद्धिर्भवतु स्वस्तिर्भवतु श्रद्धा भवतु निर्व्याजं भवतु ब्रह्मांडपुरा ६
णे प्रोक्तं नाभिस्तु जनयेत् पुत्रं मरुदेव्यां महाद्युतिं ऋषभं क्षत्रियज्येष्ठं सर्वक्षत्रस्य पूर्वकं १ ऋषभाद्भ

रतो जज्ञे वीरः पुत्रशताग्रजः अभिषिच्य भरतं राज्ये महाप्रव्रज्यामाश्रितः २ पुनर्ब्रह्मांडपुराणे इह हि इक्ष्वाकु
कुलवंशोद्भवेन नाभिसुतेन मरुदेव्यानंदनेन महादेवेन ऋषभेण दशप्रकारो धर्मः स्वयमेवाचीर्णः केवल
ज्ञानलाभाच्च प्रवर्त्तित इति तथा आरण्यकपुराणेपि यथा ऋषभदेव भगवान् ब्रह्मा तेन भगवता ब्रह्मणा स्वयमा
चीर्णानि ब्रह्माणि तपसा च प्राप्तः परं पदं पुनः प्रभासपुराणेपि यथा युगारम्भमहादेवः इन्द्रपते द्वारिकापुरी
अवतीर्णो हरिर्यत्र प्रभासशशिभूषणं १ रैवताद्रौ जिनो नेमिर्युगादिर्विमलाचले ऋषीणामाश्रमादेव मुक्ति
मार्गस्य कारणं २ तथा पुनरपि स्कंधपुराणे १८ स हस्रसंख्यनगरपुराणे अतिप्रसिद्धहद्दनगरस्थापना
दिवक्तव्यताधिकारे सर्वत्र तारंगस्य पट्टसद स्तैः श्रीऋषभचरित्रं समस्तमस्ति तथा तत्रैव सदाव
तारंगस्य स्पष्टाशत्रुंजयतीर्थं महारैवत काचलं स्नात्वा गजपदे कुंडे पुनर्जन्म न विद्य
ते १ इत्यादि बहुप्रस्थाने श्रीजिनशासनं। वर्णितमस्ति तथा अयं श्रीकल्पः पूर्वं भाद्रवासुदि
पंचम्यां रात्रौ वाच्यमानोभूत् एकः पार्श्वस्थो रात्रौ प्रतिक्रमणानंतरं श्रीकल्पसूत्रं पावता वाचयति अ
न्ये सर्वेपि साधवः कायोत्सर्गं कृत्वा शृण्वंति अयं विधिः पूर्वमासीत् स तु व्यवच्छिन्नः तदनंतरं श्रीवीरात् सं
९८० वर्षे श्रीआनंदपुरे सांप्रतं नाम्ना वडनगरे ध्रुवसेनो राजाभूत् तस्य पुत्रः सेनांगजो राज्ञो अतीववल्ल
भः स च दिवात्पर्युषणागमे मृतो राजा तीव्रशोकाक्रांतो जातः धर्मशालायां नागच्छति तस्य अनागमने यथा रा
जा तथा प्रजा इति हेतोः अन्येपि श्रेष्ठिव्यवहारिणो लोका नागच्छंति ततश्च धर्महानिं जायमानां दृष्ट्वा गुरुभि
र्ध्रुवसेनराज्ञः समीपे गत्वा प्रोक्तं हे राजन् त्वयि शोके क्रियमाणे सर्वं नगरं सदेशं शोकातुरं जातं शरीरं अनित्यं वि

नवोपि अत्राश्रुतः आयुश्च चंचलं असारः संसारोस्ति न त्वादृशां ज्ञातजिनधर्माणां अधिकशोककरणं युक्तं
अथ च त्वत्तां तानाः प्रदीयत अश्रुतं श्रुतं श्रावयामः श्रीभद्रबाहुस्वामिपादैर्नवमपूर्वाद् दृष्टमध्ययनं कल्प
सूत्रनामकं उद्धृतमस्ति तच्च मंगलभूतं महाकर्मक्षयकारकं विशेषशास्त्रं वर्त्तते यदि धर्मशालायामागम्य
ते तदा वाच्यते राज्ञा च अंगीकृतं ततो राज्ञादि सभासमक्षं नवभिर्वाचनाभिः सप्ताव नाभिर्वाचितं ततः प्रभृति लोक
समक्षं कल्पसूत्रवाचनप्रवृत्तिर्जाता ततो गुरुपरंपरया अस्माभिरपि तथैव सभायां वाच्यते तथा इदं श्रीकल्पसू
त्रं अनंतार्थविषयं यतः सर्वनदीनां यदि वालुकाक णः सर्वसमुद्राणां च यदि पानीयं भवेत् तस्मादपि एकस्य
सूत्रस्य अर्थोऽनंतगुणः स्यात् मया मंदमतिना क थं व्याख्यातुं शक्यते तथापि यथाक्रममपि अर्थलव
लेशं कथयन्नस्मि तन्माहात्म्यं नास्ति किं तु गुरोरेव तत्र दृष्टांता यथा पंगुः सूर्यमंडलं
स्पृशति तत्सारथ्यमाहात्म्यमरुणस्य १ दर्दुरः स र्पमस्तके भवति तद्गारुडिमंत्रमाहात्म्यं न दर्दुरस्य
२ चैत्रमासे कोकिला मधुरं कूजति तन्माहात्म्यं। आम्रमंजर्या न तु कोकिलायाः ३ अथ मंगलार्थं
पंचपरमेष्ठिनमस्कारो लिख्यते॥ ॥नमो अरिहंताणं नमो सिद्धाणं नमो आयरियाणं नमो उवज्झायाणं न
मो लोए सव्वसाहूणं एसो पंचनमुक्कारो सव्वपावप्पणासणो मंगलाणं च सव्वेसिं पढमं हवइ मंगलं १ तेणं
कालेणं तेणं समएणं समणे भगवं महावीरे पंचहत्थुत्तरे होत्था तंजहा हत्थुत्तराहिं चुए चइत्ता गब्भं वक्कंते
१ हत्थुत्तराहिं गब्भाओ गब्भं साहरिए २ हत्थुत्तराहिं जाए ३ हत्थुत्तराहिं मुंडे भवित्ता अगाराओ अणगारियं पव्व ७
इए ४ हत्थुत्तराहिं अणंते अणुत्तरे निव्वाघाए निरावरणे कसिणे पडिपुण्णे केवलवरनाणदंसणे समुप्पन्ने

५ साइणा परिनिव्वुए भयवं॥ व्याख्यालेशो यथा नमोऽर्हद्भ्यः चतुःषष्टीन्द्रकृतां पूजां अर्हंतीति अर्हंतस्ते
भ्यो मम नमो नमस्कारोस्तु १ नमो सि० अष्टकर्माणि क्षपयित्वा सिद्धिं प्राप्तास्तेभ्यो मम नमस्कारोस्तु २ न
मो आ० आचारेषु पंचसु ज्ञान १ दर्शन २ चारित्र ३ तपो ४ वीर्य ५ रूपेषु साधवस्ते आचार्यास्तेभ्यो मम नमस्का
रोस्तु ३ नमो उ० द्वादशांगानि सूत्रतो ये पाठयंति उपाध्यायास्तेभ्यो मम नमस्कारोस्तु ४ नमो लोए० ज्ञानदर्श
नचारित्रैः कृत्वा मोक्षमार्गं ये साधयंति ते साधवः सर्वशब्देन ये जिनकल्पिकस्थविरकल्पिकादयः सार्द्धद्वी ॥कल्पदीपि ५
पद्वीपे वर्त्तिनस्तेभ्यः सर्वेभ्यो मम नमस्कारोस्तु ५ अ थ नमस्कारस्य फलमाह एसो पं० एषः पंचपरमेष्ठिन
मस्कारः सव्वपा० सर्वपापप्रणाशनः मंगला० सार्वेषां मंगलानां प्रथमं मुख्यं भवति मंगलं अत्र न
मस्कारे अष्टषष्टिरक्षराणि एकषष्टिर्लघ्वक्ष राणि सप्तगुर्वक्षराणि नवपदानि अष्टौ संप
दः पुनः फलं नमस्कारस्य एकाक्षरं गुणितं सप्त सागरोपमपापानि गमयति संपूर्णो नमस्कारः
पंचशतसागरोपमपापानि गमयति कथं अष्टस ष्टिसत्कानां ४७६ सप्तगुर्वक्षराणां ४८ नवनवपदानां
४०२ अष्टसंपदां जातानि ५०० सागरोपमाणि तेणं कालेणं० ते इति प्राकृतत्वात् तस्मिन् काले अवस
र्पिण्याश्चतुर्थारकलक्षणे तस्मिन् समये तद्विशेषे यस्मिन् समये भगवान् श्रीमहावीरदेवो देवानंदायाः
कुक्षौ दशमदेवलोकतः पुष्पोत्तरविमानात् च्युत्वा अवतीर्णः णं शब्दो वाक्यालंकारे यद्वा सप्तम्यर्थे तृ
तीया यो वा कालसमयोः कथनादिभिः श्रीवीरस्य च्यवनादीनां कल्याणकानां विवेकः स्थितो श्रम
णस्तपस्वी भगवान् समग्रैश्वर्ययुक्तं महावीरः कर्मशत्रुजयात् सार्थकनामा पंचहस्तोत्तरस्त उत्तरायाः

संता हस्तोत्तरा उत्तरफाल्गुन्यः हस्तादुत्तरदिशि वर्त्तमानाद्याताः पंचसु च्यवनादिकल्याणकेषु यस्य सः पंचह
स्तोत्तरः निर्वाणस्य तु स्वातौ संभूतत्वात् समासे हस्तोत्तराइति बहुवचनं बहुकल्याणकापेक्षं ज्ञेयाइति अभवत्
तद्यथा हस्तोत्तरायां उत्तरफाल्गुन्यां नक्षत्रे च्युतो देवलोकात् च्युत्वा च गर्भे व्युत्क्रांतः १ हस्तोत्तरायामेव एक
स्मात् गर्भात् अन्यस्मिन् गर्भे साहरिपत्ति संक्रामितः २ हस्तोत्तरायां जातः ३ हस्तोत्तरायां मुंडे भवित्ताऽगा
रावतञ्च मुंडितो भूत्वा अगारात् गृहवासात् निःक्रम्य इति गम्यं अनगारतां साधुतां प्रव्रजितः प्रकर्षेण गतः
४ हस्तोत्तरायां केवलवरनाणदंसणे समुप्पन्ने केवलं असहायं अतएव वरं ज्ञानं च दर्शनं चेति ततः
शाकपार्थिवादिः कर्मधारयः ज्ञानं विशेषावबो धरूपं दर्शनं सामान्यावबोधरूपं कीदृश ज्ञानद
र्शने अनंते अनंतार्थविषयत्वात् अनुत्तरे स र्वोत्तमत्वात् निर्व्याघाते कटकुड्याद्यप्रतिह
व तत्वात् निरावरणे क्षायिकत्वात् कृत्स्ने सकलार्थ ग्राहकत्वात् प्रतिपूर्णे सकलस्वांशसमन्वितत्वा
त् राकाचंद्रमंडलवत् ५ स्वातौ नक्षत्रे भगवान् परि निर्वृतो मोक्षं गतः॥ इति श्रीमहावीरदेवस्य
षट्कल्याणकानि संक्षेपेण प्रोक्तानि अथ भगवतो द्वितीयवाचनायां च्यवनकल्याणकं गर्भापहारक
ल्याणकं च व्याख्यास्यते तेवर्त्तमानयोग ततइयदिवसे आप एकमजीवदानद्यइ एकशीलपालइ एकत
पतपइ एकभावनाभावइ तेशासननायक श्रीमहावीरदेव श्रीसुधर्मस्वामि जंबूस्वामि तावह्रावदशारवाउ
क्रमश्रीवयरस्वामि ततः स्वगच्छगुरुपरंपरावाच्या यावद्वर्त्तमानगुरु तेहतणी आज्ञायइ श्रीसंघप्रवर्त्तइ व्या ८
ख्यातं कल्पसूत्रस्य प्रथमं प्राग्भस्फुटं त्रिषष्ठ्यार्थपावकाश्चक्रुः समयादिमसुंदराः १ इति श्रीकल्पसूत्रस्य

प्रथमं व्याख्यानं श्रीसमयसुंदरोपाध्यायविरचितं संपूर्णं॥ अथ द्वितीयं व्याख्यानं तत्र प्रथम व्याख्याने श्रीपंच
परमेष्ठिनमस्कारः श्रीमहावीरदेवस्य च संक्षेपवाचनया षट्कल्याणकानि व्याख्यातानि अथ द्वितीयवाच
नायां श्रीमहावीरदेवस्य च्यवनकल्याणकं गर्भापहारकल्याणकं च व्याख्यायते तत्र प्रथमं श्रीमहावीरदे
वजीवेन यस्मिन् भवे सम्यक्त्वं लब्धं ततआरभ्य स्थूलान् भवान् लोकप्रसिद्धान् सप्तविंशतिः २७ विशेषग्रंथानुसा
रेण अष्टाविंशतिः २८ कथ्यंते तथाहि पश्चिममहाविदेहे नयसारग्रामचिंतकोऽभूत् तेनमार्गभ्रष्टानां
साधूनां वने भुक्ताहारोदत्तस्तत्र सम्यक्त्वं लब्धं १ एको भवः १ ततः सौधर्मे देवो जातः इति द्वितीयो भव
: २ ततो मरीचिनामा ऋषभदेवपौत्रो भरतस्य पुत्रो जातः तत्र पूर्वं दीक्षां लात्वा ततो दीक्षां त्यक्त्वा १
त्रिदंडी भूत्वा मदनीचैर्गोत्रकर्म बद्धा कपि लाय उत्सूत्रप्ररूपणेन सागरोपमकोटाको १
टी भवभ्रमणमुपार्जितवान् इति तृतीयोभवः ३ ततः पंचमदेवलोके दससागरोपमायुर्देवो
जातः ४ इति चतुर्थोभवः ४ ततश्च्युत्वा कोल्ला कसन्निवेशे कौशिकनामा विप्रो जातः अशीतिपू
र्वलक्षायुः प्रांते त्रिदंडित्वमाश्रितः इति पंचमोभवः ५ ततो मृत्वा द्वितीये देवलोके ईशाने मध्यमायुर्देवो १
जातः इति षष्ठोभवः ६ ततश्च्युत्वा स्थूणाख्यसंनिवेशे पुष्यमित्रनामा विप्रो जातो द्वासप्ततिपूर्वलक्षायु :
प्रांते त्रिदंडित्वमाश्रितः इति सप्तमोभवः ७ ततः प्रथमे सौधर्मे देवलोके मध्यमायुर्देवो जातः इति अ
ष्टमोभवः ८ ततश्च्युत्वा चैत्यसंनिवेशे अग्निद्योतनामा विप्रो जातः चतुःषष्टिपूर्वलक्षायुः प्रांते त्रिदंडित्व
माश्रितः इति नवमोभवः ९ ततो द्वितीये ईशानदेवलोके मध्यमायुर्देवो जातः इति दशमोभवः १०

५६

ततश्च्युत्वा मंदिरसंनिवेशे अग्निभूतिनामा द्विजो जातः षट्पंचाशल्लक्षायुः प्रांते त्रिदंडित्वमाश्रितः इति
एकादशो भवः ११ ततः सनत्कुमारे तृतीये देवलोके मध्यमायुर्देवो जातः इति द्वादशो भवः १२ ततश्च्युत्वा श्वेतं
ब्यां नगर्यां भारद्वाजनामा द्विजो जातः चतुश्चत्वारिंशल्लक्षायुः प्रांते त्रिदंडित्वमाश्रितः इति त्रयोदशो भवः
१३ ततो माहेंद्रे चतुर्थे देवलोके मध्यमायुर्देवो जातः इति चतुर्दशो भवः १४ ततश्च्युत्वा संसारं भ्रांत्वा राजगृहन
गरे स्थावरनामा द्विजो जातः चतुस्त्रिंशल्लक्षायुः प्रांते त्रिदंडित्वमाश्रितः इति पंचदशो भवः १५ ततः पंच
मे ब्रह्मदेवलोके मध्यमायुर्देवो जातः इति षोडशो   भवः १६ ततश्च्युत्वा बहुसंसारं भ्रांत्वा राजगृहनगरे विश्व
नंदी नाम राजा तस्य लघुभ्राता विशाखभूतिर्यु   वराजा तस्य पुत्रो विश्वभूतिनामा जातः पितृव्यपु
त्रव्याजात विरागो दी[क्षां] गृहीत्वा मासक्षपणयुग्   वा संघट्टने पतितस्य विशाखनंदिनः सिनि
किं रूपहासहीलाकरणनिदानं कृतवान् कोटि   वर्षायुर्वर्षसहस्रं दीक्षां पालयति स्म इति सप्तद
शो भवः १७ ततो महाशुक्रे सप्तमे देवलोके सप्त   दशसागरोपमायुर्देवो जातः इति अष्टादशो भवः
१८ ततश्च्युत्वा पोतनपुरे प्रजापतिमृगावत्योः पुत्रः त्रिपृष्ठनामा वासुदेवो जातो विशाखनंदिजीवसिंहं विदा
रितवान् शय्यापालककर्णे त्रपुतप्तं क्षिप्त्वा त्रिखंडं साधयित्वा उग्रं कर्म बद्ध्वा चतुरशीति वर्षलक्षायुर्जीवति
स्म इति एकोनविंशतितमो भवः १९ ततो मृत्वा सप्तमनरके जातः इति विंशतितमो भवः २० ततः उद्धृत्य ×नारको×२
सिंहो जातः इति एकविंशतितमो भवः २१ ततश्चतुर्थनरकं गतः इति द्वाविंशतितमो भवः २२ ततो भ ८
वं भ्रांतः अत्र संवत १२६४ वर्षे श्रीदेवभद्रसूरिकृतश्रीवीरचरित्रे एवमुक्तमस्ति एकदा नयसारजीवो संसारं भ्रम

न् रथपुरनगरे प्रियमित्रो राजा विमला राज्ञी तयोः पुत्रो विमलश्रीनामा जातः सकलकलाकुशलस्य पिता राज्यं दत्तं एक
दा वने क्रीडन् पाशबद्धं हरिणं मोचितवान् तेन अनुकंपागुणेन तद्भवे च मनुष्यायुर्बद्धं प्रांते दीक्षां गृहीत्वा उग्रं तप
स्तप्त्वा चक्रवर्तिपदवीभोग्यं कर्म उपार्ज्य मासिक्या संलेखनां कृतवान् इति त्रयोविंशतितमो भवः २३ ततः पश्चि
मे महाविदेहे मूकानगर्यां धनंजयो नाम राजा धारिणी राज्ञी तयोः पुत्रः प्रियमित्रनामा चक्रवर्ती जातः तत्र भवे
त्रुटितांगनामायुः पालितं तत्प्रमाणं यथा अउणत्तरि सयसहस्सा सत्तावीसं भवे सहस्साइं चत्ता कोडाकोडी उ
त्रुटियंगे वरसमाणमिणं १ अत्राह शिष्यः सुरनरेड   एहं चिअ हुंति हरि १ अरिहंत २ चक्कि ३ बलदेवा ४ इत्थु
कत्वात् कथं मनुष्यो भूत्वा चक्रवर्ती जातः तत्रोत्त   रं यथा अस्मिन् क्षेत्रे दश आश्चर्याणि जातानि त
था तस्मिन् क्षेत्रेऽपि इदं आश्चर्यमाख्यापितम्   स्त उत्तमस्तत्र नागकुमारस्तत्तीर्थंकरो जातोऽस्ति ती
र्थंकरस्तदा देवगतिमाश्रित्य विमानिकदेवस्य प   वं आगच्छति उत विस्तरार्थिना देवभद्रकृतश्रीवीर
चरित्रं द्रष्टव्यं स प्रांते राज्यं त्यक्त्वा कोटिवर्षाणि दीक्षां।   पालयित्वा चतुरशीति पूर्वलक्षाणि आयुः पालयति स्म
इति चतुर्विंशतितमो भवः २४ ततः सप्तमे शुक्रदेवलोके सप्तदशसागरोपमायुर्देवो जातः इति पंचविंशतितमो
भवः २५ ततश्च्युत्वा जंबूद्वीपे भरतक्षेत्रे छत्राग्रानाम पुर्यां जितशत्रुनामा राजा भद्रा राज्ञी तयोः पुत्रो नंदनना पि
मा जातः चतुर्विंशति वर्षलक्षान् गृहे स्थित्वा पोट्टिलाचार्यसमीपे दीक्षां वर्षलक्षं मासक्षपणैः [illegible]पालयित्वा
विंशति स्थानकसेवनेन तीर्थंकरनामकर्म बद्धवान् इति षड्विंशतितमो भवः २६ ततः प्राणते दशमदेवलोके
पुष्पोत्तरविमाने विंशति सागरोपमायुर्देवो जातः इति सप्तविंशतितमो भवः २७ ततश्च्युत्वा श्रीमहावीरदेव

चतुर्विंशतितमस्तीर्थंकरो जातः इति अष्टाविंशतितमो भवः २८ तेणं कालेणं तेणं समएणं समणे भगवं महा
वीरे जे से गिम्हाणं चउत्थे मासे अट्ठमे पक्खे आसाढसुद्धे तस्सणं आसाढसुद्धस्स छट्ठीपक्खेणं महाविजय
पुप्फोत्तरपवरपुंडरीयाओ महाविमाणाओ वीसं सागरोवमट्ठिआओ आउक्खएणं भवक्खएणं ठिइक्खएणं इ
त्यादि व्याख्या अथ भगवतश्च्यवनकल्याणकवक्तव्यतामाह तस्मिन् काले तस्मिन् समये श्रमणो भग
वान् महावीरः ग्रीष्मस्य तीव्रबलत्वात् आर्षत्वात् चतुर्थे मासे अष्टमे पक्षे आसाढशुद्धि षष्ठीपक्खेणंति दिन
रात्रिरूपं अहोरात्रस्य उत्तरार्धपक्षत्वात् पक्षोऽयं आह रात्रस्य रात्री ह्यापि षष्ठीदिवसेणंति पाठस्तत्र दिवस
शब्देन तिथिर्ग्राह्या तस्यां रात्रौ महाविमानात् चक्रवापरं कीदृशात् महाविमानात् महान् विजयो १
यत्र तच्च तत् पुष्पोत्तरं च प्रधानत्वात् पुष्पोत्तरसंज्ञकं तत् दिवप्रवरपुंडरीकमिवोत्तमत्वात् ततः किं
विशिष्टात् महाविमानात् विंशतिसागरोपमस्थि तिकात् आउक्खएणं देवसंबंधिन आयुषः क्षये
ण भवक्खएणं भवस्य देवगतेः क्षयेण ठिइक्खएणं स्थिते राहारस्य विक्रियशरीरे अवस्थानस्य वा क्षयेण अ
णंतरं अंतररहितं पश्चादित्यर्थः च्यवं देवसंबंधिशरीरं च इत्त्वा त्यक्त्वा अथवा च च्यवमानो न जानातीति कृत्वा इहेव
जंबुद्वीपे अस्मिन्नेव जंबुद्वीपे नान्यस्मिन् यतो जंबुद्वीपा अन्ये असंख्याताः संति भरतक्षेत्रे अस्यां अवस
र्पिण्यां सुसमसुसमानामके प्रथमे अरे व्यतिक्रांते सति तत्स्वरूपं इदं ४ कोडाकोडि सागरोपम आरानउमं
१न ३ पल्योपम युगलियां मा आयुषा ३ गाउ युगलियां देहमान त्रिजे दिने तूयरि प्रमाण समान युगलिय
१ आहार ल्यइ सरीरनी पांसली २५६ अपत्यपालना ४९ दिन २ ततः सुषमानामके द्वितीयो अरोपि व्यती १०

तेसति तत्स्वरूपं इदं ३ कोडाकोडि सागरोपम आरानुमान २ पल्योपम युगलियां आयु २ गाउ युगलियां न
उ देहमान बिजे दिने युगलिया बोर प्रमाण आहार ल्यइ शरीर नी पांसली १२८ अपत्यपालना ६४ दिन ३ ततस्तृ
तीयो सुषमदुःषमानामके अरेपि व्यतीते तत्स्वरूपं इदं २ कोडाकोडि सागरोपम आरानउमान एक पल्योपम यु
गलियां नउ आउ १ एक गाउ युगलियां नउ देहमान एकांतर युगलिया आमला प्रमाण आहार ल्यइ शरी
रनी पांसली ६४ अपत्यपालना ७९ दिन ४ दुःषमसुषमानामके चतुर्थेऽरके पि ४२ सहस्र वर्षैर्न्यूनैर्व्यतीते तत्स्वरूपं इ ×एकसागरोपम कोडाकोडिमान+५
दं ४२ सहस्र वर्ष न्यून एक सागरोपम कोडाकोडि आरानउमान पूर्वकोडि मनुष्यां नउ आउ ५०० धनु
ष देहमान नित्य आहार ५ पंचम दुःषमानामा अरउ तत्स्वरूपं इदं २१ सहस्र वर्ष आरानउमान १२०
वरस मनुष्यां नउ आउ ७ हाथ देहमान ५ दुःषमदुःषमानाम षष्ठोऽरः तत्स्वरूपं इदं
२१ सहस्र वर्ष आरानउमान २० वरस मनुष्यां नउ आउ ४ हाथ देहमान मत्स्य मांसाहारी ६
अथ पंचहत्तरी ७५ से से रिक्तिद्दर्शः चतुर्थारकस्य हति व्यास षष्ठपर्धे ततः पंचसप्ततिवर्षेषु सार्धाष्टमासाधिके
षु शेषेषु सत्सु ७५ वर्ष सार्धाष्टमासैः यतावता श्रीमहावीरदेवस्य आयुः ७२ वर्षाणि ततः परं त्रिभिर्वर्षैः सार्धाष्ट
मासैश्च एकोननवतिपक्षैरित्यर्थः चतुर्थारकः पूर्णो जातः ततरेकविंशति तीर्थंकरेषु इक्ष्वाकुकुलसमुत्प
न्नेषु काश्यपगोत्रेषु व्यतिक्रांतेषु सत्सु तथा द्वयोर्मुनिसुव्रत नेमिनाथयोर्हरिवंशकुलसमुत्पन्नयोर्गौतम
गोत्रयोर्व्यतिक्रांतयोः सतोरेवं त्रयोविंशति तीर्थंकरेषु व्यतिक्रांतेषु सत्सु चरमतीर्थंकरः पूर्वतीर्थंकरेण श्री
ऋषभदेवेन भरतस्याग्रे निर्दिष्टः अयं मरीचिश्चतुर्विंशतितमस्तीर्थंकरो भावीति कथितः ब्राह्मणी जंम्

आह। यस्मिन् ग्रामे ब्राह्मणकुंडग्रामस्तस्मिन् ऋषभदत्तस्य ब्राह्मणस्य कोडालस इति नाम्ना गोत्रस्य तस्य भा
र्याया देवानंदानाम्नी जालंधर इति गोत्रा तस्याः कुक्षौ गर्भतया व्युत्क्रांत उत्पन्न इत्यर्थः कस्मिन् समये पूर्वरात्र
श्चासौ अपररात्रश्च स एव काललक्षणः समयो न समाचारादिलक्षणः तत्र मध्यरात्रे इत्यर्थः आर्षत्वादेकारे
फलोपः अपररात्रशब्दाद्वा अर्द्धगते सर्वगतमिति न्यायात् अपगता रात्रिरपररात्रः [illegible] उतः
हारात्तरां नक्षत्रे चंद्रेण सह योगमुपागते सति आहारापक्रांत्या देवाहारपरित्यागेन अथवा आहारव्युत्क्रां २
त्या अपूर्वाहारात्त्यादेन मध्वाम्बाचिताहारग्रहणेन तत्र्यर्थः एवमन्यदपि पदद्वयं व्याख्येयं बः ॥समणे
भगवं महावीरे तिन्नाणोवगए आवि हुत्था चइ स्सामित्ति जाणइ चयमाणे न जाणइ चुएमित्ति
जाणइ व्या० श्रमणो भ०।।वान् महावीरो दे वलोके गर्भेपि स्थितः सन् त्रिज्ञानसहितोऽस्त
वतत्र यद्यपि देवानां षण्मासशेषायुषि म १लंम्लानिः१कल्पवृक्षकंपः२श्रीह्रीनाशो
३वाससां चोपरागः४दैन्यं५तंद्रा६कामरागां गभंगो७दृष्टिभ्रांतिः८वर्पणकः९अरतिः१०अ११
इति लाञ्छनानि तथापि तीर्थंकरसुराः पुण्याकर्षकांति [illegible] ज्ञानादिना भुक्ता भवंति
चइस्सामि० च्यवनकाले भगवान् जानाति चयमाणे० च्यवनमानो न जानाति च्यवनस्य एकसामयिकत्वा
त् छद्मस्थज्ञानोपयोगस्य चासंख्यसामयिकत्वात् श्रीः ॥जं रयणिं च णं समणे भगवं महा
वीरे देवाणंदाए माहणीए जालंधरसगोत्ताए कुच्छिंसि गब्भत्ताए वक्कंते० ॥ व्याख्या यस्यां रजन्यां रात्रौ ११
श्रमणो भगवान् महावीरो देवानंदायाः कुक्षौ अवतीर्णः तस्यां रात्रौ सा देवानंदा ब्राह्मणी सुप्तजाग

× सूत्रं ×

रा तिसुप्ता नातिजाग्रती ओहीरमाणी वारंवार ईषन्निद्रां गच्छंती कल्पटिप्पनकोक्तत्वात् तृतीयनिद्रया प्रचलायमाना इमान्
वक्ष्यमाणान् चतुर्दश१४ स्वप्नान् दृष्ट्वा प्रतिबुद्धा जागरिता किंविशिष्टान् एतद्रूपान् एतदेव वर्णितलक्षणं रूपं येषां स्व
प्नानां न कविकल्पितं अधिकं यत्तेन तथा तान् उदारान् प्रधानान् कल्याणानां शुभसमृद्धिविशेषाणां कारणत्वात्॥
कल्याणानीति गत्वा अणंति गच्छंति कल्याणं तान् कल्याणान् शिवान् उपद्रवोपशमहेतुत्वात् धन्यान् धनावहत्वात्
मंगलेदुरितोपशमे साधुत्वात् मांगल्यान् सश्रीकान् सशोभान् तद्यथा तान् चतुर्दशस्वप्नान् नामत आह प्रथमस्व
प्ने देवानंदा गजं पश्यति द्वितीये वृषभं तृतीये सिंहं च तुर्थे श्रीदेवीमभिषिक्तां पंचमे पुष्पदाम षष्ठे श
शिनं चंद्रं सप्तमे दिनकरं सूर्यं अष्टमे ध्वजं नवमे पू र्णकलशं। दशमे पद्मसरोवरं एकादशे समुद्रं द्वा
दशे देवविमानं तत्रायं विशेषः यस्तीर्थंकरो दे वलोकादवतरति तन्माता विमानं पश्यति यस्तु
नरकादागच्छति श्रेणिकादिवत् तन्माता भवनं प्रासादं पश्यति चतुर्दशे वपते स्वप्ने विमानभवन
त्यारेकत्वरदर्शनात् त्रयोदशे रत्नोच्चयं रत्नराशिं तस्य रलं चतुर्दशे सिंहं निर्धूमअग्निं बः ततः चतुर्दश
स्वप्नान् एतादृशान् दृष्ट्वा प्रतिबुद्धा सती सा देवानंदा ब्राह्मणी कीदृशी जाता इत्याह हृष्टा विस्मिता तुष्टा तावत्
ती आनंदितं चित्तं यस्याः सा चित्तानंदिता मकारः प्राकृतत्वात् अथवा हृष्टं विस्मितं तुष्टं तोषवच्चित्तं यत्र तत्तथा
तद्यथा भवत्येवं आनंदिता प्रीतिः प्रायणं मनसि यस्याः सा प्रीतिमनाः परमसौमनस्यं जातमस्याः सा परम
सौमनस्यिता हर्षवशेन विसर्पद्विस्तारयायि हृदयं यस्याः सा तथा एकार्थिकानि एतानि हर्षाधिक्यप्रतिपा
दनार्थत्वात् धाराभिर्मेघवारिधाराभिराहतं यत्कदंबकुसुमं तद्वत् समुच्छ्वसितानि उच्छ्वसितानि रोमाणि रूप

× सूत्रं॥ तं जहा गय वसह सीह इत्यादि॥ ×५

× सूत्रं॥ तए णं सा देवाणंदा० व्याख्या॥ ×६

पुरोमरंध्रेषु यस्याः सा अथ देवानंदा एतादृशी सती किं करोति इत्याह देवाणंदा॰ इणी स्वप्नानां स्मरणं क
रोति विशिष्टफलादिविचारयत्वेन स्मरणं कृत्वा ईहायामवतिष्ठति उ॰ अविरलमानसोत्सुक्यादिभावेन अचप
लं काययतश्चापल्यस्याभावेन असंभ्रांतया अत्वरितया राजहंससदृश्या गत्या कृत्वा यत्र स्थाने ऋषभदत्तो ब्रा
ह्मणस्तत्र आगच्छति आगत्य च ऋषभदत्तं ब्राह्मणं वर्द्धापयति किं कृत्वा जयेन जयः परैः अनभिभूयमानता
प्रतापवृद्धिश्च तेन विजयः परेषां असहमानानां अभिभवस्तेन अथवा जयः स्वदेशे विजयः परदेशे तेन वर्द्धापयि
त्वा तत्र भद्रासने उपविष्टा सती कीदृशी जाता आसन्ना आश्वस्ता गतिजनितश्रमाभावात् पुनः की॰ विश्व
स्ता संक्षोभाभावात् अथ उत्पन्ना पुनः की॰ सु हासनवरगया सुखेन सुखं वा सुखासना आसनवरं
गता या सा एवंविधा सती मस्तके अंजलिं मुकुलितकमलाकारं कृत्वा एवं अवादीत्॥
किंविशिष्टं अंजलिं ॰ तलाभ्यां परिगृहीतं। आह पुनः किं॰ शिरसि आवर्त्तः आवर्त्तनं प्राद
क्षिण्येन परिभ्रमणं यस्य स शिरसावर्त्तस्तं पुनः किं॰ दशनखाः यस्मिन् स तं किं अवादीत् इत्याह सू
त्रं सुगमं नवरं ॥ हे देवानां प्रिय सुलग अथवा देवानपि अनुरूपं प्रीणातीति देवानुप्रियस्तस्य संबोधनं हे दे
वानुप्रिय मन्ये इति वितर्कार्थो निपातः एतेषां स्वप्नानां कोमन्ये कल्याणफलवृत्तिविशेषो भविष्यति ७॥ सू॰॥
ततः ऋषभदत्तब्राह्मणो देवानंदासमीपे एतं अर्थं श्रुत्वा श्रोत्रेण आकर्ण्य निशम्य हृदये न अवधार्य हृष्टतुष्टा
दिविशेषणोपेतो जातस्ततः किं करोति इत्याह सू॰ ऋषभदत्तः स्वप्नावग्रहं अर्थावग्रहं करोति ततः ईहां त
दर्थपर्यालोचनलक्षणं अनुप्रविशति ततः आत्मसंबंधिना स्वाभाविकेन सहजेन मतिपूर्वकेण आभि १२

॥ मतिज्ञानवनावेण ॥ १

निबोधिकस्वभावेन बुद्धिविज्ञानेन तत्र मतिः प्राप्तविषया बुद्धिः सांप्रतदर्शिनी विज्ञानमतीतानागतवस्तुविषयं तेन
तेषां स्वप्नानां अर्थावग्रहं स्वप्नफलनिश्चयं करोति कृत्वा च देवानंदा इति अवादीत् किं अवादीत् इत्याह हे देवानु सूत्रं॥४२
प्रिये त्वया उदारादिविशेषणोपेताः स्वप्ना दृष्टाः पुनः आरोग्यं नीरोगता तुष्टिः संतोषः दीर्घायुश्चिरंजीवित्वं ते
षां कारकाः स्वप्ना दृष्टाः अथ तेषां फलमाह हे देवानुप्रिये अर्थलाभस्तव भविष्यतीति शेषः पुनः एवं स्वप्न
तदुक्तफलसाधनसमर्थात् स्वप्नात् त्वं दारकं पुत्रं प्रजनिष्यसीति संबंधः परं कदा नवसु मासेषु प्रतिपूर्णेषु पुनः
अर्द्ध अष्टमेषु रात्रिदिवसेषु अहोरात्रेषु एतावता नवमासेषु सार्द्धसप्तदिनेषु च गतेषु किंविशिष्टं पुत्रं सु
कुमालपाणिपादं सुकुमालौ पाणिपादौ हस्त चरणौ यस्य स तं पुनः किं॰ अहीनानि लक्षण
तः प्रतिपूर्णानि स्वस्वरूपतः पंचेंद्रियाणि यस्मि न् तत् तथाविधं शरीरं यस्य स तं पुनः किं॰ पुन
लक्षणानि स्वस्तिकचक्रादीनि सामान्यपुरुषा णां मध्ये उत्तमनरस्य ३२ लक्षणानि भवंति तद्य
था यस्य नख १ चरण २ हस्त ३ जिह्वा ४ ओष्ठ ५ तालु ६ लोचनांतानि ७ रक्तानि भवंति स सप्तांगलक्ष्मील
भते ७ यस्य कक्षा १ हृदय २ ग्रीवा ३ नासिका ४ नख ५ मुखानि ६ उन्नतानि भवंति तस्य उन्नतयो जायंते पु
नर्यस्य दंत १ त्वक् २ केश ३ अंगुलीपर्व ४ नखाः ५ सूक्ष्मा भवंति तस्य धनं प्रभूतं स्यात् पुनर्यस्य अक्षि १ स्तनांत
५ र २ नासा ३ हनु ४ भुजाः ५ दीर्घा भवंति स दीर्घायुः स्यात् पुनर्यस्य भाल १ हृदय २ मुखानि ३ विस्तीर्णानि भवंति
स राजा स्यात् पुनर्यस्य ग्रीवा १ जंघा २ पुरुषचिह्नं ३ लघु स्यात् सोपि राजा स्यात् पुनर्यस्य १ स्वर २ नाभि ३ स
त्वानि ३ गंभीराणि भवंति स सप्तसमुद्रांतपृथ्वीपतिः स्यात् इति ३२ लक्षणानि प्राकृतमनुष्याणां बलदेववा

सुदेवानां एकशतं अष्टोत्तरलक्षणानि भवंति चक्रवर्त्तितीर्थंकराणां तु एकसहस्रं अष्टोत्तरलक्षणानि भवंति यानि
हस्तपादादौ स्फुटरेखारूपतया दृश्यंते व्यंजनानि मषितिलकादीनि तेषां गुणाः प्रशस्तता तेन उपपेतं उप १ अप २ उ
तत् ३ इति शब्दत्रयस्य स्थाने शकंध्वादिदर्शनात् उपपेतं इति स्यात् यद्वा सहजं लक्षणं पश्चाद्भवं व्यंजनं गुणाः सौ
भाग्यादयः तैः सहितं पुनः किंभूतं मानेन १ उन्मानेन २ प्रमाणेन ३ च प्रतिपूर्णानि अन्यूनानि सुजातानि सुनिष्प
न्नानि सर्वाणि अंगानि शिरःप्रभृतीनि यस्मिन् तत्तथाविधं सुंदरं अंगं शरीरं यस्य स तं तत्र जलभृतं कुंडिकायां य
स्मिन् नरे प्रविष्टे जलस्य द्रोणो बहिः पतति स मानो॥ पेतः द्रोणमानं यथा द्विशतषट्पंचाशत् २५६ पल
प्रमाणं द्रोणमानं तथा यस्तुलां आरूढो अर्द्धभारं तु लति स उन्मानोपेतं भारमानं यथा षड्भिः सर्षपै
रेको यवः त्रिभिर्यवैरेका गुंजा स्यात् त्रिभिर्गुंजा भिरेको वल्लः स्यात् षोडशभिर्वल्लैरेको ग
द्याणः स्यात् दशभिर्गद्याणैरेकं पलं स्यात् पला नां सार्द्धशतेन मणः स्यात् दशभिर्मणैरेका धटिः
स्यात् दशभिर्धटीभिरेको भारः स्यात् एवंविधोऽर्द्धभारं तु लति स उन्मानोपेतः २ तथा यः स्वांगुलेन अष्टोत्तर
शतोच्चो भवेत् स प्रमाणोपेतः ३ मुखात् द्वादशांगुलप्रमाणात् देहं नवगुणं शेषपुरुषलक्षणमतत् तीर्थंकरा
स्तु विंशत्यंगुलशतमाना भवंति तेषां हि मस्तके द्वादशांगुलं उष्णीकं भवति पुनः किंभूतं शशिवच्चंद्रवत्सौम्या
कारो यस्य स तं पुनः किंभूतं कांतं कमनीयं अत एव हृष्टं प्रियं दर्शनं यस्य स तं अत एव सुरूपं शोभनरूपं पुनः
स पुत्रः कीदृशो भावी तदाह से वियणं दारए उम्मुक्कबालभावे विन्नायपरिणयमित्ते जुव्वण गमणुप्पत्ते॥ व्या
ख्या सोऽपि बालक उन्मुक्तबालभावः सन् अष्टवर्षः पुनः विज्ञातं विज्ञानं परिणतमात्रं यस्य सः क्वापि विलंबे इति पाठ १३

स्तत्र विज्ञ एव विज्ञकः स चासौ परिणतमात्रश्च कलादिषु इति गम्यं पुनः यौवनकमनुप्राप्तः सन् एतेषां ऋग्वेद १ यजुर्वे
द २ सामवेद ३ अथर्वणवेदानां अत्र प्राकृतत्वात् षष्ठीलोपः किं विशिष्टानां वेदानां इतिहासः पुराणं पंचमं येषां ते पुनः
किंभूत निघंटुनामनामालाषष्ठी येषां ते पुनः किंभूत वेदानां सांगोपांगानां अंगोपांगैश्च सहितानां तत्र अंगानि शिक्षा १ क
ल्प २ व्याकरण ३ छंदो ४ ज्योतिष ५ निरुक्तयः ६ षट् उपांगानि तेषामेव अंगानां प्रपंचनपराः प्रबंधाः किंभूत वेदानां सर
हस्यानां ऐदंपर्यसहितानां सारकोऽध्यापनेन प्रवर्त्तकः स्मारको वा विस्मृतस्य स्मारणात् पुनः पारगः पर्यंतगामी
धारको धीतान् धारयितुं क्षमः क्वचित् वारए इति पाठ॥ स्तत्र वारकोऽशुद्धपाठनिषेधात् पुनः षडंगवित् शिक्षादि
विचारको ज्ञानार्थेऽपि नरूक्तं स्यात् पुनः षष्टितंत्रवि स्तंत्रितात्रेति षष्टितंत्रं कापिलीयशास्त्रं तत्र विशारदः
पुनः संख्यानसंकलितव्यवकलितादिगणित॥ स्कंधे सिरकाणेति शिक्षायणति प्रतिपादयति शि
क्षाणं आचारशास्त्रं तत्र शिक्षः वाक्षरस्वरूपनिरूप कं शास्त्रं कल्पश्च यज्ञादिसमाचारवाचकं चेति शि
क्षाकल्पौ तत्र पुनः व्याकरणे शब्दलक्षणशास्त्रे छंदसि पद्यलक्षणनिरूपकशास्त्रे निरुक्तपदसंज्ञानं पुनर्ज्यो
तिषां अयने ज्ञाने ज्योतिःशास्त्रेषु इत्यर्थः अन्येषु च बहुषु ब्राह्मणकेषु वेदव्याख्यानरूपेषु ब्राह्मणसंबंधिषु ब्राह्म
णहितेषु वा परिव्राजकदर्शनप्रसिद्धेषु नयेषु आचारेषु न्यायशास्त्रेषु वा परिनिष्ठितश्चापि भविष्यति पुनर्विस्तरतः
शास्त्रनामानि ब्रह्मपुराण १ अंजोरुद्रपुराण २ विष्णुपु० ३ वायुपु० ४ भागवतपु० ५ नारदपु० ६ मार्कंडेयपु०
७ अग्निदैवतपु० ८ भविष्यत्पु० ९ ब्रह्मनिवर्त्तपु० १० लिंगपु० ११ वराहपु० १२ स्कंदपु० १३ वामनपु० १४
मत्स्यपु० १५ कूर्मपु० १६ गरुडपु० १७ ब्रह्मांडपु० १८ इति अष्टादशपुराणानि तेषां ज्ञाता भविष्यति पुनः॥

मानवीस्मृति १ आत्रेयीस्मृ० २ विष्णवीस्मृ० ३ हारीतीस्मृ० ४ याज्ञवल्कीस्मृ० ५ औशनसीस्मृ० ६ आंगिरसीस्मृ० ७ या
मीस्मृ० ८ आपस्तंबीस्मृति ९ सांवर्त्तीस्मृति १० कात्यायनीस्मृति ११ बार्हस्पतीस्मृति १२ पाराशरीस्मृति १३ शांखीस्मृति
१४ दाक्षीस्मृति १५ गौतमीस्मृति १६ शातातपीस्मृति १७ वासिष्ठीस्मृति १८ इति अष्टादश स्मृतयस्तासामपि ज्ञाताऽस
विद्यति ७ तथा ऐंद्रव्याकरण १ पाणिनिव्याकरण २ जैनेंद्रव्याकरण ३ शाकटायनव्या० ४ आपिशलीव्या० ५ चांद्र
व्या० ६ सरस्वतीकंठाभरण ७ बुद्धिसागरव्या० ८ विश्रांतव्या० ९ भीमसेनव्या० १० कालापकव्या० ११ बुद्धिव्या० १२
शिवव्या० १३ नंदिजयोत्पलव्या० १४ सारस्वतव्या० १ ६ सिद्धहेमव्या० १७ कूर्यहेमव्या० १८ इति अष्टादश व्या
करणानि तेषामपि ज्ञाताऽसविद्यति ८ तथा शिक्षा १ कल्प २ व्याकरण ३ छंदो ४ ज्योतिष ५ निरुक्ति ६ इ
ति ६ अंगानि वेदाः ४ एवं दश १० मीमांसा ११ तर्क विद्या १२ धर्मशास्त्र १३ पुराण १४ इति चतुर्दश
विद्यास्थानानि तासामपि ज्ञाताऽसविद्यति ९ तत्र रविक्रपस्य। दत्तः किं करोति इत्याह हे देवानुप्रिये त्वया ४ध्व १३:
स्वप्नाः दृष्टा इति कृत्वा इति लक्ष्मीवारं २ स्वप्नान् अनुबंद तिअनुमोदयति अथ देवानंदा किं करोति इत्याह त
एणं सा देवाणंदा माहणी उसभदत्तस्स माहणस्स अंतिए एयमट्ठं सुच्चा निसम्म हट्ठतुट्ठ जाव हियया जाव करयल
परिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु व्याख्या ततः सा देवाणंदा ब्राह्मणी ऋषभदत्तस्य समीपे एतं
अर्थं श्रुत्वा हृष्टतुष्टा सती मस्तके अंजलिं कृत्वा ऋषभदत्तस्य एवं अवादीत् हे देवानुप्रिय त्वया यदुक्तं तत्स
मस्तमेतदिति प्रतिवचने प्रत्ययाविष्करणं एतदेव सूत्रं रचयति तथा तहमेयं तहमेव एतदर्थ घामसैव्यैः इति प्रतिपादयति अनेन १४
अवयस्तद्वचनसत्यता उक्ता तथा अवितहमेतत् व्यतिरेकाभावात् पुनः असंदिग्धमेतत् संदेहाभावात् अत एव इट्ठं

इच्छितं वा मामेतत् तथा प्रतीष्टं प्रतीच्छितं वा अस्माभिः प्राप्तं सुखमस्मरणात् अभिरोचितं वा धर्मकथयो सोदत्याताद रस्यापकः स
त्योऽयमर्थोयि त्वया वदथ इति कृत्वा तान् स्वप्नान् सम्यक् प्रतीच्छति ततः ऋषभदत्तेन ब्राह्मणेन समं भोगार्हान् भो
गभोगान् भुंजाना विहरति शक्रवक्तव्यतासकवं अथ तस्मिन् समये किं जातं इत्याह तेणं कालेणं तेणं सम
एणं सक्के देविंदे देवराया वज्जपाणी पुरंदरे सयक्कऊ सहस्सक्ख मघवं पागसासणे दाहिणड्ढलोगाहिवई
व्याख्या तस्मिन् काले तस्मिन् समये शक्रस्य आसनविशेषस्य अधिष्ठाता ततः शक्रः देवानामध्ये परमैश्वर्या
दि इंद्र इति देवेंद्रः देवेषु राजा कांत्यादिभिरधिकं विराज मानत्वात् इति देवराजा वज्रं पाणौ हस्ते यस्य स व
ज्रपाणिः असुरादिपुराणां दारणात् विदारणात् इ ति पुरंदरः शतं क्रतवोऽभिग्रहविशेषाः पंचम प्र
तिमानां कार्तिकभवे यस्य स शतक्रतुः कार्तिकश्रे ष्ठिसंबंधस्त्वेवं पृथिवीभूषणं नाम पुरं प्रजा
पालो राजा कार्तिकनामा श्रेष्ठी राजमान्यो महर्द्धि कः परमजैनश्रावकः तेन श्रेष्ठिना श्राद्धप्रतिमा
नां शतं कृतं तेन शतक्रतुरिति लोके प्रसिद्धिर्जाता अ न्यदा मासोपवासी गैरिकनामा परिव्राजकः समागत
: सर्वोपि राजादिको नगरलोकः परमभक्तो जातः परं कार्तिकः श्रावकस्तत्र गैरिकं न मन्यते तद्वृत्तांतं ज्ञात्वा
गैरिको रुष्टः राजानं प्राह हे राजन् अहं तव गृहे पारणं तदा करोमि यदा कार्तिक श्रेष्ठी मम भुंजानस्य परिवेषय
ति तदा राजा श्रेष्ठिगृहे गतः श्रेष्ठिना सत्कृत्य प्रयोजनं पृष्टः राजा प्राह हे भ्रातः हे महाश्रेष्ठिन् मम गुरुगैरिकताप
सस्य त्वं परिवेषणेन लाभय श्रेष्ठी प्राह अहं सम्यक्त्वधारी श्रावको न ममायोग्यता परं तव पुरवासित्वात् राज्याभियोगे
णमिति आगारसद्भावात् करिष्यामीति अंगीकृत्य राज्ञो गृहे आगत्य श्रेष्ठी तथा परिवेषयित्वा लोभितः स च भुंजा

जो निडां पुत्याद्दृष्टोसीति श्रेष्ठिनं निर्भर्त्सयति स्म श्रेष्ठी च तदा चेतसि चिंतितवान् अहो यदि मया दीक्षा न गृहीता तदा
इयं मम हीला जाता ततः श्रीमुनिसुव्रतस्वामि समीपे अष्टाधिक सहस्र वणिक्पुत्रैः सार्द्धं दीक्षा गृहीता द्वादशांगा
नि पठित्वा द्वादशवर्षाणि दीक्षां पालयित्वा सौधर्मे प्रथमदेवलोके इंद्रो जातः गैरिकतापसश्च मृत्वा इंद्रस्य ऐरा
वणवाहनत्वेन जातः इंद्रं दृष्ट्वा पलायितः इंद्रेण धृतः इंद्रो द्विरूपस्तदा सौ मस्तकद्वयं चक्रे इंद्रेणापि रूपद्वयं कृतं पु
वं तेन मस्तक चतुष्टयं इंद्रेणापि रूप चतुष्टयं ततोऽवधि ज्ञानात् ज्ञात्वा तर्जितः इंद्रेण तेन ज्ञातमसिवं गैरिको मम वाहन
×कार्तिकश्रेष्ठिकथा॥ ५ त्वेन जातः इति पुनः इंद्रः की[...]शाखि सहस्राक्षः पं[...]च मंत्रिशतानि संति *तेषां प्रत्येकं+५ अक्षिद्वयसद्भावात् सहस्रनेत्रा
णि तानि इंद्रस्य राजकार्ये [...] द्रीणीकृत्याद्दृष्टानि [...] संति पुनः कीदृ० मघवा मघा देवविशेषा वशे
संति यस्य सः पुनः कीदृ० पा[...]मासणे [...] क्षाबल। [...] वंतो दस्यः पाको नाम दानवविशेषः तान्नवंतं वा शा
स्ति पुनः कीदृ० दक्षिणा[...]लोकाधिपतिः मेरोर्दक्षि[...]णतः सर्वस्य तदायत्तत्वात् पुनः कीदृ० द्वत्रीस
लक्ष विमानाधिपतिः पुनः कीदृ० ऐरावण ऐरावणवाहः [...] सुरो वाहनं यस्य सः पुनः कीदृ० सुरिंदे सुराणां इंद्र
आह्लादकत्वात् पुनः कीदृ० अरजांसि निर्मलानि अंबरवस्त्राणि स्वच्छतया आकाशसदृशानि वस्त्राणि धरति पु
नः कीदृ० आलइअमालमउडे आलिंगितौ यथास्थानं स्थापितौ मालामुकुटौ येन सः पुनः कीदृ० नवाभ्यामिव हे
म्नः सकाशाच्चारुभ्यां आश्चर्यकारिभ्यां चंचलाभ्यां इतस्ततश्चलनरूपाभ्यां कुंडलाभ्यां विलिख्यमानौ गल्लौ यस्य स
: पुनः कीदृ० महद्धीए महती ऋद्धिश्छत्रादिराजचिह्नरूपा [...] सः महज्जुईए महती द्युतिः कांतिः आभरणादी
नां द्युतिर्वा समयोचितवस्तुप्राप्तिर्यस्य सः महब्बले महबलं [...] यस्य स महायसे महान् यशो यस्य सः महाणु

स

२५

भावे महानुभावः प्रभावो यस्य सः महासुक्खे महद्देवसंबंधि सौख्यं यस्य सः भासुरबुंदी भासुरदीप्तिमती बुंदिर्व
पुर्यस्य सः पलंबमाणमालधरे प्रलंबा च तमाला प्रादांतलंबिनी पंचवर्णपुष्पमाला यस्य सः ईदृशः सन् सौधर्मे देव
लोके सौधर्मावतंसके विमाने सुधर्मसभायां शक्रे सिंहासने स इंद्रः एवं व्यालंकारे तत्र अर्थवशात् स्त्रीत्वं ३२ लक्ष वि
मानानां ८४ सहस्र सामानिकसुराणां तथा त्रयस्त्रिंशतां देवानां गुरुस्थानीयानां मंत्रिकल्पानां वा तथा च तुर्णां
सोम १ यम २ वरुण ३ कुबेराणां ४ लोकपालानां तथा अष्टानां अग्रमहिषीणां पद्मा १ शिवा २ शची ३ अंजू ४ अम
ला ५ अप्सरा ६ नवमिका ७ रोहिणी ८ नाम्नीनां सपरिवा[...]राणां तथा तिसृणां पर्षदां अभ्यंतर १ मध्यम २ बाह्य
रूपाणां तथा सप्तानां अनीकानां गंधर्व १ नट २ हय [...] र ३ गय ४ रह ५ पत्न ६ वसह ७ रूपाणां पुनः सप्तानी
काधिपतीनां तथा चतुरशीतिः [...] सहस्राः ४ च तु [...] र्दिशं वर्तीत ततः ३६ सहस्राधिक लक्षत्रयमिता
नां आत्मरक्षकदेवानां अन्येषां [...] च बहूनां सौधर्म [...] कल्पवासिनां वैमानिकानां देवानां देवीनां च आहे
वच्चं अधिपतिरक्षा एतत्सामान्य[...] आरक्षकेणापि क्रिय[...]ते अत आह पोरेवच्चं पौरोवर्त्यं सर्वाग्रेसरत्वं तच्च स्वा
मित्वमंतरेणापि स्यात् अत आह सामित्तं स्वामित्वं नायकत्वं तदपि पोषकत्वं विनापि हरणप्रभाधिपस्येव स्यात्
अत आह भट्टित्तं भर्तृत्वं पोषकत्वं अत आह महत्तरागत्तं गुरुतरत्वं तदपि आज्ञाविकलस्यापि यथा कस्यचिद्वणि
कः स्वदासदासीवर्गं प्रति स्यात् ततः आह आणाईसरः आज्ञेश्वरः सेनायाः पतिस्तस्य कर्म आज्ञेश्वरसेनाप
त्यं स्वसैन्यं प्रति अद्भुतं आज्ञाप्राधान्यमित्यर्थः कारेमाणे कारयन् नियुक्तैः पालेमाणे पालयन् स्वयमेव एतादृ
शः सन् किं कुर्वन् आस्ते अत आह महता रवेणेति योगः अहतं अव्यवच्छिन्नं यन्नाट्यं तत्र यद्गीतं यानि वादि

कर्म

णितंत्रीवीणातलतालादरस्फोटरवाः अथवा तलाः हस्ताः तालाः कांसिकाः त्रुटितानि शेषतूर्याणि घनमृदंगो मेघ
ध्वनिमर्दलः यच्च पटुपटहवादितं ततः कर्मधारयगर्भो द्वंद्वः ततस्तेषां यो रवस्तेन दिव्यानि देवजातानि यानि भोग
भोगानि आर्षत्वात् नपुंसकत्वं भुंजानो विहरति आस्ते इति ॥ अथ इंद्रः इमं जंबुद्वीपं केवलकल्पं संपूर्णं विपु
लेन अवधिज्ञानेन आभोगयमानः आभोगयन् पश्यन् विहरति आस्ते तत्र पश्यन् जंबुद्वीपे दक्षिणभरतार्द्धे ब्रा
ह्मणकुंडग्रामे ऋषभदत्तस्य भार्यायाः देवानंदायाः कुक्षौ गर्भत्वेन अवतीर्णं पश्यति दृष्ट्वा च हृष्टतुष्टः नंदितः स
मृद्धितरतां प्राप्तः परमानंदितो हर्षवशविसर्पद्धृदयः धाराहतनीपस्य कदंबस्य सुरभिकुसुममिव चं
चुमालयन्ति पुलकितो हत एव कुसुमितानि उच्छ्रि तानि रोमकूपाणि यस्य स तथा ततः विकसितानि वक्त्र
कमलानि भगवतो दर्शनेन उत्पन्नात् आनंदात् वरकमलवत् आननं नयने च यस्य ततः प्रच
लितानि संभ्रमात् कंपितानि वराणि कटकानि कंक णानि त्रुटिकाश्च बाहुरक्षिकाः केयूराणि बाहु
मूलभूषणानि च मुकुटं कुंडले यस्य ततः हारवि राजद्वक्षाः ततः पदद्वयस्य कर्मधारयः ततः प्रालंबे
र कुंबनकं मुक्तामयं प्रलंबमानं घोलंतं दोलायमानं भूषणम् आभरणं धारयति ससंभ्रमं सादरं सोत्सुकं त्वरितं वे
गवत् यथास्यात् एवं सुरेंद्रः सिंहासनात् अभ्युत्तिष्ठति ततः पादपीठात् अवतरति उत्तरति ततः पादुके अवमुंचति परं
पादुके कीदृशे इत्याह वैडूर्यप्रधानवर्तिना वरिष्ठरिष्ठांजनरत्नविशेषौ ययोः ततः निपुणेन शिल्पिना उप
चिते अभिपरिकर्मिते ततः मिसिमिसंति अतएव चिकिचिकायमाने ततः मणिभिश्चंद्रकांतादिभिः रत्नैश्च कर्के
तनादिभिर्मंडिते ये ते तथा ततः पदचतुष्टयस्य कर्मधारयः एवंविधे पादुके मुक्त्वा ततः एकशाटकमयं उ

×कल्पसूत्रे ॥ इमं च णं इत्यादि । सा ॥

१६

त्तरासंगं विकक्षं करोति कृत्वा च अंजलिना मुकुलितौ मुकुलाकृतीकृतौ अग्रहस्तौ येन तीर्थंकरस्य अभिमुखः
सप्त अष्टपदानि अनुगच्छति ततः वामं जानुं अंचेइ दाहिणं जाणुं धरणितलंसि कट्टु पृथ्वीतले कृत्वा साहट्टु इति पा
ठे तु संहृत्य निवेश्य तिक्खुत्तो त्रिःकृत्वः त्रीन्वारान् मस्तकं धरणीतले निवेश्य ईसिं पच्चुन्नमइ ईषत् मनाक् प्रत्युन्न
मति ततः एवंविधे भुजे साहरति ऊर्ध्वं नयति स्तंभितोपमे करोति कीदृशौ भुजौ कंकणत्रुटिकाभ्यां स्तंभितौ त
तः करतलाभ्यां परिगृहीतं कृतं सिरसा वर्त्तं आवर्त्तनम् आवर्त्तः शिरसि आवर्त्तो यस्य सः मस्तके अंजलिं कृत्वा एवं अ
वादीत् ॥ नमोत्थुणं० इत्यादि नमो नमस्कारो हस्तु अत्थु णं इति वाक्यालंकारे नमोस्तु इति सर्वत्र संबध्य
ते सर्वत्र प्राकृतत्वात् चतुर्थीस्थाने षष्ठी अत्र पाठत्रयं अ रहंताणं १ अरिहंताणं २ अरुहंताणं ३ तत्र चतुः
षष्टिसुरेंद्रैः कृतां पूजां अर्हंतीति अर्हंतस्तेभ्यः १ अरिहंताणं अरीन् कर्मरूपशत्रून् घ्नंतीति
अरिहंतारः २ अरुहंताणं भवे अप्ररोहणात् बहुवचनं आदौ तो भवे अर्हंताः इति अरुहंताणं ३
बहुत्वख्यापनार्थं नमस्कारकर्तुः फलस्य अतिशय्य ज्ञापनार्थं च भगवंताणं भगशब्दस्य १४ अर्थाः तत्र अर्क
योनि २ अर्थं वर्जयित्वा १२ अर्था ग्राह्यास्ते एवं ज्ञानवंतः १ माहात्म्यवंतः २ यशस्विनः ३ आश्रितवैरिणां वैरोप
शमनात् ३ वैराग्यवंतः ४ राज्यश्रीत्यजनात् ४ मुक्तिमंतः ५ रूपवंतः ६ वीर्यवंतः ७ अपरिमितबलत्वात् ७ प्रयत्नवं
तः तपःकर्मणि उत्साहवत्वात् ८ इच्छावंतो भवाब्धिरक्षणेच्छावत्वात् ९ श्रीमंतः चतुस्त्रिंशदतिशयविराजमानत्वात्
१० धर्मवंतः ११ ऐश्वर्यवंतः अनेकदेवकोटिसेव्यत्वात् १२ नतश्चतुर्थी तेभ्यः संपदा १ आइगराणं श्रुतधर्मस्य आदौ
प्रकृत्या नित्यत्वेपि स्वस्वतीर्थे आदिकरणात् तित्थयराणं तीर्थं चतुर्विधः संघः प्रथमगणधरो वा तत्स्थापनात्

सयंसंबुद्धाणं स्वयं आत्मना बुद्धाः परोपदेशं विना तत्त्वावबोधात् संपदा २ । अतएव तेः पुरिसुत्तमाणं पुरुषो
त्तमेभ्यः पुरुषेषु संसारेऽपि परार्थव्यसनित्व १ स्वार्थगौणत्व २ उचितक्रिया ३ अदीनत्व ४ कृतज्ञता ५ गांभीर्य ६
इत्यादिगुणै रुत्तमाः पुनस्तत्त्वमप्येवमुपमात्रयेणाह पुरिससीहाणं पुरुषाः सिंहा इव कर्मशत्रुशूर
त्वात् परीषहेषु सावहीलनत्वात् उपसर्गेषु निर्भयत्वात् च पुनः पुरिसवरपुंडरीयाणं पुरुषाः वरपुंडरीकाणि इ
व पुंडरीकाणि धवलकमलानि यतो भगवंतः कर्मपंके जाताः भोगजलैर्वर्द्धिताः ततउभयमपित्यक्ताज
गल्लक्ष्मीनिवासा हृष्यादिसेव्याश्च जाताः यथावरपुं डरीकाणि सेवकानां संतापहरत्वात् सुखाकृतित्वाच्च
६ बत्राणि च पुनः पुरुसवरगंधह पुरुषवरगंध हस्तिभ्यः पुरुषा गंधहस्तिन इव यथा गंधहस्ति
नां गंधेन अन्यगजा नश्यंते तथा भवद्विहारे णईतिमारिदुरवाउपद्रवा दूरतो यांति संप
पुनः दा३ लोगुत्तमाणं लोकस्य भव्यलोकस्य मध्ये उत्तमाः ३४ अतिशयसहितत्वात् पुनः लोगना
हाणं लोकस्य विशिष्टभव्यलोकस्य नाथाः अलब्धसम्यक्त्वादिप्रापणात् योगस्य प्राप्तस्य रक्ष
णात् क्षेमस्य च कारित्वात् पुनः लोगहियाणं लोकस्य एकेंद्रियादिगणस्य पंचास्तिकायात्मकस्य वा सम्यक्
रक्षणउपरूपणाभ्यां हितेभ्यः पुनः लोगपईवाणं लोकस्य देशनायोग्यनरादिरूपस्य प्रदीपा इव प्रदीपाः
त्वेभ्यः मिथ्यात्वतमोहरणात् पुनः लोगपज्जोअगराणं लोकस्य लोकालोकरूपस्य प्रवचनप्रवर्त्तने प्रद्योतं प्रक
रणशीला इति संपदा ४ अभयदयाणं प्राणांतकारिष्वपि न भयं ददते अथवा इहलोक १ परलोक २ आदान
३ अकस्मात् ४ आजीविका ५ मरण ६ अश्लोक ७ रूपसप्तभयहरणात् चक्खुदयाणं चक्षुरिव चक्षुः १३

श्रुतज्ञानं तद्ददंते पुनः मग्गदयाणं मार्गं सम्यक्दर्शनादिकं मोक्षपथं ददंते पुनः सरणदयाणं शरणं त्राणं बहुप
द्रवैः पीडितानां तद्वतो निर्वाणं ददंते पुनः जीवदयाणं जीवनं जीवो भावप्राणधारणं अमरणधर्मत्वं ददंते अथ
वा जीवेषु दया येषां ते पुनः क्वचिद् बोहिदयाणं इत्यपि पठ्यते तत्र बोधिर्जिनधर्मप्राप्तिस्तां ददंते संपदा ५ पुन
:धम्मदयाणं धर्मं देशसर्वचारित्ररूपं ददंते पुनः धम्मदेसयाणं देशधर्मं श्रुतचारित्ररूपं देशयंति पुनः धम्मना
यगाणं धर्मस्य क्षायिकज्ञानादिरूपस्य नायकाः स्ववशीकरणात् पुनः धम्मसारहीणं धर्मरूपस्य रथस्य सारथ
यः इव सारथयः संयमरूपस्य रथस्य आत्मरूपस्य रथिकस्य प्रवचनरूपस्य तुरंगमस्य सम्यक्प्रवर्त्तना
त् रक्षणाच्च ।। अत्र मेघकुमारदृष्टांतो यथा ।। श्रे णिको राजा धारिणी राज्ञी तयोर्मेघकुमारः पुत्रः
श्रीमहावीरवाणीं श्रुत्वा प्रतिबुद्धः अष्टौ भार्या स्त्यक्त्वा दीक्षां गृहीतवान् रात्रौ शंते सुप्तस्य प्रविश
द्भिर्निर्गच्छद्भिश्च साधुभिस्तस्य संघट्टितो यथाक्रमेण मपि निद्रां न प्राप्त तदा विचारितं मेघकुमारेण अहो
एकस्यां रात्रौ अहमेवं संघट्टितस्तदा सदाऽहं कदर्थ नां कथं सहिष्ये ततः प्रातः प्रभुं पृष्ट्वा गृहवासं श्रयि
ष्ये इति चिंतयित्वा भगवत्समीपे गतः तदा भगवता प्रोक्तं हे वत्स त्वं इतो भवात् तृतीये भवे वैताढ्यपर्वते षष्ठिवं
१ सहस्रहस्तिनीयूथपतिः षड्दंतः श्वेतश्च सुमेरुप्रभनामा हस्ती अभूः तत्र दवाग्निनाभीतः सन् सरोवरे प्रवि
ष्टः पंके मग्नो वैरिहस्तिना दंतैर्विद्धः सप्तदिनानि व्यथां सहित्वा १२० वर्षाणि आयुः प्रपाल्य मृत्वा विंध्याचलपर्वते
पुनश्चतुर्दंतो रक्तवर्णः सप्तशतहस्तिनीनायको मेरुप्रभनामा हस्ती जातः एकदा दावानलं दृष्ट्वा जातिस्मर
णं समुत्पन्नं तेन योजनमानं स्थंडिलं कृतं वारत्रयं तृणकाष्ठादिदूरीकरणेन शोधितं ।। दावानलभयसति

कंठे ... पजन्
जिन
मोहस्यास्पति ६

ऽन्योऽपीति स्वं मिलितेऽपि स्वयं स्थितः कर्णमूले कं हृदयनार्द्धपादः उत्पाटितः तत्र पादस्थाने तत्क्षणे एव शशकः
स्थितः त्वमपि कृपया तथैव स्थितो मा म्रियतां वराक इति ततः सार्द्धद्वयदिने दावानल उपशांतः शशाद्योग
तास्तदा दिनत्रयांते त्वं पादं मुंचन् गिरेः शृंगमिव धरित्र्यां पतितः कृपया मृत्वा त्वं मेघकुमारो जातः तदानीं ह
स्ति संघट्टात् पादतोलने च दुःखी न जातः अधुना साधुसंघट्टितो दुःखी भवसि एवं श्रीमहावीरदेवेन धर्मे
स्थिरीकृतः ततो मेघकुमारेण अभिग्रहो गृहीतः अद्य नेत्रद्वयं मुक्त्वा घट्टनादौ मनसापि न दुःखं करिष्या
मि ततस्तपस्तप्त्वा मासिकीं संलेखनां कृत्वा विजयदेवे २ जातः ततश्च्युत्वा महाविदेहे सेत्स्यति॥ पुनः धम्म
वरचाउरंतचक्कवट्टीणं धर्म एव वरः प्रधानः तेन नर कादि चतुर्गत्यंतकरणात् चतुरंतेन मिथ्यात्वादि रि
पुच्छेदकत्वात् चक्रेणैव वर्त्तितुं शीलं येषां ते संप दाद् पुनः दीवो दीवो इत्यादि पंचपदरूपचतुर्थी
ढीबद्धांतपदानि व्याख्यानि तत्र दीप इव दीपः स मस्तवस्तुप्रकाशकत्वात् अथवा द्वीपो नद्यां बुद्धे
दुःखकल्लोलैः रहितानां आश्वासहेतुत्वात् पुनः त्राणं अनर्थप्रतिहननं तस्माद्धेतुत्वात् पुनः शरणं अ
र्थसंपादनं तस्य हेतुत्वात् पुनः गईगम्यते दुःस्थैः सौख्यार्थं आश्रीयत इति गतिः पुनः पइट्ठा प्रतिष्ठंति अस्यां
प्रतिष्ठा आधारः संसारगर्त्ते पततां जीवानां आलंबनत्वात् पुनः अप्पडिहयवरनाणदंसणधराणं अप्रतिह
ते कटादिभिः अस्खलिते वरे क्षायिकत्वात् केवलज्ञानदर्शने ते धरंतीति पुनः विअट्टछउमाणं छद्मारिघा
तिकर्माणि संसारो वा अभिधीयते तद् व्यावृत्तं यस्मात्ते संपदा ७ पुनः जिणेभ्यो रागादिजेतृभ्यः पुनः जाव
केभ्यो दत्ते परे अपि तान् रागादीन् जापयद्भ्यः पुनः तीर्णेभ्यः संसारसमुद्रं पुनः तारकेभ्यो दत्ते परानपि उपदेशाव
धारत्वात् ४

×साधुसं× ५
×इति मेघकुमार दृष्टांतः समाप्तः॥५

१८

मूर्धा
×त्री×

र्त्तितान् पुनः बुद्धेभ्यः अज्ञाननिद्राप्रसुप्ते जगति बुद्धेभ्यः स्वयं तत्त्वं पुनः बोधकेभ्यः अन्यानपि तत्त्वं बोधयंतीति बोधकास्ते
भ्यः पुनः मुक्तेभ्यः बाह्याभ्यंतरग्रंथिबंधनात् पुनः मोचकेभ्यः परेषामपि तस्मात् संपदा ८ एतानि विशेषणानि नवावस्थ
गृहाश्रित्योक्तानि॥ अथ सिद्धावस्थामाश्रित्योच्यते पुनः सव्वन्नूणं सर्वविशेषरूपतया जानंतीति पुनः सव्वदरिसी
णं सामान्यरूपतया पुनः पश्यंति न तु वैशेषिकमतवज्जडाः पुनः कीदृशेभ्यः एवंविधं स्थानं प्राप्तेभ्यः किं विशि
कल्याणं× ष्टं स्थानं शिवं निरुपद्रवं पुनः किं अचलं स्वभावप्रयोगकृतचलनाभावात् पुनः किं अरुजं आधिव्याध्यभावात् व्याधिरहितं ५
पुनः किं अनंतं अनंतार्थविषयज्ञानस्वरूपत्वात् अथवा अनंतसुखादिरूपत्वात् पुनः किं अक्षयं अ
नाशं सादि अनंतत्वात् पुनः किं अव्याबाधं पीडा कारि कर्माभावात् पुनः किं अपुनरावृत्ति पुनः नरागमन
संसारे अवतरणाभावात् पुनः किं सिद्धिगइ नामधेयं सिद्धिर्लोकांतक्षेत्रं स वासौ गम्यमा
नत्वात् गतिश्च सिद्धिगतिनामधेयं तत् तादृशं स्थानं च व्यवहारतः सिद्धिक्षेत्रं निश्चयतो यथास्थितं स्वं स्वरूपं
प्राप्तेभ्यः अष्टापि कर्मक्षयेण नमो जिणाणं नमो जि तेभ्यः आद्यंतकृतो नमस्कारो मध्यव्यापीति पुनर्जित
भयेभ्यो नव ३ पंच निवृत्तिः संपदा ९ नवापि न रुक्तं यतः स्वाध्याय १ ध्याने २ तप ३ सिद्ध ४ उपदेश ५ स्तु
ति ६ सद्गुणकीर्त्तने च वारं २ कृतं पुनरुक्तदोषो न भवेत् अनेन जिनजन्मादिषु शक्रः स्तौति इति शक्रस्तवः उ
च्यते अत्र शक्रस्तवे ३३ पदानि नव संपदः देशांते वा पश्चिमवर्णानां अत्र पूर्वाचार्यैः एवं शक्रस्तवानंतरं त्रिकाल
वर्त्तिजिनवंदनार्थं इमां गाथां पठंति जे अ अईआ सिद्धा ये अतीताः सिद्धाः जे भविस्संति णागए काले ये अनागते
काले भविष्यंति संपइ अ वट्टमाणा संप्रति काले च ये वर्त्तमानाः सर्वान् त्रिविधेन मनोवाक्कायैर्वंदामि नत्वा इत्या

र्हंतापि नरकादिस्थानमावार्हत इव वंदनार्हा भवंति तेन भरतेन मरीचिवत् इति सामान्यतः सर्वान् भावार्हतः स्तुत्वा अ
धुना नरधिकं वीरं स्तौति॥ तत्र सूत्रं॥ नमुत्थुणं समणस्स भगवओ महावीरस्स। आइगरस्स चरमतित्थयरस्स
पुव्वतित्थयरनिद्दिट्ठस्स जाव संपाविउकामस्स वंदामि णं भगवंतं तत्थगयं इह गए पासउ मे भयवं॥ व्याख्या
१॥ नमोस्तु मम श्रमणस्य भगवतो महावीरस्य आदिकरस्य चरमतीर्थकरस्य पूर्वतीर्थकरनिर्दिष्टस्य
यावत्संप्राप्तुकामस्य॥ अत्र यावत्करणात् सक्कथयं संपुण्णं इत्यत आरभ्य ठाणमिति पर्यंतं ग्राह्यं इदं यद्यपि
भगवतः सिद्धिगमने कामो नास्ति तथापि तदुक्त प्रवेष्ट नात् संप्राप्तुकाम इव संप्राप्तुकामः तत्र असंप्राप्तः इ
त्यर्थः॥ वंदामि भगवंतं तत्थगयं तत्र ब्राह्मणकुंडग्रामे देवानंदाकुक्षिगतं अहं इहगए त्ति॥
सौधर्मे स्थितः सन् पासउ मे भयवं तत्थगए इहगयं त्ति कट्टु। पश्यतु मां भगवान् तत्रगत
इह गतं मां इति कृत्वा इति भणित्वा श्रमणं भगवं तं महावीरं वंदते। पूर्वोक्तस्तुत्या नमस्यति शिरो
नमनेन। सिंहासनवरे पूर्वाभिमुखः संनिषिण्ण उपविष्ट : तए किं सत्तवाच्या॥ ततस्तस्य इंद्रस्य एतद्रूपः संक
ल्पः समुत्पन्नः कीदृशः संकल्पः आध्यात्मिकः आत्मनि अधि अध्यात्मं तत्र भव आध्यात्मिकः आत्मविषय इत्यर्थः॥
पुनः कीदृशः चिंतितः चिंतात्मको न ध्यानात्मकः स च अभिलाषितोपि स्यात् अतः प्रार्थितः प्रार्थना संजाता अस्मिन्निति
प्रार्थितः अभिलाषात्मक इति भावः पुनः कीदृशः मनोगतः कः संकल्प इत्याह न एवं भूअं न एवं पूर्वं जातं १ न एवं भव्वं
नापि एवं भवति २ न एवं भविस्सं नापि एवं भविष्यति ३ यत् अर्हंतो वा १ चक्रवर्तिनो वा २ वासुदेवा ३ बलदेवा वा
४ एते उत्तमकुलेषु आयाइं आयाति धातुरागमे जन्मनि इति उच्यते तत्र आयासिषुः आजग्मिरे १ आयांति वा जा

×सुवा+२

×इत्यादि सूत्रं॥ तएणं तस्स सक्कस्स देविंदस्स इत्यि

का० २१

यंते २ आयाइस्संति आयास्यंति ३ कीदृशेषु कुलेषु अंतकुल० अंत्यानि अंत्यवर्णत्वात् शूद्रकुलानि तेषु १ पंतकुल० प्रां
तानि अधमानि तेषु २ तुच्छकुलेषु वा तुच्छानि कुटुंबस्य कृशत्वेन अल्पत्वेन ३ दरिद्दकुल० दरिद्राणि सर्वथा निर्धनानि ते
षु ४ किवणकुल० किराटादि तद्वंतः तेषु ५ भिक्खायरकुल० भिक्षाचराः तालाचरादयः तेषु ६ माहणकुल० ब्राह्मण
धिग्जातयः तेषु ७ एतेषु सप्तकुलेषु एते अर्हदादयः अवतारेण आगता नायांति न आगमिष्यंति परं एवं खलु एते
अर्हदादयः ४ उग्रादि ७ कुलेषु समागच्छंति कीदृशेषु इत्याह उग्गकुल० उग्राः श्री आदिनाथेन आरक्षकत्वे
नियुक्तास्तेषु १ भोगकुल० भोगा ये प्रभुत्वेन गुरुत्वे स्थापितास्तेषु २ राइन्नकुल० राजन्याः वयस्यतया मित्र
त्वेन स्थापितास्तेषु ३ इक्खागकुल० इक्ष्वाकुवंश्या आद्यवंश्यास्तेषु ४ खत्तियकुल० क्षत्रियाः श्री ऋ
षभदेवेन रक्षकत्वेन स्थापिता राज कुलीनास्तेषु ५ हरिवंसकुल० हरिवर्षक्षेत्रात्
आनीतात् युगलात् उद्भवेषु ६ अन्नतरेसु वा तह प्पगारेसु विसुद्धजाइकुलवंसेसु वा अन्यतरेषु
ज्ञात १ भट २ मल्लकि ३ लेच्छकि ४ कौरव्यादिकुलेषु तत्र ज्ञाताः श्री ऋषभस्वामिवंशजा इक्ष्वाकुवंश्या ए
व १ भोगा नागवंशजाः २ भटाः शौर्यवंतो योधाः ३ मल्लकि लेच्छकिन अराजविशेषाः ४ कौरव्याः कु
रुवंशजाः ५ जाति मातृपक्षः कुलं पितृपक्षः ताभ्यां विशुद्धे जातिकुले येषु उत्तमकुलवंशेषु आगताः
आगच्छंति आगमिष्यंति ३॥ ॥अथ च अयं श्रीमहावीरदेवो ब्राह्मणकुले आयातस्तत्कथं॥ तत्रो अत्थिपुणएसे
वि भावे लोगच्छेरयभूए अणंताहिं उस्सप्पिणि ओसप्पिणिहिं विइक्कंताहिं समुप्पज्जइ १७॥ व्याख्या॥ अस्ति पुन
रेषोपि भावो भवितव्यतारूपः पदार्थः समुत्पद्यते लोके आश्चर्यभूतः अनंताभिरुत्सर्पिणीभिः अनंताभिरवस

×३×

×वंसेसु ××
सत्रे॥०

सूत्रं ४

उत्पन्नयते १९

र्पिणी निबद्धं उत्पद्यते कथं नामगोत्रस्य नामकर्मणो ऽथवा नाम्ना संज्ञया गोत्रस्य नीचैर्गोत्रस्य अक्षीणस्य स्थितिरक्ष
यात् उत: अवेदितस्य तद्रसस्य अननुभूतत्वात् उत: अनिर्जीर्णस्य जीवप्रदेशेभ्यो ऽपरिशाटनात् उदयेन यत
अर्हदादयस्तु द्वारः अंतकुलादिषु समसु आगता आगच्छंति आगमिष्यंति परंतो वैर जोणीजम्मण निक्खमणे
णं। यो न्यांजमार्थ निक्खमणेन निक्खमिंसु: निक्खमंति। निक्खमिस्संति अथच अयं श्रमणो भगवान् महावीर
देव: जंबुद्दीवे भरहक्खेत्ते माहणकुंडग्गामे नयरे उसभदत्तस्य भार्याया देवानंदायाः कुक्षौ अवतीर्णः ततः किं कर्तव्यं
इत्याह तं जीअमेअं तीअपच्चुप्पन्नमणागयाणं सक्काणं देविंदाणं देवराईणं अरिहंते भगवंते तहप्पगा
रेहिंतो अवख्खा॥ ततइंदाणं इदं जीतमेतं आचरितं कल्पो वर्त्तते त्रयाणामेकार्थाः किंविशिष्टानां इं
द्राणां तीअपच्चुप्पन्नमणागयाणं अतीतानां वर्त्तमानानां अनागतानां च तीअत्ति तीतादौ इ
त्यनेन अकारलोपे तीअमिति॥ किं जातं यत अर्हदादीन् अंतकुलादिभ्य: समस्त्य: उग्रकुलादिषु
संहरा विस्तपसंक्रमयितुं॥ अत्र अस्यां अवसर्पिण्यां दस आश्चर्याणि जातानि तानि कथ्यंते प्रथमं श्रीमहावी
रदेवस्य केवलज्ञाने उत्पन्नेपि गोशालककृतउपसर्गो जात स्तत्संबंधो यथा॥ एकदा श्रीमहावीरदेव: श्रावस्त्यां
नगर्यां समवसृतो गोशालकोपि तत्रास्ति गौतमस्वामी गोचरीगत: सन् लोकानां बहूनां इदं वचनं श्रुतवान् यत:
द्वौ जिनौ सर्वज्ञौ श्रावस्त्यां श्रीमहावीरो गोशालकश्च अथ मंखलिनाम मंखो ऽभूत् तस्य सुभद्रा नाम्नी भार्या शरवणग्रामण
बहुलब्राह्मण गोशालायां स्थिता तत्र पुत्रो जात: इति गोशालनाम दत्तं स कियत्काले मम मिलित: षट्वर्षाणि छद्मस्थेन
मया सार्द्धं विहृतो ऽस्मात् एव बहुश्रुतवान् जातो नायं जिनो नायं सर्वज्ञः इदं भगवतो वचनं श्रुत्वा बहुजनो नगर्यां

तेनो गोतमस्वामि नाभगवत्समीपस मागस्य गोशालोत्पत्ति स्वरूपं पृष्टं। भगवता प्रोक्तं। अयं मंखलिपु त्रोनायं सर्वज्ञ:। कथं एको। ३३ हे

नधाहि। उवसग्ग गब्भ हरणं इत्थीतित्थं अभाविआपरिसा। कण्हस्स अवरकंका। ओअरण चंदसूराणं॥१॥ हरिवंसकुलुप्पत्ती चमरुप्पाओ अट्ठसयसिद्धा। असंजयाण पूआ। दस वि अणंतेण कालेण॥२॥ रिसहे समए अट्ठसयं सिद्धं सीअलजिणंमि हरिवंसो। नेमिजिणे अवरकंका गमणं कण्हस्स संपन्नं॥३॥ इत्थीतित्थं मल्ली। पूआ असंजयाण नवमजिणे। अवसेसा अच्छेरा वीरजिणंदस्स तित्थंमि॥४॥ दसमु विविसे सेवादस २ अच्छेरयाइ जाणा। हि सव्वन्नुत्ता मिटाइं। तित्थुगालिय तणियाए॥ पाअ प्यकथा॥ ४ ... तत

२०

जाताश्चि०२

त्रिकचतुष्कचत्वरादिषु परस्परं एवं वदतिस्म। यत् गोशालो मंखलिपुत्रो न जिनो न सर्वज्ञ इति गोशालो लोकादिव
चनं श्रुत्वा कुपित: सन् गोचर्यां नगर्यां आगच्छंतं भगवतां तेवासिनं आनंदनामानं साधुं एवं प्राह भो आनंद त्वं ए
कं एकं दृष्टांतं शृणु केपि वणिजो धनार्थिनो नानाप्रकारक्रयाणकै: शकटानि भृत्वा देशांतरं चलिता: महाटव्यां
प्रविष्टा: तृषापीडिता: संतो जलं गवेषयंति तत्र चत्वारि वल्मीकशिखराणि शाद्वलवृक्षाणां मध्ये दृष्टानि अथ पा
नीयं लातुं इति ज्ञात्वा एकं शिखरं तैर्भिन्नं तत्र पानीयं नि:सृतं आकंठं पीतं भाजनानि च भृतानि ततो लोभाविष्टै
र्वृद्धरूपेण कष्टदर्शिना वार्यमाणैरपि द्वितीयं शिखरं भिन्नं तस्मात् सुवर्णं नि:सृतं एवं तृतीयं भिन्नं तस्मा
त्ररत्नानि नि:सृतानि ततो लोभाच्चतुर्थमपि शिखरं भिन्नं ततस्तस्मान्महाकाल: कृष्णवर्ण: रक्तलोच
न: कोपारुणो लघुलपायमानजिह्व: भुजंगमो नि:सृत: स सूर्यसन्मुखो दृष्ट्वा सर्वानपि
कालं कालयामास। परं यो हितशिक्षादाता वृद्धवणिक् अभूत् तस्य न्यायदर्शी इति हेतोर्वनदेवतया
अनुकंपया जीवन्रक्षित: स स्वस्थानं प्राप्त: एवं त्वादीयं धर्माचार्यं महावीरं आत्मीयसंपदा अपरितुष्टं
मम अवर्णवादविधायिनं अहं अद्य स्वकीयतपसा भस्मसात् करिष्यामि त्वं प्रपण्णो ऽहं प्रचलितोस्मि वाच:।
न्यायदर्शित्वात् वृद्धरूपवत्वरक्षिष्यामि एतत् गोशालकवचनं श्रुत्वा भीत आनंदमुनिर्भगवत्समीपे आगत्य स
र्वं कथितवान् भगवतापि गौतमादीन् आकार्य प्रोक्तं भो गोशालक: समागच्छन्नस्ति सर्वेपि दूरीभवंतु न केना
पि नकिमपि वक्तव्यं। ततो गोशालक आगत एव आगत्य च भगवंतं प्रतिप्राह भो काश्यप आयुष्मन् काश्यप एवं म
इति एवं वदसि। यत् गोशालो मंखलिपुत्र: यो गोशालस्तव शिष्योऽभूत् स तु मृतो ऽहं तु अन्य एवास्मि परं गोशा

लकशरीरं परीषहसहनसमर्थं ज्ञात्वा मध्ये प्रविष्टोऽस्मि इत्यादिकल्पितवृत्तांतं कथयति स्म एवं सति सर्वानुभूतिसु
नक्षत्रनामानौ साधू स्वधर्माचार्यश्रीवीरपराभवमसहमानौ गोशालकनिवारणाय प्रवृत्तौ गोशालकेन कोपे
न तेजोलेश्यया दग्धौ ततो भगवता प्रोक्तं भो गोशालक त्वं अन्यथाऽऽलप्य तेन किं आत्मानं अपलपसि त्वं मया दीक्षि
तो मयैव शिक्षितो मयैव बहुश्रुतीकृतः ततो मा वादीरीर्ष्या ततः पुनरपि गोशालकेन तेजोलेश्या मुक्ता सा
श्रीभगवंतं प्रदक्षिणीकृत्य भगवच्छरीरमनुतापयंती गोशालकशरीरे प्रविष्टा तया गोशालकशरीरं दग्धं
गोशालः सप्तमरात्रौ कालं कृतवान् च भगवतश्च शरीरे तस्य लोहितस्रावं इदमाश्चर्यं ततश्च अश्रुनिमित्तं
कृतेन अथ षष्मासेन रेवत्या सिंहानगारः प्रति लाभितः सिंहेनापि भगवतः पाकः प्रदत्तो भगव
तो कोष्ठके प्रक्षिप्तः समाधिश्च जातः॥ इति प्रथमं आश्चर्यं १ गर्भहरणं प्रतीतं इदमपि वाच्यमा
द्वितीयमाश्चर्यमिति॥ २ ॥ तृतीयमिदं आश्चर्यं मल्लीकुमार्या स्त्रीवेदेन तीर्थं प्रवर्त्तितं॥ त
त्संबंधो यथा॥ श्रीमहाविदेहक्षेत्रे सलिलावतीविजये वीतशोकायां नगर्यां बलो नाम राजा तस्य धा
रणी नाम्नी भार्या तयोर्महाबलः पुत्रो द्विसप्ततिकलावान् पित्रा यौवने कमलश्रीप्रमुखपंचशतकन्यानां पा
णिग्रहणं कारितः पंचशतानि प्रासादानां रत्नस्वर्णरूप्यादीनां च पित्रा यौतके दत्तानि बलो महाबलाय राज्यं दत्त्वा
चारित्रं गृहीतवान् क्रमात् मोक्षं च प्राप्तः॥ अथ महाबलस्य राज्ञः अचल १ धरण २ अभिचंद्रः ३ पूरण ४ वसु ५ वैश्र
मणाः ६ षण्मित्राणि मिलितानि। अन्यदा गुरोः पार्श्वे धर्मं श्रुत्वा षड्भिर्मित्रैः समं चारित्रं गृहीतं सप्तापि गुरुप्रसादा
त् एकादशांगानि पेठुः सर्वैः समानं तपः कार्यमिति प्रतिज्ञा कृता तपः कर्तुं प्रारब्धं महाबलस्तु आगामिभवेऽपि अ २१

हमेतेभ्यो अधिको भवामीति हेतोः अधिकतपःकरणाय पारणकदिने शिरो मे दुःखतीत्यादि मिषं कृत्वा मायया उपवा
सं कृत्वा मायाप्रत्ययं स्त्रीगोत्रं कर्म बद्धवान् विंशतिस्थानकसेवनेन तीर्थंकरनामगोत्रमपि बद्धवान् ततः षड्भिर
पि लघुसिंहनिःक्रीडितं तपः प्रारब्धं। तद्विधिरेवं प्रथमश्रेण्यां पारणे विकृतित्यागः १ द्वितीयश्रेण्यां निर्विकृति
त्यागः २ तृतीयश्रेण्यां अलेपकृत आहारः ३ चतुर्थश्रेण्यां आचाम्लं ४ दिनमानमिदं वर्षद्वयं दिनानि अष्टावि
शतिः २ एवं महासिंहनिःक्रीडितमपि तपः प्रारब्धं तदपि पूर्ववत् नवरं दिनमानमिदं षड्वर्षाणि मासद्वयं अ
ष्टादश च दिनानि ततः सर्वेऽपि प्रांते द्विमासिकीं संलेखनां कृत्वा चतुरशीतिपूर्वलक्षायुः चतुरशीतिसहस्र
वर्षाणां आयुः प्रपाल्य सप्तापि जयंते विमाने देवत्वेन द्वात्रिंशत्सागरोपमायुष्काः देवाः समुत्प
न्नाः १ ततश्च्युत्वा आद्यो अचलजीवो अयोध्यायां प्रतिबुद्धिनामा राजा जातः १ द्वितीयो धर
णजीवश्चंपायां चंद्रच्छायो राजा जातः २ तृतीयो अभिचंद्रजीवः काशीनगर्यां शंखो राजा जा
तः ३ चतुर्थः पूरणजीवः श्रावस्त्यां रुक्मी नाम राजा जातः ४ पंचमो वसुजीवः कुरुषु अदीनशत्रुनामा रा
जा जातः ५ षष्ठो वैश्रमणजीवः कांपिल्यायां जितशत्रुनामा राजा जातः ६ एवं षडपि पृथक्पृथक्स्थानेषु राजा
नो जाताः महाबलजीवस्तु मिथिलानगर्यां कुंभराजस्य प्रियायाः प्रभावत्याः कुक्षौ १४ स्वप्नसूचितः समु
त्पन्नः मार्गशिरसुदि ११ रात्रौ मल्लीकुमारीत्वेन अर्हन् जातः क्रमात् मल्ली यौवनं प्राप्तः अवधिज्ञानेन षडपि
पूर्वभवमित्रनृपान् अन्यान्यस्थानेषु उत्पन्नान् ज्ञातवती स्म ततस्तेषां प्रतिबोधनाय रत्नमयं मोहनगृहं
अशोकवाटिकामध्ये कृतं तस्मिन्मोहनगृहे षडपवरिकासहिते जालमंडपे रत्नमयी निजसदृशां स्वमूर्तिं च

॥ ततो मल्ली प्रतिदिनं एकैकां अन्नपिंडीं स्वहस्तेन पूत्तलिबिडि क्षिप्त्वा २ रत्नोत्पलपिधानं ददाति इतश्च अयोध्यायां प्र-
तिबुद्धिः राजा पद्मावत्याः स्वदेव्याः नागयक्षमंदिरे पूजार्थं रचितं अत्यंतं अद्भुतं श्रीदाम दृष्ट्वा दूतान् पृच्छति स्म सोऽह
ताईदृशं क्वापि श्रीदाम दृष्टं तदा दूतैः प्रोक्तं हे राजन् मल्लीकन्यायाः इतोपि अधिकतरं दृष्टं तस्य अग्रे इदं लक्षां-
शोपि नायाति का मल्ली कीदृशी च इति सर्वस्वरूपं कथितं ततः पूर्वभवप्रेमवशात् प्रार्थनार्थं राज्ञा कुंभराजानं मल्ली ४
प्रति दूतो मुक्तः ॥ १ इतश्च चंपानगर्यां अरहन्नकप्रमुखा व्यवहारिणः संति ते च प्रवहणे चटिताः गंभीरपत्तनं ग-
ताः पुनर्द्वीपांतरं चलिताः तस्मिन् अवसरे इंद्रेण अ- रहन्नकश्रावकस्य सम्यक्त्वप्रशंसा कृता अश्रद्द-
धतैकेन अरहन्नक सदृशो दृढसम्यक्त्वस्य धार- कोऽन्यः क्वापि नास्ति तद्वचनं श्रुत्वा कोपि मिथ्या-
दृष्टिर्देवो असहमानः तत्र आगत्य महता उत्- पातान् कृतवान् मिथ्यादृष्टिलोकाः स्वकीयरदे-
वान् हरिहरादीन् स्मरंति स्म अरहन्नकस्तु श्रा- वकः साकारं अनशनं उच्चार्य वीतरागदे-
वं स्मरन् अक्षोभ्यः स्थितो देवेन बहुप्रकारं क्षोभि- तोपि न क्षुब्धः ततो देवेन प्रोक्तं वीतरागदेवं मुक्त्वा ह-
रिहरादिदेवान् स्मर यथा उत्पातं निवारयामि नो चेत् अधर्मेण सर्वान् समुद्रे बोलयिष्यामि यानपात्रं नवशलाके-
रपि सार्थैः प्रोक्तं अरहन्नक एवं कुरु परं अरहन्नको निजसम्यक्त्वधर्मे दृढः स्थितः ततस्तुष्टः कुंडलयुगलर-
त्नो भूत्वा प्रदक्षिणां दत्त्वा करकोमलाया डथित्वा स्तवति स्म अहो अरहन्नक त्वं धन्यः त्वं कृतपुण्यः तव जन्म-
जीवितं सफलं इंद्रेण या व्याख्यानयति सत्या एव दृष्टा क्षमिया च त्वं यत्कथयसि तद्ददामि । अरहन्नकः २२
प्राह उभयलोकसाधको जिनधर्मो मया प्राप्तोस्ति अन्यत् मम किमपि न विलोक्यते ततो अमोघं देवदर्शनं इति

क्त्वा अनिच्छतोपि कुंडलचतुष्टयं देवो दत्वा स्वस्थानं गतः अथ ते व्यवहारिणः कुशलेन गंभीरपत्तनं प्राप्य क्रमात् मि-
थिलायां आगताः तत्र कुंभस्य राज्ञः कुंडलद्वयं प्राभृतीकृतं । राज्ञा च मल्लीकुमार्यै दत्तं ततश्चंपायामागतास्तत्र चं-
द्रच्छायराजाय स्वकीयस्वामिने अन्यत् कुंडलद्वयं प्राभृतीकृतं । तस्मिन्नवसरे राज्ञा पृष्टं भो व्यवहारिणः परदेशे [कि-
कमपि आश्चर्यं दृष्टं । तदा तैर्मल्लीकुमार्याः रूपवर्णनं कृतं । न एतादृशं क्वापि रूपमस्ति ततश्चंद्रच्छायराजेनापि कुं-
भं प्रति दूतो मुक्तो यन्मल्ली मम देयेति २ पुनरितश्च अन्यदा मल्लीकुंडलं भग्नं कुंभेन राज्ञा कुंडलसंधानार्थं स्व-
र्णकाराः समादिष्टास्ते प्राहुः हे देव इदं देवसंबंधि कुं- डलं न मया संधातुं शक्यते ततो रुष्टेन राज्ञा ते स्वर्णका-
रा देशान्निःकाशिताः आगता वाणारस्यां शंखराज्ञः समीपे निजवासार्थं गताः राज्ञा पृष्टं कथं स्वदेशात्य-
क्ता अत्रागताः तेन कुंडलसंबंधं कथयता मल्ल्या रूपवर्णनं कृतं तेनापि शंखराज्ञा कुंभं प्रति दू-
तो मुक्तः ३ इतश्च रुक्मी राज्ञापि सुबाहुनाम्न्याः नि- जपुत्र्याः कृते चातुर्मासिकमज्जन विहितो क्रियमा-
णायां दूताः पृष्टाः प्राहुः मल्लीमज्जनकस्याग्रे इदं लक्षांशोपि नायाति तेनापि रुक्मी राज्ञा कुंभं प्रति मल्ली-
निमित्तं दूतो मुक्तः ४ इतश्च कुंभपुत्रेण मल्लेर्लघुभ्रात्रा मल्लदिन्नेन चित्रकारैः चित्रसभा चित्रयिता । चित्रकारेण
लब्धिमता यवनिकांतरितमल्लिपादांगुष्ठं दृष्ट्वा मल्लीरूपं तत्स्वरूपं चित्रितमासीत् तत्र एकदा मल्लदिन्नः स्वभार्या-
भिः सह क्रीडन् मल्लीरूपं दृष्ट्वा लज्जितो रोषात् हस्तौ छित्त्वा चित्रकरो देशान्निःकासितः स हस्तिनापुरं गत्वा अदीनश-
त्रोः राज्ञो मिलितः मल्लीरूपं वर्णने कृते अदीनशत्रुराज्ञापि मल्लीनिमित्तं कुंभं प्रति दूतो मुक्तः ५ इतश्च धर्म-
चर्चायां एका परिव्राजिका मल्लीकुमार्या जिता मानभ्रष्टा कृता सा रुष्टा सती कंपिल्लानगर्यां गत्वा जितशत्रुराज-

सादृश्ये मल्लिरूपं पटे लिखित्वा दर्शयति स्म तेनापि राज्ञा रूपमोहितेन मल्ली कृते कुंभं प्रति दूतो मुक्तः ६ एवं षण्णामपि
राज्ञां षडपि दूताः समकालं कुंभसमीपे गताः मल्ली याचिता राज्ञा सर्वेपि दूता अपमानिता न कस्यापि राज्ञो मम
पुत्रीमहं दास्यामि ततः षडपि राजानो दूतापमानेन निजं प्रसैन्यं लात्वा समकालमागत्य मिथिलानगरीं रोधयामा
सुः कुंभराजा बहिर्निःसृत्य युद्धं कुर्वन् भग्नो मिथिलां प्रविष्टः ततो मल्लिप्रपंचवचनेन राज्ञा सर्वेप्याकारिताः स्ते रा
जानो रत्नगृहं प्राप्ताः षट्सु अपवरिकासु पृथक् पृथक् प्रविष्टास्तदा मल्ल्याः प्रतिमां साक्षान्मल्लिमिव दृष्ट्वा मोहितास्ततो
मल्लिकुमार्या तत्र आगत्य तस्याः प्रतिमायाः शिरःपिधा नं उद्घाट्य दूरीकृतं ततः उच्छलितो महादुर्गंधस्ततस्ते
राजानो वस्त्रेण नासिकां निपीड्य पृष्ठं कुर्वतो नष्टाः ततस्तेषां प्रतिबोधाय मल्ली आगत्य कथयति स्म
हं हो राजानो यदि रत्नमय्यामपि पुत्तलिकायामाहारसंसर्गादीदृग्दुर्गंधो जातो भवतां
घ्रातुं न शक्योऽसौ तदा स्वभावदुष्टे तदा स्वभावादिकर्दमे धातुस्त्रीषु किं एतावान् रागः प्रतिबंधश्च क्रियते
कथं रागांधा जाताः इत्यादि प्रतिबोधवचनैः पूर्व भवमित्रता कथनेन शीघ्रं संजातं जातिस्मरणं ते स्वस्थाने गच्छंतु
मम केवलज्ञाने उत्पन्ने शीघ्रं समागंतव्यं तेपि सर्वे स्वस्वस्थानं गताः मल्लिश्च समये त्रिशती राजपुत्रीभिः समं दीक्षां
जग्राह। तस्मिन्नेव दिने केवलोत्पत्तिः षडपि राजानो मित्रैः दीक्षां गृहीता मोक्षं गताः मल्ल्याश्च स्त्रीवेन तीर्थं
प्रवर्तितं।। इदं तृतीयमाश्चर्यं।। ३।। अथ अभाविता परिषत्। श्रीमहावीरदेवस्य केवलज्ञाने उत्पन्ने दिविः
समवसरणं रचितं सुरानराश्च कोटिशः समागताः भगवता देशना दत्ता परं केनापि न सर्वविरतिर्नापि सम्यक्त्वं
च गृहीतं निःफला देशना जाता न हि कदापि तीर्थंकराणां देशना निःफला भवति इयं च प्रथमा देशना निःफ २३

ला जाता इदं चतुर्थमाश्चर्यं।। ४।। अथ कृष्णस्य अपरकंकागमनं पंचममाश्चर्यं व्याख्यायते।। एकदा हस्तिनागपु
रे पंच पांडवा द्रौपदी कुंती प्रमुख परिवार परिवृतः पंडुराजा सिंहासने उपविष्टोऽस्ति तस्मिन्नवसरे सभायां कच्छु
ल नामा नवमो नारदः समागतः परं कीदृशोऽस्ति नारदः दर्शनेन अतिभद्रकः पुनर्विनीतः पुनः अंतर्दुष्टचित्तः पु
नः आश्रितानां सौम्यप्रियदर्शनः पुनः असलितं अखंडं वल्कलचीवरं येन परिधानं कृतमस्ति पुनर्यस्य कृष्ण
मृगचर्मणा हृदये उत्तरासंगः कृतोऽस्ति पुनर्यस्य जटाजूटेन शिरो दीप्तं वर्तते पुनर्यो यज्ञोपवीतमक्षकृतक
लाचिंकासरणमुंजमेखलावल्कलचीरप्रमुखतापसो पकरणानि धरन् हस्तकृतकच्छपिकः गीतप्रियः पुन
राकाशगामिनी पातालगामिनी स्तंभिनी मोहनी प्रज्ञप्ती इत्यादि विद्याधरसंबंधि विद्यानिधिः ख्या
ताकीर्तिर्यस्य स पुनः श्रीरामकेशवयोरत्तीष्टः पुनः शांबप्रद्युम्नानिरुद्धनिषधसारणगज
सुकुमालसुमुखादि यादवसार्धत्रयकोटिकुमाराणां हृदयवल्लभः पुनः कलहयुद्धकोलाहल
प्रियः पुनर्भद्रस्य अभिलाषी बहुसंग्रामाणां दर्शी। सोत्सुकः पुनर्लोकानां असमाधिकरः एतादृशः सम
ग्गगनतलमुल्लंघयन् कलहकंदलं अनुगवेषयन् आगतः ततः पंडुराजप्रमुखैः सन्मानितः ततः उत्थाय अंतः
पुरमध्ये गतः तत्र द्रौपद्या अस्तुब्धानादिना न सत्कारितो न सन्मानितो यतोऽयं असंयती अविरती अप्रत्याख्या
तपापकर्मा ततो नारदेन रुष्टेन विचारितं इयं द्रौपदी रूपलावण्यादिना गर्विता पंचभर्तृवल्लभा च ततएनां सप
त्नीव्रातसंकटे पातयामि इति विचार्य नारदो धातकीखंडे दक्षिणार्धभरते अमरकंका नगर्यां स्त्रीलोलुपस्य
पद्मनाभस्य राज्ञः सभायां गतः ततः पद्मनाभेन स्वकीयसप्तशतसुंदरीसौंदर्यतो जातगर्वेण प्रश्नः कृतः

तो नारदमसत्कृतः ततः स मर्त्यं कस्यापि कृतः पुरं दृष्टं न वा ततो नारदेन रूपमनुपमं दृष्टां तदा तेन मानमुक्तार्थं द्रौपदी
रूपवर्णनं कृतं ततः कंदर्पदर्पोन्मादेन पद्मनाभेन पोषधशालायां गत्वा उपवासत्रयं कृत्वा पूर्वसंगतिको दे
वः आराधितः तस्याग्रे प्रोक्तं द्रौपदीं शीघ्रमानय ततः स देवस्तत्र गत्वा अवस्वापिनीं निद्रां दत्वा युधिष्ठिरस्य पार्श्व
सुप्तां द्रौपदीमुत्पाट्य पद्मनाभस्य आरामे कवाटिकायां आनीय मुमोच ततः पद्मनाभेन दृष्टा सती प्रार्थिता
तदा द्रौपद्या प्रोक्तं मम प्रियमातुलात्मजः कृष्णवासुदेवोऽस्ति स यदि षण्मासमध्ये मम शुद्धिं न करोति तदा त
वाग्रेऽस्मि ततः पद्मनाभेन विचारितं बलान्न प्रीतिरि तिहेतोर्मनसि आधाय अंतःपुरमध्ये मुक्ता द्रौपदी
च षष्ठषष्ठपारणे आचाम्लं कुर्वती तस्थौ ॥ ॥अथ द्रौपदीसंहरणानंतरं प्रभाते किं जातं तदाह सुप्तो
त्थितो युधिष्ठिरः पुत्रो द्रौपदीं पार्श्वेऽपश्यन् न सर्वत्र विलोकिता परं न क्वापि दृष्टा इति मात्रग्रे
पितामहः ततः पांडुरेण एष स्वरूपं निरूपितं ततः पांडुराज्ञापि कौटुंबिकद्वारा सर्वत्र पुरमध्ये उद्घो
षणा दापिता परं तच्छुद्धिर्न जाता ततो ज्ञातं केनापि देवेन दानवेन वा गंधर्वेण वा किंनरेण वा किंपुरुषे
ण वा अपहृता ज्ञायते ततः राज्ञा प्रोक्तं यो द्रौपदीशुद्धिं वक्ति तस्मा अभिमितां संपत्तिं ददामि परं न कोऽपि जाना इच्छितं
ति ततः पांडुराज्ञा निजभार्या कुंती कृष्णपार्श्वे शुद्धिकारापणाय मुक्ता कुंत्यपि द्वारिकाया उद्याने गत्वा स्व
यं स्थित्वा कौटुंबिकेन निजागमनं ज्ञापयामास कृष्णोऽपि हस्तिस्कंधारूढः सपरिकरः सम्मुखमागत्य ह
स्तिनउत्तीर्य पादयोर्निपत्य महाविच्छित्या निजपितृष्वसारं निजमंदिरे आनीतवान् आगमनप्रयोजनं च
पृष्टं कुंत्यापि द्रौपदीसंहरणं ज्ञापितं ततः कृष्णेन प्रोक्तं यदस्यां पृथ्व्यां कोऽप्यन्यो न वर्तते सोऽपि स्वकीयां भार्यां रक्ष २४

ति पांडवैः पंचभिरपि एका भार्या न रक्षिता अहं तु षोडशसहस्रगोपांगना रक्षामि कुंत्या कथितं सांप्रतं ह
ास्यवेलास्ति ततः कृष्णेन प्रोक्तं अर्द्धभरतमध्ये पाताले वा यत्र क्वापि द्रौपदी भविष्यति तत्र शुद्धिं कार
यित्वा उपदास्यामि न चिंता कार्या इति सत्कारसन्मानादिना संतोष्य कुंती हस्तिनागपुरे प्रेषिता ततः
कृष्णः कौटुंबिकैः सर्वत्र उद्घोषणां दत्तवान् परं न क्वापि शुद्धिः प्राप्ता ततस्तस्मिन्नवसरे किं कर्त्त
व्यतामूढा यादवसभा जाता तावता नारदः समागतः कृष्णेन पृष्टं अहो नारद भवद्भिः सर्वत्र भ्रमद्भिः क्व
ापि द्रौपदी दृष्टा श्रुता वास्ति तदा कथ्यतां ततो नारदेन प्रोक्तं अन्यदा धातकीखंडे दक्षिण
भरतार्द्धे अमरकंकायां नगर्यां पद्मनाभभवनमध्ये द्रौपदीसदृशा दृष्टा ततः कृष्णेन
प्रोक्तं भवतामेवेदं कर्म ततः कृष्णेन पांडुनृपाय दूतो मुक्तः प्रोक्तं च तत्र द्रौप
दीशुद्धिर्जातास्ति भवद्भिः पंचपांडवैः अग्रे गिन्नीसिंधुलाक्षा पूर्वसमुद्रवेलातटे समागंतव्य
मेव तावता हूतो गत्वा तथैव कारितवान् ततः कृष्णवासुदेवोऽपि प्रयाणभेरीं वादयित्वा समुद्रविज
यादि दशदशार्हादिपरिवारसहितो वासुदेवर्द्धिविच्छित्या हस्तिस्कंधाधिरूढो धृतमस्तकछत्रचाम
रैर्वीज्यमानः पूर्वसमुद्रवेलाकूले संकेतस्थाने पांडवैः समं मिलितः ततः कृष्णेन पोषधशालायाम
ष्टमं कृत्वा सुस्थितनामा लवणाधिपतिर्देव आराधितः सोऽपि आगतः कृष्णेन प्रोक्तं भो सुस्थित द्रौप
द्यानयनार्थं अहं यामि पंचानां पांडवानां षष्ठस्य मम एवं षण्णां रथानां मार्गं देहि ततः सुस्थितदेवः
प्राह मा उद्यमं कुरु पद्मनाभस्यापि पूर्वसंगतिदेवेन द्रौपदी आनीय दत्तास्ति न त्वया ततो यदि क

यद्यस्मि तदा द्रौपदीं ततो लात्वा हस्तिनागपुरे हं यामि अथवा पद्मनाभं रथवाहनबलसमेतं समुद्रे क्षिपा
मि ततो हरिर्बलगर्वितः प्राह निर्वमम ज्येष्ठा त्वं मम मार्गं वितर ततो देवेन दत्तमार्गेणया मार्गो दत्तः
श्रीकृष्णः सर्वस्मिन्नं समुद्रे वेलाकूले मुक्त्वा पंचपांडवैः समं समुद्रं रथैरुल्लंघ्य अमरकंकाया उद्याने ग
तः स्थितवांश्च तत्र दारुकनामा सारथिर्मुक्तः प्राक् वत्सो दारुक त्वं यात्वा तत्र गत्वा पादेन पद्मनाभस्य पादपी
ठमाक्रम्य कुंताग्रेण लेखं दद्या भ्रकुटिं त्रिवलिं ललाटे चारोप्य कोपं कृत्वा इदं वाच्यं रे पद्मनाभ
रे अकालमरणवांछक रे दुरंतप्रांतलक्षण रे हीनपुण्यचतुर्दशीजात रे श्रीह्रीधीधृतिकीर्तिवर्जि
त अद्य त्वं न भवसि यतो मम भगिनी द्रौपदी त्वया हृता अथवा द्रौपदीं देहि नो चे
त्संग्रामे सज्जो भव ततः पद्मनाभोपि कृष्णस्य दूतवचनं श्रुत्वा कोपं कृत्वा अव
ध्यो दूत इति हेतोः कृतं अहं तं असत्कारितं अपमानितं अपद्वारेण निःकासयत्स्वयं ह
स्तिस्कंधं समारुह्य सर्वसैन्यं लात्वा संमुखं समागत्य स्थितः ततः कृष्णः पंचपांडवान्प्राह भो
पांडवा यूयं किं युद्धं करिष्यथ किं वा प्रेक्षध्वं ततस्ते प्रोचुर्वयं युद्धं करिष्यामः पश्चाद्वयं वा पद्मनाभो वा
वा स्माकं राज्यमिति अमंगलवचनं मुखे निःसृतं ततः पांडवाः पद्मनाभेन समं युद्धं कर्तुं लग्नाः परं पद्मनाभेन बु
लवता पंचापि पांडवा हतप्रहताः कृताः संतः कृष्णसमीपे गताः ततः कृष्णो युद्धं कर्तुं लग्नः प्रथमं पांचजन्यशं
खनादेन पद्मनाभसैन्यस्य त्रिभागो नाशितः ततः शार्ङ्गनामधनुष्टंकारावेण द्वितीयस्त्रिभागो हतः ततः
पद्मनाभो ऽवशिष्टबलत्रिभागो भीतो लात्वा नष्ट्वा अमरकंकानगरीं प्रविष्टः ततः कृष्णो नरसिंहरूपं कृ

पलायित॥२ प्रवेशा॥१

२५

भंजयित्वा॥ पालनै॥

त्वा वप्रप्राकारादि पातयित्वा नगरमध्ये प्रविष्टः ततः पद्मनाभो मरणभीत्या द्रौपदीमाश्रयणे रक्ष रक्ष इति क
थयतः स्त्रीरूपं कृत्वा द्रौपदीशरणे प्रविष्टः कृष्णेन द्रौपदी पृष्टा तव पृष्टौ कोऽयं स्त्री ततः पद्मनाभो हस्ते
प्राभृतं कृत्वा कथयति स्म अहं पद्मनाभस्त्वं मारणभीत्या द्रौपदीशरणं प्रविष्टोस्मि ततः कृष्णेन शरणा
गतो न हन्यते इति कृपया जीवन्मुक्तः ततः श्रीकृष्णो द्रौपदीं अरथं मञ्जीलीलया पंचपांडवैः सह पृष्ठ्या
गच्छन् लवणसमुद्रात् हर्षेण शंखं पूरितवान् तस्मिन्नवसरे तत्र क्षेत्रे चंपायां श्रीमुनिसुव्रतस्वामितीर्थंक
र समीपे व्याख्यानं शृण्वन् कपिलवासुदेवः शंखनादं शृणोति ततः शंका जाता किं द्वितीयो वा
सुदेवो जातस्तदा सर्वज्ञोक्तो लोकः कपिल वासुदेव एकस्मिन् क्षेत्रे तीर्थंकरा चक्रवर्ति
नो वासुदेवा द्वय नोत्पद्यंते परं जंबूद्वीपस्य भरतक्षेत्रस्य वासुदेवः कृष्णनामा व
त्स द्रौपदी पद्मनाभेनानीता तां लात्वा याति तेन शंखः पूरितः ततः कपिलवासुदेवः
श्रीमुनिसुव्रतः मत्सदृशं पुरुषोत्तमं पश्यामीति हर्षेण मिलनार्थं समुद्रतटे गतस्तावता कृष्णो दूरं गत
: परं कृष्णादिरथानां पीतश्वेतादिध्वजा विज्ञा निरीक्ष्य शंखं पूरितवान् त्वमाध्यं ज्ञापितं अहो कृष्णवासुदेव
कपिलवासुदेवस्त्वां प्रणमति कृष्णोपि तन्नादं श्रुत्वा शंखनादं कृतवान् अहो कपिलवासुदेव कृष्णोपि
त्वां प्रणमति ततः कपिलवासुदेवो हर्षं प्राप्य पश्चाद्वलित्वा पद्मनाभं देशान्निःकासितवान् तत्पुत्रं तस्य पदे
स्थापितवान् ततः कृष्णोपि पांडवैः समं समुद्रं समुल्लंघ्य पंचपांडवानां एवं कथयति स्म यूयं गंगां महान
दीं नावा उत्तरत पश्चान्नौर्वलमानां मम मोचयत यावदहं गंगां त्रिसांप्रतं अहं सुस्थितं देवं संतोषयामि ततः

सहितं॥

× बलदेवा ×

उत्तीर्य॥

नमस्करोति॥

नौका न प्रेषिता नौका नागता

पंचापि पांडवाः नावं [illegible] गृहीत्वा च गंगामुत्तीर्णाः परं मनसि विचारितं कृष्णो बाहुभ्यां गंगां तरीतुं समर्थो
न वेति तावन्नावमानीतोः कृष्णायन मुक्ता ततः कृष्णो नावं गवेषयन् क्षणं स्थितो नौ नागता एकया बाहुना तु
रंगमसारथिसहितं रथं गृहीत्वा एकया च बाहुना सार्द्धद्वाषष्टियोजनां [illegible] गंगां विलोडयन् पाताले द
स्तंभमधो निक्षिपन् उत्तीर्णस्तत्र मा पांडवा बूडित्वा अधस्तात् गता भवंति तदा तैः कामस्यामीति चिंतन् रथं श्रांत
स्ततो गंगादेव्या साहाय्यं दत्तं ततो गंगामुत्तीर्य आगतेन कृष्णेन पंचापि पांडवा उपालंभिताः किमिति
नौर्न मुक्ता ततः पांडवैः प्रोक्तं युष्मद्भक्तिपरीक्षणविलोकनार्थं ततो हरिः कोपं कृत्वा प्राह रे रे य
दा मया द्विलक्षयोजनप्रमाणलवणसमुद्र उल्लंघितः पुनः पद्मनाभं जित्वा द्रौपदी आ
नीता तदा मम शक्तिर्न दृष्टा इति कथयित्वा लोहदंडेन पंचापि पांडवानां रथा चूर्णया
मि ततः कुंत्या विचारितं किमेतत्कृतं ततः पंचापि पांडवानां रथाः संचूर्णिताः पंचापि पांडवा दे
शान्निर्विषया अस्यादिशत् तस्मिन् रथसंजातस्थाने रथमर्दकनामा कोट्टो जातः ततः कृष्णः स्वस्थानं ला
त्वा द्वारकां प्रविष्टः पांडवा अपि द्रौपदीं लात्वा सैन्यसहिता हस्तिनागपुरं प्राप्ताः कुंतीदेव्यातैः कथितं स्वदु
ष्टं ज्ञात्वा पंडुराज्ञा प्रेरिता पुनः कृष्णसमीपे गत्वा मिष्टवचनैः संतोष्य तथा पंडुमथुरावासस्य आज्ञां लात्वा स
मागता ततः पंचापि पांडवाः सपरिवारा दक्षिणवेलातटे नगरं स्थापयित्वा सुखेन राज्यं कुर्वंति ततः सम
गतेन जराकुमारेण तेनोक्तद्वारिकादाहं जाततया द्वारकाज्वलनकृष्णमरणादि सर्ववृत्तांतं श्रुत्वा वैराग्यात् पांडु
सेन पुत्रं राज्ये संस्थाप्य द्रौपद्या सह प्रव्रजिताः पक्षमासादि तपांसि कृत्वा चतुर्दशपूर्वाण्यधीत्य स्थविराज्ञ २६

मुक्तं नावा विस्तीर्णं अमर्षितनिषेध उत्थित संजिता

या श्रीनेमिनाथवंदनार्थं गताः अनुनीचकलानि अटंतो लोकमुखात् श्रीनेमिनिर्वाणं श्रुत्वा युधिष्ठिरस्य क
थयित्वा विमनस्काः संतः आहारं परिष्ठाप्य शत्रुंजयोपरि द्विमासिकीं संलेखनां कृत्वा पंचापि पांडवाः सि
द्धाः द्रौपदी एकादशांगानि पठित्वा मासिकीं संलेखनां कृत्वा ब्रह्मदेवलोके पंचमे उत्पन्ना ततश्च्युत्वा
महाविदेहक्षेत्रे सेत्स्यति अत्र द्रौपदी चालिता इत्येतावत् संबंधेन प्रयोजनं अथ तत्संबंधस्य प्रसं
गाल्लिखितोऽस्ति विस्तारस्तु व्याख्यानात् ज्ञेयः अत्र उत्तमयोर्वासुदेवयोः शंखध्वनिश्रवणं पंचममाश्च
र्यं ५ ॥ पुनः कौशांब्यां नगर्यां चंद्रसूर्यौ स्वविमानेन पश्चिमपौरुष्यां श्रीमहावीरवंदनार्थं आग
तौ अत्र स्वकीयमूलविमानेन आगमनं षष्ठमाश्चर्यम् ६ ॥ हरिवंशकुलोत्पत्तिः तत्संबंधो
यथा कौशांबीनगरी तत्र सुमुखनामा राजा। वसंतसमये गजारूढः सन् उद्याने क्रीडा
र्थं गतः तत्र एकवीरकनाम्नः कुविंदस्य नार्या अतिसुरूपा सुलोचना वनमाला ना
म्नी राज्ञा दृष्टा तस्यामधिकानुरागवानुत्पन्नः राजा तां प्रति पश्यन् स्थितः अग्रे न चलति मंत्रिणा प्रोक्तं किमि
ति विलंबः क्रियते राज्ञा स्वस्य अभिप्रायः कथितो मंत्रिणा प्रोक्तं चिंता न कार्या तां मेलयिष्यामि सर्वे स्व
स्थानं गताः मंत्रिणा परिव्राजिकाप्रयोगेण सा वनमाला राज्ञा मेलिता राज्ञा अंतःपुरे क्षिप्ता तया सह सु
खेन राज्ञा कालं गमयति अथ कुविंदो निजनार्या वियोगेन ग्रथिलो जातो नगरमध्ये त्रिकचतु
ष्कचत्वरेषु हा वनमाले इति विलपन् गवाक्षस्थाभ्यां ताभ्यां दृष्टः चिंतितं च अहह अस्माभिरसमयलो

मोऽइत्यामपसि

दुःखं कुर्वन् वियोग वेरे

ध्यमो

कश्चिद्दग्धं इतमिति पश्चात्तापं कुर्वतोस्तयोरुपरि विद्युत्पतिता ताभ्यामपि मृत्वा शुभध्यानेन हरिवर्षक्षेत्रे हरिणी हरि+
नामानौ युगलिनौ जातौ वीरककुविंदोपि तयोर्मृत्युं ज्ञात्वा दुःखात् अज्ञानकष्टतपः कृत्वा सौधर्मदेवलो
के किल्बिषिको देवो जातः अवधिज्ञानेन ज्ञातं मायातौ मम वैरिणौ युगलत्वात्स्वर्गं यास्यतः इति विचार्य
तौ युगलिनौ उद्वृत्य सारोद्धारककमात् देहमानं आयुषावकृष्य कल्पवृक्षैः समं उत्पाट्य चंपानगर्यामा ×कल्प+४
नीतौ तस्मिंश्चावसरे चंपानगरीस्वामी इक्ष्वाकुवं। शीयश्चंद्रकीर्तिराजा अपुत्रो मृतः नगरलोका अप
रं राजानं विलोकयंति परं न ताहशो मिलति त दाकाशे देवेनोक्तं भो लोकाः युष्माकं अ
यं हरिराजा हरिणीराज्ञी अस्तु परं एताभ्यां कल्पवृक्षफलेन मिश्रं मांसाहारो दाया वज्जी
वं देयं इति कथयित्वा देवो गतो लोकैरपि तथैव कृतं अथ हरिनामराजा पृथिवीं साधयि
त्वा महारंभं कृत्वा भार्यासहितो नरकं गतः तस्माद्धरिहरिणीयुगलाज्जातो हरिवंशः अत्र हरिह
रिणीयुगलं नरकं गतं इदमाश्चर्यम् ७ अथ चमरोत्पातस्वरूपं च इदम् तथाहि बिभेलसन्निवेशे पूर
णो नाम गाथापतिर्महासमृद्धः रात्रौ सुखेन चिंतितं अहो पूर्वभवे पुण्यं प्रभूतं कृतं तेन इह ऋद्धिः प्राप्ता तेन ×मया
उत्तरपि अत्र तपः करोमि तदा आगामिभवेपि किंचित्सुखं प्राप्नोति इति विचिंत्य प्रभाते कुटुंबभारं कार्यसु
त्रं स्वपदे स्थापयित्वा तापसीदीक्षां गृहीत्वा यावज्जीवं षष्ठतपः कृतवान् पारणकदिने काष्ठमयं चतुःपु २१
टं भाजनं कृत्वा भिक्षायां भ्रमति तत्र प्रथमपुटे पतितां भिक्षां पांथेभ्यो ददाति १ द्वितीयपुटे पतितां भिक्षां

काकेभ्यो ददाति २ तृतीयपुटे पतितां भिक्षां जलचरादिभ्यो ददाति ३ चतुर्थपुटे पतितां भिक्षां स्वयं भुंक्ते एवं द्वाद
शवर्षाणि अज्ञानतपः कृत्वा पूरणः शुभध्यानेन मृत्वा भुवनपतिप्रथमनिकाये चमरेंद्रः एकसागरोपमायुः
महर्द्धिको इंद्रो जातः एकदा चमरेंद्रः स्वसभायां चतुःषष्टिसहस्रसामान्यदेवसहितः एकस्यां दिशि चतु
:षष्टि२सहस्रैरात्मरक्षकैः परिवृतः उपविष्टोस्ति अवधिज्ञानेन सौधर्मदेवलोके शक्रसिंहासनस्थि
तं सौधर्मेंद्रं पश्यति स्म तस्य च पादौ स्वमस्तकोपरि आगतौ ततः क्रुद्धः सन् वदति स्म अरे कोयं दु
रात्मा मम मस्तके पादौ धत्ते सेवकप्रधानसुरैः प्रोक्तं स्वामिन् अयं पूर्वोपार्जितपुण्यैरत्र अवती
र्णः अस्य च इयमेव स्थितिः न कोपः कर्त्तव्यः एतत् श्रुत्वा विशेषतः क्रुद्धः आह रे एते सौ
धर्मेंद्रपादौ स्वमस्तकोपरि सहंते नैव। मरका अन्य अहं चमरेंद्रोस्मि अहं तत्र ग
त्वा सौधर्मेंद्रपादौ गृहीत्वा अधः पातयिष्यामि इति कथयित्वा कोपं कृत्वा प्रधानैर्वारितो
पि स्वस्थानतः उत्थाय चलितः अग्रगत्वा विचारितं अर्हतां वा १ अर्हच्चैत्यस्य २ वा अनगारस्य वा
भावितात्मनः ३ शरणं विना नागम्यते तदवसरे छद्मस्थः श्रीमहावीरः सुसमारपुराद्बहिः कायोत्सर्गे
स्थितोस्ति तस्य शरणं कृत्वा लक्षयोजनरूपं कृत्वा पादाभ्यां धरित्रीं आघ्नन् हस्ताभ्यां तालास्फोटं कुर्वन् मे
घवत् गर्जारवं कुर्वन् विद्युदिव चमत्कारं कुर्वन् ज्योतिष्कांस्त्रासयन् एकं पादं सौधर्मावतंसकविमा
ने वेदिकायां द्वितीयं च पादं सुधर्मासभायां दत्वा प्रतोल्यां प्रहारं दत्वा शक्रं आक्रोशयामास देवालय
वां ताडिता देवांगना भीत्या देवानां कंठे लग्नाः कोलाहलं श्रुत्वा इंद्रो विस्मयं प्राप्तः पृष्टवान् भो देवाः को

यस्तु पूर्वभवे दिदिःप्रोक्तं स्वामिन्नक्तो पिलक्षयोजनरूपधारी महाबीभत्सो मुद्गरादिकरालः समुद्धितो स्तिदं
इत्थं अवधिना ज्ञातमेतत्त्वमरकः असंपूर्णघटवत् समुच्छलितो स्ति परमं स्पर्शिक्षोदंदाभित दावरं ततो
ज्वलदग्निस्फुलिंगसहस्रसमाकुलं वज्रं चमरेंद्रं प्रतिमुमोच चमरो पि वज्रं आगच्छन् दृष्ट्वा सीत्यारूढं च
रवकुर्ध्वपादो महाकायं संकोच्य अंतर्जलहारादी निश्वासरणा निपतं त्वयैव शरणमित्यकंकरूपदर्शा
दे श्रीमहावीरस्तव मम शरणं इक्षथ यन्स्वामिपादयोरंतरे प्रविष्टः वज्रमपि स्वामिपादास्पाचतुरंगुलिदूरस्तो
द्रुमनमातीर्थकरस्याज्ञानतासेवक इतिज्ञाघ्रा। शादागत्य इंद्रेणाशासंसमन्गृहीतं स्वामिनं वंदि
त्वा क्षमयित्वा च चमरेंद्र प्रति इंद्रः शाह रे चमर मुक्तोसि भगवत्प्रसादात्त्वं निस्सर साधर्मिक
त्वान्न किमपि वक्तव्यं परामवं स्वतर्नकार्यं ततः शक्रः स्वस्थानं गतः ततश्चमरेंद्रो
पि पादक्षान्ति उत्प्रेक्षं प्रणम्य स्वस्थानं गत : अत्र चमरेंद्रस्य सौधर्मदेवलोकगमनमा
श्चर्यमष्टमं ८ ॥अथ अष्टसमसिद्धा इति॥अ१ १५ दपंचकोत्कृष्टावगाहनानां पंच
शतधनुःप्रमाणानां एकः श्रीऋषभदेवः भरतं विना नवनवतिर्भगवतः पुत्राः अष्टौ च भरतस्य पुत्राः ए
कं शतं अष्टोत्तरं सिद्धाः अत्र उत्कृष्टावगाहनायां सिद्धा इति नवमं ९ ॥अथ असंयतानां पूजा इति
श्रीसुविधिनिर्वाणात् कियत्यपि काले गते साधुधर्मस्य उच्छेदो जातः तदा लोकैर्वृद्धश्रावकाः पृष्टाः लोधर्मो
मार्गं कथयंति ते निर्जानानां शुभामरेण तस्मात् दीयते श्रावकाणां धर्म देयं वसतिर्दियासवां
लोक तदेयं कन्यादेयाते षां पूजा कर्तव्या ततस्तेषां पूजा जाता अत्र असंयतीनां साधुवृद्धाः पूजाजाता २

+ वस्तुं +

२८

वि+३

इदं दशमम् आश्चर्यं ॥१०॥ नत्वे एतानि १० आश्चर्याणि वक्तस्य तीर्थंकरस्य वारके जातानि इत्याह॥ एकं शतं अष्टाधिकं
सिद्धं ऋषभदेवे २ असंयतीपूजा सुविधिनाथतीर्थे २ हरिवंसकुलोत्पत्तिः शीतलनाथवारे स्त्रीमल्लिनाथतीर्थं
धातकरविपोः च अवर्णं नेमिनाथतीर्थे पंच शेषाणि पंच श्रीमहावीरसंबंधीनि॥१०॥ अथ इंद्रः किं करोति चिं
त्याद॥ सूत्रं॥ एवं संपेहेइ संपेहित्ता हरिणेगमेसिं पायत्ताणियाहिवइं देवं सद्दावेइ सद्दावित्ता एवं वयासी एवं खलु देवा
णुप्पिया नएवं भूयं १ नएवं भव्वं २ नएवं भविस्सं ३ जन्नं अरहंता वा चक्कवट्टी वा बलदेवा वा वासुदेवा वा अंतकुलेसु वा … इत्यादि
व्याख्या॥ इंद्रः एवं पर्यालोचयति पर्यालोच्य हरिणेगमेषिणं हरिनिंदस्य … गामषीका दिन्नात
तीच्छक इति यस्तस्य आत्मार्थ नामानं पदात्पती काधिपतिदेवं सद्य आह्वयति एवमवा
दी देवानुप्रिय ति॥ एवं खलु इति वाक्य। उपक्रम … नएतन्नभूतं नएत
द्भवति नएतद्भविष्यति यदर्हदादयः ४ अ … तप्रांतादिकुलेषु गता आगच्छंति आगमिष्यंति प
रं अर्हदादयः ४ उग्रकुलादिषु गता आगच्छंति आ गमिष्यंति परमिदमाश्चर्यं अनंता सिरवसर्पिणी सिः
उत्सर्पिणी सिद्धमाना गोत्रकर्मणः क्षीणस्य अवेदितस्य उदयेन उत्पद्यत। तत् [illegible] अर्हदादयः ४ उत्तमकु
लेषु अंतप्रांतादिकुलेषु आगता आगच्छंति आगमिष्यंति परं नएवं कदापि भवतीय [illegible] त्यानिनोनिःक्रमणं भ
वति अयं च श्रमणो भगवान् महावीरो जंबूद्वीपे भरतक्षेत्रे ब्राह्मणकुंडग्रामे ऋषभदत्तस्य ब्राह्मणस्य भार्या
या देवानंदायाः कुक्षौ अवतीर्णः तस्मात्त्वं गच्छ देवानुप्रिय श्रमणं भगवंतं महावीरं ब्राह्मणकुंडग्रामात् ऋ
षभदत्तस्य भार्यायाः देवानंदायाः कुक्षितो लात्वा क्षत्रियकुंडग्रामे सिद्धार्थस्य राज्ञो भार्यायाः त्रिशलायाः कु

त्वा×

न+

× तस्मात् [illegible] नावर्त्तमानानां [illegible] नामनाविइ [illegible] इदं जीतकल्पेः आ वारोवर्त्तियतत्र [illegible] दादानुप्रविशंतः आ तादिकुलेस्य उग्रा दिकुलेषु संक्रमदि [illegible]

होगर्भत्वेन संहर। अथ च यत् त्रिशलाया गर्भः तुच्छिका लक्षणं संदेहो मंदा अह्नो संहर इमं मम आज्ञां आज्ञप्तिं
वा क्षिप्रमेव प्रत्यर्पय। मदाज्ञाकार्यं च मदाज्ञाकृतार्थीकृत्य शीघ्रमागत्य निवेदयेत्यर्थः॥ एवं इन्द्रेण आदेशे
दत्ते सति हरिनैगमेषिदेवः कीदृशो जातः किं च कृतवान्॥ सूत्रं॥ तए णं से हरिणेगमेसी। पायत्ताणिआ
हिवई। सक्केणं देविंदेणं देवरन्ना एवं वुत्ते समाणे हट्ठतुट्ठ जाव हियए करयल जाव कट्टु। एवं वयासी॥
दिवो आणाए विणएणं वयणं पडिसुणेइ। पडिसुणेत्ता सक्कस्स देविंदस्स देवरन्नो अंतियाओ पडि
निक्खमइ पडिनिक्खमित्ता उत्तरपुरच्छिमं दिसीभागं अवक्कमइ अवक्कमित्ता वेउव्वियसमुग्घाएणं समोहणइ। इत्या
दि॥ व्या०॥ ततः स हरिनैगमेषी देवः इंद्रेण एवं उक्तः सन् हृष्टतुष्टो यावन्मस्तके अंजलिं कृत्वा
एवमवादीत् देवः स्वामी आज्ञापयति तथेति एव आज्ञया विनयेन वचनं आदेशवच
नं प्रतिशृणोति। शक्रस्य अंतिकादपगच्छति। उत्तिष्ठ्य च उत्तरपुरच्छिमं ति। ईशानकोणमपक्रामति।
गच्छति। गत्वा च। वेउव्वि इत्ति। उत्तरवैक्रियरूपकरणाय प्रयत्नविशेषेण। समोहणइत्ति। समवहं
ति। आत्मप्रदेशान् विक्षिपति॥ समुद्घातस्वरूपमाह॥ संखिज्जाइं जोयणाइं दंडं निस्सरइत्ति। दंडमिव दंडः ऊर्ध्वाध आ
यतः शरीरबाहल्यो जीवप्रदेशकर्मपुद्गलसमूहः तं दंडं संख्यातानि योजनानि यावत् निसृजति निःका
सयति। वितानाति। तत्र विविधान् पुद्गलान् आदत्ते। इति दर्शयन्नाह॥ तद्यथा॥ रयणाणं इत्यादि॥ रत्नानां
कर्केतनादीनां एवं वज्राविकृत्य लोहिताक्षमसारगल्लहंसगर्भपुलकसौगंधिकज्योतिरस अंजन अंज
नपुलक जातरूप सुभग अंक रत्न स्फटिक अरिष्टरत्नानां दानमयथा बादरान् असारान् दंडनिसर्गगृही

२८

तान् पुद्गलान् परिशाटयति यथासूक्ष्मान् सारान् पर्यादत्ते दंडनिसर्गगृहीतान् सामस्त्येन आदत्ते इत्यर्थः॥ एवं द्वि
तीयवारं समुद्घातं करोति वांछितरूपकरणार्थं यत्नरूपेण देवा मनुष्यलोकं समागच्छंति इह च यद्यपि
रत्नादिपुद्गला औदारिका वैक्रियसमुद्घाते च वैक्रिया एव ग्राह्याः तथापीह तेषां रत्नादिपुद्गलानामिव सा
रताप्रतिपादनाय रत्नानामित्याद्युक्तं न तु रत्नादीनामेवेति व्याख्येयं॥ अन्ये आचार्या एवमाहुः औदारिका
अपि तद्गृहीताः संतो वैक्रियतया परिणमंति॥ ॥अथ उत्तरवैक्रियरूपं कृत्वा कीदृश्या गत्या हरिनैग
मेषिदेवो जंबूद्वीपं आयाति। तदाह॥ तयादेव जनप्रसिद्धया तत्र उक्किट्ठाए उत्कृष्टया प्रशस्तवि
हायोगतित्वाद् उत्कर्षवत्वात्। तुरिआए त्वरिता या मानसौत्सुक्यात्। चवलाए। चपलया कायत
:। चंडाए। चंडया संरंभवत्वात्। जयणाए। जयिन्या आशाषकर्मगतिजेतृत्वात्। उद्धुआ
ए। उद्धुतया आशाप्राप्तावयवकंपनात्। सिग्घाए। शीघ्रया परमोत्कृष्टया वेगवत्वात्। दिव्वाए।
देवजनोचितया। देवगईए। देवगत्या। अथ चागतिचतुष्टयमानमिदं। यया देव एकया वीप्सया योज
नानां लक्षद्वयं त्र्यशीतिसहस्राः पंचशतानि अशीत्यधिकानि। षट्चषष्टिभागा गच्छति सा चंडागतिः॥१॥
अथ चपलया देवः एकया वीप्सया योजनानां लक्षचतुष्टयं षट्सप्ततिसहस्राः षट्शतानि त्रिंशदधिकानि त्रिंशच्च
षष्टिभागा गच्छति। सा चपलागतिः॥२॥ अथ यया देव एकया वीप्सया योजनानां षट्लक्षाः एकषष्टिसहस्रा
: षट्शतानि षण्णवत्यधिकानि चतुःपंचाशच्च कलाः गच्छति। सा जवनागतिः॥३॥ अथ यया देव एकया
वीप्सया अष्टौ लक्षाः पंचाशत्सहस्राः सप्तशतानि चत्वारिंशदधिकानि अष्टादश षष्टिभागाः गच्छति। साग।

त्तिर्द्दिग्भवती॥४५॥ तथा गत्वा वीइवयमाणे। व्यतिव्रजन् तिर्यग् असंख्यातानां द्वीपसमुद्राणां मध्यभागेन यत्र
जंबूद्वीपे भरतक्षेत्रे ब्राह्मणकुंडग्रामनगरे ऋषभदत्तस्य गृहे यत्र देवानंदाब्राह्मणी तत्रागच्छति। आगत्य
च। आलोए। आलोके दर्शनमात्रे श्रमणस्य भगवतो महावीरस्य प्रणामं करोति। कृत्वा च देवानंदायाब्रा
ह्मण्याः सपरिजनायाः अवस्वापिनीं निद्रां ददाति। दत्वा चाशुभान् पुद्गलान् अपहरति। शुभान् पुद्गलान्
प्रक्षिपति। मनः अणुजाणउ मे भगवं इति कृत्वा श्रमणं भगवं महावीरं अव्वाबाहं। भगवतां तिःव्राध
ण तत्पीडापरिहारात्॥ अव्वाबाहेणं। सुखं सुखेन संहर्त्तु रपि पीडाभावात् यतस्तथाविधकरणव्यापारेण सं
स्पृशन्। अथवा अव्वाबाहेणं। सुखं सुखेन। त्पर्त्तुः। यानि कारणानि: कायस्य देवप्रभावेणक
रतलसंपुटेन गृह्णाति। गृहीत्वा च यत्र क्ष त्रियकुंडग्रामे सिद्धार्थराजस्य गृहे यत्र त्रि
शला क्षत्रियाणी तत्रागच्छति। आगत्य च त्रिश लायाः क्षत्रियाण्याः सपरिजनायाः अवस्वापि
नीं निद्रां ददाति। दत्वा च अशुभान् पुद्गलान् अप हरति। अपहृत्य च शुभान् पुद्गलान् प्रक्षिपति प्रक्षि
प्य च श्रमणं भगवंतं महावीरं अव्याबाधं अव्याबाधेन त्रिशलाक्षत्रियाण्याः कुक्षौ गर्भत्वेन विहिदं अहं।
×व+ वैं गर्भशाये साहरइ प्रवेशयति। साहरित्ता कुक्षिद्वारेण तं च विछिदं करणपीडां ईषदपि बाधां नैवोत्पाद
यति। अन्यथा न खलु अव्यग्रता महत्प्रभावा गर्भप्रवेशायितुं हरिर्नैगमेषिदेवस्य शक्तिरस्ति। भगवत्त्वादेवशा ३७
क्तिः इति प्रतिपादितं स्यात्। गर्भसंहरणानंतरं हरिर्नैगमेषिदेवः किं कृतवान्। तत्र सूत्रं॥ जामेव दिसं०॥४७॥
॥ ततः स हरिर्नैगमेषिदेवः जामेव दिसिं पाउब्भूए त्ति॥ यस्यां दिशो देवः प्रादुर्भूतः। शक्रपार्श्वत आगत्य

द्भूतः। तामेव दिशं प्रतिगतः। पुनः किं कृतवान् तया उत्कृष्टया त्वरया दिव्यया गत्या तिर्यग् असंख्यातानां द्वीपसमुद्राणां
मध्येन योजनसाहस्रिकाभिर्वीरखाभिः उप्पयमाणे। ऊर्ध्वं गच्छन् यत्र सौधर्मदेवलोके सौधर्मावतंसके वि
माने शक्रे सिंहासने शक्रो देवेंद्रो देवराजा तत्रागच्छति। आगत्य च शक्रस्य देवेंद्रस्य देवराजस्य इमां आज्ञप्ति
मेव प्रत्यर्पयति॥ ॥अथ च कदा गर्भापहारकल्याणकं जातं॥ तत्र सूत्रं॥ तेणं कालेणं तेणं समएणं समण
णे भगवं महावीरे। जे से वासाणं। तच्चे मासे पंचमे पक्खे। आसोयबहुले। तस्स णं आसोयबहुलस्स तेर
सीपक्खेणं। वासीइराइंदिएहिं विइक्कंतेहिं। ते सीइमस्स राइंदिअस्स अंतरा वट्टमाणस्स। हिआ
णुकंपएणं। देवेणं हरिणेगमेसिणा सक्कव यणसंदिट्ठेणमित्यादि॥४८॥ ॥तस्मिन् का
ले। तस्मिन् समये श्रमणो भगवान् महावीरः :। वर्षाकाले। श्रावणादीनां मध्ये तृतीयमासः।
अश्विनमासः। कृष्णपक्षः। तेरसीपक्खेणं त्ति त्रयोदशीपक्षे। पश्चार्द्धरात्रौ व्यशीतिरात्रिंदिने
षु। व्यतिक्रांतेषु। व्यशीतितमस्य रात्रिंदिनस्य अं तरा वर्तमाने। अंतरकाले रात्रौ। हिआणुकंपएणं।
हितः अनुकंपकः कस्मात् भगवतः अनुकंपा च भक्तिः। एवंविधेन हरिदेवेन शक्रवचनसंदिष्टेण ब्राह्मण ×नैगमेषिणा×५६
कुंडग्रामनगरे ऋषभदत्तस्य भार्याया देवानंदायाः कुक्षितः क्षत्रियकुंडग्रामे सिद्धार्थभार्याया त्रिशलायाः
कुक्षौ अर्द्धरात्रिसमये उत्तराफल्गुनीनक्षत्रे चंद्रेण सह योगं वर्त्तमाने। गर्भत्वेन संहृतः भगवतस्तदा किय
द्ज्ञानमासीत् तत्र सूत्रं॥ समणे भगवं महावीरे तिन्नाणोवगए आवि हुत्था। साहरिज्जिस्सामि त्ति जाणइ।१।
साहरिज्जमाणे नो जाणइ।२। साहरिएमि त्ति जाणइ।३।॥४९॥ श्रमणो भगवान् महावीरः ज्ञानत्रयसहितो।

नवृत्ता। ततनं संहरिष्यति। इति जानाति॥१॥ संह्रियमाणो न जानाति। संहरणस्यैकसामयिकत्वात्। य
द्यपि च अन्तर्मुहूर्त्तिकालं संसाध्यते तथापि छद्मस्थिकोपयोगतः अपि संहरणकालः सूक्ष्मतर इत्यनाभिकाः
॥केचित्तु संह्रियमाणो विजानाति इति प्रवदंति॥ कथं श्रीआचारांगे तथैव दर्शनात्। परं तत्रायं पाठः। सार्वज्ञि
कः संहृत इति च जानाति॥ अत्राह। कोपि शिवमागमती। अहो जिनदर्शने एषापि गर्भरूपा असंबद्धा वक्तव्यता॥
एवमपि गर्भपरावर्त्तनं कदापि भवति। तत्रोच्यते॥ शिवमागमेऽपि श्रीभागवते दशमस्कंधे द्वितीयाध्ययने बल
देवस्य गर्भपरावर्त्तनं श्रूयते॥ तत्र श्लोकचतुष्टयं   ॥यथा॥ भगवानपि विश्वात्मा। विदित्वा कंसजं भयं। य
दूनां निजनाथानां। योगमायां समादिशत्॥   १॥ गच्छ देवि व्रजं भद्रे। गोपगोभिरलंकृतं। रो
हिणी वसुदेवस्य। भार्यास्ते नंदगोकुले।   ॥२॥ देवक्या जठरे गर्भं। शेषाख्यं धाम मा
मकं। तत्संनिकृष्य रोहिण्या। उदरे संनिवे   शय॥३॥ गर्भसंकर्षणात्तं वै। आहुः संकर्षणं भु
वि। रामेति लोकरमणात्। बलभद्रं बलाश्रयात्॥४   ॥ उक्तमपि तत्र पुराणे मांधाता राजा। उत्पत्तिकथा यथा॥
विशाला नगरी। तत्र युवनाश्वो नाम राजा महान् साम्राज्यधरः। परं अपुत्रः। तेन पुत्रार्थं शत कन्याः परिणी
ताः। परं तथापि पुत्रो न जायते। तेन मनसि अतिदुःखं स्थितो राजा जातः॥ यतः॥ ॥अपुत्रस्य गतिर्नास्ति
स्वर्गो नैव च नैव च। तस्मात्पुत्रमुखं दृष्ट्वा। स्वर्गं यास्यंति मानवाः॥१॥ उक्तं॥ गेहं पि तं मसाणं। यत्थ न दीसंति धूलि
धूसरंगा। उट्ठंति पडंति रडवडंति॥ दो तिन्नि डिंभाइं॥१॥ इत्यादि॥ ततः कस्याप्युपदेशात् ८८ सहस्र ऋषीणां ३१
भोजनं दातुं प्रवृत्तः। ३३ कोटि देवताराधनमपि कृतं। तथापि पुत्रो न भवति। एकदा ८८ सहस्र ऋषिभिर्मिलित्वा अयं

राज्ञा आत्मानं प्रत्यहं मिष्टान्नपानादिभक्तिं करोति। परं कस्यापि पुत्रकरणे शक्तिर्नास्ति सर्वेप्युदरंभरयः पारणार्थि
मलिनाः संति। तदा तेषां मध्यादेकेन मुनिना प्रोक्तं। अहं जानामि अपायं सुवर्णकच्चोलके नीरमतिमंत्र्य राज्ञो
दत्तं। प्रोक्तं च। या तव अतीष्टा राज्ञी भवति तस्याः पातव्यं। पुत्रो भावी राज्ञा नीरं लात्वा स्थाने वा समागतः। सर्वाभिः रा
ज्ञीभिः श्रुतो व्यतिकरः। सर्वाभिर्दासीमुखात् कथापितं। मम देयं। राज्ञा विचारितं। राज्ञ्यो बह्व्यः कस्मादीयते
एकस्या दाने अन्याः सर्वा अपि क्लेशं करिष्यंति मरिष्यंति मामपि   मारयिष्यंति॥ ततः ताभिः प्रोक्तं। यस्या दा
स्यसि पानीयं तां वयं मारयिष्यामो। राज्ञा चिंतितं   ।प्रतापो १ गौरवं २ पूजा ३। श्रीर्यशः प्रभुत्वं च तिष्ठता
द्। तावत्कालं प्रवर्त्तेत। यावन्नोत्पद्यते कलिः॥   १॥ इति विचिंत्य न कस्यापि दत्तं नीरं वृत्तं कच्चो
लकं वस्त्रेण आच्छाद्य पानीयस्थाने धृतं।   विमुक्तं। राज्ञा स्वस्थाने वा सुप्तः। रात्रौ राज्ञः
तृषा लग्ना पानीयं मार्गितं। राज्ञः कथयति। य   त्र वाली इष्टा न विद्यति। सा पानीयं पाययिष्य
ति। तदा अन्यः कोपि पार्श्वे नास्ति। एकाकी शय्यापालि   कास्ति तया अज्ञानतया तत्कच्चोलकनीरं आनीय
दत्तं। राज्ञा च पीतं मंत्रप्रभावात् गर्भो जातः। दिन २ तद्वर्द्धते। राजा लज्जया सभायां नायाति। प्राप्तावधिदि
नैः समाधानं जातं। राज्ञा ८८ सहस्रमुनीनामुपालंभो दत्तो। ता समिद्धतो मम मूलच्छित्तिर्या जाता। ततः ३३ को
टि देवैः ८८ सहस्रमुनिमेलापकेन आराधितः इंद्रः समागतः। तेन स्वसेवकदेवपार्श्वात् राज्ञो नाभिं विदार्य संपू
र्णगर्भो निष्कासितः। सर्वैः प्रोक्तं। स्तन्यपानं कस्य करिष्यति। इंद्रेण प्रोक्तं। मां धास्यति। ततः इंद्रेण स्त्रीरूपं कृत्वा
स्तन्यपानं कारितं। क्रमेण वर्द्धमानो मांधाता नाम राजा जातः॥ इत्यादयो अनेके एवंविधा व्यतिकराः संति। त

लोनढेशनानामपहासःकार्यः॥ इतिकल्पसूत्रस्यद्वितीयंव्याख्यानंपरं अतिदृढत्वंतेनसतिवेलासद्भावेप
त्तसर्ववाच्यं।वेलायाअभावेगर्भापहारवक्तव्यतातृतीयव्याख्यानेआदौवाच्यमित्यपवादसूत्रंचउदशस्वप्ना
व्याख्यातव्याः॥ व्याख्यानंकल्पसूत्रस्य।द्वितीयंसुगमंस्फुटं।शिष्यार्थपाठकाःश्रेऽयः।समयादिमसुंद
रः॥ २॥ इतिश्रीकल्पसूत्रस्यद्वितीयंव्याख्यानं॥ ग्रंथाग्रं १३३०॥ ॥पूर्वप्रथमवाचनायांश्रीमहावीर
देवस्यसंक्षेपवाचनयाश्रीपंचपरमेष्ठिनमस्कारव्याख्यान पूर्वषट्कल्याणकानिव्याख्यातानि।
द्वितीयवाचनायांश्रीमहावीरस्यच्यवनकल्या॥ णकंदशआश्चर्याणिगर्भापहारकल्याणकंत्रि
वशास्त्रोक्तमंधातायक्रवर्तिप्रमुखस्वामिसंबं धानिव्याख्यातानि॥ ॥अथतृतीयवाचना
यांयस्यांरात्रौहरिनैगमेषिदेवेनगर्भ पहारःकृतःतदाकिंजातं॥ तत्रसूत्रम्॥
॥जंरयणिंचणंसमणेभगवंमहावीरेदेव णंदामाहणीएजालंधरस्सगुत्ताएकुच्छी
उतिसलाएखत्तियाणीएवासिठसुत्ताएकुच्छंसि गब्भत्ताएसाहरिए।तंरयणिंचणंसादेवाणंदामा
हणीसयणिज्जंसिसुत्तजागराउहीरमाणी२इमेआरूवेउराले।कल्लाणे।सिवेधन्ने।मंगल्लेसस्सिरीए।च
उद्दसमहासुमिणेतिसलाएखत्तियाएहडेपासित्ताणंपडिबुद्धा॥तंजहा॥गयवसहगाहा॥१व्या०॥यस्यां
रात्र्यांसादेवानंदायाःकुक्षितःत्रिसलायाःकुक्षौगर्भत्वेनसंक्रांतः।तस्यांरात्रौसादेवानंदाब्राह्मणीशय्यी ३२
येसुप्तजागरा।उहीरमाणी२ईषन्निद्रांगच्छंतीप्रचलानाम्नीतृतीयांनिद्रांप्राप्नुवंतीएतानुएतद्रूपान्।आत्मीयास्य
रस्यमानान्शिवादिविशेषणोपेतान्पूर्वव्याख्यातार्थान्।त्रिसलाक्षत्रियाणीहृतान्दृष्ट्वाप्रतिबुद्धाजागरि

रिता तान्कान्गजवृषभादीन्पूर्वकथितान्॥ पुनस्तस्यांरात्रौकिंजातं॥ तत्रसूत्रं॥ जंरयणिंचणंसम॥
णेभगवंमहावीरेदेवाणंदाएमाहणीएजालंधरस्सगुत्ताएकुच्छीउतिसलाएवासिठसुत्ताएकुच्छिंसिग
ब्भत्ताएसाहरिए॥ व्या०॥ यस्यांरात्रौश्रमणोभगवान्महावीरोदेवानंदाकुक्षितःत्रिशलाक्षत्रियाण्याः
कुक्षौगर्भत्वेनसंक्रांत तस्यांरात्रौसात्रिशलाकीदृशे।वासघरेसुप्ताऽभूत्।तस्यवासघरस्यवर्णनंक्रियाते।
।तत्रसूत्रं॥ तंसितारिसगंसि।वासघरंसि।अभिंतरउसचित्तकम्मे।बाहिरउदूमिअघट्ठमठ्ठे।विचित्तउल्लो
अचिल्लिअतले।मणिरयणपणासिअंधकारे॥ इत्यादि॥व्या०॥ तस्मिन्वासगृहे।किंविशिष्टेवास
गृहे।तादृशे।तादृशाकवक्तुमशक्यस्वरूपे। श्रीभद्रबाहुस्वामीकथयति।नाकापिवर्णयि
तुंसमर्थोभवति।एतादृशेपुण्यवतांयोग्ये इत्यर्थः॥पुनःकिंभ।अभितरउसचित्तकम्मे
ति।अभ्यंतरात्अभ्यंतरतःभित्तिभागभित्तेर्मध्य भागसचित्रकर्मणि चित्रकर्मसंयुक्ते।पुनःकिंभ
बाहिरउदूमिअघट्ठमट्ठे।बाह्यतोभित्तेर्बहिर्भागे दूमिअंधवलितं।पुनःकिंभघृष्टंकोमलपाषाणा
दिनाअतएवमृष्टंयत्रगृहेतस्मिन्।पुनःकिंभवा०।विचित्तउल्लोअचिल्लिअतले।विचित्रआश्चर्यकृत्उल्लोच
स्यचंद्रोदयस्यचित्रितंविविधचित्रविच्छित्तिसंयुक्तं।तलंअधोभागोयस्मिन्एतावतातदुपरिचंद्रोदयोबद्धोस्ति
तस्यतलंनानाप्रकारचित्रसहितंवर्त्तते।विचित्तउल्लोअचिल्लियपाठेउअयमर्थः।विचित्रोविविधचित्रयुक्तो
उल्लोकःपरिभागः चिल्लिअंदीप्यमानंतलंअधोभागोयत्रततोविशेषणकर्मधारयः॥पुनःकिंभवा।मणिरय
णपणासिअंधकारे।मणिरत्नैःप्रणाशितंदूरंगमितंअंधकारंयत्रतत्तस्मिन्।पुनःकिंभवा।बजसमसुविभत्त

ष्टमिसंगो । बज्ज अत्यर्थं समः अनिम्नोन्नतो नापि उन्नतः उच्चः पंचवर्णकुट्टिमकलितः ।। सुविरचितः ।। कृतस्वस्तिके
ष्टमिस्तगो । यत्र तस्मिन् । पुनः किंभूते । पंचवन्नसरससुरभि । पंचवर्णेन पुनः सरसेन पुनः सुरभिणा पुनर्मुक्त
क्षिप्तेन एवंविधेन पुष्पपुंजलक्षणेन उपचारेण कोर्थः पुष्पपुंजव्याकलिते सति । पुनः किंभूते । कालागुरुपव
रत्ति । कालागुरुः चंद्रस्य अगुरुः । प्रधानं कुंदुरुक्कं चीडा नाम गंधद्रव्यविशेषः । तुरुक्कं च सिल्हकं धूपश्च द
सागादि गंधद्रव्यसंयोगजः ।। ततो द्वंद्वसमासस्ततस्तेषां संबंधी यो मघमघायमानोतिशयवान् गंधः उद्धू
तउद्धूतः । तेन अभिरामे मनोहरे । पुनः किंभूते । सुगं धवरत्ति । सुष्ठु गंधवराणां प्रधानवासानां गंधो यस्मि
न्न तत्सुगंधवरगंधिकं तस्मिन् क्वचित्सुगंधि वरगंधिए इति पाठः ।। तत्र सुगंधाः सुरसयोः प्रव
रगंधाः प्रधानचूर्णाः तेषां गंधो यत्रास्ति तस्मि न् । पुनः किंभूते । गंधवट्टिभूए त्ति । गंधव
र्त्तिः गंधद्रव्यगुटिका कस्तूरिका वा तद्गुटिकागं धवर्त्तिः तद्भूतं सौरभ्यातिशयात् गंधद्रव्यगुटि
काकल्पं इत्यर्थः ।। इत्यनेन वासगृहं वर्णितं ।। अ थ तस्मिन् वासगृहे यस्मिन् शयनीये त्रिशला सुप्ता तस्
य शयनीयस्य वर्णनमाह ।। तत्र सूत्रं ।। तंसि तारिसगंसि सयणिज्जंसि । सालिंगणवट्टिए उभओ बिब्बोअणे ।
उभओ उन्नए । मज्झेणयगंभीरे । गंगापुलिणवालुयउद्दालसालिसए । ओअविअखोमिअदुगुल्लपट्टपडिच्छन्ने
इत्यादि ।। व्या० ।। त्रिशला क्षत्रियाणी एतादृशे शयनीये सुप्ता सती चतुर्दश स्वप्नान् पश्यति स्म । किंविशिष्टे शय
नीये शय्यायां तस्मिन् तस्मिन् । पुनः किंभूते । तारिसगंसि । तादृशे वक्तुमशक्यस्वरूपे । पुनः किंभूते । सालिंगण ३३
वट्टिए । सह आलिंगनवर्त्त्या शरीरप्रमाणोपधानेन वर्त्तते यत्तत्तस्मिन् । पुनः किंभूते । उभयतः शिरोंतपादांतयो

श्चेति बिब्बोअणे उपधाने गंडुके यत्र तस्मिन् । पुनः किंभूते । उभओ उन्नए । अत एव उभयतः उन्नते । पुनः किंभूते । म
ज्झेणयत्ति । मध्ये नतं च गंभीरं च मध्ये नतगंभीरं । अथवा मध्येन च मध्यभागेन गंभीरे । अथवा नते क्वचित्पन्न
ग विब्बोअणे इति पाठो दृश्यते । तत्र सुपरिकर्मितगंडोपधाने इत्यर्थः ।। पुनः किंभूते । गंगापुलिणत्ति । गंगापुलि
नवालुकायां पादे न्यस्ते अवदालः पादादिन्यासे अधोगमनं तेन सालिसए इति । सादृशे अतिनम्रत्वात् । पुनः किंभूते । उ
अविअ त्ति । उवचिअं रचितं परिकर्मितं यत् क्षौमं अतसीमयं दुकूलं वस्त्रं तस्य युगलापेक्षया यः पट्टः एकशा
टकः स प्रतिच्छदः आच्छादनं यस्य तत्तस्मिन् । पडिच्छ न्न इति पाठे प्रतिच्छन्नं आच्छादितं पुनः किंभूते । सुवि
रइअ त्ति । सुष्ठु विरचितं सुविरचितं रजस्त्राणं आ च्छादनविशेषो दुपरिभोगावस्थायां यत्र तत्तस्मि
न् । पुनः किंभूते । रत्तंसुअत्ति । रक्तांशुकेन म शकगृहनाम्ना वस्त्रेण संवृते । आहते । पुनः
किंभूते । सुरम्ये । अतिरमणीये । अत्यंतसुंदरे । अत्र शयनीये तत्रयं उपरिज्ञातं एवं अतसीमय
एकशाटकपट्टः ।। १ ।। द्वितीयं अपरिभोगावस्थायां रजस्त्राणं । २ तृतीयं मशकमयं आच्छादनं । पुनः किं
भूते । आईणगत्ति । आजिनकं मृगचर्ममयो वस्त्रविशेषः स च स्वभावात् अतिकोमलः स्यात् रूतं च कर्पासपक्ष्म
बूरो वनस्पतिविशेषः । नवनीतं म्रक्षणं तूलिस्तूलः । सदृशो स्पर्शो यस्य तत्तस्मिन् । उवचित्तिपाठे उत्तूलं ।
अर्कतूलं एषामिव स्पर्शो यस्य तत्तस्मिन् । पुनः किंभूते । सुगंधवरत्ति । सुगंधाभ्यां वरकुसुमचूर्णाभ्यां प्रधानपु
ष्पजातिः ।। १ ।। वासयोगस्यापरः शयनीयस्य शोभायाः उपचारः पूजा तेन कलिते ।। अथ तस्मिन् शयनीये ।
स्य शोभायाः उपचारः पूजा तेन कलिते ।। ।। अथ तस्मिन् शयनीये कदाचित् कीदृशी जाता ।। तत्र सूत्रं ।। पुव्वरत्ता

वरत्तकालसमयंसि। सुत्तजागरा। ओहीरमाणी २ इमेआरूवे ओराले। जाव चउद्दश महासुमिणे पासित्ता णं पडिबुद्धा।। व्या
य।। पूर्वरात्रापररात्रकाले निमध्यरात्रौ एतस्य व्युत्पत्त्यादिकं पूर्ववदत्र मन्तव्यं। तस्यां शय्यायां सुप्तजागरा। ओंघीरंति
ई घन्निद्रां गच्छन्ती इमान् एतद्रूपान् उदारादि विशेषणोपेतान्। चतुर्दश महास्वप्नान् दृष्ट्वा प्रतिबुद्धा जागरिता
तान् नामतआह।। तत्र सूत्रं।। गय १ वसह २ सीह ३ अभिसेअ ४ दाम ५ ससि ६ दिणयरं ७ झयं ८ कुंभं ९। पउ
मसर १० सागर ११ विमाण १२ भवण १२ रयणुच्चय १३ सिहिं १४ च।। १।। व्या०।। प्रथमस्वप्ने गजं पश्यति। २ द्वितीये
वृषभं। ३ तृतीये सिंहं। ४ चतुर्थे अभिसेअ अभिषि च्यमानां श्रीदेवीं। ५ पंचमे दाम निउप्फमालापश।
छट्ठे ससित्ति चंद्रं। सप्तमे दिणयरत्ति सूर्यं। ८ अ ष्टमे ध्वजं। ९ नवमे पूर्णकलशं। १० दशमे पद्मस
रोवरं। ११ एकादशे समुद्रं। १२ द्वादशे देववि मानं। १३ त्रयोदशे रत्नपुञ्जं। १४ चतुर्दशे शि
हित्ति अग्निं पश्यति। १४।। अथ चतुर्दश स्वप्ना नां वर्णनं तत्र प्रथमं गजवर्णनमाह।। तत्र सूत्रं।।
तएणं सा तिसला खत्तियाणी तप्पढमयाए तं उं अ चउद्दंतमूसिअ गलिअ विउल जलहर हार नि
कर खीरसागर ससंक किरण दगरय रययमहासेलपंडुरतरं। इत्यादि व्या०।। ततः सा त्रिशला क्षत्रियाणी त
त्प्रथमतया तेषां स्वप्नानां प्रथमतया पूर्वं ईदृशं इभं गजं स्वप्ने पश्यति।। अत्र कल्पसूत्रे प्रथमं इभदर्शनं प्रोक्तं।।
तत्सामान्यवृत्तिमाश्रित्य यतो द्वाविंशति तीर्थंकरमातरः प्रथमं गजं स्वप्ने पश्यन्ति स्म। अन्यथा ऋषभदेवमा
ता उसभस्वामिनी प्रथमं वृषभं। महावीरदेवमाता त्रिशला च प्रथमं सिंहं अपश्यत्। अतः सामान्यवृत्तमा
श्रित्य प्रथमं गजो व्याख्यायते।। कीदृशं इभं। तं उअत्ति। ततं विस्तीर्णं उज्ज्वलं चैवेषां तेन ततो जसः एवंविधा।

श्चत्वारो दंता यस्य स तं। पुनः किंभूतं। ऊसिअत्ति। उच्छ्रितः उदयगलिअत्ति। निर्झरो मदो यस्मात् विपुलजलधरो विस्ती
र्णमेघः पुनः हारनिकरत्ति। पुंजीकृतहारः खीरसागरत्ति। क्षीरसमुद्रः ससंकिरणत्ति। चंद्रकिरणाः दगर
यत्ति। उदककणाः शीकराः रययमहासेलोत्ति। रजतमहाशैलो वैताढ्यपर्वतः एतेषामिव पांडुरतरं अतिशयेन पांडुरं श्वेतं वा।
पुनः किंभूतं। समागयत्ति। समागता मधुकरा भ्रमरा यत्र तत् एवंविधं यत् सुगंधदानं मदस्तेन वासितं कपो
लमूलं यस्य स तं एतावता यस्य कपोलमूलं भ्रमराः गुंजायमानाः संति। इयामव गजस्य शोभा क विम
ज्जयरत्ति। नहइश्यत्ति। तत्र समागतं सततं यत्तद्व ह मानं यत् सुगंधदानं तेन वासितं कपोलमूलं यस्य
स तं इति व्याख्यथं।। पुनः किंभूतं। देवरायपि। । देवराजस्य इंद्रस्य कुंजरो हस्ती ऐरावणः तद्व
वरप्रमाणं प्रमाणं यस्य स तं शास्त्रोक्तदेह मानमित्यर्थः।। पुनः किंभूतं। सजलघणत्ति।।
सजलजलसहिता घनो निविडः परस्परं मिलितो विस्तीर्णो यो जलधरो मेघस्तस्य
तद्वत् गंभीरस्थानः प्रधानो घोषो यस्य हस्तिनः स तं। पुनः किंभूतं। प्रशस्तं कल्याणकारिणं वा। पुनः किं
भूतं। सव्वलक्खणत्ति। सर्वलक्षणानां समस्तहस्तिलक्षणानां कदंबं समूहो जातमस्यति। सर्वलक्षणकदंबि
तं तं। पुनः किंभूतं। वरोरुं। वरश्रेष्ठाभोउरुदिशालस्थवरोरुस्तं तमेवं इतदर्शिनात्। यथापरचक्रं सहत्तममपि।
तं क्लाथ्याति। तथा इभदर्शनात् इतरंगा विशिष्ट जानं पश्यति। इति हेतोः इभदर्शनं।। इति गजस्वप्नविचारः।। १।।
।। अथ द्वितीयस्वप्ने त्रिशला क्षत्रियाणी वृषभं पश्यति। तस्य वर्णनं कीदृशं।। तत्र सूत्रं।। तओ पुणो धवलकमल
पत्तपयराइरेगरूवप्पभं। पभासमुदयोवहारेहिं। सव्वओ चेव दीवयंतमित्यादि व्या०।। ततः पुनः त्रिशलाक्षत्रिया।

णी वृषभं पश्यति। किंभूतं धवलकमलत्ति। धवलकमलपत्राणां प्रकरात् समूहात् अतिरेका अधिका रूपप्रभा य
स्य स तं। किं कुर्वंतं॥ पहासमुदयत्ति। प्रभायाः कांत्याः समुदायः समूहः तस्य उपहाराः विस्तारणानि तैः सर्व
तः सर्वदिशो दीपयंतं। पुनः किंभूतं। अइसिरिभरत्ति। अतिश्रियः उत्कृष्टशोभायाः भारः संभारस्तेन यत्प्रेरणं
तेनैव विसर्पत् उल्लसत्। अत एव कांतं दीप्यं शोभमानं चारु प्रधानं ककुदं स्कंधो यस्य स तं। इदं ककुदं स्वभावेनै
व उल्लसति। परं तत्र उत्प्रेक्षा क्रियते। इदं स्वभावेन उल्लसति। किंतु सहस्रशोभासंभारेण प्रेर्यमाणं उल्लस
ति। पुनः किंभूतं। तणुसुद्धत्ति। तनोः शरीरस्य शुचि सुकुमाल रोमाणां स्निग्धा छविर्यस्य स तं। पुनः किंभू
तं। थिरसुबद्धत्ति। स्थिरं अत एव सुबद्धं मांसलं अत एव उपचितं लष्टं प्रधानं सुविलक्षं यथावत्सं
तविशिष्टावयवं सुंदरं अंगं यस्य स तं। एतावता रयस्य वृषभस्य अंगानि अवयवाः स्थिराणि
सुबद्धानि मांसलानि उपचितानि प्रधानानि च। यावत्संनिविष्टावयवानि संति। पुनः किंभूतं। घण
वट्टलट्ठत्ति। घनानि निचितानि वृत्तानि वर्तुलानि ललितानि लष्टाद उक्कुसिट्ठ अतिश्लिष्ट उप्पाग्र म्रक्षिताग्रतीक्ष्णशृंगाणि
यस्य स तं। क्वचित् तुप्पसुद्धग्गातिरक्त्ति पाठः। तत्र तुप्पे म्रक्षिते तुप्पाग्रे तुप्पाकारे गोरोचनासन्नासूचकं बिंदु
रूपं तुप्पं तत् अग्रे उपरिभागे ययोः शृंगयोः ते शृंगे यस्य। पुनः किंभूतं। दंतं। नउद्धतं। पुनः किंभूतं। सिवं। शिवं उपद्रवनि
वारकं। पुनः किंभूतं। समाणसोहंतत्ति। समानास्तुल्यप्रमाणाः अत एव शोभमानाः शुद्धा निर्दोषाः श्वेता दंता
यस्य स तं। एतावता वृषभस्य दंताः तुल्यप्रमाणाः शोभमानाः निर्दोषाः श्वेताश्च वर्तंते। पुनः किंभूतं। अमियगु
णत्ति। अमितगुणानां सुखमिव सुखदायकं मंगलमुखमिति पाठे तु अमितगुणं। अत एव मंगलमुखं कल्याणकार ३५

णसमर्थः। वृषभदर्शनेन अयं परमार्थः। वृषभो सारं वहतीति देशनया एवं स्वामी संयमभारं वहंतं करिष्यति॥ इति।
वृषभस्वप्नविचारः॥ ३॥ अथ त्रिशला क्षत्रियाणी तृतीये स्वप्ने सिंहं ददर्श। स सिंहः कीदृशः॥ तत्र सूत्रम्॥
तओ पुणो हारनिकरखीरसागरससंककिरणदगरयरययमहासेलपंडुरतरं। ३००रमणिज्जपिच्छणि
ज्जं। थिरलट्ठपउट्ठवट्टपीवरसुसिलिट्ठविसिट्ठतिक्खदाढाविडंबिअमुहं। परिकम्मियजच्चकमलकोमलपमाण
सोहंतलट्ठउट्ठं। रत्तुप्पलपत्तमउअसुकुमालतालुनिल्लालिअग्गजीहं इत्यादि॥ व्या०॥ ततः पुनर्द्वितीयवृ
षभस्वप्नदर्शनानंतरं त्रिशला क्षत्रियाणी एवं वक्ष्यमाणं सिंहं नभस्तलादाकाशादवपतंतं अवतरंतं नि
जवदनं स्वकीयमुखं अभिपतंतं प्रविशंतं पश्य ×सिंहं× ति। किंभूतं सिं। हारनिकरेत्यादि व्याख्या शब्दात्त
थाप्ययं परमार्थः यादृशो हारपुंजः क्षीरसा गरः पुनर्यादृशः शशांकः किरणाः पानीयरजःशि
शीकराः। यादृशो वैताढ्यः एतेषामिव सः सिंहः धवलो वर्तते। रमणिज्जं रमणीयमत एव सुंद ×पुनः किं सिं×
रं। अत एव प्रेक्षणीयं द्रष्टुं योग्यं। पुनः किं। सिं। थिर लट्ठत्ति। स्थिरौ दाढौ लष्टौ प्रधानौ प्रकोष्ठौ लष्टौ कां
तौ। अस्य प्राग्भागे स्थितौ प्रकांतौ प्रकोष्ठौ कलाचिके यस्य स तं। एतावता यस्य सिंहस्य कलाचिके दाढप्र
धाने कांते च वर्तेते। पुनः किं। सिं। तथा वृत्ता वर्तुलाः पीवराः स्थूलाः सुश्लिष्टाः तीक्ष्णा या दाढास्ताभिर्विडंबितं अलं
कृतं मुखं यस्य स तं। न तो विशेषेण कर्मधारयः। विडंबिअत्ति। विवृतमित्यन्ये। पुनः किं। सिं। परिकम्मिअत्ति। परि
रकर्मिताविव परिकर्मितौ। जात्यकमलवत्कोमलौ। पुनः प्रमाणे नमात्रया शोभमानौ। माइअसोहंत पाठे तु
मानौ। प्रतिमात्रया स्थितौ। क्रूरवाक्त्वा शोभमानौ लष्टौ प्रधानौ ओष्ठौ यस्य स तं। एतावता यस्य सिंहस्य ओष्ठौ कमल
उष्ठौ रक्त

+सहितौ+

वर कोमलतोपमाण । सोमसमानो वर्त्तते । उ॰ कि॰ । सि॰ रत्तुप्पलन्ति । रक्तोत्पलपत्रवत् [illegible] तालुय [illegible] न्ति ।
ल्लालिताग्रा निःक्रामिता या जिह्वा यस्य स तं । तालुस्थानकचिह्नलन्ति दृश्यते । तत्र रक्तोत्पलपत्रवन्मृदुतलं यस्य
स एवंविध निर्लालिताग्रा लपलपायमाना अग्रजिह्वा यस्य तिष्ठति स्म । उ॰ कि॰ । सि॰ मूसागयपवरेत्ति । मूष
रगतं प्रध्मायमानं उत्तमविशेषस्य यत्प्रवरकनकं तद्वत् पिता पितमसिना [illegible] अतएव [illegible] मानं तवत्तवृत्ति विमल
ते भितस्सदृशे नयने यस्य स तं । अत्र चार्षत्वात् विशेषणविशेष्ययोः पूर्वपरनिपाते नात्यंतनियमः । एतावता सिंहा
स्य नयने तप्तकांचनवत्पिंगले तस्य सविद्युत सदृशापीतवर्त्तेते । उ॰ कि॰ । सि॰ विसालपीवरन्ति ।।
विशालो पीवरो उरुहृदयं यस्य सः । उ॰ परि॰ ।। पूर्णो दृढस्नातो विमलः स्कंधो यस्य स तं ततः पदद्वय
स्य कर्मधारयः । तं । उ॰ कि॰ । सि॰ मिउवि सयन्ति । मृदूनि सुक्ष्माणि विशदानि धवला
नि सूक्ष्माणि तनूनि लक्षणोपेतानि विस्तीर्णानि केसराणि स्कंधरोमाणि तेषामाटोपस्ते
न उच्छ्रितया शोभितस्तं । एतावता यस्य सिंहस्य स्कंधेषु जाता धवला सूक्ष्मा विस्तीर्णा उच्छ्रिता केस
रिसटा वर्त्तते । उ॰ कि॰ । सि॰ ऊसिअन्ति । उच्छ्रितं उदग्रं सुनिर्मितं कुंडलीकृतं सुजातं संपूर्णं आस्फोटितमाछो
टितं लांगूलं पुच्छं येन स तं । एतावता येन सिंहेन उदग्रं कुंडलीकृतं संपूर्णं पुच्छं आछोटितं वर्त्तते । उ॰ कि॰ सि॰ ।
सोमं । सौम्यवा मनसा अक्रूरं । उ॰ कि॰ । सि॰ सोमाकारं । मनोहराकृतिं । उ॰ कि॰ । सि॰ लीलायंतं । संचरंतं ।
न उद्धावमानं । उ॰ । जृंभायंतं । जृंभां कुर्वाणं । उ॰ । गाढतिक्खन्ति । गाढातीक्ष्णा याग्रनखा यस्य स तं । उ॰ । वयण
सिरीत्ति । वदनस्य मुखकंदरस्य श्रियेव लार्थं पल्लवं प्रसृत रक्तवास्य प्राप्ता प्रसारिता चार्वी मनोहरा जिह्वा य

×इव+१

×आ+४

विस्तीर्ण

३६

स तं । नवमिल्लाणि अग्गजीहं । इत्यनेन पौनरुक्त्यं विशेषणांतरोपादानात् । क्वचित् वयणसिरिपल्लवपत्तचारु
जीहं इति पाठस्तत्र वदनस्य श्रीः शोभा तादृशी उल्लंबा लंबमाना पत्रवत् चार्वी जिह्वा यस्य स तं । अत्र सिंहस्वप्न
दर्शने ।। अयं हेतुः । यथा सिंहान्गजघटा नीत्या पलायते । तथा भगवद्दर्शनात् नाना वादि शिरोमणिः पलायते ।। इति ।
तृतीयः सिंहस्वप्नविचारः ।। ३ ।। ।। अथ सिंहदर्शनानंतरं उत्तमविशालाकृतिर्या पूर्णचंद्रवदना चंद्रसुंदरी श्री
देवी स्वप्ने पश्यति । कविसमये एवं ।। मानवाः शिरस्तो वर्ण्या देवाश्चरणतः ।। उत्त इति ।। ततः श्रीदेवीवर्णनमप
चरणतः क्रियते ।। तत्र सूत्रम् ।। उच्चागयठाणलट्ठ संठिअं । पसत्थरूवं । सुपइट्ठियकणगकुम्मसरिसो
वमाणचलणं । अच्चुन्नयपीणरइयमंसलउ न्नयतणुतंबनिद्धनहं । इत्यादि ।। व्याख्या ।। कि
श्री देवी । उच्चागयत्ति । उच्चं आगतं स्थानं यया उच्चागो गः पर्वतो हिमवान् तत्र जातं सुच्चाग
डं यत् स्थानं कमलं तत्र लष्टं यथा स्यात् देवं स स्थितां ।। कि॰ श्री॰ । पसत्थन्ति । प्रशस्तं रूपं अतिसु
दररूपं । उ॰ । कि॰ श्री॰ । सुपइट्ठियत्ति । सुप्रतिष्ठितौ स मतलनिवेशितौ कनककूर्मसदृशौ उन्नतत्वात्
सदृशौ उपमानं ययोस्तादृशौ चरणौ यस्याः सा तां । एतावता यस्याः श्रीदेव्याः चरणौ सुवर्णकच्छपवत् उन्न
तौ वर्त्तेते । उ॰ । कि॰ श्री॰ । अच्चुन्नयपीणत्ति । अत्युन्नतं पीनं अंगुष्ठाद्यंगं तत्र रंजिता मृगरमणादन्यत्रापि सतत
नलो म्यारंजिता इव लाक्षारसेन मांसला उन्नता मध्योन्नता नमवस्तलिना स्ताम्रा आरुणाः स्निग्धाश्च रूक्षा न
रवा यस्याः सा यका । अत्युन्नतानपि निजरूपदर्पधरान् पिशीणयतीति अत्युन्नतप्रीणा इति नखविशेष
णमवक्तार्थं । एतावता यस्याः श्रीदेव्या नखा लाक्षारसरंजिता इव मध्योन्नता रक्ताः स्निग्धाश्च वर्त्तंते । उ॰ । कि॰

श्री। कमलपत्रासूत्रि। कमलस्य पत्राणि तानि पत्राणि कमलपत्राणि तद्वत् सुकुमालं करचरणं यस्याः सा तथा सो को-
मलवरांगुलिः श्रुता तां। एतावता यस्याः श्री देव्याः कमलपत्रसदृशौ सुकुमालौ करौ चरणौ कोमलाः प्रधाना अंगु-
लयश्च वर्त्तंते। ५। किं श्री। कुरुविंदावर्त्तेति। कुरुविंदावर्त्तं भूषणविशेष आवर्त्त विशेषो वा तद्वृत्तौ वृत्ता वर्तुले जंघे ×६+३
यस्याः सा तां। एतावता यस्या जंघायाः कुरुविंदावर्त्तनामा आभरणविशेषो वर्त्तंते। आवर्त्त विशेषो वा चिह्नरू-
पा वर्त्तंते। ६। किं श्री। निगूढेति। निगूढजानुनी यस्याः सा तां। ७। किं श्री। गयवरेति। हस्तिवरकरसदृशा सदृ-
शौ ऊरू यस्याः सा। ८। किं श्री। चामीकररइअ त्ति। चामीकरं स्वर्णं तेन रचिता मेखला चामीक-
ररचिता मेखला तया युक्तं सहितं कांतं विस्तीर्णं श्रोणिचक्रं यस्याः सा तां। एतावता यस्याः
कटितटं स्वर्णमेखलया विराजमानं वर्त्तंते। ९। किं श्री। जच्चंजणेति। जात्यांजनं भ्र-
मरजलदप्रकरः ऋजुः वर्णेन तत्समा ऋज्वी। समा समा अविषमा संहिता निरंतरा तनुका
सूक्ष्मा आदेयसुभगा ललिता सविलासा सुकुमारे स्निग्धे शरीरावयवाप्यभ्यापि मृद्वी रमणीया मनोज्ञा
रोमराजी यस्याः सा तां। एतावता यस्याः देव्याः रोमराजी जात्यांजनं भ्रमरः जलदघटाश्च तद्वच्छ्यामा शरी- ३७
रादिशोभ्यादिस्निग्धा सुकुमारा निरंतरा मनोहरा च वर्त्तते। १०। किं श्री। नाभीमंडलेति। नाभीमंडलेन सुंदरं वि-
शालं प्रशस्तं शुभलक्षणवत् जघनं यस्याः सा तां। एतावता यस्याः श्री देव्याः नाभीमंडलेन जघनं अत्यंत
सुंदरं प्रशस्तलक्षणसहितं च वर्त्तते। ११। किं श्री। करयलमाइअ त्ति। करतलेन माइअ त्ति। मेयं मानं वा।
प्रशस्त त्रिवलीकं शातनवलित्रयसहितं मध्यं यस्याः सा तां। एतावता यस्याः कटिमध्यं करतलेन ग्राह्यं वा-

लित्रयशोभितं च वर्त्तते। १२। किं श्री। नाणामणि त्ति। नानाप्रकाराणि यानि भूषणानि आभरणानि वा द्युतियोज्ज्व-
मणयः चंद्रकांताद्याः रत्नानि विद्रुमादीनि कनकं पीतवर्णं तपनीयं रक्तस्वर्णं तद्रूपा तैर्विमलमहार्घा-
स्तौ विशेषितं तेषां यानि आभरणानि उपांगपरिधेयानि तैर्विराजितानि उपांगानि अंगुल्यादीनि यस्या ×व्याघ्रागामंगानि शिराः प्रभृतीनि+३
: सा तां। आगमे अर्थवान्। एतावता नानाप्रकारैः चंद्रकांतादिमणीनां विद्रुमादिरत्नानां पीतसुवर्णस्य
रक्तस्वर्णस्य च याभिराभरणानि तैः शिरःप्रभृतीनि अंगानि भूषणैश्च अंगुल्यादीनि उपांगानि यस्याः।
विराजमानानि संति। १३। किं श्री। हारविरायंत त्ति। हारेण विराजत् कुंदमालया च परिणद्धं ज-
लज्जलितं त्ति। ज्वाज्वल्यमानं जाज्वल्यमानं त्ति। प्रावतडूलवलदेवंदीप्यमानं स्तनयुगलं
मेव विमलोकलत्नो यस्याः सा तां। एतावता यस्याः श्री देव्याः स्तनयुगलं हारेण
कुंदजातीयपुष्पमालया च विराजितं सकलसमृद्धं च वर्त्तते। १४। किं श्री। एवंविधमुत्त-
का कलापेनाभिः कर्णाभरण सहितां। किंविशिष्टेन मुक्ता कलापेन। आइअ त्ति। आदृतैः आ-
दरसहितैः। उत्पथितैः आप्तैः विज्ञानिभिः विरचितेन विरचितमंडलेन। १५। किं श्री। सुलगिहेप्पिहा विलि- ×सुरनेगाि+५
ड्डालकि र्षेण विरागिः। उज्ज्वलेन। अथवा किं श्री। आचितिर्मर्यादा स्याना चितः नयस्तात्पत्रिकामरकत
पत्राणि। तानि विभूषितानि तियोज्ज्वं। कचित् आति अपत्रि अत्रि। द्रप्रातां। तत्र त्रिकं वंशस्य अधोभागः त-
त्समीपे पलक्षितातासा ग्रीवा त्रिकं तत्र आत्रिका त्रिकं यावत् प्रालंबका ज्ञेयाः स्यत तत्र आत्रिक प्रालंबकं
एवंविधं सूचितं विभूषायेन मुक्ता कलापेन तद्वत् विपुलंबमानत्वादि त्यर्थः। १६। किं श्री। उरत्थदीना

रमालया विरचितेन विराजितेन यांकं बमणिसूत्रकेण वा उपलक्षितां। पु। किं। श्री। आननकोटुंबिकेन सोभागुणसमुदये
न च उपलक्षितां। किं। आननकोटुंबिकेन कमलेति आर्षत्वात्। अंसोपसक्तस्कंधलग्नं विस्तीर्णमपि परमिद्धा। एवम
न्यत्रापि। यतक्तं कलत्रगतं स्योहस्संती प्रशास्त्राउलायत्रा। तथाहि तेन यथा किल राजा कोटुंबिकैः शोभते। एवमानन
मपि। शोभासमुदायेनेति। शोभादीनि। सपवगुणस्तस्य समुदायः प्राग्भारस्तेनोपलक्षितां। पुनः किं। श्री। कमलेति।
कमलवत् अमलविशालविस्तीर्णरमणीये लोचने यस्याः सा तां। पु। किं। श्री। कमलेति प्रकासलीलादीप्तो यो
करौ तदगृहीताभ्यां कमलाभ्यां मुक्तो करतलात् यमक रंदरसो यस्याः सा। तां। अत्रापि कमलशब्दस्य प्राकृत
त्वेन पूर्वनिपातः। पु। किं। श्री। लीलावाय्यतिलील यामनवतः स्वेदोर्ध्वं तस्याः स्वेदसिव श्रमावात्। वाल
र्धवातक्षिप्रार्धकृतायः पक्षकस्तालकंतं यां। डनमित्यर्थः। तेनोपलक्षितां। कचित्। लीला
शामातदर्घपरिस्मक स्पर्शयावादस्त्रकाताचि हितः पक्षः प्रतिज्ञापरिग्रहो यिनसत्तया। कः प्रत्य
यातिताशामात्रगुणसमुदयस्य विशेषणतयाख्या। चक्षते। तत्त्वगंतरितवितनप्रतीयते। पु। किं। श्री। सुवि
सदत्ति। सुविशदः स्पष्टोनपुनर्लेटाकूटवत्। अविद्धत्तः क्रमः शेषो मोघानाद्विरलः सूक्ष्मः स्तलिनो लंबमानः के
सहस्तः केशपाशो यस्याः सा तां। एतावता यस्याः श्रीदेव्याः केशपाशः स्पष्टः। शेषामालंबमानश्च शोभते। पु। किं।
श्री। पद्मनि। पद्मद्रहमध्यवर्तिकमलवासिनी। पु। किं। श्री। दिग्गजानि। दिग्गजैः पूरूपीवरकरैः। गरिष्ठपुष्ठकुंभा
दिः अभिषिच्यमानां नागवंतीवृत्ताहिमवच्छिखरिस्त्वदे पूर्वदंतवर्णनां। श्रीदेवीं त्रिशलाक्षत्रियाणी पश्यति॥
॥अथ श्रीदेवीस्वरूपं क्षेत्रस्वरूपं क्षेत्रसमासादिपु लेशतो लिख्यते॥ तथाहि॥ अस्मिन् जंबूद्वीपे भरतक्षेत्रे हिमवान्

३८

पर्वतोस्ति। शाश्वतः पर्वतः कीदृशः स्वर्णमयः। एकं सहस्रं द्विपंचाशदुपरि योजनानि द्वादश कलाश्च शतयः पृथु
लो वर्त्तते। पुनः यः शतयोजनान्युच्चः। तस्य हिमवत्पर्वतस्य उपरि एकः पद्मद्रहोस्ति। स कीदृशः दशयो
जनानि उंडः। पंचशत ५०० योजनानि विस्तार पृथुलः। एकं योजनं समदसंवलंबं निर्मलजलेन च संपूर्णः। तस्य
पद्मद्रहस्य वज्ररत्नमयं तलं। वज्ररत्नमयं च पार्श्वद्वयं। तस्य पद्मद्रहस्य मध्ये एकं श्रीदेवीवासयोग्यं प
कमलं वर्त्तते। पुनः तत्कीदृशं। एकं योजनं पृथुलं। एकं योजनं लंबं। दशयोजनानि पानीयमध्ये क्रोश
द्वयं पानीयस्योपरि शोभते। दशयोजनानि निम्नं वज्रोंथं तस्य परिधिः। वज्ररत्नमयं तस्य कमलस्य
तलं। अरिष्टरत्नमयं तस्य मूलं रक्तरत्नमयं। तस्य कंदः। वैडूर्यरत्नमयं तस्य नालं। रत्नसुव
र्णमयानि तस्य बाह्यपत्राणि। किंचिद्रक्त जांबूनदनामसुवर्णमयानि तस्य बाह्यपत्रा
णि। तस्य कमलस्य मध्ये बीजरूपं स्वर्णमय १ एका कर्णिका वर्त्तते। सा कीदृशी। रत्नस्व
र्णमया तस्याः केसराः क्रोशद्वयं सा लंबा पृथु ला च एका क्रोशं याव उच्चा। पिंडरूपेण क्रोश
त्रयं सविशेषं तस्याः परिधिः। तस्याः कर्णिकाया मध्यभागे श्रीदेवीयोग्यं एकं गृहं वर्त्तते। तत्कीदृशं। एकं
क्रोशं यावत् लंबं। अर्द्धक्रोशं यावत् पृथुलं। किंचिन्न्यूनं क्रोशं यावदुच्चं। तस्य गृहस्य त्रीणि द्वाराणि एकं द्वा
रं पूर्वदिशि १ द्वितीयं दक्षिणदिशि २ तृतीयमुत्तरदिशि ३। तानि द्वाराणि पंचशत ५०० धनुः संख्यानि। सार्द्ध
द्विशतं २५० धनूंषि २ पृथुलानि तस्य गृहस्य मध्ये सार्द्धद्विशतधनुः २५० प्रमाणा एका मणिमयी वेदिका
वर्त्तते। तस्याः वेदिकाया उपरि एका श्रीदेवताया योग्या शय्या वर्त्तते। अथ यो निडंदं कमलं यत्कथितं तत्क

मलमष्टोत्तरशतकमलैः १०८ वलयाकारेण परिवेष्टितं वर्त्तते। एतानि अष्टोत्तरशतकमलानि मूलमुख्यकम-
लार्द्धप्रमाणानि ज्ञेयानि। तेष्वष्टोत्तरशतकमलेषु श्रीदेव्या आभरणानि संति। इति प्रथमं वलयं॥१॥
पुनः प्रथमवलयस्य परितो वलयाकारेण कमलानां द्वितीयवलयो वर्त्तते। तत्र पूर्वदिशि श्रीदेव्याः चतस्रो म-
हत्तरा देव्यो वर्त्तंते। तासां चत्वारि कमलानि संति॥१॥ पुनराग्नेयकोणे श्रीदेव्या अभ्यंतरपर्षदस्थानां गुरुस्था-
नीया अष्टौ सहस्राणि देवा वर्त्तंते। तेषामष्टौ सहस्राणि कमलानि वर्त्तंते॥२॥ दक्षिणदिशि श्रीदेव्याः मध्यम-
पर्षदि स्थातारः दशसहस्रदेवा मित्रस्थानीया वर्त्तंते। तेषां दशसहस्रकमलानि संति॥३॥ पुनर्नैर्ऋति-
कोणे श्रीदेव्या द्वादशसहस्रप्रमाणाः किंकरस्थानीया देवाः संति। तेषां द्वादशसहस्रकम-
लानि संति॥४॥ पुनः पश्चिमदिशि श्रीदेव्याः सप्त अनीकाधिपतयः संति॥५॥ वायव्यकोणे
१ उत्तरदिशि २ ईशानकोणे च ३ एतत्त्रयदिक्षु श्रीदेव्याश्चतुःसहस्रप्रमाणाः सामानिका देवाः
वर्त्तंते। तेषां चतुःसहस्रकमलानि संति। एवं दिशामष्टकेन। द्वितीयं वलयं॥२॥ पुनर्द्वितीयवलयस्य
परितो वलयाकारेण तृतीयो वलयो वर्त्तते। तस्मिन्वलये श्रीदेव्याः षोडशसहस्रप्रमाणाः अंगरक्षका देवाः
वर्त्तंते। तेषां षोडशसहस्रकमलानि संति। इति तृतीयवलयं॥३॥ पुनस्तस्मात्तृतीयवलयात्परतो वलयाका-
रेण चतुर्थो वलयो वर्त्तते। तस्मिन्नभ्यंतरवलये श्रीदेव्या ये द्वात्रिंशल्लक्षाः ३२ अभ्यंतरा आभियोगिकदेवा ३७
स्संति। तेषां द्वात्रिंशल्लक्षकमलानि संति॥ इति चतुर्थो वलयः॥४॥ पुनस्तस्माच्चतुर्थादभ्यंतरवलयात्परतो
वलयाकारेण पंचमो मध्यवलयो वर्त्तते। तस्मिन्वलये श्रीदेव्याश्चत्वारिंश४०ल्लक्षा मध्यमा आभियोगिकदेवाः

वर्त्तंते। तेषां चत्वारिंशल्लक्षकमलानि संति। इति पंचमो वलयः॥५॥ पुनस्तस्मात्पंचमवलयात्परतो वलयाकारे-
ण षष्ठो वलयो बाह्यो वर्त्तते। तस्मिन्वलये श्रीदेव्या अष्टचत्वारिंशल्लक्षा ये बाह्या आभियोगिकदेवा वर्त्तंते। तेषां दे-
वानां अष्टचत्वारिंशल्लक्षकमलानि संति। इति षष्ठो वलयः॥६॥ ॥अथ कियंति सर्वाणि कमलानि जातानि तत्रा-
ह॥ एका कोटी विंशतिर्लक्षाः पंचाशत्सहस्राः एकं शतं विंशतिश्च कमलानि शाश्वतानि पृथिवीमयानि॥ व-
नस्पतिकायकमलसदृशाकारतया दृश्यमानानि। एतत्सर्वं कमलवासिनो देवा देव्यश्च श्रीसेवां कुर्वाणाः सं-
ति केचित् श्रीस्थाने लक्ष्मीरूपां वर्णयंति॥ तन्न संगतं। यतो लक्ष्मीदेवता तु ऐरवतक्षेत्रे शिखरिपर्वतद्र-
हनिवासिनी॥ अथवा लक्ष्मीः पद्मा रमा या मा ता मा श्रीः कमलेंदिरा। श्रीहेमाचार्यवचनात्॥ लक्ष्मी-
ः श्रीपर्यायत्वेन गण्यते। तदा लक्ष्मीनामग्रहणमपि युक्तं तात्पर्यात्॥ इति चतुर्थस्वप्नविचारः॥४
॥ ॥अथ पंचमस्वप्ने त्रिशला पुष्पमालां पश्यति। परं कीदृशीं॥ तत्राह सूत्रं॥ तओ पुणो सरसकुसुम-
मंदारदामरमणिज्जभूअं। चंपगासोगपुन्नागनागपियंगुसिरीसमुग्गरमल्लिआजाइजूहिअंकोल्लको-
ज्जकोरिंटपत्तदमणमालिअवासंतिअपउमुप्पलपाडलकुंदाइमुत्तसहकारसुरहिगंधिं। अण५॥ ततश्चतुर्थस्वप्नदर्श-
नानंतरं त्रिशला क्षत्रियाणी एवंविधं दाम पुष्पमालां पश्यति। किं। दाम। सरसम्नि। सरसकुसुमयुक्तमंदारदाम तेन रम-
णीयभूतं। रम्यं संजातं। एतावता पारिजात १ मंदार २ हरिचंदन ३ संतानकादि ४ कल्पवृक्षसदपुष्पमालाभिः शो।
सतं। पु। किं। दाम। चंपगासोगन्नि॥ चंपक अशोक पुन्नाग प्रियंगु शिरीष मोग्गर मल्लिका जाति यूथिका कोल्लकोज्ज-
कोरंटकपत्र दमनक नवमालिका वासंतिका पद्म उत्पल पाटल कुंद अतिमुक्त सहकाराणां सुरभिगंधो वर्त्त-

दिशाविदिशोर्दश

तो। यस्मिन्नंतरात्। पु। किं। अणुवम्न। अनुपमेन गंधेन दशदिशो पि वासयत्। पुनः किं। दा। सव्वोउअत्ति। सर्वर्तुकं यत्सुरभि।
कुसुममाल्यं तेन धवलं च तत् विलसत्कांतं बहुवर्णं भक्तिचित्रं चेति विशेषणकर्मधारयः॥ अनेन धवलवर्णस्या- अधिकं
श्रीयत
धिक्यं लक्ष्यते। पुनः षट्पदेति षट्पदमधुकरीभ्रमराः वर्णादि विशिष्टा भ्रमरजातय तेषां गणः समुदायः गुम-
गुमायमानो मधुरं ध्वनन् निलीयमानः स्थानांतरात् आगत्य तत्र लीयमानो गुंजन् मधुरं शब्दविशेषं कुर्वन् देश-
*तस्मिन्न भागेषु तस्मिन् देशो यस्य दाम्नः गमकत्वादेव मध्यपदसमासः॥ ततः पाश्चात्यविशेषणकर्मधारये षट्पदादि वि-
नभोंतरात्
शेषणस्य पुनः कर्मधारयः॥ पु। किं। नभस्तलाभोगतला नू अवपतंतं अवतरंतं दाम्ना दर्शनात् यथा॥ पुष्प-
मालापरिमलः सर्वदिक्षु प्रसरति। तथा भगवतो पि यशःपुंजः सर्वत्र विस्तरिष्यति॥ तद्वत् मौलिमालावी- पिंड-समूह-स्य
ति। दामदर्शनात् त्रिभुवनालोकमस्तकधार्य यिष्यति॥ इति दामस्वप्नविचारः॥५॥ ॥अथ
षष्ठस्वप्ने त्रिशलाक्षत्रियाणी चंद्रं पश्यति॥ परं चंद्रः कीदृशः तत्राह॥ सूत्रं॥ ससिं च गोखीरफेण
दगरयरययकलसपंडुरं सुभं हिअअनयणकंतं पडिपुन्नं तिमिरनिकरघणगुहिरवितिमिरकरं इत्यादि
॥व्या०॥ सा देवी त्रिशलाक्षत्रियाणी षष्ठे स्वप्ने शशिनं चंद्रं पश्यति। परं किं। भू। शशिनं। गोखीरेति। गोक्षीरं गोदुग्धं फे-
नं डिंडीरः दगरजः पानीयशीकराः। रजतकलशो रूप्यघटः एतेषामिव पांडुरः श्वेतस्तं। पु। किं। भू। शुभं कल्याण-
कारकं। पु। किं। भू। हिअयेति। हृदयस्य नयनयोः कांतं। पु। किं। भू। पडिपुन्नं। संपूर्णं। पु। किं। भू। वितिमिरेति॥ 40
तिमिरनिकरेण घनगंभीरस्य वननिकुंजादेः तिमिराणां अभावो वितिमिरं तत्करणशीलं। पु। किं। भू। पमाणप-
*प्रमाण+१ क्खंति। प्रमाणपक्षयोः वर्षादिप्रमाणहेतोः शुक्लकृष्णपक्षयोः अंतर्मध्ये राकाली लेखा यस्य स तं॥ अथवा चंद्र-

स्तितं करोति पौर्णमासी

निवर्त्तनात् *प्रकाशितं।+२

मा सापेक्षया प्रमाणपक्षयोः अंते पौर्णमास्यां राकादा दर्शदायिन्यो लेखाः कला यस्य स तं। संपूर्णकलमित्यर्थः॥ पुनः
किं। भू। कुमुदेति। कुमुदवनानां रात्रिविकासिकमलानां विबोधकं। पु। किं। भू। निशायाः रात्रेः शोभाकारकं। पु।
किं। भू। सुपरिमठ्ठेति। सुपरिमृष्टेन दर्पणतलेनोपमा यस्य स तं। पु। किं। भू। हंसस्येव पटुर्धवलो वर्णो यस्य स तं॥
पु। किं। भू। जोइसेति। अत्र ज्योतिःसमुद्देन ग्रहादिना पदं सर्वत्र द्रष्टव्यं। तस्य अधिकमिव लक्ष्यते। इति। अथवा
रव्यानात्। पु। किं। भू। तमसोंधकारस्य रिपुर्वैरी तस्य ध्वंसनात्। तमारिपु मिति पाठे तमसोंधकारस्य अभिव लक्ष्यते इति अव्याख्यानात्॥+
*पुनः किं० न रिपुः शत्रुर्वा यस्मिन् स तं। अत्र अकारस्य प्राकृ- षः कार्यः। पु। किं। भू। मयणेति। मदनस्य कंदर्पस्य
शरापूरमिव तू णीरमिव उदितं दृष्टं चंद्रं लक्ष्मी क रोति कामः कामिनां स्वशरान्॥ पुनः किं। भू।
समुद्देति। समुद्रस्य उदकं पानीयं पूरयति॥ चं डि कयात स्य समुद्रस्य उल्लासमानात्॥ पुनः किंभू-
तं। दुम्मणेति। दुर्मनं विरहिणी लोकं पादैः कि रणैः शोषयंतं तापातिरेककरणात्। पादकि-
रितिपक्षे शोषयत्यां कः पुनः श्रितियो जितामव। पु। किं। उजितं। पुमनस्कं दुःखिन्नं कृतोयतो दयितवर्जितं। त-
मनोहरं दिदीप्तं तां द्दवर्जितं। पु। किं। भू। सोम्मचारुरूपं। पु। किं। भू। गगणेति। गगनमंडलस्याकाशमंडलस्य विशालस्य चंक्रम्यमा-
णं क्रमं तिलकमिव विशेषादेवत्वात्। गगणमणि त्ति। पाठे तु गगनस्य। अनेन अस्मिन्वा गमनं मार्गः। पु। किं। भू। रो-
हिणि त्ति। रोहिण्या मनश्चित्तं तस्य हितदो इष्टफलदायी वल्लभः प्रियस्तं। एकपाक्षिकप्रेमनिरासार्थं हितइत्यु-
क्तं। सर्वनक्षत्राधिपत्ये पि यद्रोहिणीवल्लभ इति विशेषणं तद्लोकरूढ्या। पु। किं। भू। पूर्णो विकलः चंद्रश्चा-
क्लादोय स्मात्॥ अथवा पूर्णश्चंद्रो दीप्तिर्यस्य मघाद्यनावरणात्। अतएव समुल्लसंतं प्रतिक्षणं दीप्यमानं पुनः

सोनाम्

× नवशतकोटीकोट्य + २

र्यस्य चंद्रस्य सिमध्यं एतावद्भवंति॥ अष्टाशीतिर्मंगलादयो ग्रहाः॥ अष्टाविंशतिर्नक्षत्राणि॥ अश्विन्यादीनि॥ तुमस्तारा
णां षट्षष्ठिसहस्रकोटीकोट्यः॥ पंचसप्ततिकोटीकोट्यश्च एते सर्वे पि चंद्रस्य परिवारं कुर्वंति॥ चंद्रस्वप्नदर्शनमात्रेण
भगवान् चंद्रसदृशवदनो नेत्रतापसंहारी सौम्यो लोकानां आनंददायक नयनानां आल्हादकारी च स भविष्यति॥ इति चं
द्रस्वप्नविचारः॥६॥ ॥अथ सप्तमस्वप्ने त्रिशला सूर्यं पश्यति स्म॥ तत्र सूत्रं॥ तओ पुणो तमपडलपरिप्फुडं चे
व तेयसा पज्जलंतरूवं॥ रत्तासोगपगासकिंसुअसुअमुहगुंजद्धरागसरिसं॥ कमलवणालंकरणं॥ अंकणं जो
इसस्स॥ अंबरतलपईवं॥ हिमपडलगलग्गहं॥ इत्या दि॥ ७॥ ततः सा त्रिशला क्षत्रियाणी सप्तमस्वप्ने
एवंविधं सूर्यं पश्यति॥ किं॥ सूत्रं तमपडलत्ति॥ त (अंधकार) मः पडलस्य अभावः अतमःपटलं तत्परिस्फुटं अथ
वा तमःपटलं परिस्फुटयतीति तमःपटलपरि (प्रगट) स्फु टः स्वगुणैः स्वराः इति चेवतत्त्व॥ ३॥ किं॥ सू॥ तेयसा
ह स्य अवधारणार्थस्य व्यवहितसंबंधत्वात् तेज सि व प्रज्वलद्रूपं प्रज्वलद्वह्नि सूर्यमंडलवर्तित्वात्॥ पृथि
वीकायिकाः जीवा एव॥ अथवा चकारस्य समुच्चय र्थः॥ ३॥ किं॥ सू॥ रत्तासोगत्ति॥ रक्ताशोकश्च १ प्रकाश
किंशुकश्च॥ पुष्पितपलाशः २ शुकमुखं ३ गुंजार्धश्च ४॥ एतेषां सदृशस्तं॥ आरक्तत्वात्॥ एतावता रक्ताशोकवृक्षः
१ पुष्पितकिंशुकवृक्षः २॥ शुकस्य मुखं ३ गुंजायाः अर्धभागो मुखं विना ४ एताभिर्वस्तुभिः यथा रक्तानि भवंति तद्
त्सूर्योपि रक्तवर्णः॥ ३॥ किं॥ सू॥ कमलत्ति॥ कमलवनं अलंकरोति विकाशश्रिया विभूषयति॥ कमलवनालं
करणस्तं॥ ३॥ किं॥ सू॥ ज्योतिषस्य ज्योतिषां समूहो ज्योतिश्चक्रं तस्य अंकनं मेषादिराशिसंक्रमणादिना लक्ष
णं ज्ञापकं॥ ३॥ किं॥ सू॥ अंबरतले आकाशतले प्रदीपकं॥ आकाशस्य दीपकमिवेत्यर्थः॥ ३॥ किं॥ सू॥ हिमपडलेति॥ ४१

सूटकेव ३५ + दीपकवत् + १ × बादर + रतिबलक + ज्योतिषं + २ लक्षणं

हिमपडलं गले गृह्णातीति हिमपटलगलग्रहः अर्वतपात्रशरत्तो गलहस्तं ददातीतीतिस्तं॥ ३॥ किं॥ सू॥ गहगणोरुना
।यहगणस्य उरुमहान् नायकस्तं॥ ३॥ किं॥ सू॥ रत्तिविणासमिति स्पष्टं॥ क्वचित् रत्तिविणासमिति पाठस्तत्र
रात्रिव्यपनाशमिति व्याख्येयं॥ ३॥ किं॥ सू॥ उदयछेति॥ उदये अ त्थमणे च मुहूर्तं यावत् सुखदर्शनं॥ अन्यथा
दुन्निरीक्ष्यरूपमिति वक्ष्यमाणं॥ ३॥ किं॥ सू॥ रत्ति मुहत्ति॥ रात्रौ मकारस्य अलाक्षणिकत्वात् अहा वेन उद्धूंखला
नुहः प्रचारान् दुष्टप्रचारान् चौरपारदारिकादीन् प्रमर्दयति॥ यः सतां॥ रत्ति मुद्धंतपा [illegible] रात्रि [illegible] अत
:प्रचरंतश्च खलास्तेषां प्रचाराः तत्प्रमर्दनं॥ य था दि॥ राज्ञा [illegible] तः [illegible] कुरेवप्रचारान्॥
अपि तमा विधुतसच्चक्षुषां पृथिव्यामांस सूर्योदये उ सुकरः प्रकारः प्रवितुइति॥ ३॥ किं॥ सू॥ सीतवेगम
हनं [illegible] विहंसकं॥ ३॥ किं॥ सू॥ मेरु रु गि रिसततपरिवर्द्धकं तं॥ ३॥ विशालं विपुलं॥ ३॥ ततः
सूर्यो रस्सीसहस्सेति॥ रश्मिसहस्रेण दलित ग लिताद् [illegible] आदीनां [illegible]
यस्मात् पंथे नवासानतवाम्॥ पयहि अत्ति॥ पाठे ३ रा रश्मिसहस्रेण प्रकटितादीप्ता [illegible]
अत्र रश्मिसहस्राभिधानं रूढ्या अन्यथा आधिक्यमपि रश्मीनां लोकशास्त्रे उच्यते॥ यथाऽङ्गुलं सदा [illegible] उक्तं
स्याति रश्मयःतेरश्मयः॥ तथाहि॥ चैत्रमासे सूर्यस्य द्वादशशतानि किरणाः॥ १ वैशाखमासे त्रयोदशशतानि कि
रणाः॥ २ ज्येष्ठमासे चतुर्दशशतानि किरणाः॥ ३॥ आषाढमासे पंचदशशतानि किरणाः॥ ४॥ श्रावणमासेपि
चतुर्दशशतानि किरणाः॥ ५॥ भाद्रपदमासे चतुर्दशशतानि किरणाः॥ ६॥ आश्विनमासे षोडशशतानि कि
रणाः॥ ७॥ कार्तिकमासे एकादशशतानि किरणाः॥ ८॥ मार्गशीर्षमासे सार्धानि दशशतानि किरणाः॥ ९॥ पोष

+ मेरुगिरिवि + ८

॰ईदिनेन॰ निजनिनार्थ॰

निविशाङ॰ अशिनैव॰

मासे एकं सहस्रं किरणाः १०। माघमासे एकादशशतानि किरणाः ११। फाल्गुनमासे सार्धानि दशशतानि किरणाः
१२॥ अयं विशालगात्रो जिनाकृतेऽति॥ पुनरपि अयं सूर्यः॥ अरुणप्रभारश्मिः १ सूर्यकांतमणि २ चक्रवाक ३ कमल ४।
पथिकादीनां प्रीतिकारकः पुनरपि॥ तारा १ चंद्र २ दीपक ३ अघविध धूक ५ अंधकार ६ चौर ७ कुमुद ८ कुलटादी
दीनामनिष्टकारकोऽस्ति॥ सूर्यदर्शनात् भगवतः तेजः प्रतापप्रबलो भविष्यति॥ तमवन्नादः सः रात्रिहंता इति॥ सू
र्यस्वदर्शनात् मंदलधूलोलविष्यति॥ इति सप्तमस्वप्न विचारः॥७॥ ॥अथाष्टमे स्वप्ने ध्वजं पश्यति। परं स ध्वजः कीदृ
शः तत्राह सूत्रम्॥ तओ पुणो जच्चकणगलट्ठिपइट्ठि अं समूहनीलरत्तपीअसुक्किलसुकुमालुल्लसिअमो
रपिच्छकयमुद्धयं धयं अहिअसस्सिरीअं फा लि असंखंककुंददगरययरययकलसपंडुरेण मत्थया
त्थेण सीहेण रायमाणेण रायमाणमित्यादि॥ ८॥ ततः पुनः सा त्रिशला क्षत्रियाणी अष्टमे स्वप्ने
एवंविधं ध्वजं पश्यति। किं॰ ध्व॰ जात्य क कनकस्य अत्यंत शुद्धस्य स्वर्णस्य या यष्टिः तस्यां प्रतिष्ठि
तं स्थापितं पुनः किं॰ ध्व॰ संमूहति। समूहो दलिएषांइ नसमूहाः॥ अन्यादिशात् अप्रत्यये समूहवंतः॥ इत्युपाइ
त्यर्थः॥ तैर्नील १ रक्त २ पीत ३ शुक्लैः ४ चकौ तस्य नीलात् अनंतिविप्रकर्षात्। पार्श्ववर्तिनात् इत्यर्थः॥ पंचवर्णैः सुकु
मारैः कोमलैः उल्लसद्भिर्वातेन स्फुरद्भिर्मयूरपिच्छैः कृता मूर्द्धजा इव केशा इव यस्य स तं। पुनः किं॰ ध्व॰ अधिकं स
श्रीकं अतीवशोभायुक्तं। पुनः किं॰ ध्व॰ एवंविधेन सिंहेन समगवहांबमसूत सिंहाकारपताकया सिंहविशेषण
वा राजमानं। किं॰ सिंहेन। फालिअ इति। स्फाटिकं स्फटिकं शंखः कंबुः अथवा स्फाटिको भिन्नः शंखः अंको रत्नवि
शेषः कुंदमाल्यं दकरजः सिकलकणा रजतकलशो रूप्यकलशः तद्वत् पांडुरेण एतावता धवलेन सिंहरूपं वर्तते ४२

निरूपद्रव॰ कोमल॰

नत्त स्फुटिक १ अंक रत्न २ कुंद ३ दकरज कलश रूप्यकलसपवत् धवलं वर्त्तते। गगनमंडलं भेत्तुं व्यवसितेन कृतो
द्यम इव अत एव विभ्राजत इत्युत्प्रेक्षा॥ पुनः किं॰ ध्व॰ शिवः सौम्यः मृदुः॥ अकठिनः यो मारुतो वायुस्तस्य लहर्यः॥ आ
हः तेन आहतं आंदोलितं अत एव प्रकंपमानं इतस्ततो नृत्यंतं अथवा शिवं मृदुकमारुत आहत लताव कंपमानमि
ति व्याख्येयं। लता इव यष्टिः। आर्षत्वात् आहतस्य परनिपातः॥ पुनः किं॰ ध्व॰ अतिप्रमाणं महाप्रमाणं। पुनः किं॰ ध्व॰ जन
प्रेक्षणीयरूपम्। ध्वजदर्शनात् भगवान् स्वकुलकेतुत्रयसहितां ध्वजादविशरिष्यति। पुनर्वंशो ध्वजा प्राप्योल्लविष्य
ति। धर्मध्वज श्रिया भूषितो भविष्यति॥ इत्यष्टमस्वप्न विचारः॥८॥ ॥पुनः सा त्रिशला नवमस्वप्ने पूर्णक
लशं पश्यति परं सः कलशः कीदृशः तत्राह सूत्रम्॥ त ओ पुणो जच्चकंचणुज्जलंतरूवं। निम्मलजलपु
ण्णमुत्तमं। दिप्पमाणसोहं। कमलकलावप रि रा यमाणं। पडिपुन्नसव्वमंगलभेअसमागयं
। पवररयणपरायंतकमलट्ठिअं इत्यादि व्याख्या॥ सा त्रिशला क्षत्रियाणी नवमस्वप्ने पूर्णकलशं पश्य
ति। किं॰ कु॰ जात्यकांचनेन उत्तमस्वर्णेन उज्ज्वलं रूपं यस्य स तं। पुनः किं॰ कु॰ निर्मलजलेन पवित्रपानीयेन प्रति
पूर्णं भृतं। पुनः किं॰ कु॰ उत्तमं प्रधानं। पुनः किं॰ क॰ दिप्प। दीप्यमानशोभं कांतं। दीप्यमाना शोभा यस्य स तं। पुनः किं॰ क
कमलकलापेन कमलसमूहेन परि समंतात् राजमानं। क्वचित् कालमऊरकलावपरिरायमाणं पाठः॥ तत्र स
ष्टार्थ एव। पुनः किं॰ क॰ प्रतिपूर्णकानां सर्वमंगलदानां समागमस्थानं। क्वचित् पडिपुन्नसव्वमंगल
भेयसमागमं। इति पाठः तत्र प्रतिबुध्यमानानि जागरूकाणि यानि सर्वमंगलानि। तेषां आलयो निवासस्थानः॥
समागमः। समुदायो गमनं यस्य स तं। पुनः किं॰ क॰ पवरेति। प्रवररत्नैः प्रकार्षेण राजति कमले स्थितं यद्वा प्रवररत्न

सोभायमान॰

×पुनः किं॰ सदेना मलसुश्चित उनरपिराजमानत शोभमानेना पु॰ किं॰ सिंहेना +१

यस्य तथा परागः उध्धरेणुः अंतर्गतो यस्य तादृशे कमले स्थितः क्वचित् पवररयणपसरंतकमलठिअं ति। पाठस्त
त्रप्रवराणि रत्नानि यत्र तच्च स्थितं। ३। किं। का। नयणमि। नयनानां आनंदकत्वात्। भूषणकरं। ३। किं। का। उच्चास
मानं स्वयं उत्साथा वा अभ्रमानं। अत एव सर्वा दिशो दीपयंतं। ३। किं। इ। सोमेति। सोमलक्ष्मा उज्ज्वलसंपदा।
निहेलणं ति। दर्शनीया कृद्धं। ३। किं। का। सर्वैः पापैः अशिवैः परिवर्जितं। अत एव शुभं। ३। नः साउरंदीपं। ३।
किं। का। श्रियात्रिवर्गसंपन्ना वरं श्रेष्ठं। तदा गर्भसूचकत्वात्। ३। किं। का। समवाउयंति। सर्वैस्मर्त्तुभिः समुत्प
कंबसा ६ न्नानां सुरभिकुसुमानां आसक्तं माल्यदाममाला यस्मि श्री न् सतं। अत्र दाम शब्दः अशोभायां। यथा वनांतकापाल
पालीत्यादौ। अंतरपाली शब्दो। ३। किं। इ। रतेः ति ॥ रक्तशब्दस्य रूप्यवाचकत्वेपि अन्न कनकवाचि
त्वाद्यं। स्वर्णकलसदर्शनात् भगवतो मंगलश्रे लि र्भविष्यति॥ इति नवमस्वप्नपूर्णकुंभविचारः॥ ९॥ ॥
॥ अथ दशमस्वप्ने पद्मसरः पश्यति। पुनस्तत्सरः की दृशं। तन्नामादि सूत्रं॥ तओ पुणो रविकिरणतरुणा
बोहिअसहस्सपत्तसुरभितरपिंजरजलं। जलचरप हकरपरिहत्थगमच्छपरिभुज्जमाणजलसंचयं। महंत
मित्यादि॥ व्या०॥ ततः सा त्रिशला क्षत्रियाणी शरत्कालीनरजनीकरवत् सामं वदनं यस्याः सा इंदुवदना इत्यर्थः
पुनरप्येवं विधं पद्मसरः पद्माकरं पश्यति। परं किं। पद्मसरः रविकिरणेति। तरुणशब्दस्येह संबंधात् तरुणर
विकिरणैर्बोधितानि यानि सहस्रपत्राणि पद्मानि तैः सुरभितरं पिंजरं पीतरक्तं जलं यस्मिन् तत्तथा। अथवा ४३
। पुणरविति। पुनरपि किरणः सूर्यस्तस्य तरुणेन अति भावनाबोधितानीत्यादि योज्यं॥ ३। किं। पा। जलचरेति। ज
लचरा यादांसि तेषां। पहकरेति। दशपदार्थानामनुकरणं परिहत्थेति। परिपूर्णजलचरपहकरपरिहत्थं गच्छमत्स्यप

रिभुज्यमानजलसंचयं यस्य। चतिविशेषणकर्मधारयः। ३। किं। पा। महंतमिति। ३। किं। पा। कमलं सूर्यविकासि रक्तकमल
यं नीलं उत्पलं रक्तं कुवलयं रक्तं तामरसं महोत्तोल्लमुद्धपुंडरीकं श्वेतं एषां उरुसिरिविशालैः सर्पद्भिः उद्घसद्भिः श्रीसमुद
यैः कांतिशोभाभिः रेहंलदिव दीप्यमानमिव। ३। किं। पा। अत एव रमणीयरूपशोभं। ३। किं। पा। पमुइअंतेति। प
अमरगणा सुदितं अंतभ्रमिता येषां तेते च ते मत्तभ्रमरा निविशाषाः तेषां उत्कराः समूहास्तामपि भ्रमरा भ्रासितानां अतिव
ल्लवरस्यापमानैः अवलिह्यमानानि स्वाद्यमानानि कमलानि यत्र तत्। ३। किं। का। यं बेति। कादंबकाः
कलहंसाः १ बलाहकाः २ बलाकाः ३ चक्राः चक्र वाकाः ५ कलाः मधुरध्वनयः हंसाः राजहंसाः ७ सा
रसादीर्घजानुकाः॥ ८॥ तेच ते गर्विताश्च ते सा। श्रा माहंसाः स्वाकुनगणाश्च पक्षिसमूहाश्च तेषां मि
थुनैः द्वंद्वैः सेव्यमानं सलिलं यस्य तत्तथा॥ स्तु नः किं। पा। पउमिणिति॥ पद्मिनीनां पत्रोपला
ग्नायत्जलबिंदवस्तेषां निचयेन चित्रं मंडितमि व ॥ कचित्। जलबिंदुमुत्तचित्तमिति पाठस्तत्र। जल
बिंदव एव मुक्तामौक्तिकानि तानि चित्रं। ३। किं। पा ॥ हृदयनयनकांतं। ३। किं। पा। सरस्वासिराममिति नं
॥ सरस्सु सरोवरेषु अर्हद्दृष्टं। अत एव अभिरामं। सरोरुहाभिरामं उद्योतितीति। ह्मकारात् सर्वमुकारः। सरोवर
दर्शनाद्व सरोवर वत्सुरासुरनरहृपाराड् हंसादिसेव्यो भावी॥ इति पद्मसरोवरे दशमस्वप्नविचारः॥ १०॥ अथ
एकादशस्वप्ने त्रिशला समुद्रं पश्यति। स कीदृशः तन्नामादि सूत्रं॥ ॥तओ पुणो चंदकिरणरासिसरिससिरिवछसो
हं। चउगमणपवद्धमाणजलसंचयं। चवलचंचलुच्चायप्पमाणकल्लोललोलंततोयं पडुपवणाहयचलिअचवल
पागडतरंगरंगमित्यादि। व्या०॥ ततः पुनः सा त्रिशला क्षत्रियाणी क्षीरोदसागरं एकादशे स्वप्ने पश्यति। किं। क्षी

×तरंगस्तरंगोसेदे वा इति वचनात् रंगविशेषा एव×

चंद्रकिरणेति। चंद्रकिरणराशेः सदृशाः श्रीः शोभा मध्यभागाल्लवणशिखायाः स्पृशंतं चक्रवालशब्देन अत्र मध्यभागो लक्ष्यते॥
पुनः किंभूतं। चउगमाणेति। चतुर्गमने चतसृषु दिक्षु मार्गेषु प्रवर्द्धमानाः परिवर्त्तमानाः प्रसरन् जलसंचयो यस्य स्पृशंतं। च
तुर्गुणं प्रवर्द्धमानं जलसंचयमिति पाठः॥ सुगम एव। कस्माच्चतुर्गुणवृद्धिरिति चेदुच्यते आधिक्यमात्रस्यैव विवक्षि
तत्वात्। पुनः किंभूतं। चवलेति। चपलाः स्पृशंचलाः अन्यान्यप्रमाणैः अनेकानंतसमानैः कल्लोलैः लोलज्जलं यस्य
स्पृशंतं। पुनः किंभूतं। पडुपवणेति। पटुपवनेन आहताः संतः चलिताः इतस्ततः अत एव चपलाः प्रकटाः स्फुटाः तरं
गाः तथा रंगंतः इतस्ततः रंगतो रंगा रंगभंगा अनेक भंगाः तथा रवारवेण शब्दायमानाः। अतिक्रांताः
शोभमाना निर्मला उत्कटाः उत्साहाः कर्मयः ता त तरंगास्तरंगा तरंगाः कर्मयस्तेषां च छेकात्मकाः
अत्र कल्लोलाः सामान्यतरंगास्त एव लघवः सं गा ॥ लघुविवक्षितर्मयः कर्मयस्ता महाकल्लोलाः तैः
सह सार्द्धयः संबंधस्तेन प्रधावमानस्तीरासितु रं ॥ सर्पन्पश्चाद्वर्त्तितो निवृत्तो द एव वसासुरतरोति
संयोगासिरामश्च दृश्यः प्रधावमानः सन्नासुरतरो। द पनिवृत्तश्च सन् अतिरामदृष्टार्थः॥ ततोलोलस्ता
यं तत् पदेन सह कर्मधारयः॥ कश्चित् उद्धदकमीसहसंतिपाठः॥ स च सुबोधः ततः परं पदं प्रधावमाण नित्रत्तसा
सुरतमासिराममिति पाठस्तत्र प्रधावन् निरंतरं रयेण अग्रे यमानो गच्छन् आयमानो वा पश्चाद्गच्छन् प्रधावमानः नि
वर्त्तते निर्भ्रंतत्रिपदपदृष्टास्यस्यतत्। अनिर्भ्रंतं केनापि अदृश्यमानं हरत्वात् अत एव लासुरं संयोगं यत्तदपरपा
रं तेन असिरामाविशल्यनमनाहारी त्यर्थः॥ ततः प्रधावपदेन सह कर्मधारयः॥ एतावता य स्पष्ट उदस्य अति
चंचलकल्लोलिलोलितानीयं वर्त्तते। पुनर्यस्य वायुना आहताः चलिताश्चपलास्तरंगा लघुकल्लोला वर्त्तते। पु ४४

नर्यस्य समुद्रस्य संगाविच्छिन्नमंतस्तरंगा एव अंगानि तैः रंगोलेवर्त्तते। पुनर्विपर्यस्य कर्मयो महाकल्लोला अतिक्रांतत्वि
तः रवारवेण भ्रमाणशब्दं कुर्वंतः शोभमाना निर्मला उत्कटाश्च संति। पुनर्यः समुद्रः कल्लोलैस्तरंगैश्च संगतोऽस्मि
लिश्च सार्द्धयः संबंधस्तेन तीरसन्मुखं धावमानो निवर्त्तमानश्च महालयं कोलाहलं वर्त्तते। पुः किंभूतं। महामगरि
तामहंतामकराश्च मत्स्याश्च इति मिश्रवृत्तिमिंगला श्च धनिरुद्धाश्च पतिलितिलिकाश्च॥६॥ इलडउसहाला
पाश्च सिघातेन उद्धाद्याहोटलेन कर्षरहव कर्षर उछलज्जावृ फेनपसारायत्र समतं। पुः किंभूतं। महानईति। म
हानदीनां गंगादीनां वरितावेगैः आवर्त्तमानैये रंगगावर्त्तरव्यआवर्त्तस्तत्र गुप्यन् व्याकुलीभवन् अ
तएव उच्छलत् प्रत्यपनिवृत्तं च भ्रममाणं भ्रमणआ लोलालं चलाचलं अस्थिरं सलिलं यस्य स्पृशंतं॥
पुनर्यस्मिन्समुद्रे चतुर्दशलक्षाः षट्पंचाशत् सहस्राश्च नद्यः पतंति कथं तत्राह॥ चतुर्दश
सहस्रनदीपरिवारसहिता गंगासिंधुश्च भरतक्षेत्रसंबंधिनी॥ एवं चतुर्दशसहस्रनदीपरिवारस
हिता रक्ता रक्तवती च ऐरवतक्षेत्रसंबंधिनी॥२८॥ ॥पुनः अष्टाविंशतिसहस्रनदीपरिवारसहिता रो
हिता रोहितांशा च हैमवतक्षेत्रसंबंधिनी॥५६॥ पुनः षट्पंचाशत्सहस्रनदीपरिवारसहिता सुवर्णकू
ला रूप्यकूला च ऐरण्यवतक्षेत्रसंबंधिनी ११२। पुनः षट्पंचाशत्सहस्रनदीपरिवारसहिता हरिकांता ह
रिसलिला च हरिवर्षक्षेत्रसंबंधिनी ११२ पुनः षट्पंचाशत्सहस्रनदीपरिवारसहिता सीता सीतोदा च॥
महाविदेह रम्यकक्षेत्रसंबंधिनी ११२॥ पुनः पंचलक्षा द्वात्रिंशत्सहस्रनदीपरिवारसहिता सीता सीतो
दा महाविदेहक्षेत्रसंबंधिनी। एवं सर्वा अपि मिलिताः चतुर्दशलक्षाः षट्पंचाशत्सहस्राश्च भवंति। समुद्रस्य

नाकृग वान्समुद्रइव तरंगसीरोलावी॥ अत्र शिष्यः प्राह॥ ननु सूत्रमध्ये क्षीरोदधिः प्रोक्तस्तत्र नानाविधकल्लोल
नदीवेलादीनां कथमसंभवः तत्र तेषामसंभवात् उच्यते। यद्यपि क्षीरोदधिसमुद्रः प्रोक्तस्तथापि लवणसमुद्र एव
संभाव्यते। यतः क्षीरोदसमुद्रे अन्यथा कल्लोलनदीवेलानामसंगतिः स्यात्॥ इति एकादशस्वप्नविचार
ः॥ ११॥ ॥अथ द्वादशस्वप्ने त्रिशलादेवी विमानं पश्यति। तत्स्वरूपं आह तत्र सूत्रम्॥ तओ पुणो तरुणसू
रमंडलसमप्पभं। दिप्पमाणसोभं। उत्तमकंचणमहामणिसमूहपवरतेअअट्ठसहस्सदिप्पंतनहप्पईवं। इ
त्यादि॥ व्याख्या॥ ततः एकादशस्वप्नानंतरं त्रिशलाक्षत्रि याणी द्वादशे स्वप्ने एवंविधं विमानवरपुंडरीकं प
श्यति विमानं पश्यति। किं। वि। तरुणेति॥ तरुण सूर्यमंडलेन तरुणसूर्यबिंबेन समा प्रभा यस्य स
तं। तत्। किं। वि। दीप्यमानं। शोभां। तं। किं। वि॥ उत्तमकांचनमहामणिसमूहैः प्रवराणां ते
अस्ति॥ तेकं तगडति। आधारसावमिति तिकालि हादिवादचि। यद्वा ज्ञायंते गृहे पतत्त इति त्रैया
यम्रत्यये कंसा लक्षा मष्टोत्तरसहस्रेण १००८ दीप्य। मानं सम तमसः प्रदीपयति। प्रकाशयति॥ यत् पुनः
किं। वि। कणगेति। कनकप्रतरसुवर्णपत्रके लंबमानाभिर्मुक्ताभिः समुज्ज्वलं कनकप्रतरैर्लंबमानमुक्ता
भिश्च समुज्ज्वलमित्यर्थः। अधिकमिव दीप्तिं आव्याख्यामात्। पुनः किं। वि। ईहामिगति। ईहामृगाः वृकाना
हर इति प्रसिद्धाः॥ १ उसभति वृषभाः २ तुरगति॥ अश्वाः ३ नरमगरत्ति। मगरमत्स्याः ४। विहगाः पक्षिणः ५ वाल
गति। व्यालाः सर्पः ६। किंनराः देवविशेषाः ७॥ रुरवो मृगभेदाः ८। सरभा अष्टापदजीवाः ९। चमरा चमरीज
वः॥ १०॥ संसत्ति। श्वापदविशेषाः॥ ११॥ कुंजरा हस्तिनः॥ १२॥ वनलता अशोकलताद्याः॥ १३॥ पद्मलताः पद्मि

२४५

×शाष्टेन×५

न्यः १४। एतेषां भक्तिभिर्विच्छित्तिभिश्चित्रं नानारूपं एतावता यस्मिन् विमाने एतानि ईहामृगादीनि रूपाणि संति। पुनः किं
वि। गंधव्वेति। गंधर्वस्य गीतस्य उपवाद्यमानस्य वादित्रस्य च संपूर्णो घोषो यत्र। अथवा पेति सूत्रेण उपबुज्झमाण इति
रूपं कृत्वा। गंधर्वोपबुज्झमाण इति पाठस्तत्र गंधर्वाणां देवगायनानां उपबध्यमानः परस्परं संबंधी लवेत्॥
अतएव संपूर्णो घोषो यत्र तत्। पुनः। किं। वि। नित्यं सजलघनो विपुलो जलधरः पृथुः गर्जितसंघट्टो
×तं× ×स्तद्× स्य गर्जितशब्दवद् अनुनादिना प्रतिरवयुक्तेन। देवदुंदुभिमहारवेण सकलमपि जीवलोकं पूरयंतं। ×पुनः किंभूतं ... जलो×४
अथवा यं तं च तदंदशरक्षा नकं वा लोकं व्याप्नुवंतं उ । किं। वि। कालागुरुत्ति॥ कृष्णागुरुः प्रवरः कुंदुरु
ष्कः चीडा सिल्हकः तुरुष्कः सिल्हकद्रव्यविशेषः। ३। उरु कं च सिल्हारसः। ३। तेषां दह्यमानो धूपः पश्च दशांग
दिव्यं संगामित्व। गंधमालिनी ग्रंथोक्त सुरभि। क र णो पार्श्व सूतनन्न द्रव्याणि। तेषां उत्तमम घ
मघायमानेन गंधमनोज्ञतेन इतस्ततो विप्रसृ। ते न अभिरामं यत्तत्तथा॥ कि विशिष्टं कृतधूपसार
संग इति पाठस्तत्र दह्यमानो योऽधूपसारो रञ्जष्टधूप ः॥ तस्य संगतेन तद्दग्धं रामत उत्तमत्वेन तिथ्या रम्यं॥
पुनः किं। वि। नित्यालोकं। नित्यमुद्योतवत्। सेतं॥ श्वेतं प्रभं। पुनः किं। वि। सुरवराभिरामं सुरवरान् अभिरमयतीति सु
रा अथवा॥ सुराणां वराः अभिरामं तत्। पुनः किं। वि। रामाः स्त्रियो यस्मिन् तत्। पुनः। किं। वि। सातस्य साता वेदनी
यस्य कर्मण उपभोगो यत्र तत्। पंचधा विषयसुखसंपत्तेस्तत्र सद्भावात्। देवविमानदर्शनात् देवाद्देवीसेव्यासौ ×भगवान्×
वी॥ इति द्वादशस्वप्ने देवविमानविचारः॥ १२॥ एतद्देवविमानदर्शनानंतरं सा त्रिशला त्रयोदशस्वप्ने रत्ना
शिं पश्यति। परं सकीदृशं तत्राह सूत्रम्॥ ॥ तओ पुणो पुलगवेरिंदनीलसासगकक्केयणलोहिअक्खमरगय

पवालफलिहसोगंधिअहंसगब्भअंजणचंदप्पहवररयणेहिं महिअलपइट्ठिअं। गगणमंडलंतं। पभासयं-
तं। तुंगं। मेरुगिरिसन्निकासं पिच्छइ। सा रयणनिकररासिं।।१३।। व्या०।। ततः पुनरपि सा त्रिशला क्षत्रिया-
णी त्रयोदशे स्वप्ने रत्नानां निकरः समूहो रत्ननिकरस्तस्य राशिः पुंजं तं पश्यति। किं। रत्न। पुलगेति। पुला-
करत्न१ वज्ररत्न२ नीलरत्न३ सासगत्ति। सस्यकरत्न४ कर्केतनरत्न५ लोहिताक्षरत्न६ मरकतरत्न७ प्रवाल-
रत्न८ स्फटिकरत्न९ सौगंधिकरत्न१० हंसगर्भरत्न११ अंजनरत्न१२ चंदप्पहत्ति। चंद्रकांत१३ एतैः रत्नैः स्व-
वा गगनमंडलांतं यावत् प्रकाशयंतं। पु। किं। र।। महीतले प्रतिष्ठितं। पु। किं। र। तुंगं। उच्चं। तुंगत्वमनिय-
तमित्याह।। मेरुगिरिः सन्निकाशं तुल्यं।। रत्नरा शि दर्शनानंतरमगवाहुज्ञामादिपुणरत्नराशिकानल-
रवी।। इति त्रयोदशस्वप्नरत्नराशिविचारः ।। १३ ।। अथ चतुर्दशस्वप्ने निर्धूमाग्निं पश्यति। त्रिश-
ला। परं कीदृशाग्निस्तदा दहनम्।। सिहिं च। सा विउलुज्जलपिंगलमहुघयपरिसिच्चमाणनिद्धू-
मधगधगाइअजलंतजालुज्जलाभिरामं। इत्यादि ।। व्या०।। सा त्रिशला क्षत्रियाणी चतुर्दशस्वप्ने शिखि-
नं अग्निं पश्यति। अत्र गद्यबंधसद्भावाद्यात्र सिहिं चेति पदं तस्य ग्रहणं साकं। अत एव इति लोके विशाख्य-
पदं उत्कर्षकांते सिहिमिति। किं। वि। सिं। विउलुज्जलेति। विपुलेन उज्ज्वलेन पिंगलेन च मधुघृतेन परिषिच्य-
मानो निर्धूमो धगधगायमानो धगधगिति। अत एव ज्वलंत्या ज्वालया दीप्यमाना ज्वाला अर्चिषः तासिः उज्ज्वलं अत-
एव अभिरामं। किं। वि। शि। पुनः किं। ज्वालानां प्रकरैः कलापैः समूहैरित्यर्थः।। अन्योन्यं अनुप्रकीर्णमिव मि- ४६
श्रितमिव स्पर्धया तस्य वाग्निज्वाला अन्योन्यं अनुप्रविशंतीत्यर्थः।। किं ज्वालाप्रकरैः। तरतमेति। तरतमयो-

गोपेतैः तरतमयोगात्। अत्रादिशब्दद्वयप्रत्ययः। कथं एका ज्वाला उच्चा अन्या उच्चतरा अपरा उच्चतमा। इति तरतमयो-
गयुक्तैः। पु। किं। शि। उत्पुत्ति। ज्वालानां उत्कर्षेण ज्वलनं ज्वालोज्ज्वलकं। आर्षत्वात् हिसंकिलायः। पु। किं कुर्वंतं। कु-
ष्ट्यंतिक विव पावकः। उदग्रे अंबरं आकाशं पचंतं इव क्वचित् दह्यं लिहावलिज्वालाभिः आकाशमिव पक्वं कुर्वंत-
मिति तावत्। पु। किं। शि। अतिवेगेन चंचलं निर्धूमाग्निदर्शनानंतरं गर्भवर्त्तिप्रभावेण संक्षिप्यति। निर्धूमाग्निवन्नागना- ×ते७क्रिव×४
मंगलरूपे स्वस्ति।।१४।। एतेच स्वप्नावलिका।। कुत्र आदरेण तु न दृश्यंते। एवं येषु पि संतितेषु बह्वो वा चतुर्दश-
अत एव अंजलिः पर्युषणा कल्पस्य निबंधकारेण्या।। व्याताः। यथा उत्पथ प्राप्नाय यथा स्वाध्यवं किं विख्यात-
स्तासः इति।। ।। अथ एतान् चतुर्दशस्वप्नान् दृष्ट्वा त्रि- शला क्षत्रियाणी जाता।। तत्राह सूत्रम्।। इमे एआरि-
से। सुभसोमे। पिअदंसणे। सुरूवे। सुमिणे द- ठूण सयणमज्झे पडिबुद्धा।। इत्यादि।। व्या०।।
इमान् एतादृशान् पूर्वं व्यावर्णितस्वरूपान् शुभान् उदक- ल्याणहेतून् सौम्यान् उत्तमान् कीर्तिर्येषां तस्मादि-
दर्शनप्रियदर्शनीयान् स्वप्नान् सा त्रिशला स्वरूप २२ स्वप्नान् गजादीन् शयनमध्ये
निरीक्ष्य दृष्ट्वा प्रतिबुद्धा जागरिता। किं। त्रि। अरविंदवत् कमलवत् लोचने यस्याः सा। पुनः हर्षेण पुलकितांगी
एतान् चतुर्दश स्वप्नान् तीर्थंकरमाता पश्यति। यदा यस्याः मातुः कुक्षौ अर्हत् तीर्थंकरो व्युत्क्रामति।। अवतारं
लभते। तदा इत्यादि त्रिशला क्षत्रियाण्या चतुर्दशस्वप्ना दृष्टा व्याख्याताः।। ।। अथ चतुर्थवाचना
त्रिशला क्षत्रियाणी सिद्धार्थराजसमीपे गत्वा स्वप्नफलपृच्छां करिष्यति।। तत्र वर्त्तमानयोगः।। अस्मिन् महापर्वणि
समागते एके महोत्सवादानं ददति। एके शीलं पालयंति। एके तपस्तपंते। एके भावनां भावयंति। तत्सर्वं ज्ञात्वा समाधि

स्य श्रीमहावीरदेवप्रसादात् अग्रेस्व गुरुपरंपरायाः।। व्याख्यानं कल्पसूत्रस्य। इतीयं सुगमं स्फुटं। शिष्यार्थं
पाठकाश्च क्रु स्समयादिमसुंदराः।।३।। ।।अथ चतुर्थव्याख्यानं आरभ्यते। तत्र पूर्वं प्रथमवाचनायां पंचपरमे
ष्ठिनमस्कारो व्याख्यातो १ द्वितीयवाचनायां च श्रीमहावीरदेवस्य गर्भापहारकल्याणकं व्याख्यातं।।२।। तृती
यवाचनायां चतुर्दशस्वप्ना व्याख्याताः।।३।। ।।अथ चतुर्दशस्वप्नदर्शनानंतरं त्रिशलाक्षत्रियाणी चतुर्थव
रचनायां किं करोति। तत्र सूत्रं।। तएणं सा तिसला खत्तियाणी इमेएयारूवे उराले चउद्दस महासुमिणे
पासित्ताणं पडिबुद्धा समाणी। हट्ठ जाव हियया। धाराहयकयंबपुप्फगं पिव समुस्ससियरोमकू
वाइत्यादि।। व्या०।। तएणं इत्यादीनि। ज्ञाणवस यणिज्जा। इति पर्यंतानां पदानां पूर्वं सार्थव्या
ख्यातत्वात्। तथापि संबंधलापनिकामात्रं व्या ख्यते। ततः सा त्रिशला क्षत्रियाणी इमान् एत
ताद्दशान् पूर्वं व्याख्यातान् चतुर्दशस्वप्नान् दृष्ट्वा। हृष्टतुष्टा सती स्वशयनादुत्थाय शयनीयात् स
मुत्थाय पादपीठादपि समुत्तीर्य अत्वरितया अचपल याऽविलंबितया राजहंससदृश्या गत्या यत्रैव ×असंभ्रांतया×
शयनीयं तत्रापि सिद्धार्थनामा क्षत्रियो राजा तत्रैवागच्छति। आगत्य च सिद्धार्थं क्षत्रियं ताभिरेतादृशाभिर्गीर्भि
र्वाणीभिः एवं प्रतिबोधयति। जागरयति। किं विशिष्टाभिर्गीर्भिः। ताहिंति।। याभिर्विशिष्टगुणोपेताभिः।
उत्तः किं विशिष्टाभिर्गीर्भिः। इष्टाभिः तस्य सिद्धार्थस्य वल्लभाभिः। स्त्रीणां वचनं वल्लभं भवति। प्रायेण शाक्त ४३
×अभिलषिताभिः× कमानामपि।३। किं। गी। कांताभिः। सदैवेति व।३। किं। गी। प्रियाभिः। आह्लाद्याभिः। सर्वेषामपि।३। किं। गी
मनोज्ञाभिः मनोरमाभिः।। कथयापि।३। किं। गी। मनोज्ञाभिः मनःप्रियाभिः श्लिष्टतयापि।३। किं। गी। उदाराभिः।३

मनोज्ञादपदे रमा
नचेतिहैम

३

दारनादवर्णोच्चारादियुक्ताभिः।४०। किं। गी। कल्याणाभिः। समृद्धिकारकाभिः।३। किं। गी। शिवाभिः गीर्दोषानुप
हताभिः।३। किं। गी। धन्याभिः धनलंभिकाभिः।३। किं। गी। मंगल्याभिः मंगलसाध्वीभिः।उनः। सश्रीकाभिः अलंकार
दिशोभावतीभिः।उनः०हृदयगमणिज्जाहिंति। हृच्चित्तहृदये तत्र हृदये यांगच्छंति कोमलत्वात्। सुबोधत्वा
द्वा ताभिः।उनः० हृदयप्रह्लादनीयाभिः।उनः०मियमहुरेहिं। मिता वर्णपदवाक्यापेक्षया। परिमिताम
धुराः स्वरतः मंजुला मनोरमाः शब्दतो यास्तास्ततः पदत्रयस्य कर्मधारयः। ततः सा त्रिशला किं करोति
तत्र सूत्रं।। तएणं सा तिसला खत्तियाणी सिद्धत्थेणं रन्ना अब्भणुण्णाया समाणी नाणामणिकणगरयणभत्तिचित्तंसि
भद्दासणंसि। निसीअइ निसीइत्ता आसत्था वीसत्था। सुहासणवरगया सिद्धत्थं खत्तियं ताहिं इट्ठाहिं जा
व संलवमाणी २ एवं वयासी।। व्या०।। तएणमिति। ।ततोऽनंतरं सा त्रिशला क्षत्रि
याणी सिद्धार्थेन राज्ञा अभ्यनुज्ञाता सती। एवं वि धेन भद्रासने सिंहासने निषीदति। उपविशति। किं
०भद्रासने नानामणिक्ति। नानाप्रकाराणां स्वर्णरत्नानां भक्तिविच्छित्तिः तया चित्रे विचित्रे। किं० त्रिशला आश्वस्ता ग
तिजनितश्रमाभावात्।३। किं। त्रि। विश्वस्ता संक्षोभाद्यभावात्। अनुत्सुका।३। किं। त्रि। सुखेन सुखं वा शुभं वा
आसनवरं गता सिद्धार्थक्षत्रियं प्रति ताभिः पूर्वव्याख्याताभिर्गीर्भिः संलपंती २ एवं अवादीत्। किं अवादीत्तत्र
सूत्रं।। एवं खलु अहं सामी अज्ज तंसि तारिसगंसि सयणिज्जंसि वण्णओ जाव पडिबुद्धा तं। गयवसहगाहा। ए
एसिं सामी उरालाणं चउदसण्हं महासुमिणाणं के मन्ने कल्लाणे फलवित्तिविसेसे भविस्सइ।। व्या०।। एवं ख
लु निश्चयेन अहं हे स्वामिन् अद्य तस्मिन् तादृशे शयनीये सुप्ता सती एतान् चतुर्दश महास्वप्नान् दृष्ट्वा प्रतिबु

स्नाङ्गारितास्तेषां वर्णकः प्राग्वज्ज्ञेयः। तेषां स्वप्नानां कः कल्याणकारी फलवृत्तिविशेषो भविष्यति। ततः सि
द्धार्थः किं कृतवान् तत्सूत्रं॥ तए णं से सिद्धत्थे राया। तिसलाए खत्तियाणीए। अंतिए एयमट्ठं सुच्चा। निसम्म हट्ठ
तुट्ठचित्तमाणंदिए पीइमणे। परमसोमणस्सिए हरिसवसविसप्पमाणहियए। धाराहयनीवसुरहिकुसुम
चंचुमालइयऊसवियरोमकूवे ते सुमिणे ओगिण्हइ ओगिण्हित्ता ईहं अणुपविसइ अणुपविसित्ता अप्पणो साभाविएणं मइपुव्वएणं। बु
द्धिविन्नाणेणं। तेसिं सुमिणाणं अत्थुग्गहं करेइ करित्ता तिसलं खत्तियाणिं ताहिं इट्ठाहिं कंताहिं पियाहिं जाव
वग्गूहिं संलवमाणे एवं वयासी॥ व्याख्या॥ ततश्च सः सिद्धार्थः क्षत्रियो राजा त्रिशलायाः क्षत्रियाण्या अं
तिके समीपे एतं पूर्वोक्तमर्थं श्रुत्वा हृष्टः सन् पी इमाणे इत्यादिपदानि पूर्वं व्याख्यातानि संति। ता
हृष्टः सन् ते सुमिणे ओगिण्हइ तान् स्वप्नान् अव। गृह्णाति अर्थावग्रहतः अवगृह्णाति ईहामनुप्र
विशति। सदर्थपर्यालोचनलक्षणां। ततः अप्प। णो आत्मनः स्वसाभाविकेन मतिपूर्वकेन बुद्धि
विज्ञानेन तेषां स्वप्नानामर्थावग्रहं करोति अप्पणो इत्यादिपदानामर्थः पूर्ववद् ज्ञेयः। अर्थावग्रहं कृ
त्वा त्रिशलां क्षत्रियाणीं ताभिर्वाग्भिरेवमवादीत्। ताहिं इत्यादीनि पदानि पुनर्विस्तरेण व्याख्यायंते। किं
विशिष्टाभिर्वाग्भिः ताभिर्विवक्षिताभिः पुनः इष्टाभिः। वांछिताभिः। पुनः कांताभिः कमनीयशब्दाभिः। पुनः
प्रियाभिः। पुनः मनसा ज्ञायंते सुंदरतया या वाचः सुंदरा इत्यर्थः। ताभिः पुनः मनसा अम्यंते गम्यंते पुनः पुनर्याः
सुंदरत्वात् ताभिः पुनः मनसा अतिविधिना अतिबहुकालं यावत् स्मर्यंतीभिः पुनः उदाराभिः शब्दतोऽर्थतश्च ४८
पुनः कल्याणाभिः शुभार्थप्राप्तिसूचिकाभिः पुनः शिवाभिः उपद्रवरहिताभिः शब्दार्थदूषणरहिताभिरित्यर्थः पु

नः धन्याभिः धनलंभिकाभिः। पुनः मंगल्याभिः मंगले अनर्थप्रतिघाते साध्वीभिः पुनः सश्रीकाभिः शोभायुक्ताभिः। पुन
: हृदयगमनीयाभिः। कोमलत्वाद् आह्लादिकाभिः। पुनः हृदयप्रह्लादिकाभिः। पुनर्मिताः अल्पाक्षरा मधुराः कोम
लशब्दाः सश्रीकाः। श्रिया सहितास्ततः पदत्रयस्य कर्मधारयस्ताभिः वाग्भिः इष्टादीनि एकार्थिकानि वा प्रायः एवं
विधाभिर्वाणीभिः संलपन् सिद्धार्थो राजा एवं वदति स्म। किं अवादीत्। तत्राह सूत्रं॥ उराला णं तुमे देवाणुप्पिए
सुमिणा दिट्ठा। कल्लाणा णं तुमे एवं धन्ना मंगल्ला सस्सिरीया। आरुग्गतुट्ठिदीहाउ। कल्लाणमंगलकारगा णं तुमे
देवा० अत्थलाभो देवा० भोगलाभो देवा० पुत्तलाभो सुक्ख० रज्ज० एवं खलु देवाणुप्पिए नवण्हं मासाणं बहुप
डिपुन्नाणं। अद्धट्ठमाण राइंदियाणं। वइक्कंताणं। अम्हं कुलकेउं। अम्हं कुलदीवं। अम्हं कुलपव्वयं। अम्हं
कुलवडिंसयं। अम्हं कुलतिलयं। अम्हं० कित्तिकरं। अम्हं० वित्तिकरं। अम्हं० दिणयरं। अम्हं कुलाधा
रं। अम्हं० नंदिकरं। अम्हं० जसकरं। अम्हं० पायवं। अम्हं० विवद्धणकरं। सुकुमालपाणिपायं अहीणपडिपु
न्नपंचिंदियसरीरं। लक्खणवंजणगुणोववेयं। माणुम्माणपमाणपडिपुन्नसुजायसव्वंगसुंदरंगं। ससिसो
मागारं। कंतं पियदंसणं दारयं पयाहिसि॥ व्याख्या॥ हे देवानुप्रिये। हे सरलस्वभावेत्यर्थः। उदाराः कल्याणाः शि
वाः धन्या मंगल्याः सश्रीकाः आरोग्यतुष्टिदीर्घायुःकल्याणमंगल्यकारकाः स्वप्नाः दृष्टाः। व्याख्यातमेतेषां पूर्व
वत्। पुनः स्वप्नफलानि वक्ति अर्थलाभो भविष्यति। इति क्रियाः सर्वत्र योज्या॥ अर्थो हिरण्यादिस्तस्य लाभः। भो
गाः शब्दादयास्तेषां लाभः। पुत्रः सुतस्तस्य लाभः। सौख्यं निर्वृतिस्तस्य लाभः। राज्यं सप्तांगस्वरूपं तस्य लाभ
स्तेन भविष्यति। पुनः हे देवानुप्रिये नवमासेषु बहुप्रतिपूर्णेषु सार्द्धाष्टमदिवसेषु व्यतिक्रांतेषु सत्सु एवंविधं
साढीसातदिन

दहं पुत्रं जनयिष्यसि। किंभूतं दारकं। अस्माकं कुले केतुश्चिह्नं ध्वजं केतुरिव केतुः अद्भुतत्वात्। पाठांतरे कुलस्य
देशः कारणं। पुनः कुलदीपं दीप इव दीपः प्रकाशकत्वात्। मंगलत्वात् च। पुनः कुलपर्वतं अनभिभवनीय-
स्थिराश्रयसाधर्म्यात्। पुनः कुलअवतंसं शेखरं उत्तमत्वात्। पुनः कुलतिलकं भूषणत्वात्। पुनः कुलकीर्तिः
ख्यातिस्तस्याः करं क्वचित् कुलवृत्तिकरं पाठः।। तत्र वृत्तिर्निर्वाहस्तस्याः करं। पुनः कुलदिनकरं सूर्यं। अविप्र-
काशकत्वात्। पुनः कुले आधारं पृथिवीवत्। पुनः कुलनंदिकरं वृद्धिकरं। पुनः कुले यशः सर्वदिग्गामितां
स्य करं। पुनः कुले पादपं वृक्षं आश्रयणीयत्वात्। पुनः कुलविवर्द्धनं विविधैः प्रकारैः वृद्धिकरं। पुनः सुकु-
मालपाणिपादं अहीनसंपूर्णपंचेंद्रियसरीरं। लक्षणव्यंजनगुणोपपेतं। मानोन्मानप्रमाणप्र-
तिपूर्णसुजातसर्वांगसुंदरांगं। शशिसौम्याकारं कांतं प्रियदर्शनं। सुकुमालादीनां पदानां
व्याख्या पूर्ववत्। पुनः स दारकः कीदृशो भविष्यति तत्र सूत्रं।। से वि य णं दारए उम्मुक्कबालभावे
विन्नायपरिणयमित्ते जुव्वणगमणुपत्ते सूरे वीरे विक्कंते वित्थिन्नविउलबलवाहणे रज्जवई राया भ-
विस्सई।। व्या०।। सोपि च दारकः उन्मुक्तबालभावः विज्ञातपरिणतमात्रः। यौवनकमनुप्राप्तः सच्छूरो
दानतो ऽभ्युपगतनिर्वाहणतो वा। वीरः संग्रामतः विक्रांतो भूमंडलाक्रमतः। विस्तीर्णादपि विपुलं अति
विस्तीर्णं बलवाहनं सैन्यगवादिकं यस्य सः। राज्यपतिः राजा स्वतंत्र इत्यर्थः।। तस्मात् त्वया उदाराः स्वप्ना दृष्टाः ए- ४९
प्रशंसति ४२ वं द्विर्वारं त्रिर्वारं तान् स्वप्नान् अनुबृंहति सा त्रिशला किं कुर्वती तत्र सूत्रं।। तएणं सा तिसला खत्तियाणी सिद्ध-
त्थस्स रन्नो अंतिए एयमट्ठं सुच्चा निसम्म हट्ठतुट्ठ जाव हियया करयलपरिग्गहियं दसनहं मत्थए अंजलिं कट्टु ए-

वं वयासी। एवमेयं सामी। अवितहमेयं सामी। असंदिद्धमे० इच्छियमे० पडिच्छियमे० इच्छियपडिच्छियमे० सच्चेणं एस-
मट्ठे से जहेयं तुब्भे वयह त्तिकट्टु ते सुमिणे सम्मं पडिच्छइ पडिच्छित्ता सिद्धत्थेणं रन्ना अब्भणुन्नाया समाणी। नाणामणिर-
यणभत्तिचित्ताओ भद्दासणाओ अब्भुट्ठेइ अब्भुट्ठित्ता। अतुरियं अचवलं असंभंताए। अविलंबियाए। रायहंससरिसी-
ए गईए जेणेव सए सयणिज्जे। तेणेव उवागच्छइ उवागच्छित्ता सयणिज्जं उरूहइ उरूहित्ता एवं वयासी।। व्या०।। अयमा-
लापकः पूर्वं व्याख्यातोस्ति। परं संबंधयोजनामात्रं। इहं ततः सा त्रिशला क्षत्रियाणी सिद्धार्थस्य राज्ञः समी-
पे एतमर्थं पुत्रप्राप्तिलक्षणं श्रुत्वा हृष्टतुष्टा सती अंज- लिं मस्तके कृत्वा एवं अवादीत्। एवमेतत् स्वामिन्। मम
अवितथं असंदिग्धं। ईप्सितं सत्यमेतत्। यत् यूयं वदथ। इति कृत्वा तान् स्वप्नान् सम्यक् प्रतीच्छति। ततः
×नानामणिरत्न क्तिचित्रात्।× सिद्धार्थेन राज्ञा अनुज्ञाता सती। भद्रासनात्। अभ्युत्तिष्ठति। ततः अत्वरितं। यया गत्या आगता
तयैव राजहंससदृशा गत्या यत्र स्वकीयं शयनीयं तत्र आगच्छति आगत्य च शयनीयमध्यारोहति। तत
:एवमवादीत्। किं अवादीत् तत्र सूत्रं।। मा मे ते उत्तमा पहाणा मंगल्ला सुमिणा। अन्नेहिं पावसुमिणेहिं पडिहम्मि-
स्संति इति कट्टु। देवगुरुजणसंबद्धाहिं पसत्थाहिं। मंगल्लाहिं। धम्मियाहिं। लट्ठाहिं। कहाहिं। सुमिणजागरियं जा-
गरमाणी पडिजागरमाणी विहरइ।। व्या०।। मा मम एते उत्तमाः स्वरूपतः प्रधानाः फलतः मंगल्याः मंगले अनर्थ-
प्रतिघाते साधवः स्वप्नाः अन्यैः पापस्वप्नैः प्रतिहनिष्यंते। इति कृत्वा इति हेतोः देवगुरुजनसंबद्धाभिः प्रशस्ताभि-
:मंगल्याभिः धार्मिकाभिः लष्टाभिः कथाभिः सुमिणजागरियं तीस्वप्नसंरक्षणार्थं जागरिकां जाग्रती विदधती
प्रतिजाग्रती तान् स्वप्नान् संरक्षणेन उपचरंती विहरति। आस्ते। ततः प्रभाते सिद्धार्थो राजा किं कृतवान् तत्र सूत्रं

तएणंसिद्धत्थेखत्तिएपच्चूसकालसमयंसिकोडुंबियपुरिसेसद्दावेइ२त्ताएवंवयासी।खिप्पामेवभोदेवाणुप्पिया।
अज्जसविसेसंबाहिरियंउवट्ठाणसालंगंधोदयसित्तंसुइयसंमज्जिउवलित्तंसुगंधवरपंचवण्णपुप्फोवया
रकलियंकालागुरुपवरकुंदुरुक्कतुरुक्कडज्झंतधूवमघमघंतगंधुद्धुयाभिरामंसुगंधवरगंधियंगंधवट्टि
भूयंकरेहकारवेहकरित्ताकारवित्तासीहासणंरयावेह२त्ताममेयमाणत्तियंखिप्पामेवपच्चुप्पिणह॥५७॥
ततःसिद्धार्थोराजाक्षत्रियःप्रत्यूषकाललक्षणोयःसमयस्तस्मिन्प्रत्यूषसमयइत्यर्थः॥कौटुं
बिकपुरुषान्आदेशकारिणःशब्दापयति।आकार्य ति।आकार्यचएवमवादीत्।क्षिप्रमेवशीघ्रमेवभोद
वानुप्रियाःअद्यविशेषेणबाह्यांआस्थानशालांउ पस्थानमंडपंएवंविधांस्वयंकुरुत।अन्यैःकारय
तसिंहासनंचरचयित्वाइमांममआज्ञांकृत्वाप्रत्य र्पयत॥किंभूतांगंधोदकेनसिक्तां।पुनः
किंभूतांशुचिकांपवित्रां।संमार्जिताकचवरादप नयनेन।उपलिप्तागोमयादिना।यासातथातां।इदंच
विशेषणंगंधोदकसिक्तसंमार्जितोपलिप्तशुचिका मित्येवंद्रष्टव्यं।सिक्ताद्यनंतरंसाविहिता।शुचिकाचअप
विशेषंपूर्ववत्।ततस्तेकिंकुर्वंतितत्रसूत्रं॥ तएणंतेकोडुंबियपुरिसासिद्धत्थेणंरन्नाएवंवुत्तासमाणाहट्ठतु
ट्ठजावहियया।करयलजावकट्टुएवंसामित्ति।आणाएविणएणंवयणंपडिसुणंति२त्तासिद्धत्थस्सखत्तियस्स
अंतियाओपडिनिक्खमंति२त्ताजेणेवबाहिरियाउवट्ठाणसालातेणेवउवागच्छइ२त्ताखिप्पामेवसविसेसंण
बाहिरियंउवट्ठाणसालंगंधोदयसित्तसुइयजावसीहासणंरयावेइ२त्ताजेणेवसिद्धत्थेखत्तिएतेणेवउवाग
च्छंति२त्ताकरयलपरिग्गहियंदस[illegible]सावत्तंमत्थएअंजलिंकट्टुसिद्धत्थस्सखत्तियस्सतमाणत्तियंपच्चुप्पि

स॰ ५०

वृति४२

णंति॥५८॥ ततस्तेकौटुंबिकपु[illegible]सिद्धार्थेनराज्ञाएवमुक्ताःसंतःहृष्टतुष्टाएवंइतियथादेशंस्वामिन्नितिआ
ज्ञयाइतिरूपंआज्ञावचनंविनयेनवचनंप्रतिशृण्वंति।शृत्वाचसिद्धार्थस्यक्षत्रियस्यअंतिकात्समीपात्प्रतिनि
ःक्रामंति।प्रतिनिःक्रम्यचयत्रैवबाह्याउपस्थानशालातत्रैवआगच्छंति।आगत्यचक्षिप्रंशीघ्रमेव।बाह्यांउपस्थानशा
लांगंधोदकसिक्तांसमार्जितांउपलिप्तांशुचिकांकृत्वासिंहासनंचरचयित्वायत्रैवसिद्धार्थोराजाक्षत्रियःतत्रै
वआगच्छंति।आगत्यचदशनखंमस्तकेअंजलिंकृत्वासिद्धार्थस्यक्षत्रियस्यतांआज्ञांप्रत्यर्पयंति।यथातत्रवयं
आदिष्टाआज्ञाआस्थानमंडपादिरचनारूपाकृताइत्य र्थरूपा।ततःसिद्धार्थःक्षत्रियःकिंअकरोत्तत्रसूत्रं॥
॥तएणंसिद्धत्थेखत्तिएकल्लंपाउप्पभाएरयणीएफु ल्लुप्पलकमलकोमलुम्मीलियंमिअहापंडुरेपभा
एरत्तासोगप्पगासकिंसुयसुयमुहगुंजद्धरागबं धुजीवगपारावयचलणनयणपरहुयसुरत्तलो
यणजासुयणकुसुमरासिहिंगुलयनियराइरेयरेहं तसरिसेकमलायरसंडबोहएउट्ठियंमिसूरे।
सहस्सरस्सिंमिदिणयरेतेयसाजलंतेतस्सयकर पहरापरद्धंमिअंधयारेबालायवकुंकुमेणंखचियव्व
जीवलोएसयणिज्जाओअब्भुट्ठेइ२त्तापायपीढाओपच्चोरुहइ२त्ताजेणेवअट्टणसालातेणेवउवागच्छइ२त्ताअ
ट्टणसालंअणुपविसइ२त्ता॥५९॥ ततःसिद्धार्थःक्षत्रियःकल्यमितिश्वःप्रकाशेततःप्रकाशप्रभातायांप्रकटप्र
भायांरजन्यांपुनःप्रभातेरजनीसति।किंभूतायांफुल्लोत्पलेति।फुल्लंविकसितंतच्चतदुत्पलंचपद्मंक
मलश्चहरिणविशेषःकमलसारंगमृगःतयोःकोमलंअकठोरंउन्मीलितंदलानां।नयनयोश्चउन्मीलनंउन्निद्र
तायस्मिन्तत्तस्मिन्।पुनःकिंभूतेअथरजनीविभातानंतरंदीर्घत्वंचआर्द्रत्वात्पांडुरेश्वेतेप्रभातेएवंविधेसूर्येउ

वा६॰

ऽके सति। किंभूते सूर्ये रक्तासोगेति रक्ताशोकस्य तरोः प्रकाशः प्रभावः १ किंशुकं पलाशपुष्पं च शुकमुखं च गुं
जायाः अर्धं चेति द्वंद्वस्तेषां यो रागस्तेन सदृशः। क्वचित्तु गुंजद्धरागबंधुजीवगपारावयचलणनयणपरहु
यसुरत्तलोयणजासुअणकुसुमरासिहिंगुलगनिगराइरेगरेहंतसरिसे। इति पाठः। तत्र बंधुजीवकं पुष्पवि
शेषः। पारापतस्य चलनौ नयने च परभृतस्य कोकिलस्य सुरक्तस्य जात्या लोचने परभृतस्य वा सुरक्ते सुरा
ष्टेन। कोपाविष्टस्य लक्षणात् कोपरक्ते लोचने। जासुयणकुसुमराशिः। जपापुष्पपुंजः। हिंगुलकनिकरः।
सुवर्णितं कुसुंभविंदपुलिकापरैस्यादतिरेकेण आ धिक्येन विराजमानोसमत्र सदृशास्तस्मिन्। अरुणव
मात्रेण सदृशा विशिष्टदीप्त्या रूपातिरेक इति भावः। पुनः किंभूते सूर्ये कमलाकराः पद्मोत्पत्तिस्थानह्र
दादयः तेषु यानि खंडानि नलिनवनानि तेषां बो धके विकाशके। पुनः किंभूते सूर्ये सहस्ररश्मा
यायस्य सतस्मिन्। पुनः किंभूते सूर्ये दिनकरे दिन करणशीले। पुनः किंभूते तेजसा ज्वलति सति
पुनः क्व सति। तस्य च कराः किरणाः तेषां तैर्वा प्रहारे १ इति घातस्तेन अपराद्धे विनाशिते अंधकारे सति पद
र्शितप्रारूढलक्षणेन रूपः। पुनः क्व सति। जीवलोकमध्ये जगति बालातपः कुंकुममिव तेन खचिते इव पिंज
रिते इव एवंविधप्रभाते जाते सति। सिद्धार्थराजा शयनीयादभ्युत्तिष्ठति। अभ्युत्थाय च पादपीठात उत्तरति
उत्तीर्य च अट्टनशालां व्यायामशालां अनुप्रविशति। अनुप्रविश्य च किं करोतीत्याह मूलसूत्रं॥ ॥अणेगवायाम ५१
जोगवग्गणवामद्दणमल्लजुद्धकरणेहिं। संतपरिस्संते। सयपागसहस्सपागेहिं सुगंधतिल्लमाइएहिं पी
णणिज्जेहिं। दीवणिज्जेहिं मयणिज्जेहिं। विंहणिज्जेहिं दप्पणिज्जेहिं सव्विंदियगायपल्हायणिज्जेहिं॥

अब्भंगिए समाणे तेल्लचम्मंसि निउणेहिं पडिपुन्नपाणिपायसुकुमालकोमलतलेहिं पुरिसेहिं अब्भंगणप
रिमद्दणुव्वलणकरणगुणनिम्माएहिं छेएहिं दक्खेहिं पट्ठेहिं कुसलेहिं मेहावीहिं निउणेहिं निउणसि
प्पोवगएहिं। जियपरिस्समेहिं पुरिसेहिं अट्ठिसुहाए तयासुहाए मंससुहाए रोमसुहाए चउव्विहाए
सुहपरिकम्मणाए संबाहणाए संबाहिए समाणे अवगयपरिस्समे अट्टणसालाओ पडिनिक्खमइ ६०
॥ व्या०॥ अनेकानि व्यायामनिमित्तं योग्यानि यानि तत्र योग्या गुणनिका १ वल्गनं च २ व्यामर्द
नं च परस्परं बाह्वाद्यंगमोटनं ३ मल्लयुद्धं च प्रतीतं ४ धाकरणानि च अंगभंगविशेषाः ५ तैः राजा श्रांत
ः सामान्येन परिश्रांतः अंगप्रत्यंगापेक्षया सर्वतः त तः शतकृत्वो यत्पक्वं अपरापरौषधीरसेन सह
शतेन वा कार्षापणानां वा यत्पाकं एवं सहस्रपा क म पि एवंविधैः सुगंधितैलादिभिः अभ्यंगैः अ
र्दिशाक्षात् घृतकर्पूरपानीयादिरूपैः। किंविशिष्टै ग अभ्यंगैः प्रीणनीयैः। अग्निजननैः। पुनः किंभू
तैः मदनीयैः। कामवर्धनैः। पुनः किंभूतैः बृंहणी यैः मांसोपचयकारिभिः। पुनः किंभूतैः दर्पणी
यैः बलकारिभिः। पुनः सर्वेंद्रियाणि सर्वगात्राणि च प्रह्लादयंतीति कर्तरि अनीयप्रत्ययः तैः अभ्यंगैः स्ना
दिः अभ्यंगः क्रियते स्म यस्य सः अभ्यंगितः सन् ततः तैलचर्मणि तैलाभ्यक्तस्य संबाधनाकरणाय यच्चर्म
कलिका परिकर्मते तत्र एवंविधैः पुरुषैः संबाहिए समाणे त्ति योगः। किंभूतैः पुरुषैः पडिपुन्नेत्ति प्रतिपूर्णा
नि पाणिपादानां सुकुमालकोमलानि अतिकोमलानि तलानि अधोभागा येषां ते तैः। पुनः किंभू
तैः अभ्यंगणेति अभ्यंगपरिमर्दनोद्वलनानां प्रतीतानां करणे ये गुणविशेषास्तैर्निर्मिताः सदस्याः

×तत्तैलचर्म्म×२

×सयपागत्ति त्रि×

×रसरुधिरादिधातुसमताकारिभिः दीपनीयैः।×७

×दक्षैः शीघ्रकारिभिः । पत्तैः । प्राप्तार्थैः अधिगतकर्मभिः निष्ठांगतैः कुशलैः आलोचितकारिभिः मेधाविभिः ×६

कुशलैः येते तैः । पुनः किंभूतैः छेकैः ॥ अवसरज्ञैः ॥ द्विसप्ततिकलापंडितैरित्यर्थः ॥ पुनः किंभूतैः दक्षैः कार्या
णां अविलंबकारिभिः ॥ पुनः किंभूतैः प्रष्ठैः ॥ वाग्मिभिरित्यर्थः ॥ अथवा प्रष्ठैः ॥ अग्रगामिभिः ॥ पुनः किंभूतैः
कुशलैः । साधुभिः ॥ संबाधाकर्मणि । पुनः किंभूतैः मेधाविभिः ॥ अपूर्वविज्ञानग्रहणशक्तिनिष्ठैः ॥ निपुण
दक्षैः । निपुणशिल्पोपगतैः । दक्षचित्तारंभः । तत्र निपुणैः उपायकुशलैः । निपुणानि सूक्ष्माणि यानि शिल्पा
नि अंगमर्दनादीनि । तानि उपगतानि अधिगतानि यैस्ते तैः ॥ पुनः किंभूतैः जितपरिश्रमैः ॥ व्याख्यांतरे छे
कैः प्रयोगज्ञैः ॥ सकृत्स्वयंकृतदृष्टकर्मज्ञैः ॥ निपु णैः ॥ उपायारंभिभिः ॥ निपुणशिल्पोपगतैः ॥ सुकोम
लशिल्पसमन्वितैः ॥ कया चतुर्विधया सुखकर्मणा । च तुःसुखा सुखकारिणी परिकर्मणा अंगसुश्रूष
तया किंविशिष्टया सुखकर्मणया ॥ अस्थिसुख हे ३ वाना ॥ अस्थिसुखया ॥ एवं मांससुखया ॥ त्वक्
सुखया रोमसुखया ॥ संबाधनया ॥ संवाहनया वावि श्र मणया संवाहितः सन् राजा अपगतपरिश्रमा
ज्ञातः ॥ क्वचित् अवगयखेयपरिस्सामत्ति पाठः ॥ तत्र खेदो दैन्यं श्रमो व्यायामजं शरीरस्य अस्वास्थ्यं त
ताद् अपगतो खेदपरिश्रमो यस्मात् स तथा सोऽपगतखेदपरिश्रमः ॥ एवंविधः सन् राजा अट्टनशालातः प्र
तिनिष्क्रामति ॥ प्रतिनिष्क्रम्य च यत्रैव मज्जनगृहं तत्रैव उपागच्छति ॥ उपागत्य च मज्जनगृहं अनुप्रविशति ॥
अनुप्रविश्य च किं करोति तत्र सूत्रं ॥ समुत्तजालाकुलाभिरामे ॥ विचित्तमणिरयणकुट्टिमतले रमणिज्जे ण्हा
णमंडवंसि नाणामणिरयणभत्तिचित्तंसि ण्हाणपीढंसि सुहनिसन्ने पुप्फोदएहि य गंधोदएहि य उण्होदएहि य सुहो
दएहि य सुद्धोदएहि य कल्लाणकरणपवरमज्जणविहीए मज्जिए ॥ व्या० ॥ ततो राजा एवंविधे स्नानमंड ५२

तिष्ठः

पे स्नानपीठे सुखेन निषण्णः सन् उपविष्टः सन् एवंविधैः पानीयैः स्नापितः ॥ किंभूते स्नानमंडपे ॥ समुक्तेन ॥ मुक्ताफलयुक्तेन
जालेन गवाक्षेण ॥ आकुलः व्याप्तो दृष्टिरामश्च यः स तस्मिंश्च ॥ समंतजालाकुलाभिरामे ॥ पाठे तु समंताज्जालैर्जाला
कैर्विचित्रितभित्तिचित्रा गृहावयवविशेषैः ॥ आकुलोऽभिरामश्च तस्मिंश्च ॥ समुत्तजालाभिरामे पाठे तु समस्तैर्जाल
कैः अभिरामे मनोहरे ॥ पुनः किंभूते ॥ विचित्रमणिरत्नानां कुट्टिमतलं बद्धभूमिर्यत्र स तस्मिंश्च ॥ किंभूते ॥ ना
नामणिरत्नानां भक्त्या विच्छित्त्या विचित्रे ॥ अथ एवंविधैः उदकैः गंधोदकैः मज्जितः ॥ किंभूतैः उदकैः ॥ पुष्परसमिश्रैः ॥
श्रीखंडादिरसमिश्रैः ॥ पुनः उष्णोदकैः एकांततापनाद कैः ॥ पुनः शुद्धोदकैः ॥ पवित्रस्थानानीतैस्तीर्थोदकैः
सुखोदकैर्वा नातिशीतोष्णैः ॥ पुनः शुद्धोदकैः स्वाभा विकैः ॥ तत्र कथं मज्जितः तदाह सूत्रं ॥ ॥ तत्थ कोउयस
एहिं बहुविहेहिं ॥ तत्र स्नानावसरे कौतुकादीनां रक्षादीनां शतैः बहुविधैः ॥ तत्रापि राजा कदा
दृष्टः ज्ञातस्तत्र सूत्रं ॥ ॥ कल्लाणगपवरमज्जणाव साणे पम्हलसुकुमालगंधकासाइयलूहियंगे ॥ अ
हयसुमहग्घदूसरयणसुसंवुडे ॥ सरससुरहिगो सीसचंदणाणुलित्तगत्ते ॥ सुइमालावन्नगविलेवणे ॥ आ
विद्धमणिसुवन्ने कप्पियहारद्धहारतिसरयपालंबपलंबमाणकडिसुत्तसुकयसोहे ॥ पिणद्धगेविज्जे ॥ अंगुलि
ज्जगललियकयाभरणे ॥ नाणामणिकणगरयणवरकडगतुडियथंभियभुए ॥ अहियरूवसस्सिरीए ॥ कुंडलउ
ज्जोइयाणणे ॥ मउडदित्तसिरए ॥ हारोत्थयसुकयरइयवच्छे ॥ मुद्दियापिंगलंगुलीए ॥ पालंबपलंबमाणसुकयपडउत्तरि
ज्जे ॥ नानामणिरयणकणगविमलमहरिहनिउणोवियमिसिमिसंतविरइयसुसिलिट्ठविसिट्ठलट्ठआविद्धवीर
वलए ॥ किं बहुणा कप्परुक्खए चेव अलंकियविभूसिए नरिंदे ॥ व्या० ॥ ॥ अथ सिद्धार्थो राजा कल्याणकप्रवर

×प्रथा×

मज्जनांतेवसानेकीदृशोविभूषितोजातस्तत्रकल्याणेतिकाययति।आकाययतिकल्याणकं।यस्तत्रमज्जनंतस्यअव
सानेप्रांते।एतावताकल्याणकारिप्रधानमज्जनकरणानंतरमित्यर्थः।कीदृशोनरेंद्रः।पम्हला।पक्ष्मवती।सुकुमा
ला।गंधेन।काषायिका।कषायारक्ताशाटिका।तयालूषितंअंगंयस्यसतथा।पुनःकिंभूतः।क्वापिनासानीसास
वायवुज्झवरकुद्दंवन्नफरिसजुत्तंहयलालापेलवाइरेगधवलंकणगखचियंतिपाठस्तत्र।नासानिःश्वासवाते
नवाह्यंश्लक्ष्णत्वात्।चक्षुःहरतिविशिष्टरूपत्वात्।चक्षुःहरंचक्षुर्वर्णेंद्रियंवा।चक्षुरोधकंघनत्वाद्वा।वर्णस्पर्शयुक्तं
हयलालायाःअश्वलालायाःअपिपेलवंमृदु।अतिरेकेण। अतिशयेनधवलंयत्रघांकनांकनकखचितंमंडितं।अंत
र्मः॥पुनःकिंभूतः।अहतंमलादिना।अनुपद्रुतंसु महार्घंबहुमूल्यंयद्दूष्यरत्नं।प्रधानवस्त्रंतेनसुसंवृ
तःपरिगतः।यद्वासुष्ठुसंवृतंपरिहितंयेनसः।पुन :किंभूतः।सरससुरभिगोशीर्षचंदनानुलिप्तगा
त्रः।सुगमं॥पुनःकिंभूतः।शुचिनीपवित्रेमालाच पुष्पमालावर्णकंविलेपनंचमंडनकारिकुंकुमादि
विलेपनंयस्यसः।यद्यपिवर्णकशब्देनचंदनमुच्यते। परंगोशीर्षचंदनानुलिप्तेत्यत्रतस्योक्तत्वात्।पुनःकिं
भूतः।आविद्धानिमणिसुवर्णानियस्यसः।नधावत्तरदूषणमस्तीत्यर्थः।पुनःकिंभूतः।कल्पितोविन्यस्तोहारोअ
ष्टादशसरिकः।अर्द्धहारोनवसरिकःत्रिसरिकंचप्रतीतंयस्यसतथा।प्रालंबोझुंबनकंप्रलंबमानायस्यसः।क
टिसूत्रेणकट्याभरणेनसुष्ठुकृताशोभायस्यसः।ततःपदत्रयस्यकर्मधारयः।यद्वाकल्पितहारादिभिःसुकृताशो
भायस्यसः।पुनःकिंभूतः।पिनद्धानिपरिहितानि।ग्रीवायांग्रैवेयकानिग्रीवाभरणानियेनसः।पुनःकिंभूतःअंगु
लीयकानिअंगुलीभरणानि।कर्मिकाललितानिशोभावंतिकचाभरणानिपुष्पादीनियस्यसः।क्वापिपिणद्धगेवि

मुद्रिकादीनि

ज्जललियंगयललियकयाभरणेत्तिपाठस्तत्रपिनद्धानिग्रीवादिषुग्रैवेयकांगुलीयकानिसःतथाललितांगेशरीरेअन्यान्यपिल
लितानिसशोभानिकृतानिविन्यस्तानिआभरणानियस्यसः।ततःपदद्वयस्यकर्मधारयः।यद्वापिनद्धानिग्रैवेयकांगुलीय
कानि।ललितांगदेवकचाभरणानियेनसः।पुनःकिंभूतः।वरकटकानिप्रधानानिहस्ताभरणानि।त्रुटिकानिबाह्वाभर
णानितैःस्तंभिताविवभुजौयस्यसः।पुनःकिंभूतः।अधिकरूपेणसश्रीकः।पुनःकिंभूतः।कुंडलाभ्यांउद्योतितंआननंय
स्यसः।पुनःकिंभूतःहारेणआविस्तृतमाच्छादितंतेनैवसुष्ठुकृतरतिकंवक्षोयस्यसः।पुनःकिंभूतःमुद्रिकाभिःसरत्नांगु
ल्याभरणैःपिंगलाअंगुल्योयस्यसः।किंभूतःमुकुटेन। दीप्तंशिरोयस्यसः।किंभूतःप्रलंबेनप्रलंबमानेनवस्त्रा-
कृतपटेनउत्तरीयंउत्तरासंगोयेनसः।किंभूतःनाना मणिकनकरत्नैर्विमलानिमहार्घाणिनिपुणेनशि
ल्पिनाउद्विग्नानि।परिकर्मितानिमिसिमिसिंतदी प्यमानानि।यानिविरचितानिसुश्लिष्टानिविशि
ष्टानिलष्टानिमनोहराणिआविद्धानिपरिहितानि वीरवलयानियेन।कोपिवीरोमांविजित्यएतानिव
लयानिमोचयित्वाइतिस्पर्द्धया।यानिवलयानिपरिद धाति।तानिवीरवलयानिउच्यंते।किंबहुनावर्णितेने
तिशेषः।कल्पवृक्षइवअलंकृतोदलादिभिर्विभूषितश्च।फलपुष्पादिभिः।राजाउअलंकृतोमुकुटादिभिः।विभूषि
तोवस्त्रादिभिःपुनर्नरेंद्रःकीदृशस्तत्रसूत्रं॥ सकोरंटमल्लदामेणंछत्तेणंधरिज्जमाणेणंसेयवरचामराहिं।उद्धुव्व
माणीहिं।मंगलजयसद्दकयालोए व्याप॥ एवंविधेनध्रियमाणेनछत्रेणश्वेतवरचामरैःउद्धूयमानैश्चसहितइति
शेषः।किंविशिष्टेनछत्रेणसकोरंटाख्यकुसुमस्तबकवंतिमाल्यमालानिपुष्पस्रजोयत्रतानिकोरंटकःपुष्पवृ
क्षस्तानिमाल्यानिमालांतेपुञ्जोऽसार्थेदीयंते।मालायहितानिमाल्यानिपुष्पाणिदामानिमालां।वाचनांतरेतुअर्थ

न

त्रां =

प्रथितवेष्टित

लिवृत्ता। अलंकारवर्णकः सचिव एगावलि पिणद्धे इत्यादि राजप्रश्नीयसूत्रे। तत्तु विस्तरार्थिना राजप्रश्नीयसूत्रात् द्रष्टव्यं
अत्रोत्तमरस्य क्षीवेद्वे पिसीवृं गिाद्दमालना। पुनः किंभूतो नराणां गलसूत्रे भुजयुराष्ट्रः सतः। आलोकेन दृश्यसमाना।।
लोकैः कृतमार्गदानः इत्यन्ये। पुनर्नरेंद्रः कीदृशः सन् मज्जनगृहान्निःक्रामति तत्र सूत्रं।। अणेगगणनायकदंडना
यगराईसरतलवरमाडंबियकोडंबियमंतिमहामंति गणगदोवारिय अमच्चचेडपीढमद्दनगरनि
गमसेट्ठिसेणावइसत्थवाहदूअसंधिपालसद्धिं संपरिवुडे। धवलमहामेहनिग्गए इव गहगणदिप्पंतरि
क्खतारागणाण मज्झे ससिव्व पियदंसणे नरवई नरिंदे नरवसहे नरसीहे। अब्भहियरायतेयलच्छीए दिप्पमा
णे मज्जणघराओ पडिनिक्खमइ इत्ता।। व्या०।। ततः सद्यः श्रीमन्नरपतिः ईदृशः सन् मज्जनगृहात् निःक्रा
मति इति उक्तिः किंविशिष्टो नरपतिः। अणेगगणअणे के ये गणनायकाः प्रकृतिमहत्तराः १ दंडनायक
१ तंत्रपालाः २ राजानो मांडलिकाः ३ ईश्वराः युवर १ राजानः अणिमाद्यैश्वर्ययुक्ताः इत्यन्ये ४ तलवराः तु
दृष्ट नृपदत्तपट्टबंधविभूषिता राजस्थानीयाः ५ माडंबि काः छिन्नमंडवाधिपाः ६ कौटुंबिकाः कतिपयकुटुंबप्र
वोद्वलगकाः ७ गणमहत्तरावा ८ महामंत्रिणो महामात्याः मंत्रिमंडलप्रधानाः हस्तिसाधनाध्यक्षा वा ९ गणकाः ज्योति
षिकाः भांडागारिका वा १० दौवारिकाः प्रतीहाराः राजद्वारिका वा ११ अमात्याः राज्याधिष्ठायकाः १२ चेटाः पादमूलिका
दासा वा १३ पीठमर्दा आस्थाने आसन्नासन्नसेवका वयस्या इत्यर्थः। विरूपाचार्या वा १४ नागरा नगरवासिप्रकृतयो दरा
जदेयविभागाः १५ निगमाः कारणिका वणिजो वा १६ श्रेष्ठिनः श्रीदेवताध्यासितसौवर्णपट्टविभूषितोत्तमांगाः १७ सेनाप ५४
तयो नृपतिनिरूपिताः चतुरंगसेनानायकाः १८ सार्थवाहाः सार्थनायकाः १९ दूताः अन्येषां गत्वा राज्ञा संदेशनिवेदकाः

२० संधिपाला राज्यसंधिरक्षकाः २१ एषां द्वंद्वसमासः कार्यः ततस्तैः इह तृतीयाबहुवचनलोपो दृष्टव्यः सार्द्धं न केवलं
तत्सहितो दपि तु समंतात् परिवृतो नरपतिः मज्जनगृहान्निःक्रामति। पुनर्वार्त्तिकमपि।। अत्रार्थे।। गणनायका दंडनाय
का। श्रीकरणा। वयकरणा। देवकरणा। जमकरणा। सामंत महासामंता। मंडलीका। महामंडलीका। चउरासिया। मुकुटब
द्धा। संधिपाला इतपाला संधिविग्रही। परविग्रही। अमात्य महामात्या। श्रेष्टि सार्थवाह। व्यवहारीया। अंगरक्षक पुरो
हिता। हस्तिनायक। वहीवाहक। पईयायता। पमयफीयायता। कपटायता। टाकटमाली ईडमाली धर्मवादी धातुवादी
मंत्रवादी तंत्रवादी। यंत्रवादी। तर्कवादी। धनुर्द्धरा दंडधर खड्गधरा बाणदीधरा छत्रधरा चामरधरा पताकाधरा दी
वीधरा प्रतीहारा पालहारा सेजपाल। तंत्रपाल। अंगम ईका। आत्मरक्षका मीढाबोला। साचाबोला। बुद्धबो
ला। साहबोला। कथाबोला। गुणबोला। समस्याबो ला। सांहित्यबंधका। लक्षणबंधका। छंदबंधका। अ
लंकारबंधका। नाटकबंधका। गीतबंधक इत्यादीनां प रिवारेण परिवृतः। पुनः किं। धवलमहामेघनिर्गत इव यहितवेष्टितः
ग्रहश्री ससिच्चिनि। ततोऽद्धनत्रस्य बंधस्तेनो ग्रहगणदीप्य मानदीप्यमानतारकगणानां मध्ये इव वर्त्तमानः। पुनः किं
प्रियदर्शनः। पुनः किं नराणां पतिः रक्षिता। पुनः किंभूत नरेषु ऐश्वर्यादिसद्भावात्। पुनः किंभूत नरश्रेष्ठ राज्यधुराध
रणात्। पुन नरसिंहः शौर्यातिशयात्। पुनः किंभूत अस्याधिकराजतेजो लक्ष्मीदीप्यमानः। एवंविधः सन् राजा मज्जनगृ
हान्निःक्रम्य किं करोतिस्म तत्र सूत्रं।। जेणेव बाहिरिया उवट्ठाणसाला तेणेव उवागच्छति। उवागच्छित्ता सीहासणंसि पुरत्थाभिमु
हे निसीदइ इत्ता अप्पणो उत्तरपुरच्छिमे दिसीभाए अट्ठ भद्दासणाइं। सेयवत्थपच्चुत्थुयाइं सिद्धत्थयमंगलोवयाराइं रया
वेइ इत्ता। अप्पणो अदूरसामंते नाणामणिरयणमंडियं। अहियपिच्छणिज्जं। महग्घवरपट्टणुग्गयं सण्हपट्टसतिसयचि

नताणं। ईहामिअ उसह तुरिय नर मगर विहग वालग किंनर रुरु सरभ चमर कुंजर वणलय पउमलय भत्ति
चित्तं। अभिंतरियं जवणियं अंछावेइ २ त्ता नाणामणिरयणभत्तिचित्तं। अच्छरयमिउमसूरगच्छय सेयवच्छपच्चुत्थु
यं। सुमउयं। अंगसुहफरिसं विसिट्ठं। तिसलाए खत्तियाणीए भद्दासणं रयावेइ २ त्ता॥ व्याख्या॥ ततो पश्चात् मज्जनगृह २
त्ति। कम्प यत्रैव बाह्या उपस्थानशाला। तत्रैव आगच्छति। आगत्य च सिंहासने पूर्वाभिमुखः निषीदति नि
षिद्य च। आत्मनः ईशानकूणे अष्टौ भद्रासनानि रचयति। रचयित्वा किं० भद्रासनानि श्वेतवस्त्रेण धवल
वाससा प्रत्यवस्तृतानि आच्छादितानि पुनः किं० सपकृतसिद्धार्थकस्य धान्यो मंगलउपचारः कृताये
षु। तानि पुरस्कृतत्वात्। कृतशान्तिकस्य मध्यनिपात। ततः आत्मनः सामंत समीपे नातिदूरे नाति
निकटे। तानि समीपे इत्यर्थः एवं विधाय मनि। कां अछय तीति। आकर्षयतीति संबंधः। किं०
यं० नानामणिरत्नमंडितां पुनः किं० प्रेक्षणीयां। अवलोकनीयां कापि अद्वितीयविच्छित्तिरूप मि
ति पाठः सुबोधः पुनः किं० यथमहार्घां च सो परपत्तने वस्त्रोत्पत्तिस्थाने उत्कृष्टसूत्रा वरपट्टना प्रधा
न वेष्टनका उद्गता निर्गताः पुनः किं० सूक्ष्मपट्टसूत्रमयी सत्कि शतचित्र स्थानको यस्यां सातां। कचित्स
त्कि सय सहुवचियमाणं पावतत्र सत्कि शतैः सहुपचितैः स्फातीमानो बहुमानीयस्यां सा तां। क्वचित् स
त्त बहुसत्तिसय चित्तताणं सयथ सहुचियपाठस्तत्र स्पष्टानि बहुसत्तिसतानि यानि चित्राणि तेषा
स्थानं तत एव सततसमुचितां सर्वकालयोग्यां पुनः किं० ईहामृगाः वृकाः ऋषभा। उरग नर मगर विहग ५५
पक्षिणः। व्यालाः श्वापदाः भुजंगा वा किंनरा व्यंतरविशेषाः रुरवो मृगभेदाः सरभाः अष्टापदाः महाकाया

आटव्यपशवः चमरा आटव्यगावः कुंजरा हस्तिनः वनलता पद्मलताः उद्दातः सर्वेषां पदानां द्वंद्वः कार्यः
ततः स्तासां विच्छित्तिभिः चित्रां एवंविधां अभ्यंतरसागवर्त्तिनीयमनिकां अछावेइत्ति आकर्षयति। आय
तां करोतीत्यर्थः पुनर्यवनिकाकीदृशी तत्राभ्यधिकार्त्तिकमपि तथाहि॥ गजरथ तुरंगम सौद वृषभ सुरअ
सुर किंनरा देव विद्याधर गण गंधर्व विहग सरभ सर्प करभ सुकर राजसारस हरिण चामर वनलता पद्म
लता मरव नंद्यावर्त्त स्वर्णकलश स्वस्तिक भद्रासन आदर्श विमान हंस कोकिल नीलाशुक मत्स्य विल २
सर्प गंगा वृषभ तत्त्व उसेरिभ गजलांगूलप्रचु पदद्विपद बहुविध नाटक रोहिंस मोरा सता
आतपत्रा केतु भुवन वृक्ष अचलनदी पुष्करिणी समुद्र रत्न मणि माणिक्य वनवापी प्रमुख लि
खित रूपां विचित्रां यवनिकां तस्याथ वनिका बंधनानंतरं सिद्धार्थ राजा एवंविधं त्रिसला
देवीयाः निमित्तं भद्रासनं रचयति॥ किं० भ० नानामणिरत्नभक्तिचित्रं पुनः किं० सप श्वेतवस्त्रे
ण प्रत्यवस्तृतं उपरि आच्छादितं अथवा अस्तरक मास्तृकमस्तरके अवस्तृतं पुनः किं० मृदुकं
कोमलं अत एव अंगस्य सुखाय सुखकारी स्पर्शो यस्य तत् अथवा जातं भासनं रचयित्वा किं करोति। त
यत्सूत्रं॥ कोडुंबियपुरिसे सद्दावेइ २ त्ता। एवं वयासी॥ खिप्पामेव भो देवाणुप्पिया। अट्ठंगमहा मित्त सुतङ्ग×
धारए। विविहसत्थकुसले सुमिणलक्खणपाढए सद्दावेह। तए णं ते कोडुंबियपुरिसा सिद्धत्थे
णं रन्ना एवं वुत्ता समाणा हट्ठतुट्ठ जाव हियया। करयल जाव पडिसुणंति २ त्ता। सिद्धत्थस्स खत्तिय
स्स। अंतिआओ पडिनिक्खमति २ त्ता। कुंडपुरं नगरं मज्झंमज्झेणं जेणेव सुविणलक्खणपाढगाणं गेहा इ

तेणेव उवागछंति२त्ता सुविणलक्खणपाढए सद्दावेइ तए णं ते सुविणलक्खणपाढगा सिद्धत्थस्स खत्तियस्स कोडुंबिय
पुरिसेहिं सद्दाविया समाणा हट्ठतुट्ठ जाव हियया ण्हाया कयबलिकम्मा कयकोउयमंगलपायछित्ता सुद्धप्पा
वेसाइं मंगल्लाइं वत्थाइं पवराइं परिहिया अप्पमहग्घाभरणालंकियसरीरा सिद्धत्थयहरियालिया कयमंग
लमुद्धाणा सएहिं सएहिं गेहेहिंतो निग्गछंति२त्ता खत्तियकुंडग्गामं नगरं मज्झंमज्झेणं जेणेव सिद्धत्थस्स रन्नो भवणवर
वडिंसगपडिदुवारे तेणेव उवागछंति२त्ता एगओ मिलंति२त्ता जेणेव बाहिरिया उवट्ठाणसाला जेणेव सिद्धत्थे
खत्तिए तेणेव उवागछइ२त्ता करयल जाव कट्टु सिद्धत्थं खत्तियं जएणं विजएणं वद्धावेइ॥ व्या०॥ ॥अथ तदास
नरचनानंतरं सिद्धार्थो राजा कौटुंबिकपुरुषान् आ कारयति। आकार्य च एवम् अवादीत्। क्षिप्रमेव भो दे
वानुप्रियाः स्वप्नलक्षणपाठकान् शीघ्रम् आकारयत किं० स्वप्नलक्षणपाठकान्। अष्टांगमिति। अष्टांग
अष्टावयवाः। दिव्य१ उत्पात२ अंतरिक्ष३ भौम४ अं ग५ स्वर६ लक्षण७ व्यंजन८ भेदात्। अंगविद्याः।
कीर्णादौ उक्तः॥ अथवा अंग१ स्वप्न२ स्वर३ भौम४ व्यंजन५ लक्षण६ उत्पात७ अंतरिक्ष८ भेदात् अष्टभेदं
यन्महानिमित्तं परोक्षार्थप्रतिपत्तिकारणं व्युत्पादकशास्त्रं विज्ञाय ये। तस्य सूत्रार्थौ तौ धारयंति पठंति वा। त
यो विधारणाय ते तान् अनेन पाठान्वयं व्याख्यातं। अरएण रए२ पाठए त्ति३। पुनः किं० स्व०। विविधशास्त्रकुश
लान्। ततस्ते स्वप्नपाठकाः कौटुंबिकपुरुषैः सिद्धार्थेन राज्ञा एवमुक्ताः संतः हृष्टतुष्टाः जाताः। यावत् करण ५६
तुहट्ठतुट्ठचित्तमाणंदिया इत्यादि वर्णकः। उनयो करयल परिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु ए
वं देवो तहत्ति। आणाए विणएणं वयणं पडिसुणंति त्ति अस्यार्थः। इति अस्पष्टं ति। अस्तु पगछंति। वचनं। कीदृशो

न विनुयेन। एवमित्ति यथैव यूयं सणह। तथैव देवो त्ति हे देव तहत्ति मा अन्यथा आज्ञया सर्वदा देशेन करिष्यामः इत्ये
वं अभ्युपगमसूचकपदवक्तलक्षणेन रूपेण प्रतिश्रुत्य च सिद्धार्थस्य क्षत्रियस्य अंतिकात् समीपात् प्रतिनिःक्रा
मंति प्रतिनिःक्रम्य च कुंडपुरग्रामस्य मध्ये भूत्वा यत्रैव स्वप्नपाठकगृहाणि तत्रैवागछंति आगत्य च स्वप्नपाठ
कान् आकारयंति। ततश्च ते स्वप्नलक्षणपाठकाः सिद्धार्थस्य कौटुंबिकपुरुषैः आहूताः संतः हृष्टतुष्टाः संतः स्ना
ताः कृतस्नानाः। पुनः स्नानानंतरं कृतं बलिकर्म स्वदेवतानां यैस्ते। पुनः किं० स्व० कृतानि कौतुकमंगलप्राय
श्चित्तानि यैः स्वप्नादिविघातार्थं अवश्यकरणीयत्वात् तथा तत्र कौतुकानि मषीतिलकादीनि
मंगलानि च सिद्धार्थकदध्यक्षतदूर्वांकुरादीनि। अन्यत्राह्नः पादछुप्ता। पादेन पादे वा छुप्ताः चक्षुर्दो
षपरिहारार्थं पादछुप्ताः कृतानि कौतुकमंगला श्रुते पादछुप्ता इति समासः। पुनः स्व० शुद्धात्मा
नः स्नानेन शुचीकृतदेहाः। पुनः किं० स्व० वस्त्राणि परिहिताः। किं० वस्त्राणि वेसाइं। वेषसाधूनि रम्याणि।
अथवा शुद्धानि च तानि प्रवेश्यानि च। राजसभाप्रवेशोचितानि चेति पदद्वयमपि वस्त्रविशेषणं कार्यं। पुनः किं० व
स्त्राणि मंगलकरणे साधूनि। पुनः किं० व० प्रवराणि प्रधानानि॥ किं० स्व०। अप्पेति। अल्पानि महार्घाणि बहुमूल्यानि
आभरणानि तैः अलंकृतं शरीरं येषां ते। पुनः किं० स्व० सिद्धत्थे त्ति। सिद्धार्थकाः सर्षपाः हरितालिका च दूर्वांकुराः कृ
ता मंगलनिमित्तं मूर्ध्नि शिरसि यैस्ते एवंविधाः संतः स्वप्नपाठकाः स्वकेभ्यः स्वकीयेभ्यः २ इत्यर्थः। गृहेभ्यो निर्य
छंति निर्गत्य च क्षत्रियकुंडग्राममध्ये भूत्वा यत्रैव सिद्धार्थस्य राज्ञः सदनवरे उत्तमप्रासादे भवनं सकलवंशोत्तरकं वा भवन
वरवतंसकस्य प्रतिद्वारे मूलद्वारे समीपद्वारे आगछंति आगत्य च एकत्र मिलंति मिलित्वा च यत्रैव बाह्या आस्था

न शाला यत्रैव सिद्धार्थो राजा तत्रैव आगच्छंति आगत्य च अंजलिं मस्तके कृत्वा सिद्धार्थं क्षत्रियं जयेन विजयेन वर्द्धा-
पयंति। वर्द्धयंति। आचक्षते इत्यर्थः॥ तामाशिषमाख्याति। तु नस्ते घोत्तु:॥ हे राजन् त्वं दीर्घायुर्भव। श्रीमान् भव। यशस्वी भ-
व। प्रज्ञावान् भव। भोगवान् भव। धन्यवान् भव। सौभाग्यवान् भव। कीर्तिमान् भव। कांतिमान् भव। पुनः प्रवदंति स्म। आद-
शावतारो वः पाठ्यानां कमनीयांगजनयति॥ किं दीपो न हि श्रीपः॥ किंतु वामांगजो जिनः॥१॥ अस्यापि बालावबोधार्थ-
मर्थो। यथा। हे राजन् दशावतारो वो युष्माकं पाठ्यानां। किंवत् कमनीयं अंगजं जनकं जितस्मात् नह्यत् जयवाचकतिर्यस्य सः। ईदृ-
शस्तर्हि किं दीपः। प्रदीपो न हि कस्मात् स्यापि दशातोवर्त्ति। तोद्वतारो भवति। कमनीयांगजनयतिर्भवति। तर्हि किं
श्रीपः। श्रीकृष्णो न हि कस्मात् स्यापि दशावतारमत्स्य कृष्णादयो वर्त्तते। अथवा कमनीयांगजनयतिरपि
कृष्णवर्णत्वात् किंतु कोदेवः इत्याह। वामांगजः वाम १स्या अंगजा वामांगजः श्रीपार्श्वनाथो यतः सः
दशावतारो दशअवताराभवा यस्य सः दशावतारः पुनः कमनीयांगजनयतिः श्यामवर्णत्वात् अथमो श्री-
वीरो मुक्तः॥ सिद्धार्थस्य श्रीपार्श्वनाथश्रावकत्वेन। श्रीआ चारांगसूत्रे प्रोक्तत्वात्। ततस्ते स्वप्नपाठकाः कीदृशाः सं-
तः किं कुर्वंति स्म। तत्राह सूत्रं॥ तए णं ते सुविणलक्खणपाढगा सिद्धत्थेणं रन्ना वंदियपूइयसक्कारियसमाणियसमा-
णा पत्तेयं पत्तेयं पुव्वन्नत्थेसु भद्दासणेसु निसीयंति। व्या०॥ ततस्ते स्वप्नलक्षणपाठकाः सिद्धार्थेन राज्ञा वंदिताः सद्गुणोत्की-
र्तनेन। पूजिताः पुष्पैः सत्कारिताः फलवस्त्रादिदानेन। सन्मानिता अभ्युत्थानादिप्रतिपत्त्या। अन्यवाचः। पूजिताः वा- ५७
स्त्राभरणादिभिः सत्कारिताः अभ्युत्थानादिना सन्मानिताः। आसनदानादिना क्वचित् अच्चियवंदियमाणियपूइयत्ति
पाठस्तत्र अर्चिताश्चंदनचर्चादिना मानिता दृष्टिप्रणामतः पूजिताः पुष्पैः समाणत्ति संतः प्रत्येकं पूर्वन्यस्तेषु भद्रासने-

षु निषीदंति। ततो राजा किं करोतीत्याह सूत्रं॥ तए णं सिद्धत्थे खत्तिए तिसलं खत्तियाणिं जवणियंतरियं ठावेइ ठा-
वित्ता पुप्फफलपडिपुन्नहत्थे परेणं विणएणं ते सुविणलक्खणपाढगा एवं वयासी॥ व्या०॥ ततः सिद्धार्थो राजा त्रिश-
लाक्षत्रियाणीं यवनिकांतरितां स्थापयति स्थापयित्वा पुष्पफलप्रतिपूर्णहस्तः सन् एतावता पुष्पफलानि स्वप्न-
पाठकानामग्रे मुक्त्वा प्रकृष्टेन विनयेन तान् स्वप्नलक्षणपाठकान् प्रति एवमवादीत्। किं अवादीत्तत्र सूत्रं॥ एवं ख-
लु देवाणुप्पिया अज्ज तिसला खत्तियाणी तंसि तारिसगंसि सिज्जावंदी रमाणी २ इमे एयारूवे उराले चउद्द-
स महासुमिणे पासित्ताणं पडिबुद्धा तं जहा। गयवसभ ह०॥ तं एएसिं चउद्दसण्हं महासुमिणाणं देवाणुप्पिया
उरालाणं के मन्ने कल्लाणे फलवित्तिविसेसे भवि- स्सइ॥ व्या०॥ एवं खलु हे देवानुप्रियाः अद्य त्रि-
शला तादृशे शय्यनीये सुप्ता सती ईषन्निद्रां गच्छंती ए- तादृशान् पूर्वव्याख्यातान् चतुर्दश महास्वप्नान्
गयवसहगाथोक्तान् दृष्ट्वा प्रतिबुद्धा। तान्यूयं कथयत। एतेषां चतुर्दशमहास्वप्नानां कः फलवृत्तिविशेषो भ-
विष्यति। ततस्ते स्वप्नपाठकाः कीदृशाः संतः किं कुर्वंति स्म तत्र सूत्रं॥ तए णं ते सुमिणलक्खणपाढगा सिद्धत्था-
स्स खत्तियस्स अंतिए एयमट्ठं सुच्चा निसम्म हट्ठतुट्ठ जाव हियया ते सुमिणे उगिण्हंति २ त्ता ईहं पविसंति २ त्ता अन्न-
मन्नेणं सद्धिं संलावंति। सं० त्ता तेसिं सुमिणाणं। लद्धट्ठा। गहियट्ठा। पुच्छियट्ठा। अहिगयट्ठा। सिद्धत्थस्स रन्नो पुर-
ओ सुमिणसत्थाइं उच्चारेमाणा सिद्धत्थखत्तियं एवं वयासी॥ व्या०॥ ततस्ते स्वप्नपाठकाः सिद्धार्थस्य क्षत्रियस्य
अंतिके समीपे एतं अर्थं श्रुत्वा हृष्टतुष्टाः संतः तान् स्वप्नान् गृह्णंति हृदि ध्यात्वा विचारणां कुर्वंति। विचार्य च अन्योन्य-
न सह संलापयंति। संवादयंति पर्यालोचयंतीत्यर्थः। क्वचित् संलाविंति त्ति पाठः तत्रापि स एवार्थः ततस्ते कीदृ-

परस्परं विचारं करोति॥

×लद्धार्थो×

आकारा लक्षणाद्यः। स्वप्नानां लब्धार्था विशेषेण लब्धार्थाः। स्वत एव पुनः कीदृशा गृहीतार्थाः। परासिप्रायग्रहणतः पुनः कीदृष्टार्था
:संशयेति। परस्परं ततः एवं विनिश्चितार्थाः। अत एव अधिगतार्थाः अवधारितार्थाः। अथवा लब्धार्थाः अर्थश्रवणतः गृही
तार्थाः अवधारणतः पृष्टार्थाः संशये सति अधिगतार्था वा अर्थावबोधात्। विनिश्चितार्था एवं पर्यालोचनात्। सिद्धार्थस्य राज्ञः
पुरो ते स्वप्नशास्त्राणि समुच्चरंतः। सिद्धार्थराजानं एवं अवादिषुः। किं अवादिषुः तत्सूत्रं॥ एवं खलु देवाणुप्पिया अम्हं सु
मिणसत्थे बायालीसं सुमिणा तीसं महासुमिणा बावत्तरिं सव्वसुमिणा दिट्ठा। तत्थ णं देवाणुप्पिया अरिहंतमायरो वा चक्क
वट्टिमायरो वा। अरिहंतंसि वा चक्कहरंसि वा। ग्रंथाग्रं ४०० गब्भं वक्कममाणंसि। एएसिं तीसाए महासुमिणाणं इमे चउद्दस
महासुमिणे पासित्ताणं पडिबुज्झंति। तं०। गयवसह० २ वसिंदेवा वासुदेवमायरो वा। वासुदेवंसि। गब्भं वक्कममा
णंसि। एएसिं चउद्दसण्हं महासुमिणाणं अन्नयरे सत्त महासुमिणे पासित्ताणं पडिबुज्झंति। बलदेवमायरो
वा। बलदेवंसि गब्भं वक्कममाणंसि। एएसिं चउद्दसण्हं महा सुमिणाणं अन्नयरे चत्तारि महासुमिणे पासित्ताणं पडिबु
ज्झंति। मंडलीयमायरो वा। मंडलीयंसि। गब्भं वक्कममाणंसि एएसिं चउद्दसण्हं महासुमिणाणं अन्नयरं एगं महासुमिण
णं पासित्ताणं पडिबुज्झंति। इमे य णं देवाणुप्पिया तिसलाए खत्तियाणीए चउद्दस महासुमिणा दिट्ठा। तं उराला णं देवाणुप्पि
या तिसला सुमिणा दिट्ठा। जाव मंगल्लकारगा णं दे० ति० सुमिणा दिट्ठा। अत्थलाभो देवाणु० भोग० दे० पुत्त० दे० सुक्ख० दे०
रज्ज० दे०। एवं खलु देवाणुप्पिया तिसला खत्तियाणी नवण्हं मासाणं। बहुपडिपुन्नाणं अद्धट्ठमाण राइंदियाणं। व ५८
इक्कंताणं तुम्हं कुलकेउं। कुलदीवं। कुलपव्वयं। कुलवडिंसयं। कुलतिलयं। कुलकित्तिकरं। कुलवित्तिकरं। कुलदिणय
रं। कुलाधारं। कुलनंदिकरं। कुलजसकरं। कुलपायवं। कुलविवद्धणकरं। सुकुमालपाणिपायं अहीणपडिपुन्नपंचिं

दियसरीरं लक्खणवंजणगुणोववेयं। माणुम्माणपमाणपडिपुन्नसुजायसव्वंगसुंदरंगं। कंतं पियदंसणं सुरूवं दारयं प
याहिसि। सेवि य णं दारए उम्मुक्कबालभावे विन्नायपरिणयमित्ते। जुव्वणगमणुप्पत्ते। सूरे वीरे विक्कंते। विच्छिन्नविपुलवाह
णे। चाउरंतचक्कवट्टी। रज्जवई राया भविस्सइ। जिणे वा तिलोगनायगे। धम्मवरचक्कवट्टी। तं उराला णं देवा० तिसला० सु०
जाव आरुग्ग तुट्ठि दीहाउ कल्लाण मंगल्लकारगा णं दे० तिसला सुमिणा॥ ७७॥ स्वप्नपाठका एवं प्राहुः। एवं खलु सो देवा
नुप्रिय अस्माकं स्वप्नशास्त्रे द्विचत्वारिंशत् स्वप्नाः त्रिंशत् महास्वप्नाः सर्वे पिंडिताः सप्ततिः स्वप्ना दृष्टाः। तत्र देवानुप्रिय अर्ह
न्मातरो वा चक्रवर्तिमातरो वा। अर्हति वा चक्रवर्तिनि वा गर्भे व्युत्क्रामति। प्रविशति सतीत्यर्थः। गर्भे वा व्युत्क्रामति उत्पद्य
माने एतेषां त्रिंशत् स्वप्नानां मध्यात् इमान् चतुर्दश महास्व प्नान् दृष्ट्वा प्रतिबुध्यंति गजवृषभादीन्। अथ वासुदेवमा
तरो वा वासुदेवे गर्भे व्युत्क्रामति चतुर्दशमहास्वप्नम ध्यात् अन्यतरान् सप्त महास्वप्नान् दृष्ट्वा प्रतिबुध्यंति।
अथवा बलदेवमातरो बलदेवे गर्भे व्युत्क्रामति। चतुर्दशम हास्वप्नमध्यात् चतुरो महास्वप्नान् दृष्ट्वा प्रतिबुध्यंति। मंड
लीकमातरो वा मंडलीके गर्भे व्युत्क्रामति चतुर्दशमध्ये एकं महास्वप्नं पश्यंति। तान् हे देवानुप्रिय त्रिशलाक्षत्रियाण्या
चतुर्दश महास्वप्ना दृष्टाः। ततः उदाराः स्वप्ना दृष्टाः। एवं पूर्ववत् स्वप्नवर्णको व्याख्येयः। ततः एतत्स्वप्नदर्शनप्रभावात् अर्थ
×स्व३× लाभो भविष्यति। जाव पुत्रलाभो भविष्यति। पुत्रविशेषणानि प्राक् सिद्धानि। सोपि च पुत्र उन्मुक्तबालभावो विज्ञातपरिण
तमात्रो यौवनं प्राप्तः सूरो विक्रांतो विस्तीर्णबलवाहन चतुरंगचक्रवर्ती राज्यपतिः राजा भविष्यति। जिनो वा त्रिलोक
नायको धर्मवरचक्रवर्ती भविष्यति। ततो देवानुप्रिय त्रिशलाक्षत्रियाण्या प्रधानाः शुभाः स्वप्ना दृष्टाः। पुनः स्वप्नविचा
रोप्येवं। दे राज्ञे स्वधातुप्रकोपात् वा आधिप्रबले सति वृक्षः पर्वतशृंग आकाशालंघनं स्वप्ने पश्यति १ पित्ताधिके स्वर्णे रत्नदिवाकर

× स्वप्नेपश्यति।×१

वह्निप्रमुखाणि।२॥ श्लेष्माधिके सति श्वेतचंद्रनक्षत्रशुक्लपक्षनदीसरोवरसमुद्रादीनां लंघनं पश्यति।३॥ पुनः गोवृषभ
हस्तिप्रासादपर्वतशृंगवनस्पतीनां आरोहणं विष्टालेपनं रुदितं मृतिं च यः स्वप्ने पश्यति। तस्य श्रेष्ठं। पुनर्यः स्वप्ने रा
ज्ञानं हस्तिनं अश्वं स्वर्णं वृषभं गावं कुटुंबं पश्यति। तस्य कुटुंबपरिवारो वर्द्धते। पुनर्यः प्रासादस्थितो भुंक्ते। समुद्रं
च स्वप्ने तरति। स दासकुलोत्पन्नोपि राजा भवति। पुनर्यो दीपमस्त्रं फलं पद्मं कन्यां छत्रं ध्वजं च स्वप्ने पश्यति। स जयं लभ
ते। पुनर्यः स्वप्ने लिंगं प्रतिमां च स्वप्ने पश्यति। तस्य आयुः कीर्त्तिर्यशो धनानां वृद्धिर्भवेत्। पुनर्यः कर्पासं भस्म। अस्थितक्र
वर्ज्जितानि शुक्लवस्त्राणि पश्यति। तस्य शोभनं भवेत्। पुन यो गां हस्तिदेव अश्वनरेंद्र वर्ज्जितानि सर्वाणि वस्त्राणि दृष्ट्वा
स्ताति पश्यति। तस्य नाशो मरणं भवेत्। पुनः स्वप्नमध्ये गीते रोदनं भवेत्। नर्त्तने बंधबंधनं प्राप्नुयात्। हसने शोचनं
लभेत्। पठने कलहं लभते। पुनः स्वप्ने देवसाधुविप्र पितृराजवृषभसाद्यद्ददंति। तत्सत्यं भवति। पुनः श्वेत
सर्पेण दक्षिणभुजे स्वप्नमध्ये दष्टो भवेत्। तस्य सहस्रलाभो दशमे दिने स्यात्। पुनर्यो वृक्षं फलितं पुष्पितं क्षीरिणं स्व
प्नमध्ये अधिरोहति। तस्य प्रद्युतधनप्राप्तिर्भवेत्। पुनर्यः गर्दभं उष्ट्रं महिषं महिषीं वा एकाकी स्वप्ने अधिरोहति। तस्य नाशो मृ
त्युः स्यात्। पुनर्यः शुक्लपुष्पश्वेतवस्त्रधरा श्वेतगंधाद्यविलेपना नारी आलिंगयति। तस्य सर्वतो सुखी लक्ष्मीर्भवति। पुनर्यो रक्तव
स्त्रधरा रक्तगंधाद्यविलेपना नारी आलिंगयति। तस्य रक्तव्याधिर्जायते। परं या स्त्री गजादीन् चतुर्दश स्वप्नान् पश्यति। तस्य
ः पुत्रश्चक्रवर्ती तीर्थंकरो वा भवेत्। पुनः स्वप्ननिदानानि नव। श्रुतं१ अनुभूतं२ प्रदर्शनं३ सकलस्वप्नं४ चिंता५ प्रकृति
विकारं६ देव७ पुण्य८ पापानि९ आद्यानि षट् निःफलानि। अंत्यत्रयं सफलं। शुभाशुभं ददात्येव। पुनः रतिहास्यशोक
।कामउत्साहभयक्षुधातृषाजुगुप्सामूत्रविष्टापीडोत्पन्नः स्वप्नो निःफलः॥ पुनः प्रथमप्रहरे दृष्टः स्वप्नो वर्षेण फ ५८

लति।१। द्वितीयप्रहरे षड्भिर्मासैः फलति।२। तृतीयप्रहरे दृष्टस्त्रिभिर्मासैः।३। चतुर्थप्रहरे एकमासेन फलति।४। रात्रिशेषे घ
टिकाद्वये दृष्टो दशदिवसैः।५। सूर्योदयवेलायां दृष्टः स्वप्नः। शीघ्रमेव फलति। नात्र संदेहो भवेत्। अथ सिद्धार्थो राजा स्वप्नपाठके
भ्यः पुत्रप्राप्तिफलं श्रुत्वा किं अवादीत् तत्सूत्रं॥ तएणं सिद्धत्थे राया तेसिं सुमिणलक्खणपाढगाणं अंतिए एयमट्ठं सुच्चा निस
म्म हट्ठतुट्ठचित्तमाणंदिए पीइमणे परमसोमणस्सिए हरिसवसविसप्पमाणहियए करयल जाव ते सुमिणलक्ख
णपाढए एवं वयासी। एवमेयं देवाणुप्पिया। अवितहमेयं देवा०। इच्छियमेयं दे०। पडिच्छियमेयं दे०। सच्चे णं एसमट्ठे
से जहेयं तुब्भे वयह त्तिकट्टु ते सुमिणे सम्मं पडिच्छइ॥ व्याख्या॥ ततश्च सिद्धार्थो राजा तेषां स्वप्नपाठकानां समीपे एनं अर्थं
श्रुत्वा हृष्टतुष्टः सन् तान् स्वप्नपाठकान् एवं अवादीत्। एवमेतत् देवानुप्रियाः। ईप्सितमेतत् देवानुप्रियाः स
×विशेषतुवा× त्यमेतत्। यद्भवंतो वदथ। यतो भवंतः सुसिद्धिकाः। सुसिद्धिकानां सर्वत्र सिद्धिरेव स्यात्॥ गांगातेलीवत्॥ तथा
हि। कोपि विद्यार्थी प्रतिष्ठानपुरदक्षिणदेशगत्वा सट्प शास्त्रं सर्वविद्या त्रिंशद्वर्षाणि पठित्वा जातगर्वो मस्तके अंकु
धरः। विद्यया उदरं मा स्फुटतु इति उदरे बद्धपट्टः। यदि वादी नष्ट्वा आकाशं याति तदा निश्रेणिमारुह्य। अधः पातयामि
इति निश्रेणी सेवकस्कंधे वहन् वादी पाताले प्रविशति तदा कुद्दालिः खानयित्वा निःकासयामि इति कुद्दालमपि सार्थे धर
न् कोमम अग्रे चारयति। संघट्टणान्मुखे धृत्वा तृणपूलकं सेवककक्षायां धारयन्। वादेन दक्षिणखंडे रमस्कवादे
ज्ञानाभिमानो वादेन निर्जित्य। सरस्वतीकंठाभरणादीनि विरुदान्यवादयच्च। लोडराडसभां पंचशतपंडितविरुडमानां
श्रुत्वा उज्जयिन्यां समेतः। सो उराडे नप्रवेशो त्सवादिना सन्मानदानपूर्वं उत्तारितः। समीचीनस्थाने। ततः सभायां आग
तेन लोडराडसमक्षं वादकरणेन। कालिदाससाक्षी मार्कंड। सर्वपूर्तिप्रमुखाः पंचशतपंडिता अपि डिताः। लोडराडा।

नविमृष्टं। अहो परदेशिना महाचार्येण मदीया महाडिताः। मम पंडितसभा माहात्म्यं गतं इति चिंतातुरः श्रीदाई वने गतः तत्र एका
कुंडं दृष्टा गणीमध्यात् तत्र स्तनतलं निःकास्य एकं समये तिलं क्षिप्तं तं राज्ञा तं पत्रं पं तां यां तां नामानं तिलकं पश्यति स्म। राज्ञा वि
चारितं। अहो कोऽपि स्यात् स्वबुद्धिविज्ञानं सुत्तं च॥ एतत्॥ यतः॥ षष्टिर्वा मनके दोषा। अशीति मे धक पिंगलो। शतं च दुर्दमुं देत
काणे संख्या न विद्यते॥१॥ ततस्तं आकार्य राज्ञा पृष्टं। अहो त्वं महाचार्येण सह वादं करिष्यसि। तेन प्रोक्तं। आं। मम किं यास्यति
का स्थितिस्त्वा। अहं मरात्मा येन ऋणी पिलवति कदाचित्। ततः आदित्यवारे राज्ञा महाचार्यं मोकार्य प्रोक्तं। लोकाश्रीमहाचार्याम
म सहाय स्तुयाडिताः। तत्सत्यपरं अस्माकं एतेषां महान् पाठ कोऽसहाचार्यो स्ति। तेन समं अद्य वादः क्रियतां। दक्षिणमह
हाचार्येण प्रोक्तं सत्यं॥ ततो महाचार्यः सिंहासने उपनिवे शितः। अन्येपि कालिदासश्रीमाघडप्रमुखाः पंडिताः स
हाः समेताः तेषामपि आसनानि राज्ञा दत्तानि। ततो गांग रतेली महाचार्यः परिधापित पंचांगवेषः। स्वर्णासनेण
॥३४॥ दिनाविभूषितः स्थूलवपुः महौन्मत्त हस्तीव आनीतः। रा ज्ञा उक्तः। सर्वा सभापि उत्थिता। बहुमानसन्मानादिना
राज्ञा सिंहासने निवेशितः। ततो दक्षिणीय महाचार्येण वि मृष्टं। अहं कृशवपुः। अयं स्थूलवपुः। कथं कारं वादमहं वि
ष्यामि। ततः किं वाक्कलहेन तं पृच्छामि। ततो दक्षिणीय महाचार्येण एका अंगुलिर्दर्शिता। ताड राज्ञा सहेन क्रोधं कृत्वा अंगु
लिद्वयं दर्शितं। ततो ज्ञातचमत्कारेण दक्षिणीयमहाचार्येण पूरित पंचांगुली क्रोधेन हस्तं अधोकृत्वा दर्शितः। ततो लोकाकारेण
द्वेन दृष्टा मुष्टिर्दर्शिता। ततो दक्षिणीयमहो मस्तकात् अं जरोऽन्नार्थं चाउदरात् किंचाप हं बोदर्थित्वा निःश्रेणीं तुं काऽऽवाना ६०
दं मा चूर्णयोऽपरएव पुलकं वहालयित्वा गर्वमुक्ता स सा सम संलोकसहस्यपादयोर्लग्नः। अहो अहं न केनापि क्षितः। एवं
महापंडितस्तु याडितो। लोकराजन पृष्टं। को वादः अतो दस्माकं श्राव्यतां। महाचार्यः प्राह। अहो लोकराजस्मयाएकांगुलिदा
र्शितं न ज्ञापितं। एकः शिवो लोकगतकर्त्ता सृस्ति। त्वदीयसहेन विशेषो ज्ञापितो दं गुलिद्वयदर्शनेन तत्र एकेन शिवेन किं। द्वितीया शक्ति
रप्यस्ति। पुनर्मया पंचांगुलि दर्शनेन ज्ञापितं। इंद्रियाणि पंच संति। त्वदीयमहाचार्येण मुष्टिदर्शनात् ज्ञापितं। पंचेंद्रिया
णि बद्धा निग्रहितानि सध्यानि। ततो त्वदीयो महाचार्यो महापंडितो महाविरागवान् च। किं अस्माहात्म्यं वर्णितं तेनेंद्रजाः पंडितः
कुत्रापि। ततो दक्षिणीय महाचार्यो मानभ्रष्टस्त्वरितं स्वदेशाय चलितः। ततो लोकराजेन गांगा तेली पृष्टः। को वादः कृतस्तेन
तोक्तं। लोकराजन मम तेन महेन एकांगुलिदर्शनेन ज्ञापितं त्वं काणोऽसि। मया अंगुलिद्वयदर्शनेन ज्ञापितं। अहं त्वां द्वयोश्च
क्षोः काणं करिष्यामि। ततो दपसहेन पंचांगुलि दर्शनेन ज्ञापि तं अहं त्वां चपेटया मारयिष्यामि। ततो मया रोषं कृत्वा मुष्टिदर्श
नेन ज्ञापितं। अहं त्वां मुष्ट्याघातमाघम्मिक रणेन मारयिष्यामि। तदा राज्ञादिकाः सर्वापि सभा सदर्पं हसति स्म। अहो अस्मा
दिना समीचीनाः सुसिद्धिकार्यं। राज्ञा बहुसन्मानादिना संतो षितः। स्वस्थानं गतः। सिद्धार्थो राजा वदति स्म। यूयमपि
सुसिद्धिकास्तेन तव कुं मम सत्यं सवृत्ति। अथ सिद्धार्थो रा जा स्वप्नपाठकानां किं करोतिस्म तत्र सूत्रं॥ सुमिणलक्ख
णपाढए। वित्तलेणं। असणेणं। पुप्फवत्थगंधमल्लालंकारेणं स क्कारेइ सम्माणेइ २ त्ता विउलं जीवियारिहं। पीइदाणं दलइ २
त्ता पडिविसज्जेइ तएणं से सिद्धत्थे खत्तिए। सीहासणाओ अब्भुट्ठेइ २ त्ता जेणेव तिसला एवं रुवणि यं तरिया। तेणेव उवागच्छइ
२ त्ता तिसलिं एवं वयासी। एवं खलु देवाणुप्पिया सुमिणसत्थंसि। बायालीसं सुमिणा। तीसं महासुमिणा। जाव एगं महासुमि
णं पासित्ताणं पडिबुज्झंति। इमेयणं तुमे देवाणुप्पिए। चउदस महासुमिणा दिट्ठा। तं उराला णं। तुमे जाव जिणे ते णं चक्कवट्टी वा
मवखवक्कवट्टी। तएणं सा तिसला एयमट्ठं सुच्चा। निसम्म हट्ठतुट्ठा जाव हियया। करयल जाव ते सुमिणे सम्मं पडिच्छइ २ त्ता सि
द्धत्थेणं रन्ना अब्भणुन्नाया समाणा। मणिरयण भत्तिचित्ताओ। सीहासणाओ अब्भुट्ठेइ २ त्ता। अतुरियं अचवलं असंभंताए। अविलंबिया

ण। रायवंसस्स रिसीए गईए। जेणेव सए भवणे तेणेव उवागच्छइ २त्ता सयं भवणं अणुपविट्ठा॥ व्या०॥ ॥अथ सिद्धार्थो राजा स्वप्नपाठ
कान् विपुलेन अशनेन। पुष्पैः। अग्रथितैः। वस्त्रैः। गंधैर्वासैः। माल्यैः ग्रथितैः पुष्पैः। अलंकारैः मुकुटादिभिः कृतसमाहारद्वंद्वः स
त्कारयति। प्रवरवस्त्रादिना सन्मानयति। तथाविधवचनादिप्रतिपत्त्या सत्कारयित्वा। सन्मानयित्वा। विपुलं विस्तीर्णं जीविकोचि
तं। आजन्मनिर्वाहयोग्यं। वा प्रीतिदानं ददाति। दत्वा च प्रतिविसर्जयति। तेऽपि स्वप्नपाठकाः प्राप्तसुवर्णरत्नमणिमाणिक्यरजतादि
वस्तुधनाः स्वगृहे गताः। स्वसार्थोऽसिरपि नोपलक्षिताः। ततः स्वप्नपाठकविसर्जनानंतरं सिद्धार्थो राजा सिंहासनाउत्थाय यत्रै
व त्रिशला क्षत्रियाणी तत्रोपागत्य त्रिशलां क्षत्रियाणीमेवमवा दीत्। हे देवानुप्रिये स्वप्नपाठकैः इदं प्रोक्तं। स्वप्नशास्त्रे द्विचत्वा
रिंशत्स्वप्नाः। तत्र त्रिंशन्महास्वप्नाः ~~यावन्महास्वप्नाः~~ यावत् ॐ मंडलीकमातरो वा। मंडलीके गर्भगते एकं स्वप्नं पश्यति। एत
त्पर्यंतः सर्वोऽपि स्वप्नविचारः कथितः। ततस्त्वयापि चतुर्द श स्व प्ना दृष्टास्ततस्तव पुत्रलाभो भविष्यति। चक्रवर्ती वा। त्रैलो
क्यनाथो वा भविष्यति। ततस्त्रिशलायैतमर्थं श्रुत्वा हृष्टतुष्टा। सि द्धार्थेन राज्ञा अभ्यनुज्ञाता सती सिंहासनाउट्ठाय त्वरिता
×तत्रागत्य स्वकीयं भवनं× दकच्या राजहंससदृशया गत्या यत्रैव स्वकीयं भवनं अ नुप्रविष्टा। अथ यदा भगवान् सिद्धार्थराजभवने अवतीर्णस्तत
:प्रभृति तिर्यग्जृंभिकदेवैः किं कृतं तत्र सूत्रं॥ जंप्पभिइं च णं समणे भगवं महावीरे तं रायकुलं साहरिए तप्पभिइं च णं बहवे वेसम
णकुंडधारिणो तिरियजंभगा देवा सक्कवयणेणं से जाइं इमाइं पुराइं पुराणाइं निहाणाइं भवंति तं जहा। पहीणसामिया
इं पहीणसेउयाइं। पहीणगुत्तागाराइं। उच्छिन्नसामियाइं। उच्छिन्नसेउयाइं। उच्छिन्नगुत्तागाराइं। गामागरनगरखेडकब्बड
मडंबदोणमुहपट्टणआसमसंबाहसन्निवेसेसु। सिंघाडएसु वा। तिएसु वा। चउक्केसु वा। चच्चरेसु वा। चउम्मुहेसु वा। महापहे ६१
सु वा। गामट्ठाणेसु वा। गामनिद्धमणेसु वा। आवणेसु वा। देवकुलेसु वा। सभासु वा। पवासु वा। आरामेसु वा। उज्जाणेसु वा। व

णसंतिगेहेसु वा। सुन्नागारेसु वा। गिरिकंदरसंतिसेलोवट्ठाणगिहेसु वा। संनिखित्ताइं चिट्ठंति ताइं सिद्धत्थरायभवणंसि साह
रंति॥ व्या०॥ यत्प्रभृति श्रमणो भगवान् महावीरो राजकुलं संहृतस्तत्प्रभृति बहवस्तिर्यग्जृंभकाः तिर्यग्लोकवासिनो जृंभ
का देवाः शक्रवचनेन शक्रेण वैश्रमण आदिष्टः। तेन च ते आदिष्टा इत्यर्थः। किं विशिष्टास्तिर्यग्जृंभकाः। वैश्रमणकुंड
धारिणो। वैश्रमणस्य कुंडं आयत्ततां धारयंति ये ते एवंविधानि महानिधानानि एतेषु स्थानेषु यानि तिष्ठंति। तानि सिद्धा
र्थराजगृहे संहरंति। प्रवेशयंति। दृष्टिस्तेषां जर्वंति इत्यर्थः। से अथ शब्दार्थः। किं रूप महानिधानानि पुरा प्रतिष्ठितानि तेन पुराणा
नि चिरंतनानि। पुराणपुराणानि। किं रूप महा रूप। पहीणसामि याइं। प्रहीणाः स्वल्पीभूताः स्वामिनो भूमिगतसद्रव्यादिसं
रक्षा द्रव्यसंचकाः येषां तानि। प्रहीणस्वामिकानि। पुनः किं रूप। पहीणसेउयाइं। प्रहीणाः अल्पीभूताः सेचकाः धन
क्षेप्तारो येषां तानि। प्रहीणसेक्तृकानि। पहीणसेउ का नि वा सेतु मार्गः। पुनः किं रूप पहीणगुत्तागाराइं। प्रहीणं
×गारं येषां तानि तत्र× विरलीभूतं मानुषं गोत्रागारं। धनस्वामिनो द्रव्यस्य आग रं गृहं एवं उच्छिन्ना निःसत्ताकीभूताः स्वामी येषां तानि एवम
च्छिन्नगोत्रागाराण्यपि व्याख्यातानि। अथ केषु स्थानेषु तानि तद्दर्शयति। सिंघाडएत्यादि। तत्र शृंगाटकं फलं तदाकारं
×त्रिकं यत्र रथ्यात्रयं मिलति। चतुष्कं यत्र रथ्याचतुष्कं मिलति। चत्वरं बहुरथ्यापातस्थानं× त्रिकोणं स्थानं चतुष्कं चत्वरं। देवकुलादि महापथो राजमार्गः। ग्रामस्थानानि ग्रामपुरातननिवासभूमयः। नगरस्था
नानि नगरस्योच्छसितभूमयः। पुनर्ग्रामनिर्धमनानि ग्रामजलनिर्गमाः। खालमिति प्रसिद्धाः। एवं नगरस्य निर्धमनानि। पुनः
आपणा निद्दाहाः। देवकुलानि यक्षाद्यायतनानि सभाः जनोपवेशनस्थानानि। अत्र पवासु वा इति पदं बहुषु आदर्शेषु दृ-
श्यते। परं अतिरिक्तं संभाव्यते। टीकादौ अव्याख्यातत्वात्। आरामाः कदल्यादिप्रच्छन्नाये स्त्रीपुंसां क्रीडास्थानानि उद्या
नानि पुष्पफलाद्युपेतवृक्षशोभितानि। बहुजनस्य उत्सवमानस्य सोज्जनार्थं यानं येषु इति उद्यानानि वनानि। एकजाती

द्वि

×पथोस्त्रःप
त्तनानिजल
स्थल×

यवृक्षाणिवनषंडानि।अनेकजात्युत्तमवृक्षस्थानानि।१।शून्यागारं२।गिरिकंदरा३एतेत्रयःप्रसिद्धाः।शांतिकर्मस्थानानिक्ष्मवि
त्संधिइतिपाठः।तत्रसंधिर्गृहद्वयोरंतरालप्रच्छन्नस्थानं।शैलगृहं।पर्वतमुत्कीर्य्यकृतंउपस्थानगृहं।आस्थानमंडपः।ततःस्मशा
शानादीनांद्वंद्वः।कापिभवणगिहेसुवाइत्यपिदृश्यते।तत्रभवनगृहाःकुटुंबवसनस्थानानिएतेषुस्थानेषुसंनिक्खित्ताइं
तिसम्यक्निक्षिप्तानि।कापिसंनिक्खित्ताइंसंनिहियाइंगुत्ताइंचिट्ठंतिइतिपाठः।तत्रसंनिहितानिसम्यग्गुप्तिरक्षानीकृतानि
निगुप्तानिपिधानानिअनेकोपायैःप्रवेशयंतिनिःक्षिप्यंति।कचित्संघाडएसुवाइत्यस्मात्पूर्वंगामनगरखेडकब्बडमंबा
दोणमुहपट्टणासमसंवाहसंनिवेसेसुइतिदृश्यते।तत्रक   रादिगम्याग्रामाः।आकरालोहाद्युत्पत्तिभूमयः।नएतेषुक
रोदस्तीनि।नगराणिखेटानिधूलीप्राकारोपेतानिकर्बटा   निकुनगराणिमडंबानिसर्वतोर्द्धयोजनात्परतोवस्था
स्थितग्रामाणिद्रोणमुखानि।यत्रजलस्थलपथावुभा   प   त   रणपर्यायाद्वारवेलाः।आश्रमास्तीर्थस्थानानि
वासंवाहाःसमभूमौकृषिंकृत्वायेषुदुर्गभूमिषुधा   न्या   निकृषीवलाःसंवहंति।रक्षार्थंसंनिवेशाःसार्थकटका
द्याः।ततोद्वंद्वस्तेषुकापिसंनिवेशघोषासमुपावस्तत्रघोषाः   कुलानितथापालगावतितत्रअवतीर्णमातापितरौकीदृशेम
नोरथेअकार्षी।।तत्रसूत्रं।।तएणंसमणस्सभगवओमहावीरस्स।अम्मापिऊणं।अयमेयारूवे।अब्भत्थिए।चिंतिए।पत्थिए
मणोगएसंकप्पे।समुप्पज्जित्था।जप्पभिइंचणंअम्हंएसदारएकुच्छिंसिगब्भत्ताएवक्कंते।तप्पभिइंचणंअम्हेहिरन्नेणंव
ड्ढामो।सुवन्नेणंवड्ढामो।धणेणं।धन्नेणं।रज्जेणं।रट्ठेणं।बलेणं।वाहणेणं।कोसेणं।कुट्ठागारेणं।पुरेणं।अंतेउरेणं।ज
णवएणं।जसवाएणं।वड्ढामो।विउलधणकणग।मुत्तिय।संख।सिलप्पवालरत्तरयणमाइएणं।संतसारसावइज्जेणं।पीइ
सक्कारेणं।अईवअईवअभिवड्ढामो।तंजयाणंअम्हंएसदारएजाएभविस्सइतयाणंअम्हेएयस्सदारगस्सएयाणुरूवंगुणंगुणनि

×ढम×

×स्थानानि×

६२

प्फन्नंनामधिज्जंकरिस्सामोवद्धमाणत्ति।।व्या०।।ततस्तुश्रमणस्यभगवतोमहावीरस्यमातापित्रोःअयमेतद्रूपोऽध्यर्थितःचिंति
तःप्रार्थितोमनोगतसंकल्पःसमुत्पद्यत।यत्प्रभृतिअस्माकंएषदारकःकुक्षौगर्भत्वेनव्युत्क्रांतः।तत्प्रभृतितदादितःआरभ्यहि
रण्यादिभिर्वर्द्धामहे।तत्रहिरण्यंरूप्यंअघटितस्वर्णमित्येके।स्वर्णंघटितं।धनंगणिमादिचतुर्धा।तत्रगणिमंजाइफलपुंगफ
लाइं१धरिमंत्रा।कुंकुमगुडाइं२।मिज्जंचोप्पडलोणाइं३।परिछिज्जं।रयणवत्थाइं४।।धान्यंचतुर्विंशतिधा।यथाहि।।जव
१गोधूमश२दरिमंत्र३सालि४ब्रीहि।सट्ठिका।कोद्दव।अणुया।कंगू।रालय।तिल।मुग्ग।मासाय।अयसि।तिमा।निष्पा
वसिलिंद।रायमासाय।इक्खू।मसूरा।तुवरी।कुलत्था।तह्य   त्र   या।कलाया।।२४।।इति।राज्यंसप्तांगं।राष्ट्रंदेशाः।बलंचतु
रंगं।वाहनंवेसरादि।कोशो।भांडागारं।कोष्ठागारं।धान्य   गृ   हं   पुरं।अंतःपुरंवधूतीनां।जनपदोलोकः।कचिज्जसवा
एणंइतिपाठः।तत्रयशोवादःसाधुवादः।पुनर्विपुलधनं   गा   चादिकनकंघटिताघटितरूपंक्षिप्रापिकानि।क
र्केतनादीनि।मणयःचंद्रकांताद्याः।मौक्तिकानि।शुक्ति।क   र   कासादिप्रसवानि।संखादक्षिणावर्ताः।शिलाराजपट्टा
दिकाः।प्रवालानिविद्रुमाः।रक्तानिपद्मरागाआदिशब्दात्कं   कं   बलादिपरिग्रहः।ततएतेनकोर्थः।सद्विद्यमानंसारंस्वापते
यं।प्रधानद्रव्यं।तेनप्रीतिर्मानसिकीस्वेच्छासत्कारोवस्त्रादिभिर्जनकृतस्तास्तांद्वंद्वः।एतैरतीववर्द्धयामोवृद्धिंगताश्चयततो।
यदाआवयोरेषदारकःउत्पत्स्यते।तदाआवांएतस्यपुत्रस्यवर्द्धमानइतिनामधेयं।प्रधानंनामेवनामधेयं।करि
ष्यावः।।किंभूतंगुणंगुणेभ्यःआगतंगौणं।गौणंशब्दःप्रधानेप्यस्ति।इत्याद्गुणनिष्पन्नं।।अथभगवंतंमातुर्भक्त्यागर्भेनि
श्चलेसतिकिंजातं।।तत्सूत्रं।।तएणंसमणेभगवंमहावीरेमाउअणुकंपणाएनिच्चलेनिप्फंदे।निरेयणे।अल्लीणपल्ली
णगुत्तेआविहोत्था।तएणंतीसेतिसलाएअयमेयारूवेजावसमुप्पज्जित्था।हडेमेसेगब्भे।मडेमेसेगब्भे।चुएमेसेगब्भे।गलिएमेसे।उ

ख~

~सोपारी~

~रत्ना=

ह्विंपयइ इयाणिंनोएयइ इतिकट्टु उहयमणसंकप्पा चिंतासोगसागरंपविठा करयलपल्हत्थमुही अट्टज्झाणोवगया भूमीग
यदिट्ठिया झियाइ झियाइं तंपियसिद्धत्थरायभवणं उवरयमुइंगतंतीतलतालनाडइज्जजणमणुज्जंदीणविमणंविह
रइ चापण॥ ततः श्रमणो भगवान्महावीरो मातुरेवंकंपार्श्वकल्प्यामानरिवासक्तिरूप दीर्घमयोपरिस्पंदमानमामातुः कष्टं
भूयादिति। मातरि वा सक्ति रन्येषां विधेयतया दर्शिता भवत्विति निःस्पंदो जातश्चलनादभावात् निश्चलः किंचिच्चलनस्याप्यभा
वात् अतएव निरेजो नो निःकंपः अतएव गुप्तः परिस्पंदनाभावात् ततो विशेषणकर्म्मधारयः। चापीति समुच्चये ततस्त्रिशला
क्षत्रियाण्याएवंएतद्रूपो मनसि संकल्पः समुत्पद्यत तद्यथा॥ मममसगर्भो हृतः केनापि देवादिना मृतो वा कालधर्म्मः
प्राप्तः च्युतः सजीवत्वफलपिंडतालक्षणात् त्पर्याया त्परि स्खलः गलितो द्रवता प्राप्य क्षरितः चतुर्ष्वपि पदेषु का
क्का विकल्पप्रतीतिः एषमे गर्भः पूर्वं एजति कंपते इदानीं नो एजतीति इतिकृत्वा त्रिशला चिंताशोकसागरं प्रवि
ष्टा चिंतया गर्भहरणादिध्यानेन यः शोकः सएव सागरः। स्तत्र संप्रविष्टा किं० त्रिशला उहयमणसंकप्पा उपह
तः कालुष्यकचलितो मनःसंकल्पो यस्याः सा पुनः किं०त्रि०। करयलेति करतले पर्यस्तं निवेशितं मुखं यया सा पुनः किं
०त्रि० आर्त्तध्यानेन उपगता व्याप्ता पुनः किं०त्रि० भूमौ गता दृष्टिर्यस्याः सा भूमिमुखमेव किं कर्त्तव्यं जडतया वीक्षमाणा।
ध्यायति पुनस्तदपि सिद्धार्थराजस्य भवनं कीदृशं जातं उवरयेति० उपरतं निवृत्तं मृदंगतंत्रीतलतालैः प्राधान्यख्यातिः नाटकीयै
नाटकहितैः पात्रैः मणुज्जंति सा व प्रधानतया निर्देशात्र मनोज्ञत्वं चारुतायस्मात् अथवा उपरतं मृदंगतंत्रीतलताल
नाटकीयजनं अणुज्जंति। अणुज्जं अनोज्ञं स्कंवा। अतएव दीनविमनस्कं विहरति आस्ते। एवं विधे व्यतिकरे जाते सति त्रि
शलाकीदृशं दुःखं करोतिस्म तदाह॥ अहो यदि मम गर्भो गत स्तदा नूनं अहं अभाग्याति:पुण्या यतः अभाग्यस्य गृहे ६३

४५ त्वयाममलोचनेदत्वागृहीते त्वयाममनिधानंदत्वाउद्दालगृहीतं त्वयाअहंमेरोः शिखरमारोप्यहस्तो पातिता॥ ४

चिंतामणिरत्नं कथं तिष्ठति। अथवा दरिद्रस्य गृहे निधानं कथं प्रकटीभवति। अथवा मरुस्थले कल्पवृक्षः कथं चिरं अवतिष्ठति
नहि कदापि निःपुण्यानां तृषितानां अमृतपानेच्छा पूर्णा भवति। पुनः प्राह। रे दैव धिक्त्वां रे निर्घृण रे निर्दय रे निःकरुण रे पापि
ष्ठ रे दुष्ट रे निकृष्ट रे अशिष्ट रे निष्ठुर रे पापकर्म्मकारक रे निरपराधजनमारक रे मूर्त्तिमत्पातक रे विश्वजनघातक रे निर्ल
ज्ज किं निःकारणं मम वैरी जातः तव मया किं अपराद्धं प्रकटीभूय निवेदय त्वया मम मनोरथकल्पवृक्षः समूलमुन्मूलितः।
त्वया अदंडः खातांखातानिःकृतो त्वया मम मुखागतः कवलो गमितः। त्वया मम निःपन्नं क्षेत्रं दुर्वातेन दूषितं। त्वया मम क्र
याणकभृतं परद्वीपाद् आगतं प्रवहणं तीरे भग्नं। त्वया निःपा दिता रसवत्यपि भग्ना। किं वा पूर्वादिवस्य उपालंभदानेन म
या कानि चित् पूर्वभवे महाघोरपापकर्माणि कृतानि तानि उदये आगतानि। तद्यथा॥ किं वा मया परपक्का
स्यपक्कास्या भ्रंशिता वा। किं वा बालवत्स्या तां मातृस द्वियोगः कारितो वा। किं वा मया बालवत्स्यानां दु
ग्धांतरायः कृतः कारितो वा। किं वा बालसहितानि तं दिरबिलानि खनितानि। धूल्यादिना पूरितानि वा किं
वा मया नकुलकोलादि बालसहितेषु बिलेषु उष्णनीरा णि क्षिप्तानि। अथवा किं वा मया कीटिकादि नगराणि
पानीयेन प्लावितानि। किं वा मया शुकसारिकामयूरहंसचक्रवाककुक्कुटादिपक्षिणां बालैः सह वियोगो कारितो दत्तो
पातिताः ४ वा। किं वा चटिकादीनां माला अंडकत्रिशसहिताः किं व कुत्तुच्छाधर्म्मज्ञात्वा प्रकाकानां अंडानि स्फोटितानि किं वा
बालहत्या कापि कृता कारिता वा। किं वा सपत्नीनां पुत्रादिकपरिछदे दुश्चिंतनं कृतं। किं वा गर्भस्य स्तंभनशातनपातनानि।
समाचरितानि। तन्त्रमन्त्रा वा प्रयुक्ताः किं वा तेषां मौषधानि क्षिपितानि। किं वा कस्य अपि शीलशोभविषये अंगुलीसंज्ञा
शापः प्रदायि। किं वा मया शास्त्रा वत्स्यन्ता स्पाडिता वा। अन्यदीयाः स्वकीया वा किं वा केनापि विराधिते तक्षपिण

हृतः ४

×एतस्मिन्नव सरे×

मम शापो दत्तः किंवा कस्या अपि मया रत्नानि चोरितानि किं वा शीलखंडनादि महापापं कृतं कारितं च अथवा व्रतानि गृही
त्वा चिरकालं पालयित्वा भग्नानि। किंवा कस्यापि मर्मोद्घाटितः। किंवा कोपि महान्यग्रोधो छिन्नः। छेदितो वा किंवा मदत्त
रं सरः शोषितं किंवा नानाजीवव्याप्ते वने दावानलो दत्तो दापितः। किंवा देवद्रव्यं भक्षं प्रासादो वा पातितः। अथवा
दानं ददानेंतरायः कृतः कारितो वा। अथवा कस्यापि विषं दत्तं दापितं। अथवा वृक्षफलानि विदारितानि। किंवा।
अपक्वफलानि त्रोटितानि किंवा अनंतकाय अभक्ष्यादीनि भक्षितानि। किं बहुकथनेन मया किंचित्पापं कृतं येन
मम ईदृशं दुःखं पतितं अथ यदि ईदृशोऽद्भुत ईदृशस्य मम चिंतो गर्भो गतस्तदा किं सांसारिकसुखेन किं वा जीवितेन
किं जीवितेन त्रिलोकपूजितेन ईदृशेन पुत्ररत्नेन विना। अलं मम विलापकरणेन। अथ किं करोमि।
क्व गच्छामि कस्याग्रे वदामि। अथाहं निरर्थकं ना दंडी वामि। एवं विलापान् कुर्वती शून्यस्तब्धमृगी
वत् इतस्ततः परिभ्रमंती ~~कथं~~ ईदृशी किं दुःख। ~~स्य कारणं तव तत~~ त्रिशला स्वामिनी दृष्ट्वा चतुरस
खीपरिवारेण पृष्टा हे स्वामिनि कथं ईदृशी किं दुःखस्य कारणं तव। ततस्त्रिशला अश्रूणि निःश्वासान् निक्षिपं
ती प्राह। हे सख्यः किमहं वदामि निर्भाग्याया मम जीवितं गतं। ततः सख्यो वदंतिस्म। हे स्वामिनि ज्ञातं अमंगलं तव ग
र्भस्य कुशलं वर्त्तते त्रिशला प्राह हे सख्यो यदि गर्भस्य कुशलं स्यात्तदा मम किं दुःखं हा अहं दैवेन सर्वस्वापहारेण न
दूतास्मि। इत्युक्त्वा भूमौ मूर्छां प्राप्य पतिता। पुनः सखीभिः शीतलपानीयछोटनेन व्यंजनवातेन च सचेतना कृता पुनः प्र ६४
श्वसती गद्गदस्वरेण गर्भस्वरूपं कथयति स्म पुनः मूर्छां प्राप्य पुनः सचेतना कृता समुत्थाय विलपति स्म ततः सखीज
नपरिवारोपि समस्तोपि दुःखव्याप्तो जातः प्राह च रे दैव त्वया किं कृतं अस्मदीयस्वामिन्या गर्भो हा अनेन दाहा

राक×२

कुलदेव्यो यूयं कुत्र गताः यत् उदासीनास्तिष्ठत ततो वृद्धस्त्रियः उपयाचित यंत्रमंत्रतंत्र शांतिकपौष्टिकादीनि कारयंति
निमित्तज्ञान् पृच्छंति इष्टदेवादीन् स्मरंति ततो राजापि एतत्स्वरूपं श्रुत्वा दुःखपीडितो नाटकादीनि निषेधयति वचना
न्यपि गाढशब्देन निरोति मंत्रिणोपि किंकर्तव्यतामूढा जाताः राजभवनमपि समस्तं शून्यमिव शोकस्य राजधानीवत्
श्रिया त्यक्तमिव दुःखस्य लीलागारतुल्यमिव उद्वेगस्य आकार इव सर्वदुःखानां आकर इव जातं लोकजनाछादनसं
लापशायनादि व्यवहारोपि विस्मृत इव जातः पुनस्त्रिशला निश्वासैरेव उत्तरदानं जातं अश्रुपातैरेव मुखधावनं जा
तं शून्यचित्तैरेव उपवेशनादिका शरीरस्य स्थितिर्जाता। एतादृशं दुःखमयं व्यतिकरं ज्ञात्वा भगवता अवधिज्ञाने
नावधार्य विचारितं अहो किं क्रियते अदामो। हस्य गतिरीदृशी अस्माभिर्गुणः कृतः स दोषो जातो
रिव दोषनिःपत्तये जातः मातुः प्रमोदाय कृतोपि गु णः दुःखाय जातो नालिकेरपानीये न्यस्तकर्पू
रवत् इति विचिंत्य भगवता त्रिभुवनस्वामिना किंचि त्स्पंदितं ततस्त्रिशला गर्भस्य कुशलं ज्ञात्वा हर्षप्रक
र्षं प्राप्य वदति स्म हे सख्यो मम गर्भस्य कुशलं वर्त्तते कु॰ श्रद्धाधिगमया अज्ञानेन विलापादिता दुःखं कृतं संति
मम भाग्यानि प्रवृत्तानि अहं धन्या अहं कृतपुण्या अहं त्रिभुवनमान्या श्लाघ्यं मे जीवितं कृतार्थं मे जीवितं पुण्यवस
त्वामे श्रीजिनपादाः मम श्रीगोत्रदेवीनां प्रसादा जाताः। मम आजन्माराधितः श्रीजिनधर्मः फलितः। मम प्राचीनं समीचीनं
कर्म प्रकटीभूतं। प्राप्तं मया अद्य मुक्तेरपि राज्यं। उच्छ्वसितो मम रोमांचकंचुकः विकसितेन प्रफुल्लं वदनारविंदं विहसि यने×१
तं कपोलफलकं प्रहृष्टा वृद्धस्त्रीणां जयजीवरूपा आशिषः प्रवर्त्तितानि कुलवृद्धाभिर्मंगलानि संस्थापितानि सर्वत्र अष्टौ
मंगलानि प्रदत्तानि इत्यादौ कुंकुमछटाः उच्छ्रिताः पताकापटाः संन्यस्तामिक्तिकस्वस्तिकाः निवर्त्तिताः प्रवालमंडाव

र्णैः विकीर्णपुष्पप्रकरः वासितः सर्वत्रापि कर्पूरागरुमृगमदचंदनादिपरिमलनिकरैः निबद्धानि तोरणानि परिधृतानि आभरणा
नि प्रणीतानि गीतानि दिव्यनाटकानि सूत्रितानि वादनाय वादित्राणि प्रगुणितानि सधवस्त्रीभिः अक्षतपात्राणि पठंति।
बंदिवृंदानि नृत्यंति नानापात्राणि प्रत्यर्थितप्रमोदेन गात्राणि राजसदनं च। चतुर्भिरपि वर्णैर्व्याप्तं वर्धापनाय आगताभिः स्व
र्णकोटीभिः पूर्णं। पुनः प्रमोदाकुलचेटीभिराकीर्णं। दिव्यरवैः संनिबद्धपर्यंतरंगमेदुरं मंगलानि निविष्टौंडःप्रवेशं मूर्तिमत्प्रमो
दमयमिव संप्राप्तसर्वाभ्युदयमिव करकलितसकलसिद्धिकमिव समुद्दीपितमिव लब्धत्रिभुवनमहाराज्यमिव सर्वसंप्रा
प्तिप्राज्यमिव पुनरपि विधीयंते स्म दशाहोत्सवाः। प्रकटयंते स्म मंचातिमंचेषु नाट्यानि वाद्यंते स्म तूर्यनिर्घोषाः लोकानां
कोलाहलेन कर्णपतितमपि न श्रूयते पुनरपि प्रयोजि तः श्रीजिनप्रासादेषु पूजाः बंदिमोचनानि कृतानि
सर्वत्र नगरमध्ये अमारिपटहो घोषितः सुसाधूनां पर्युपास्तिर्विस्तारिता शास्त्राणि साधर्मिकवा
त्सल्यानि। व्यक्तीकृता श्रीसंघभक्तियुक्तिः सत्रागारेषु महादानानि प्रवर्तितानि याचकानां मनोरथदानानि द
त्तानि। महादानेन राजपुरुषाः कल्पवृक्षा इव जाता राजापरमैश्वर्येण इंद्र इव जातः लोकश्च सर्वोऽपि प्रभूतदिव्या
भरणादिविभूत्या सुरलोक इव दृश्यते गृहे गृहे च महामहोत्सवः संपन्नः सर्वेषां च परमानंदः प्रकटीबभूव॥ अथ भगवा
ग.४ न् गर्भस्थः कीदृशं अभिग्रहं गृह्णाति। तत्राह सूत्रं॥ तएणं समणे भगवं महावीरे गब्भत्थे चेव इमेयारूवं अभिग्गहं अ
भिगिण्हइ नो खलु मे कप्पइ अम्मापिऊहिं जीवंतेहिं मुंडे भवित्ता आगारवासाओ अणगारियं पव्वइत्तए व्या०॥ ततश्च श्र ६५
मणो भगवान्महावीरः गर्भ एव स्थितः पक्षाधिकमासषट्के व्यतिक्रांते इत्यर्थः इमं एतद्रूपं अभिग्रहं गृह्णाति नो निषेधे ख
लु निश्चितं मम कल्पते मातापित्रोर्जीवतोः मुंडो भूत्वा अगारात् अनगारतां प्रव्रजितुं॥ अथ त्रिशला क्षत्रियाणी

चतुर्दशिक-

केन प्रकारेण कीदृशी सती गर्भं वहति। तत्राह सूत्रं। तएणं सा तिसला खत्तियाणी। ण्हाया कयबलिकम्मा कय
कोउयमंगलपायच्छित्ता। सव्वालंकारविभूसिया तं गब्भं नाइसीएहिं। नाइउण्हेहिं। नाइतित्तेहिं। नाइकडुएहिं ना
इकसाएहिं नाइअंबिलेहिं नाइमहुरेहिं। नाइनिद्धेहिं नाइलुक्खेहिं नाइउल्लेहिं नाइसुक्केहिं सव्वत्तुगभ
यमाणसुहेहिं भोयणच्छायणगंधमल्लेहिं। ववगयरोगसोगमोहभयपरिस्समा। जंतस्स गब्भस्स हियं मियं पत्थं
गब्भपोसणं तं देसे अ काले अ। आहारं आहारमाणी विवित्तमउएहिं सयणासणेहिं पइरिक्कसुहाए मणाणु
कूलाए विहारभूमीए पसत्थदोहला संपुन्नदोहला संमा णियदोहला। अविमाणियदोहला। वुच्छिन्नदोहला।
ववणीयदोहला सुहंसुहेणं आसइ सयइ चिट्ठइ निसीअइ तुअट्टइ विहरइ सुहंसुहेणं तं गब्भं परिवहइ
व्या०॥ ततश्च सा त्रिशला क्षत्रियाणी स्नाता कृतबलिकर्मा कृतकौतुकमंगलप्राय
श्चित्ता। सर्वालंकारविभूषिता तं गर्भं सुखेन वहति किंः एवंविधैः आहारादिभिः किंभूतैः नाइसी
एहिं। नातिशीतैः यतः अतिशीतं मारुतं प्रकोपयति शीतादिभेदेन कानिचिद्वातिकानि कानिचित्पैत्तिकानि
कानिचित् श्लेष्मकारीणि स्युः उक्तं च वाग्भटग्रंथे। वातलैश्च भवेद्गर्भः कुब्जांधजडवामनः। पित्तलैः खलतिः पिंगः। श्वि
त्री पांडुः कफात्मभिः॥१॥ पुनर्नात्युष्णैः यतोऽत्युष्णं हरति बलं। पुनर्नातितिक्तैः। नातिकटुकैः नातिकषायैः।
नात्यम्लैः। नातिमधुरैः नातिस्निग्धैः नातिरूक्षैः नात्यार्द्रैः नातिशुष्कैः॥ यतएभिः सेव्यमानैः गर्भो बंधनान्मुच्य
ते। पुनरपि कामसेवा १ यान २ वाहन ३ अध्वगमन ४ प्रस्खलन ५ प्रपतन ६ प्रपीडन ७ प्रधावन ८ अभिघातन ९ विष
मशयन १० विषमासन ११ उपवास १२ वेग १३ विघात १४ अतिभोजन १५ अतिराग १६ अतिशोक १७ अतीसार १८

वमन १९ विरेचन २० पेंखोलन २१ अंडीर्ण शिलिगर्सपातो नवेदां उनर्त्तोडनोन्मादन गंधमाल्यैः। तत्र तोड
नं आहारग्रहणं। आछादनं प्रावरणं। गंधाः पटवासादयः। माल्यानि पुष्पमालाः तैः। किं० आ० सव्वउगे ति०। ऋतौ ऋ
तौ यथायोग्यं भज्यमानाः सेव्यमानाः सुखाः सुखहेतवो ये ते तैः। किं० त्रि० ववगय त्रि०। व्यपगताः रोगाः ज्वरादयः शोकः इ
ष्टवियोगादिकृतो मनःपीडा मोहो मूर्च्छा। भयं भीतिमात्रं। परित्रासो भयं कस्माद्भयपरित्रासस्थाने परिश्रमो वा व्यायामः। त
तः कृतद्वंद्वा यस्याः सा व्यपगतरोगशोकभयमोहपरिश्रमा। एवं विशिष्टा सती यत्तस्य गर्भस्य हितं गर्भस्यैव मेधायुरा
दिवृद्धिकारणं मितं न अधिकं ऊनं वा। पथ्यं अरोगका रणं चात्र। कोऽर्थः गर्भपोषणं देशे च उचितप्रदेशे तथा काले
तथाविधाः स्वसरे आहारं आस्वादयंती। विविक्ता दोषविमुक्तानि लोकांतराद्यसंकीर्णानि वा मृदुका
नि च कोमलानि यानि तैः शयनासनैः। उ० वि० हारभूम्या चंक्रमणासनादिभूम्या। किं० प० वि० इ
कत्ति। प्रतिरिक्तया तथाविधजनाद्यपेक्षया। विजन या अत एव सुखया शुभया वा। उनः किं० विहाणाम
नोऽनुकूलया। उनः किं० त्रि० प्रशस्ता अनिंद्या दोहदा मनोरथा यस्याः सा। उनः किं० त्रि०। संपूर्णदोहदा अ
भिलाषपूरणात्। उनः किं० त्रि०। संमानितदोहदा प्राप्ति लषितसंभोगात्। उनः किं० त्रि०। अवमानितदोहदा नाव
ज्ञातदोहदा। क्षणमपि न अपूर्णमनोरथेत्यर्थः। अत एव व्युच्छिन्नदोहदा त्रुटिताकांक्षादोहदा व्यवच्छेदस्यैव प्रकर्षा
भिधानायेत्याह। व्यपनीतदोहदा सुखं सुखेन गर्भं नाबाधया आसइ इति आश्रयति आश्रयणीयं स्तंभादि शेते निद्र
यति चिट्ठति ऊर्ध्वा तिष्ठति निसीदति आसने उपविशति। तुयट्टयति त्ति निद्रां विना शय्यायां। विहरति कुट्टिमे। अत्र त्रिशला
या विशेषणं शोकं। प्रसन्नदोहला। संपूर्णदोहलां तत्र को दोहदं उत्पन्नः। कथं च पूरितस्तत्संबंधः कथ्यते। एकदा त्रिश ६६

लाया दोहदं उत्पन्नो यदहं इंद्राण्याः कर्णयोः कुंडले स्वयं परिदधामि। परं तस्य दुःकरत्वेन अपूरणात् यत्याहं दुर्मना जाता त
दा इंद्रेण आसनकंपात् अवधिना ज्ञातं। ततस्तत्पूरणोपायार्थं इंद्राणीप्रमुखं अप्सरोवृंदं लात्वा एकस्मिन् दुगमिपर्वतांतर्व
र्त्तिनि विषमे भूमिस्थाने देवनगरं स्थापयित्वा इंद्रः स्थितः। सिद्धार्थः सेनां कृत्वा निकटे गत्वा इंद्राकुंडले याचते स्म। इंद्रोऽन ददाति
। युद्धाय सज्जो जातस्ततः सिद्धार्थेन इंद्रेण समं युद्धं कृतं इंद्रः समर्थोऽपि ज्ञानन्वत्पभग्नो नष्टा गतः। ततः सिद्धार्थेन अप्सरोवृंदं लुंटि
तं इंद्राण्याः कर्णकुंडले गृहीत्वा आनीय त्रिशलायाः स्वप्रियाया दत्ते तया च परिहिते दोहदः संपूर्णः संजातः। अथ त्रि
शला गर्भहितं आसखीजनेन प्रत्यहं एवं शिक्ष्यते तथा हे स खि मंदं संचर। मंदमेव ब्रूहि। कोपकरणं त्यज। पुनः पथ्यं भु
क्ष्व। नीवी सविधारी त्या। बद्धाना। उनः अहाहहासं मा कृथाः॥ आकासे शेत विवशायने मा शेष नीचैर्मा गच्छ। बहिरपि
मा गच्छ। इत्यादि। अथ भगवतो जन्मकल्याणकं कथ यन्नाह तत्रादृसूत्रं॥ तेणं कालेणं०॥ व्याख्या॥ त
स्मिन् काले तस्मिन् समये। भगवान् श्रीमहावीरदेवः श्र ग्रीष्मकालस्य प्रथमो मासस्तस्य यो द्वितीयः पक्षः। एताव
ता चैत्रसुदित्रयोदशीरात्रौ नवसु मासेषु उपरि च सार्द्धसप्त रात्रिंदिनेषु व्यतिक्रांतेषु सत्सु। पुनर्ग्रहेषु उच्चस्थानगतेषु।
ग्रहाणां सुच्चराशयस्तु यं। रवेर्मेषराशिः। उच्चः १। एवं चंद्रस्य वृषः २ मंगलस्य मकरः ३ बुधस्य कन्याराशिः ४ बृहस्पतेः कर्करा
शिः ५ शुक्रस्य मीनराशिः ६ शनैश्चरस्य तुलराशिः ७ राहोर्मिथुनराशिः ८। फलं तेन पं त्रिभिस्त्वयैहेनरिंदो सवेन् एंचत्ति वा
सुदेवः षड्भिश्चक्रवर्ती सप्तभिस्तु तीर्थंकरास्तेव। अत्र च सर्वेषां ग्रहाणां उच्चत्वं। अंशकादि अपेक्षणीयं। तथाहि सूर्यो दश
मे त्रिंशांशे वर्त्तमानः परमोच्चः एवं चंद्रस्तृतीये त्रिंशांशे २ मंगलोऽष्टाविंशे त्रिंशांशे ३ बुधः पंचदशे त्रिंशांशे ४ बृहस्पतिः पंचमे
त्रिंशांशे ५ शुक्रः सप्तविंशे त्रिंशांशे ६ शनैश्चरो विंशतितमे त्रिंशांशे वर्त्तमानः परमोच्चो ज्ञेयः। प्रौढे सति प्रथमे प्रधाने चंद्रयोगे
नः

चंद्रबले। अथ नृपादीनां पुनः सौम्यासु रत्नो दृष्टा यसावातं शां तासु वर्त्तितिमिरासु सगवज्जन्मकाले सर्वत्रोद्योतसावा
त्। चंडिकया ध्वस्तत्वं तासु वा। विशुद्धासु उल्कापातदिग्दाहाद्यसावात् निर्मलासु दिक्षु सतीषु। पुनः सर्वशकुनेषु काके
लपोतक्यादिषु जइणसुत्ति। जयोऽस्यास्तिषु जयिनो राजादीनां जयदायिनस्तेषु। पुनः मारुते वायौ पयाहिणंसि। प्रदक्षि
णश्चासौ अनुकूलश्च भगवतः प्रदक्षिणवाहित्वादनुकूलस्तस्मिन् अथवा प्रदक्षिणः प्रदक्षिणावर्त्तत्वात्। अनुकूलः सुर
भिशीतलत्वात्। पुण किं भूमिमारुते भूमिसर्पिणि भूम्यां चंडवातो हि उच्चैः सर्पति तादृशो वा ते प्रवाते आरब्धे पुनः एवंविधे काले
ऋतौ। किंभूते निःपन्नसर्वशा स्यामेदिनीयत्र सा तस्मिन्। पुण पमुइयजणवएसु जनपदवासि
यु लोकेषु एवंविधेषु सत्सु। किंभूताः जणप पमुदिताः सुभिक्ष सौस्थ्यादिना प्रक्रीडिता वसंतोत्सवादिषु क्रीडितुमा
रब्धास्ततो विशेषणकर्मधारयः तेषु अत्र अवसरे दर्शयितुमाह इत्यादिन ह रयते। पुनः उवरत्तेति
अर्द्धरात्रे हस्तोत्तरानक्षत्रे उत्तराफाल्गुनीनक्षत्रे चंद्रेण सह वर्त्तमाने आरो
ग्यमनाबाधमातां आरोग्यं अनाबाधं दारकं पुत्रं प्रजाता रं सुखं वेदनिष्क्रांतः सोप
सर्गवात्सकर्मकोऽइति स्कंदपुराणे। पुनर्विशेषख्याये। गतकलियुगसं० २६५१ व
र्षे चैत्र सुदि त्रयोदश्यां मंगलवारे उत्तराफाल्गुनीनक्षत्रे घटी ६० रात्रिगतघटी १५ पल।
३१ समये मकरलग्ने चंद्रहोरायां श्रीवीरजन्मेति कुंडलिकाचेयं॥ इत्यनेन श्रीमहावी ६७
रदेवस्य जन्मकल्याणकं व्याख्यातं। अथ पंचमव्याख्याने श्रीमहावीरस्य जन्मोत्सवो व्या
ख्यास्यते। सर्व्वतमानयोगः॥ अस्मिन्नवसरे एके दानं ददति। एके शीलं पालयंति। एके

तपस्तपंति। एके भावनां भावयंति इत्यादि। व्याख्यानं कल्पसूत्रस्य चतुर्थं सुगमं स्फुटं। शिष्यार्थं पावकाश्च जः। समयादि
मसुंदराः॥१॥ इति चतुर्थव्याख्यानं समाप्तं॥ ४॥ ॥अथ पंचमं व्याख्यानं प्रारभ्यते। तत्र पूर्वं श्रीमहावीरदेवस्य ज
न्मकल्याणकं व्याख्यातं। अथ पूर्वं जन्मोत्सवो व्याख्यायते। अथ भगवतो जन्मानंतरं किं जातं। तत्र सूत्रं॥ जं रयणिं
च णं समणे भगवं महावीरे जाए तं रयणिं च णं बहूहिं देवेहिं देवीहिं य उवयंतेहिं य उप्पयंतेहिं य देवुज्जोए
१ एगालोगे लोए २ देवसंनिवाया ३ उप्पिंजलमाणभूआ ४ कहकहगभूआ आवि हुत्था ५॥ व्या०॥ यस्यां रजन्यां रात्रौ श्र
मणो भगवान्महावीरो जातस्तस्यां रात्रौ देवोद्योतोऽभव त्। किं कारिभिर्बहुभिर्देवैर्देवीभिश्च किं कुर्व
द्भिः किं कुर्वतीभिश्च। उवयंतेहिं। अवपतद्भिः अवतरद्भि ः। उपरिष्टादधआगच्छद्भिः। पुनः उप्पयंतेहिं। उत्पतद्भि
रूर्द्ध्वं गच्छद्भिः उच्छलद्भिः उच्छलनक्रियासर्वत्र योज्या १ पुनर्लोके चतुर्दशरज्ज्वात्मके एकालो
कः एकोद्योतः आलोकउद्योतो यत्र सः २ पुनः रथो हि तत्क्रियात्पयाकारजनिः एवंविधोऽभूत् किं देवसं
निवाया चतुर्विधदेवनिकायानां संनिपातो यस्यां सा ३ नः किं ४० उप्पिंजलमाणभूआ उप्पिंजलो भृशमाकु ऽत्पर्थ॥
लः सङ्काचरति इत्याचारक्विपिशानिरिव आकुलत्वात् माणादेशोच उप्पिंजलमाणेति सिद्धं तद्भूता भूतशब्दस्यो
पमानार्थत्वात् उत्पिंजलंतीव क्वापि उप्पिंजलमालभूआ इति पाठस्तत्र उत्पिंजलानां देवादीनां माला श्रेणिर्यस्यां सा भूता
प्राप्ता पुनः किं ४० कहकहगभूआ कहकहत्ति अव्यक्तो नादस्तद्भूता हर्षाट्टहासादिना कहकहारवमयी अ
थवा तस्यां रात्रौ देवसंनिपाताः अभवन् उत्पिंजलेत्यादिविशेषणद्वयं देवसंनिपातानां पुनस्तस्यां रात्रौ किं जातं॥
सूत्रं जं रयणिं च णं समणे भगवं महावीरे जाए तं रयणिं च णं बहवे वेसमणकुंडधारी तिरियजंभगा देवा सिद्धत्थ

रायसवर्णसिद्धिरण्यवासंच१ सुवर्णवासंच२ वइरवासंच३ वत्थवासंच४ आभरणवासंच५ पत्तवासंच६ पुप्फवासं
च७ फलवासंच८ बीअवासंच९ मल्लवासंच१० गंधवासंच११ चुण्णवासंच१२ वन्नवासंच१३ वसुहारावासंचवासिं
सु१४ व्या० पुनर्यस्यां रात्रौ भगवान् जातस्तस्यां रात्रौ बहवो वैश्रमणस्य धनदस्य कुंदस्य आज्ञाया धारिणस्तिर्यग्
जृंभका देवाः सिद्धार्थराजस्य भवने हिरण्यादीनां वृष्टिं कुर्वंति तत्र हिरण्यं रूप्यं अघटितस्वर्णं वा तस्य वर्षं अन्यत्तु
वृष्टिस्तु महती सुवर्णस्य घटितकनकस्य वृष्टि० वज्रस्य हीरादेर्वृ० वस्त्रस्य बहुमूल्यदेवदूष्यादेर्वृ० आभर
णस्य मुकुटकुंडलादेर्वृ० पत्रस्य नागरवल्लिपत्रादेर् वृ० पुष्पस्य मालतीचंपकादेर्वृ० फलस्य नालिकेरादे
र्वृ० बीजस्य शालिगोधूमबीजादेर्वृ० माल्यस्य ग्र थितपुष्पादेर्वृ० गंधस्य कोष्टपुटपाकादेर्वृ० चूर्ण
स्य गंधद्रव्यसंबंधिनो वृ० वर्णस्य चंदनादेर्वृ० वसूनि रत्नानि तेषां धारा तस्याः वर्षं कुर्वंति पु
नर्भगवज्जन्मसमये अचेतना अपि सर्वा दिशो मुदिता इव प्रसेदुः पुनर्वायवोऽपि सुखस्पर्शाः संतो मंदं म
दंति स्म पुनस्त्रिभुवने महानुद्योतो जातः पुनर्नारकाः अपि क्षणं हर्षं प्रापुः पुनः पृथ्व्यपि उल्लासं प्राप्ता अथ
अत्र समये षट्पंचाशद्दिक्कुमार्य आगत्य भगवतो जन्मोत्सवं चक्रुस्तस्यानुक्रमं प्राह॥ अष्टौ दिक्कुमार्यो अधोलोकवासि
न्यो यागजदंताकारपर्वतानां अधस्ताद्भवनावासेषु तिष्ठंति भोगंकरा१ भोगवती२ सुभोगा३ भोगमालिनी४ तोय
धरा५ विचित्रा६ पुष्पमाला७ अनिंदिता८ एता अष्टौ आसनकंपात् अवधिज्ञानेन भगवतो जन्मकल्याणकं ज्ञात्वा
आगत्य संवर्त्तकवातेन जन्मगृहात् योजनं यावत् पृथ्वीं शोधयित्वा भगवंतं भगवतो मातरं च नत्वा ईशानकू
णे सूतिगृहं चक्रुः १ अथ अष्टौ दिक्कुमार्य ऊर्ध्वलोकवासिन्यो यानंदनवनकूटेषु तिष्ठंति मेघंकरा१ मेघवती२ सुमे ६८

घा३ मेघमालिनी४ सुवत्सा५ वत्समित्रा६ वारिषेणा७ बलाहिका८ एता अष्टौ आगत्य भगवंतं भगवतो मातरं च न
त्वा सर्वं शोधितायां योजनप्रमाणभूमिकायां सुगंधपानीयसुगंधपुष्पवृष्टिं चक्रुः १६ ततः पुनरपि अष्टौ दिक्कुमा
र्यः पूर्वरुचकवासिन्यो या रुचकाभिधानस्य त्रयोदशद्वीपस्य प्राकाराकारेण मंडलव्यवस्थितस्य उपरि पूर्वदि
ग्व्यवस्थितेषु अष्टसु कूटेषु तिष्ठंति नंदोत्तरा१ नंदा२ आनंदा३ नंदिवर्द्धना४ विजया५ वैजयंती६ जयंती७
अपराजिता८ एता अपि अष्टौ आगत्य भगवंतं भगवतो मातरं च नत्वा आलोकार्थं भगवतोऽग्रे दर्पणं धरंति २४
पुनरपि अष्टौ दिक्कुमार्यस्तत्रैव रुचकाभिधानत्रयोद शद्वीपे दक्षिणदिग्व्यवस्थितगिरिकूटेषु अष्टसु यास्तिष्ठं
ति समाहारा१ सुप्रदत्ता२ सुप्रबुद्धा३ यशोधरा४ ल क्ष्मीवती५ शेषवती६ चित्रगुप्ता७ वसुंधरा८ एता अपि
आगत्य च जिनं जिनमातरं च नत्वा जलभृंगारा न्स्नानार्थं करे कृत्वा भगवतोऽग्रे गीतं गानं कुर्वं
ति ३२ पुनरपि अपरा अष्टौ दिक्कुमार्यस्तत्रैव त्रयो दशे रुचकद्वीपे पश्चिमदिग्व्यवस्थितगिरिकूटेषु
अष्टसु यास्तिष्ठंति इलादेवी१ सुरादेवी२ पृथ्वी३ पद्म वती४ एकनासा५ नवमिका६ भद्रा७ सीता८ एता अ
प्यागत्य जिनं जिनमातरं च नत्वा वातार्थं व्यजनं हस्ते गृहीत्वा भगवतोऽग्रे तिष्ठंति ४० पुनरपि अपरा अष्टौ दि
क्कुमार्यः तत्र त्रयोदशे रुचकद्वीपे उत्तरदिग्व्यवस्थितगिरिकूटेषु अष्टसु यास्तिष्ठंति अलंबुसा१ मितकेसी
२ पुंडरीका३ वारुणी४ हासा५ सर्वप्रभा६ श्री७ ह्री८ एता आगत्य जिनं जिनमातरं च नत्वा भगवतोऽग्रे चाम
राणि ढालयंत्यस्तिष्ठंति ४८ पुनरपि अन्याश्चतस्रः कुमार्यस्तत्रैव त्रयोदशे रुचकद्वीपे पूर्वविदिग्व्यवस्थि
तगिरिकूटेषु चतुर्षु यास्तिष्ठंति विचित्रा१ चित्रकनका२ तेजा३ सौदामिनी४ एता अप्यागत्य जिनं जिनमातरं

गातंगानं गयँग।
तीगंधर्वमथन
र्त्तनमिति है म॥

वातायनं१

चनत्वा दीपं हस्ते गृहीत्वा भगवतोऽग्रे तिष्ठंति ५२ उत्तरपश्चिमपराश्चतस्रो दिक्कुमार्यस्तत्रैव त्रयोदशे रुचकद्वीपेऽभ्यं
तरव्यवस्थितगिरिकूटेषु चतुर्दश्यां तिष्ठंति रूपा१ रूपासिका२ सुरूपा३ रूपकावती४ एता आगत्य जिनं जिनमातरं
च नत्वा भगवतो नालं चतुरंगुलतश्छित्वा खातोदरे क्षिपंति स्म पश्चात्तं खातोदरं वैडूर्यरत्नैः प्रपूरयित्वा तस्योपरि ह
र्व्या बद्धं पीठं चक्रुः ५६ ततो जन्मगृहात् पूर्वस्यां१ दक्षिणस्यां२ उत्तरस्यां३ दिशि कदलीगृहत्रयं चक्रुः ततो दक्षि
णकदलीगृहे भगवंतं भगवतो मातरं च नीत्वा द्वयोरपि अभ्यंगं कुर्वंति स्म ततः पूर्वगृहे नीत्वा स्नानं कारयित्वा विले
पनवस्त्रालंकाराणि परिधापयामासुः तत उत्तरकदलीगृहे अरणिकाष्ठाभ्यां अग्निमुत्पाद्य चंदनैर्होमं कृत्वा रक्षा
पोट्टलिकां द्वयोर्हस्तयोर्बबंधुः ततो हे भगवन् त्वं पर्व तायुर्भव इत्याशिषं दत्वा अश्मगोलकौ कर्णयो रा
स्फाल्य जन्मस्थाने जिनं जिनमातरं च नीत्वा स्वस्व दिक्षु स्थिता गीतानि गायंति स्म एताश्च षट्पंचाशद्दि
क्कुमार्यः प्रत्येकं चतुःसहस्रमहत्तरादेवीभिः चतुःसह स्रसामानिकदेवीभिः षोडशसहस्रैरंगरक्षकदेवै
: सप्तभिरनीकैः सप्तभिरनीकाधिपतिभिरन्यैरपि महर्द्धिभिर्देवैः सहिताः आभियोगिकदेवकृतैर्योजनप्र
× र्विमानै × माणैरायांति ततो भगवतो जन्मोत्सवं पूर्वविधिना कृत्वा कृतार्थतां मन्यमानाः स्वस्वस्थाने गताः इति दिक्कुमारी
जन्मोत्सवः॥ अथ इंद्रजन्मोत्सवमाह तस्मिन् समये शक्रस्य इंद्रस्य आसनं चचाल ततोऽवधिज्ञानप्रयुंजनेन सौ
धर्मेंद्रेण श्रीमहावीरस्य जन्मसमयो ज्ञातः तत इंद्रः सुघोषां एकयोजनप्रमाणां घंटां हरिनैगमेषिदेवपार्श्वात् अ
वादयत् तद्वादने च सर्वदेवलोकमध्यवर्त्तिसर्वविमानघंटा नादं चक्रुः ततः सर्वेपि देवा इंद्रादेशं ज्ञात्वा इंद्रस ६७
मीपे समागताः इंद्रोपि पालकनाम्ना देवेन कृते लक्षयोजनप्रमाणे पालकनामविमाने उपविष्टः इंद्रस्याग्रतो

ष्टौ अग्रमहिष्य उपविष्टाः इंद्रस्य वामपार्श्वे सामानिकदेवाः स्थिताः इंद्रस्य दक्षिणपार्श्वे तिसृणां सभानां देवाः।
स्थिताः इंद्रस्य पृष्ठतः सप्तापि अनीकानि स्थितानि अन्यैरपि बहुभिर्देवैः परिवृतः सिंहासनस्थो गीयमानगु
णग्रामः सन् इंद्रश्चचाल एवमन्येपि देवाः स्वस्वविमानानि आरुह्य चेलुः तेपि केपि इंद्रस्य आदेशात् केपि मित्र
स्यानुवर्त्तनात् केपि स्वस्त्रीणां प्रेरणात् केपि तीर्थंकरस्य रागात् केपि कौतुकात् केपि आश्चर्यात् केपि भक्तितः
एवं सर्वेपि सुरा नानाप्रकारैर्वाहनैर्युक्ता इंद्रेण समं चलिताः तस्मिन् प्रस्तावे नानाप्रकारैर्वाद्यनिर्घोषैर्घंटानां क्व
त णिकशब्दैर्देवानां कोलाहलैश्च शब्दाद्वैतं विश्वं जातं मा र्गागमने सिंहवाहनस्थो देवो हस्तिवाहनस्थं देवं व
क्ति भो त्वदीयं वाहनं दूरीकुरु मदीयवाहनकेश रीदुर्द्धरोस्ति नतो हनिष्यति १ एवं अश्वस्थो वेसर
स्थं वक्ति २ गरुडस्थः सर्पस्थं ३ चित्रकस्थः छागस्थं ४ इत्यादि एवं सुराणां कोटिकोटी
सर्वाहनैर्विमानैश्च विस्तीर्णोपि आकाशमार्गो संकीर्णो जातः तथा केपि देवा अग्रे गच्छतां मित्र
त्वं परित्यज्य अग्रे ययुः केपि दाक्षिण्यं परित्यज्य के पि प्रतिज्ञां परित्यज्य अग्रे गच्छंति स्म केचिद्देवा वदंति
भो मित्र क्षणं प्रतीक्षस्व अपरे देवा वदंति भो न वक्तव्यं मौनं कुरु एतादृशे महोत्सवे कः कं प्रतीक्षते पर्वता
सराश्च संकीर्णा एव भवंति तथा आकाशे आगच्छतां देवानां मस्तके यदा चंद्रकिरणा लग्नास्तदा देवा निर्ज
रा अपि सजरा इव दृश्यंते स्म तथा तारका अपि मस्तकोपरि स्फुटघटाकाराः कंठे ग्रैवेयकाभरणसमाः दे
हे च प्रस्वेदबिंदुसमाः शोभंते स्म ततो नंदीश्वरे विमानानि संक्षिप्य जिनजन्मस्थाने समागत्य जिनं जिनमात
रं च त्रिःप्रदक्षिणीकृत्य वंदित्वा नमस्यित्वा च इंद्रो वदति स्म हे रत्नकुक्षिधारिके हे विश्वप्रदीपिके तुभ्यं नमोस्तु

अहं शक्रोस्मि प्रथमदेवलोकादागतोस्मि चरमतीर्थंकरस्य जन्मोत्सवं करिष्यामि हे देवि त्वया न भेतव्यं इत्युक्त्वा
अवस्वापिनीं निद्रां दत्वा जिनप्रतिबिंबं जिनमातृपार्श्वे मुक्त्वा भगवंतं करसंपुटे गृहीत्वा चलितस्तत्र पंचरूपाणि इंद्रे
ण सर्वश्रेयोलाभवांछता कृतानि एकेन रूपेण तीर्थंकरो गृहीतः द्वाभ्यां रूपाभ्यां चामरे गृहीते एकेन रूपेण छत्रं गृही
तं एकेन रूपेण वज्रं गृहीत्वा अग्रे चलितः ५ तस्मिन्समये इंद्रो हर्षेण एवं भावयति स्म अद्य मम सहस्रनेत्राणि सफ
लानि जातानि यैः कृत्वा अहं भगवतः संपूर्णरूपं पश्यामि पुनरग्रगामिनो देवाः पृष्ठिगान् देवान् स्तुवंति धन्याः पृष्ठगा
देवा ये भगवंतं सम्यक् पश्यंति स्वकीयनेत्रैश्च पश्चाद्भ मीहंते एवं पृष्ठगा अग्रगामिनः स्तुवंति अनया रीत्या
इंद्रो मेरुपर्वतस्य शृंगस्थपंडकवने मेरुचूलायां द क्षिणदिशि अतिपांडुकंबलाशिलातले जिनमुत्सं
गे कृत्वा पूर्वदिक्संमुखो निषीदति स्म देवाः स र्वेपि भगवत्समीपे समागताः ततो द्वादशदेव
लोकस्वामी अच्युतेंद्र आभियोगिकदेवान् इति आ दिशति स्म भो देवा यूयं कलशैर्गंगापद्मद्रहादि
तीर्थानां पानीयमानयत परं ते कलशाः कीदृशाः कि यंतश्च तदाह एकसहस्राष्टौ कलशाः १००८ सुवर्ण
मयाः १००८ रूप्यमयाः २ १००८ रत्नमयाः ३ १००८ स्वर्णरूप्यमयाः ४ १००८ स्वर्णरत्नमयाः ५ १००८ रूप्यरत्नम
याः ६ १००८ स्वर्णरूप्यरत्नमयाः ७ १००८ मृन्मयाः ८ सर्वेपि अष्टौ सहस्राश्चतुःषष्टिश्च सर्वेपि कलशाः यो
जनाननाः एवं भृंगार १ दर्पण २ रत्नकरंडक ३ सुप्रतिष्ठक ४ स्थाल ५ पात्रिका ६ पुष्पचंगेरिका ७ दीनि पूजा
या उपकरणानि प्रत्येकं २ एकं सहस्रं अष्टौ च ज्ञेयानि एवं अच्युतेंद्रो गंगादीनां चतुर्दशलक्षषट्पंचाशत्स ३०
हस्रमितानां पानीयं मागधादितीर्थानां मृत्तिकां पद्मद्रहादीनां पद्मानि क्षुल्लहिमवद्वर्षधरवैताढ्यविज
×महानदीनां×१

यवक्षस्कारदेवकुरूत्तरकुरुभद्रशालनंदनवनादीनां सिद्धार्थ १ पुष्प २ तुंबर ३ प्रमुखगंधान् सर्वौषधीश्च जला
नि च आनाययत् अथ ते देवाः तीर्थजलेन भृतान् कुंभान् मस्तके धरंत आकाशमार्गे आगच्छंतः कीदृशाः संजाय
ते संसारसमुद्रं तरीतुमिव हृदयाग्रे कुंभा धृताः संति अथवा भावद्रुमं सिंचंतीव २ अथवा पापमलं क्षालयंतीव ३
ततः सर्वे देवाः कुंभान् तीर्थजलभृतान् तीर्थंकरोपरि यावत् ढालयंति तावत् इंद्रस्य संशय उत्पन्नः अहो
अयं बाल एतावतां कलशादीनां नीरधारां कथं सहिष्यते माज्ञावनं भवति ततः इंद्रेण क्षणं तेषां कलशानां ढा
लनं निवारितं ततो भगवता अवधिज्ञानेन इंद्रस्य अभिप्रायं ज्ञात्वा अनंतबलेन पादस्य वामांगुष्ठाग्रं
ईषच्चंपितं ततो मेरुपर्वतोऽकंपत तत्कंपनेन च किं जातं तदाह पृथिवी कंपिता १ पर्वतानां शृंगा
णि त्रुटित्वा पतितानि २ समुद्राः क्षोभं प्राप्ताः ३ ब्रह्मांडस्फोटसदृशाः शब्दाः प्रकटीबभूवुः ४ अ
परं भोलीता सुराः स्वकीयपतिमालिंगनमकरो त् अत्र कवेरुत्प्रेक्षा मेरुणा ज्ञातं अहमसंख्याता
नां तीर्थंकराणां मध्ये न केनापि तीर्थंकरेण पूर्वं स्पृष्टः। अद्य चरमतीर्थंकरेण पादाग्रेण स्पृष्टः ततो मम महान्
प्रसादः कृतः अहं निःपापः पवित्रश्च कृतः ततो हर्षप्रकर्षान्नृत्यति स्म अथ मेरुकंपने इंद्रेण रुष्टेन विचारितं
अहो केन पापिष्टेन देवदानवभूतवेतालराक्षसव्यंतरादिना शांतिकरणसमये उपद्रवः कृतस्ततोऽवधिज्ञानप्र
युंजनेन ज्ञातं अहो अहं अज्ञानी तीर्थंकराः किल बाल्यावस्थायामपि अनंतबला भवंति ततः सौधर्मेंद्रेण आदे
शो दत्तो पूर्वमच्युतेंद्रेण समकालं कलशैः स्नानाभिषेको भगवतः कारितः ततो नुपरिपाटीतः सर्वैरपि स्नानाभि
षेकाः कारिता यावच्चंद्रसूर्यादयः ततः पुनरपि चत्वारि वृषभरूपाणि कृत्वा अष्टशृंगैर्दुग्धधाराभिः स्नाना

लिषेकमिंद्रः कारितवान् स्नानाभिषेके कृते मेरुः कीदृशो जातः स्नात्रकवेस्तवेद्धा सर्वपर्वताः सहस्राणि नि
सपंचाशच्च ५५ तेषां मध्ये मेरुपर्वतस्य राज्याभिषेकः कृतः स्नात्रनीरैः स्नानाभिषेको जातो नीरनिर्झराणि
कृताहाराः भगवतो मूर्त्तिर्मस्तके मुकुटं देववाद्यानि अप्सरोगीतानि इति ततो देवा गीतगानतानमाननृत्यवा
द्यादिकं आरात्रिकापर्यंतं जन्मोत्सवं कृत्वा मातुः पार्श्वे मुक्त्वा भगवत्प्रतिबिंबं संहृत्य अवस्वापिनीनिद्रां हृत्वा कृ
त्पकुंडलयुगलं भगवतउच्छीर्षे मुक्त्वा श्रीदाम रत्नदाम झटितं स्वर्णकंडकं उल्लोचे मुक्त्वा स्वामिनोंगुष्ठे अमृतं
न्यस्य रत्नमयपट्टे रूप्यमयतंडुलानां अष्टौ मंगलानि लिखित्वा द्वात्रिंशत् रत्नस्वर्णकोटीर्वैश्रमणदेव इंद्र
वचनेन सिद्धार्थराजगृहे वर्षतिस्म ततइंद्रआ तियोगिकसुरैरुद्घोषणां वादापयामास सो
लोयः कोपि भगवतो मातुर्वा मनसापि अशुभं चिंतयिष्यति तस्य शिरः आर्यमंजरीवत्सप्तधा
स्फुटिष्यति ततः इंद्रचतुःषष्टिरपि इंद्राः असंख्या तैरिंद्रैर्देवैश्च सहिताः जिनजन्मोत्सवं कृत्वा नंदीश्व
रे अष्टाह्निकां कृत्वा स्वस्वस्थाने गता इति इंद्रकृतो जि नजन्मोत्सवः॥ तदनंतरं प्रियसाषिता नाम्नी दासी सि
द्धार्थनृपं पुत्रजन्मनिवेदनेन वर्धापयतिस्म राज्ञापि हृष्टतुष्टेन दास्या मुकुटवर्जानि आभरणानि दत्तानि मस्तकं
क्षालयित्वा दासीकर्मछुरीकृतं अथ प्रभाते सिद्धार्थराजा किं कृतवान् तत्सूत्रं॥ तएणं से सिद्धत्थे खत्तिए भव
णवइवाणमंतरजोइसवासी विमाणवासीदेवेहिं तित्थयरजम्मणाभिसेअमहिमाए कयाए पच्चूसकालसम
यंसि नगरगुत्तिए सद्दावेइ स० एवं वयासी ए० खिप्पामेव भो देवाणुप्पिया कुंडपुरे नगरे चारगसोहणं क ७१
रेह कारवेह माणुम्माणवद्धणं करेह कारवेह व्याख्या॥ ततश्च सिद्धार्थो राजा क्षत्रियः भवनपतिव्यंतर

ज्योतिर्वासिविमानवासिदेवैस्तीर्थकरजन्माभिषेकमहिमायां कृतायां सत्यां प्रभातकालसमये नगरगुत्तिए नगरगु
प्तिकान् कोटारक्षकान् सद्दावेइ समाकारयति सद्दावेत्ता समाकार्य च एवं अवादीत् भो देवानुप्रियाः क्षिप्रं शीघ्रं क्षत्रि
यकुंडग्रामे चारगसोहणं बंदिमोचनं कुरुत कारयत एवं माणुम्माणवद्धणं मानं रसधान्यविषयं उन्मानं च तुलारू
पं तयोर्वर्धनं कुरुत कारयत च पुनः सिद्धार्थो राजा किं कृतवान् तत्सूत्रं॥ कुंडपुरं नगरं सब्भिंतरबाहिरियं
आसियसंमज्जिओवलित्तं सिंघाडगतिगचउक्कचच्चरचउमुहमहापहेसु सित्तसुइसंमट्ठरत्थंतरावणवीहि
यं मंचाइमंचकलियं नाणाविहरागभूसियज्झयप डागमंडियं लाउल्लोइयमहियं गोसीससरसरत्त
चंदणदद्दरदिन्नपंचंगुलितलं उवचियचंदण कलसं चंदणघडसुकयतोरणपडिदुवारदेस
भागं आसत्तोसत्तविउलवट्टवग्घारियमल्ल दामकलावं पंचवन्नसरससुरहिमुक्कपुप्फ
पुंजोवयारकलियं कालागरुपवरकुंदुरुक्कतुरु क्कडज्झंतधूवमघमघंतगंधुद्धुयाभिरामं सुगंधवरगं
धियं गंधवट्टिभूयं नडनट्टगजल्लमल्लमुट्ठिय वेलंब गकहगपढगलासगआरक्खगलंखमंखतूणइल्ल
तुंबवीणिय अणेगतालायराणुचरियं करेह कारवेह करित्ता कारवित्ता य जूअसहस्सं मुसलसहस्सं च उ
स्सवेह उस्सवित्ता ममएअमाणत्तियं पच्चप्पिणह १०० व्या० पुनरपि सिद्धार्थो राजा प्राह भो देवानुप्रियाः क्ष
त्रियकुंडनगरं ईदृशं कुरुत स्वयं कारयत च अन्यैः कीदृशं नगरं सब्भिंतरबाहिरियं सह अभ्यंतरेण मध्य
भागेन बाहिरिकाबहिर्भागो यत्र तत्तथा क्रियाविशेषणमिदं की० नगरं आसिक्तं गंधोदकछटकदानात् संमा
र्जितं कचवरशोधनात् उपलिप्तं गोमयादिना पुनः शृंगाटकत्रिकचतुष्कचत्वरचतुर्मुखमहापथपथेषु सर्वं

व्याख्याते उस्थाने उसिक्तानि जलेन अत एव शुचीनि पवित्राणि संमृष्टानि कचवराऽपनयनेन समीकृतानि वा रथ्यांतराणि रथ्यामध्यानि आपणवीथयश्च हट्टमार्गा यस्मिन् तत् पुनः कीदृ० नव मंचामालकाः प्रेक्षणकद्रष्टृजनोपवेशनार्थं अतिमंचास्तेषाम् उपरियै तैः कलितं पुनः कीदृ० नाणाविह राग भूसिअ झय पडाग मंडियं नानाविधरागैः कुसुंभादिभिर्विरचिता याध्वजाः सिंहगरुडादिरूपकोपेताः छत्रातिछत्रयाः पताकाश्च ताभ्यः इतरास्ताभिर्मंडितं पुनः कीदृ० लाइयं बगणादिना लेपनं उल्लोइयं सेटिकादिना कुड्यादौ धवलनं ताभ्यां महितमिव पूजितमिव यत्रा लिसं उल्लोचितं उल्लोचयुक्तं महितं च पुष्पप्रकरादिना पुनः किं० गोसीससरसरत्त० गोशीर्षस्य चंदनविशेषस्य सरसस्य प्रत्ययस्य रक्तचंदनस्य चंदनविशेषस्य वा दर्दरस्य दर्दराभिधानपर्वतजातश्रीखंडस्य दत्ता न्यस्ताः पंचांगुलयस्तला हस्तका यस्मिन् कुड्यादिषु दर्दरबहलेन चपेटारूपेण वा दत्तपंचांगुलितलमित्येके अन्ये त्वाहुः दर्दरश्चीरावनद्धकुंडिका मुखं तेन गालितेन गोशीर्षादिरसेनेति पुनः किं० उवचिअचंदणकलसं उपचिताः उपनिहिताः भूदांतः कृतचउक्के चंदनकलशा मंगल्यघटा यत्र तत् पुनः किं० चंदणघडसुकयतोरणपडिदुवारदेसभागं चंदनघटाः सुकृततोरणानि च प्रतिद्वारं द्वारस्य द्वारस्य देशभागेषु यत्र तत् क्वचित् घटस्थाने घणत्रिपाव स्तत्र चंदणा चंदनमालाछनानि बद्धानि सुकृतानि तोरणानि च प्रतिद्वारं देशभागेषु यत्र तत् पुनः कीदृ० आसत्तो० आसक्तो भूमिलग्नः उत्सिक्तश्च उपरिलग्नो विपुलो विस्तीर्णो वट्टो वर्तुलो वग्घारियवि प्रलंबितः पुष्पगृहाकारो माल्यदामा पुष्पमालानां कलापः समू ७२
हो यत्र तत् पुनः कीदृ० पंचवन्न पंचवर्णाः सरसाः सुरभयो ये मुक्ताः करप्रेरिताः पुष्पपुंजास्तैर्य उपचारो

भूमेः पूजा तेन कलितं पुनः कीदृ० कालागरुपवर कुंदुरुक्क तुरुक्क डझंत धूव मघमघंत गंधुद्धुयाभिरामं सुगंधवरगंधियं गंधवट्टिभूयं इति विशेषणत्रयस्य अर्थः पूर्ववत् पुनः किं० नडनट्टेति नटा नाटककर्त्तारः १ नर्त्तका ये स्वयं नृत्यंति अंकेल्ला इत्येके २ जल्ला वरत्राखेलकाः राज्ञः स्तोत्रपाठकाः इत्यन्ये ३ मल्ला भुजयुद्धवंती ताः ४ मौष्टिका मल्ला एव ये मुष्टिभिः प्रहरंति ५ विडंबका विदूषका ये समुखविकारं उत्कृत्य नर्त्तकाः ६ कथकाः सरसकथाकथकाः ७ पावकाः सूक्तादीनां ८ पवगत्तिपावे प्लवगा ये उत्प्लवंते झंपादिना गर्त्तादिकं वातरंति ९ लासका ये रासकान् ददति १० आरक्खकास्तलाराः आख्यायका वा शुभाशुभयोः ११ लंखा महावंशाग्रखेलकाः १२ मंखाश्चित्रफलकहस्ता भिक्षाकाः गौरीपुत्रा इति प्रसिद्धाः १३ तूणइल्लास्तूणकथिल्ला तूणाख्यवाद्यवंतो वा १४ तुंबवीणिकाः वीणावादकाः अथवा तुंबा किंनरी आलपन्यादि वादकाः वीणिका वीणावादकाः १५ अनेके ये तालाचरास्तालादानेन प्रेक्षाकारिणः तालान् कुट्टयंतो वा ये कथां कथयंति तैरनुचरितं सेवितं यत्र तथा एवंविधं नगरं स्वयं कुरुत अन्यैः कारयत कृत्वा कारयित्वा च पुनरपि मंगलार्थं यूपसहस्रं मुशलसहस्रं ऊर्ध्वीकुरुत कृत्वा च मम एतामाज्ञां कृत्वा प्रत्यर्पयत १०० ततस्ते कौटुंबिकपुरुषाः किं कृतवंतस्तत्राह ॥ तएणं ते कोडुंबियपुरिसा सिद्धत्थेणं रन्ना एवं वुत्ता समाणा हट्ठतुट्ठ जाव हियया करयल जाव पडिसुणित्ता खिप्पामेव कुंडपुरे नगरे चारगसोहणं जाव उस्सविता जेणेव सिद्धत्थेराया तेणेव उवागच्छंति उवागच्छित्ता करयल जाव कट्टु सिद्धत्थस्स रन्नो एयमाणत्तियं पच्चप्पिणंति १ ततस्ते कौटुंबिकपुरुषाः सिद्धार्थेन राज्ञा एवं उक्ताः संतो हृष्टतुष्टहृदयाः करकमलयुगलमस्त

केनिच्चुडच्च आदेशं अंगीकृत्य शीघ्रमेव बंदिमोचनं यावत् मुसलसहस्रं ऊर्ध्वं कारयित्वा यत्रैव स्थाने सिद्धा-
र्थो राजा तत्रागच्छंति आगत्य च करतलयुगलं मस्तके कृत्वा राज्ञस्तां आज्ञां तथैव कृत्वा राज्ञः समर्पयंति इति
ततः सिद्धार्थो राजा किं करोति तत्सूत्रं॥ तए णं सिद्धत्थे राया जेणेव अट्टणसाला तेणेव उवागच्छति उवा० जाव स
व्वोरोहेणं सव्वपुप्फगंधवत्थमल्लालंकारविभूसाए सव्वतुडियसद्दनिनाएणं महया इड्ढीए महया जुईए महया ब
लेणं महया वाहणेणं महया समुदएणं महया तुडियजमगसमगप्पवाइएणं संखपणवभेरिझल्लरिखरमुहि
हुडुक्क मुरज मुइंग दुंदुहिनिग्घोसनाइयरवेणं उस्सु क्कं उक्करं उम्मुक्कं उक्किट्ठं अदिज्जं अमिज्जं अभडप्प
वेसं अदंडकोदंडिमं अधरिमं गणियावरनाडइज्ज कलियं अणेगतालायराणुचरियं अणुद्धुयमुइं
गं ग्रं० ५०० अमिलायमल्लदामं पमुइयपक्कीलि यसपुरजणजाणवयं दसदिवसं ठिइवडियं करे
इ व्या० ततश्च सिद्धार्थो राजा यत्र अट्टणसालात त्रागत्य दशदिवसान् यावत् स्थितिपतितां करो
तीति संबंधः स्थितौ कुलमर्यादायां पतिता आगता या पुत्रजन्मोत्सवप्रक्रिया तां केन प्रकारेण स्थि
तिपतितां करोति तदाह जाव सव्वोरोहेणं समस्तांतःपुरैर्यावत्करणात् सव्वजुईए इत्यादि दृश्यं याव
द्रूपमाणं सव्वोरोहेणमित्यंतमत्र ग्राह्यं पुनः सर्वपुष्पगंधवस्त्रमाल्यानि अलंकारो मुकुटादिस्तैर्या विभूष
या कृत्वा पुनः केन सव्वतुडियसद्दनिनाएणं सर्वाणि यानि त्रुटितानि वादित्राणि तेषां शब्दो निनादश्च प्र
तिशब्दस्तेन कीदृशो राजा महया इड्ढीए महत्या ऋद्ध्या छत्रचामरादिकया युक्त इति गम्यं एवं महया जुईए ७३
युक्तिरिष्टवस्तुघटना द्युतिर्वा दीप्तिराभरणादीनां तया पुनर्महताबलेन सैन्येन पुनर्महता वाहनेन

शिबिकावेसरादिना पुनर्महता समुदयेन संगतास्युदयेन निजपरिवारादिसमुदायेन वा पुनर्महता तूर्याणां य
मकसमकं युगपत्प्रवादितेन ध्वनितेन पुनः शंखः कंबुः पणवो मृत्पटहः भेरी ढक्का दमामा इति नाम झल्लरी चतु
रंगुलनालिः करटिसदृशी वलयाकारा उभयतोनद्धा इत्यन्ये खरमुखी काहला हुडुक्का त्रिवलितुल्या मुरजो
मर्दलः मृदंगो मृन्मयः दुंदुभिर्देववाद्यं एतेषां निर्घोषो महाध्वनि नादितं च प्रतिशब्दस्तद्रूपो यो रवस्तेन कीदृ
शीं स्थितिपतितां उस्सुक्कं उच्छुल्कां उन्मुक्तशुल्कां शुल्कं विक्रेतव्यभांडं प्रति मंडपिकायां राजदेयं द्रव्यं पुनः किं
०स्थि० उक्करं उन्मुक्तकरां करो गवादीन् प्रतिवर्षं रा जदेयं द्रव्यं उक्किट्ठं कृष्टं कर्षणं यस्यां लभ्यस्याकर्षण
निषेधात् अथवा उत्कृष्टां प्रधानां पुनः की० स्थि०। अदेयां विक्रयनिषेधेन केनापि न कस्यापि देयं
पुनः किं० स्थि० अमेयां क्रयविक्रयनिषेध ादेव पुनः कीं० स्थि० अभटप्रवेशां न विद्यते भ
टानां राजाज्ञादायिनां सहउत्रादीनां प्रवेशः कु टुंबिगृहेषु यस्यां सा तां पुनः की० स्थि० अदंडिम
कोदंडिमं दंडेन निर्वृत्तं दंडिमं कुदंडेन निर्वृत्तं कुदं डिमं राजद्रव्यं तद्द्वयमपि नास्ति यस्यां सा तां तत्र दं
डोऽपराधानुसारेण राजग्राह्यं द्रव्यं कुदंडस्तु कारणिकानां प्रज्ञापराधान्महत्यपराधे अल्पं राजग्राह्यं क्व
चित् अदंडकुदंडिममिति पाठस्तत्र दंडलभ्यं द्रव्यं दंडः शेषं पूर्ववत् पुनः की० स्थि० अधरिमं न धरिमं यस्यां ×ऋणं×
सा तां ऋणमुत्कलनात् क्वापि अधारिममिति पाठः केनापि कस्याप्यधारणात् पुनः की० स्थि० गणिकावरै
र्विलासिनीप्रधानैः अगणिय त्ति पाठे अगणितैः प्रतिस्थानासंभवात् असंख्यैर्नाटकीयैर्नाटकप्रतिबद्धैः
पात्रैः कलितां पुनः की० स्थि० अनेकतालाचरानुचरितां प्रेक्षाकारिसेवितां अनुद्धता आनुरूप्येण वादना

र्द्धं उद्धिमा अनुद्धूता वा वादनार्द्धं अपरित्यक्ता मृदंगा यस्यां सा तां पुनः की॰ अम्लानानि माल्यदामानि पुष्पमाला
यस्यां सा तां पुनः की॰ प्रमुदितो हृष्टः प्रक्रीडितश्च क्रीडितुमारब्धः सह पुरजनेन जनपदो लोको यस्यां सा तां।
क्वापि पमुइयपक्कीलियजणाभिरामं तत्र प्रमुदितैः प्रक्रीडितैश्च जनैरभिरामां वाचनांतरे विजयवेजइयं तूरपते तत्रा
तिशयेन विजयो विजयः सप्रयोजनं यस्याः सा विजयवेजयिकी तां ततो राजा किं करोति तत्सूत्रं॥ तएणं सिद्धत्थे
राया दसाहियाए ठिइवडियाए वट्टमाणीए सइए य साहस्सिए य सयसाहस्सिए य जाए य दाए य लाए य
दलमाणे य दवावेमाणे य सइए य साहस्सिए य सय साहस्सिए य लंभे पडिच्छमाणे य पडिच्छावेमाणे य एवं
विहरइ इति व्या॰ ततश्च सिद्धार्थो राजा दशाहिकायां दशदिवसप्रमाणायां वर्द्धमानायां शतिकान् श
तपरिमाणान् साहस्रिकान् सहस्रपरिमाणान् शतसाहस्रिकान् लक्षपरिमाणान् यागान् देवपूजा
:दायान् पर्वदिवसे दानानि भागान् लब्धद्रविणभागान् मानितद्रव्यांशान् वा ददत् दापयन् लाभान् प्रतीच्छ
न् गृह्णन् प्रतिग्राहयन् विहरति स्म ततो भगवतो मातापितरौ यत्कुरुत तत्सूत्रं॥ तएणं समणस्स भग
वओ महावीरस्स अम्मापियरो पढमे दिवसे ठिइवडियं करिंति इति व्याख्या॥ ततश्च भगवतो मातापितरौ प्र
थमदिवसे स्थितिपतितं कुलक्रमागतं पुत्रजन्मोचितमनुष्ठानं कुरुतः पुनरपि तईए दिवसे चंदसूरदंस
णियं करिंति तृतीये दिवसे चंद्रसूर्ययोर्दर्शनिकां उत्सवविशेषं कारयतो मातापितरौ यत्राधुना बालस्य द ७४
र्पणो दर्श्यते तद्विधिरयं गृहस्थगुरुः स्फटिकमयीं रूप्यमयीं वा चंद्रमूर्त्तिं विधिना अर्चित्वा स्थापयेत् तत सीर्ध
करमातरं स्नातां सुवस्त्राभरणां करद्वयधृतपुत्रां चंद्रोदये प्रत्यक्षं चंद्रसंमुखं नीत्वा इति वदति ॐ अर्हं

चंद्रोऽसि निशाकरोसि नक्षत्रपतिरसि सुधाकरोसि औषधीगर्भोसि अस्य कुलस्य ऋद्धिं वृद्धिं कुरु कुरु स्वाहा॥
इत्यादि चंद्रमंत्रमुच्चरन् मातृपुत्रयोश्चंद्रं दर्शयेत् ततो माता सपुत्रा गुरुं प्रणमति गुरुश्चाशीर्वादं ददाति
यथा सर्वौषधीमिश्रमरीचिजालः सर्वापदां संहरणप्रवीणः करोतु वृद्धिं सकलेपि वंशे युष्माकमिंदुः स
ततं प्रसन्नः १ ततः स्थापितमिंदुमूर्त्तिं विसर्जयेत् कदाचित्सा रात्रिश्चतुर्दशी अमावासी वा स्यात् सा त्वे
वाश्चाकाशे चंद्रो न दृश्यते तदा तस्यामेव संध्यायां चंद्रदर्शनं कार्यं अपरस्यामपि रात्रौ चंद्रोदये सवत्तुत
त् पुनरस्मिन्नेव दिने प्रभाते स्वर्णमयीं ताम्रमयीं वा सूर्यमूर्त्तिं विधिना संस्थाप्य गृहस्थगुरुरिति
वदति ॐ अर्हं सूर्योऽसि दिनकरोसि तमोपहोऽसि सहस्रकिरणोसि जगच्चक्षुरसि प्रसीद अ
स्य कुलस्य तुष्टिं पुष्टिं प्रमोदं कुरु कुरु स्वाहा इत्यादि सूर्यमंत्रमुच्चरन् मातृपुत्रयोः सूर्यं दर्श
येत् ततो माता गुरुं प्रणमति गुरुश्चाशीर्वादं ददाति यथा॥ सर्वसुरासुरवंद्यः कारयिता सर्वध
र्मकार्याणां भूयात्त्रिजगच्चक्षुर्मंगलदस्ते सपुत्राय ॥१॥ इति ततो मातापितरौ षष्ठे दिवसे धम्मजागरियं
धर्मेण कुलधर्मेण लोकधर्मेण वा जाता धर्मजागरिका रात्रौ धर्मजागरणं तां कुर्वंति ततः एकादशो दिवसे
व्यतिक्रांते सति पुनः निव्वित्तिए असुइजायकम्मकरणे निर्वर्त्तिते कृते अशुचीनां अशौचवतां जन्मक
र्मणां प्रसवव्यापाराणां नालच्छेदनादीनां करणे संपत्ते बारसाहदिवसे संप्राप्ते द्वादशाख्यदिवसे अथवा
द्वादशानामह्नां समाहारो द्वादशाहं तस्य दिवसो येन द्वादशाहः पूर्यति तत्र विउलं असणपाणखाइम
साइमं उवक्खडाविंति मातापितरौ विपुलं विस्तीर्णं परिपूर्णं अशनं १ पानं २ खादिमं ३ स्वादिमं ४ चतुर्वि

अमपि आहारं उवक्खारयन्तोरसवतीनिःपादयतः उपस्कृतं यिल्वाच ततः किं कृत्वा कीदृशौ संतौ मातापित
रौ किं कुर्वाते तत्र सूत्रं॥ मित्तनाइनियगसयणसंबंधिपरिजणं नायए खत्तिए य आमंतित्ता तओ पच्छा ण्हा
या कयबलिकम्मा कयकोउयमंगलपायच्छित्ता सुद्धप्पवेसाइं मंगल्लाइं पवराइं वत्थाइं परिहिया अप्प
महग्घाभरणालंकियसरीरा भोयणवेलाए भोयणमंडवंसि सुहासणवरगया तेणं मित्तनाइनियगसं
बंधिपरिजणेणं नायएहिय सद्धिं विउलं असणपाणखाइमसाइमं आसाएमाणा विसाएमाणा परि
भाएमाणा विहरंति इति ४ व्या० मित्राणि सुहृदः १ ज्ञातयः सजातीया मातृपितृभ्रात्रादयः २ निजकाः स्व
कीयाः पुत्रादयः ३ स्वजनाः पितृव्यादयः ४ संबंधिनः श्वसुरपुत्रश्वश्रुरादयः ५ परिजनो दासीदा
सादिः ६ नायखत्तिएत्ति उसभसामिसयणिज्जगा ऋषभस्वामितः प्रहानुस्वर्यागताः तान् आमंत्र्य
आकार्य ततः स्नातौ कृतबलिकर्माणौ कृतकौतुकमंगलप्रायश्चित्तौ भोजनवेलायां भोजनमंडपे
सुखासनवरगतौ तेन मित्रज्ञातिनिजकसंबंधिपरिजनेन ज्ञातक्षत्रियैश्च सार्द्धं तद्विपुलं चतुर्विधं आहा
रं आसाएमाणा आईषत्स्वादयंतौ बहुत्यजंतौ इक्षुखंडादिवत् विसाएमाणा विशेषेण आधिक्येन
स्वादयंतौ अल्पमेव त्यजंतौ खर्जूरादिवत् परिभुंजेमाणा परिसामस्त्येन उपभुंजानौ अल्पमपि अत्यजं
तौ भोज्यं परिभाएमाणा परिभाजयंतौ अन्योन्यं यच्छंतौ खाद्यं एवं मातापितरौ विहरतः ततः कीदृशौ जातौ ७५
तत्र सूत्रं॥ जिमियभुत्तुत्तरागयाविय णं समाणा आयंता चोक्खा परमसुइभूया जिमितौ भुक्तवंतौ भुक्तो
त्तरकालं भोजनोत्तरकालं आगतौ उपवेशनस्थाने इति गम्यं समाणत्ति संतौ पुनः कीदृशौ आचांतौ शुद्धो

दकेन कृतशौचौ चोक्षौ लेपसिक्थाद्यपनयेन अत एव परमशुचिभूतौ तान् मित्रादीन् प्रति एवं अवादिष्टां
अत्र पुनर्ग्रंथांतरानुसारेण भोजनविच्छित्तिं आह॥ मांडवउ उत्तंगतोरणमांडवउ उरतनवउ बैसिवानो आं
गणउ तेतउ नीलरत्नतणउ सघरामांम्या आसण बैसतां किसी विमासण आगइ मुंकी सोनानी आडणी
तेहिमडाय इत्था डणी उपरि सोनाना थाल अत्यंत घणुं विसाल विचमैं चउसहि वाटकी लिगारनहीडा
ति काटकी गंगोदक दीधा थालकचोलानैं हाथपवित्र कीधा सगली पांति बइठी तितरइ पीसणहारी पइठी
ते केहवी सोलशृंगारसज्या बीजा कामतइया ह्य घनीहूंमी खिजं बाहेषलकै चूंमी लयलाघवी कला
मनकीधा मोकला चित्तनी उदार अतिघणुं दातार दौलतीहाथ परमेसर देजे तेहनउ साथ ध
समसती आवी सगलांरइ मनि भावी पहिलुं फलह लिपीसइ सगलां राहीया हीसइ पाका
आंबानी कातली ते पूरा षांडसुं भरी अनइ वली पातली पोका केला ते वली षांडसुं कीधा भेला स
षराकरणा ते वली पीलावरणा नीला नारंगा रंगइ दीसता सुरंगा नीकोली राइणि पीसी लाइणि दाडि
मनी कली षातां भूडेरखी निमिजानइं अषोड षातां इडइ कोड जाषनइं बिदाम केई कागदी केई श्याम
सिलेमी पारिकनैं षजूर ते पीस्या सरपूर नालेरनी गरी मालवी गुलसुं भरी नीबू षाटा नइ मीठा एहवा तउ
केथे नदीठा चारोलीनइ पिसता लोक डीमइ हसता वली सेलडीनइं सदाफल ते पिण पीस्या परिघल॥
हिवइ पकवान आणइ ते केहवा वषाणइ सतपुडा षाजा उरत कीधा ताजा सदलानइ साजा मोटा जाणे
पासादना बाजा पबै पीस्या लाडू जाणे नो ह्यागाइ कुणपते नाम डीमतां मननरहइ वांम मोतीयालाड

५
कल्पल·

दालियालाडू सेवईयालाडू कीटीरालाडू मांडउलिरालाडू तिलरालाडू त्रिगडूलाडू मगरीयालाडू फगरी
यालाडू सिंहकेसरीयालाडू वलीबीजा आपणापकवांन जीमतां वाधइ सुखनउ वांन ऊणरजाति नवीरसाति
दहीवडा गुंदवडा फीणासखरासोट तेमांहे नहीं खोट पातलीसेव जीसी सूत्रीटेव नरताऊ घेवर तल्पागुंद
ऊंदलाऊतजलेबी सीरालापसी मीठौ मगद आंबौ मालनिगद खांडनउ चूरमउ साकरनउ चूरिमौ पवइ
जीसीसालि तेजीमीठी विचालि तेऊणरसेद सांसलतांऊ पडेउमेद सुगंधसालि सुवर्णसालि धउलीसा
लि रातीसालि पीलीसालि सुहृसालि कौमुदीसाल कलमसालि ऊंकणीसालि देवजीरसालि राय
भोगसालि मीठीसालि साठीचोषा अखंडचोषा॥ निबलीखांम्या सवलीबम्या हलुयइ हाथसोस्या
नखवतीवीण्या उन्नमस्त्रीजस्या सुघडस्त्रीज सांम्या सुजाणस्त्रीजतास्या एहवा अणीया
ला सुगंध सरसफरहराऊरत्रीस्या वलीदालि जीसी पलितेऊणइ अनइ केहवी मंडोरामुगनी
दालि काबिलीचिणांनीदालि गुजरातीतूयरनी। दालि उमदनीदालि फालरनीदालि मटरनीदालि
वरणैपीयली परिणामै सीयली वलीपरिघलघी जीस्या पलितेकेहवा आऊनातावा गाइनाघी मजीव
वरणाघी सुरहाघी नाकपेयघी सदा आदेयघी हिवपोलीजीसी पलितेकेहवी आबीपोली घीमांहि
झबोली ऊंकरीमारीफलसइजाइ एकवीसनउ एककउलीयउथाइ॥ हिवैसालणाजीस्यापिणतेकेह
वा नीलीछमकाईजेमीनासालणा टिंडोरांनासा० तिंडसीनासा० चीभडांनासा० कोहलांनासा।कंको
डांनासा० कारेलांनासा।।करमदांनासा।।कालिंगडांनासा।केलांनासा० आरीयांनासा० ररीयांनासा० मु

×चुंदीयोद्रि मो×४

७६

×काकडी।कार २।×१

ल्कचरनासा० षरबूजांनासा० चिंगणांनासा० मोगरीनासा।नीबूयांनासा।आंबोलियांनासा।वाल्होल
नासा।वलीचउलांनीफलीनासा।सरहूनीफलीनासा० सांगरीनासा।काचरीनासा।आमलांनासा।कयरना
सा।ऋलनासा।फोगनासा।नीलीमरिचनासा।नीलीपीपरिनासा० राईतासा।खाटासा।खारासा।मीठासा।गल्या
सा।तल्यासा।वघास्यासा।धउंकास्यासा।छमकायासा॥ वलीजीसीसाडी तेऊपरिसजकोराडी तेऊण
र सरसवनीसाडी सोयांनीसाडी मूलांनीसाडी बथूयानीसाडी चिणारीसाडी चीयलिनीसाडी चंद
लेवानीसाडी मेथीनीसाडी हिववडा आवैतेकेहव ।। मरिचालावडा तल्यावडा कोरावडा कांजीरावडा
घोलवडा मुंगारीदालिरावडा उडदारीदालिरावडा ।घणइघोलिसीना घणइतेलसीना मरिचांनाघणुंच
मत्कार अत्यंतसुकमार हाथलीधाऊबलइ मुं हडइघाल्याऊरतगलइ घणुंसुस्वर्गनादेवदे
वीपणिखावानइटलवलइ हिवपलेव आवइते केहवी चोखानीपलेव जारिनीपलेव बाजरीनी
पलेव दलदियापलेव पिंपलीयापलेव सुंठियाप लेव सवडकियापलेव हिवैतोजनविचिपीवानापा
णी आवइ पलितेकेहवा साकरनापांणी जाषनापांणी खांडनापांणी गंगानापांणी पाजरपांणी कर्पूरवा
स्यापांणी एलचीवास्यापांणी वाढाहीमसीतलपांणी हिवैदहीनाघोल आवइतेकेहवा गाइनादही सइं
सिनादही सखरादही कावाजाम्यादही मधुरादही सखरासजीरालासलवणाजाडाघोल तेहनासस्वाक
चोल चाउलांसुं जीमतांथयारंगरोल॥ वलीसखराकोरागरबा सरी आपणाकरबा मांहेघणीराई जीमतां
डीजनहीकाई ऊपरिजीराचूणरउ घतिवास करणहारीपणिखास॥ हिवचलूरापांणी आवइ तेकेहवा॥

५
कल्पल·

केवमंतानायांणी काश्चानायांणी कर्पूरवास्यापांणी पामलवास्यापांणी चंदनवास्यापांणी एलचीवास्यापांणी सुगंधपांणी गंगोदकपांणी तिणसुं चवकीधा॥ दिवे मुंजणदीजे तेकेहवा॥ चीकणीसोपारीनीफाल चिवलीसोपारीनीफाल तेविण केसरकर्पूरवासित वलीनीषालवंग जावंत्रीजाइफल मोटामोटा पाकानागरवेलनापांन घणाआदरनैं मांन घणा गीतनैं गांन घणा तांननैं मांन पबैसलावस्त्रपदिराया तेकेहवा देवदूष्यवस्त्र रत्नकंबलवस्त्र पामरी वस्त्र षीरोदकवस्त्र अटाणवा पासावा अधोतरवा नरमावा सेलावस्त्र कर्पूरवस्त्र मलरवस्त्र कसबीवा जरबपवस्त्रा मुषमलवा चीणीवा बुलरवसमावा मजांडर वस्त्र कषीपावा पाटूवा टसरियावा सणियावा सयरवावस्त्र नारीकुंजरप्रमुषवस्त्र पंचरंगीवागापदिराया वलीकाश्मीरकेसरनाछांटणाकीधा वलीसलीशविलेपनसुगंधलगाया बावनाचंदनविलेपमकीधा सुगंधअरगजालगाया वलीसघराचो आचंपेलफूलेलकेवडेलजाईजूई कुंदमचकुंदचांपउमरुयोमोगरो दमणो केतकी मालतीप्रमुषनाफूलपदिराया पछैवली मुगट तिलक कुंडल हार दोर वीरवलय अंगद बहिरषा नवग्रही मुंदडी कंदोराहाथनाटचसांकला पगनीसांकली प्रमुषपदिराया एटवीजुटुंबसाटमीनी तक्तिविछित्तिकीधी॥ अथमिश्रादीनामग्रेमातापितरौ किंअवादिष्टां तत्सूत्रं॥ जइंणंदेवाणुप्पिया अम्हं एयंसिदारगंसि कुछिंसिगप्भंवक्कंतंसिसमाणंसि इमेयारूवे अब्भत्थिए चिंतिए जाव समुप्पज्जित्था जप्पभिइं चणं अम्हं एसदारए कुछिंसिगप्भत्ताए वक्कंते तप्पभिइं चणं अम्हेहिरन्नेणंवड्ढामो सुवन्नेणंवा धणेणंवा धन्नेणंवा जावसावइज्जेणंवा पीइसक्कारेणं अईवर अभिवड्ढामो सामंतरायाणोवसमागयाय तंजयाणं अम्हं एसदारए जाए भविस्सइ तयाणं ११

अम्हे एयस्सदारगस्सएयाणुरूवं गुणं गुणनिप्फन्नं नामधिज्जं करिस्सामो वद्धमाणुत्ति ता अम्हं अज्जमणोरहसंपत्ती जाया तं होउणं कुमारे वद्धमाणनामेणं तएणं समणस्सभगवओमहावीरस्स अम्मापियरो नामधिज्जं करिंति वद्धमाणुत्ति व्याप सोदेवानुप्रियाः पूर्वमपिआवयोः एतस्मिन्दारके बालके कुक्षौ गर्भत्वेसति अयमेतादृशोऽभ्यर्थितश्चिंतितो मनोरथः समुत्पन्नोऽभूत् यस्माद्दिनात् आवयोः एषदारकः कुक्षौ गर्भत्वेन व्युत्क्रांतस्तस्माद्दिनात् आवां हिरण्येनवर्द्धावहे सुवर्णेनवा धनेनवा धान्येनवा यावत् प्रीतिसत्कारेण अतीववर्द्धावहे॥ सामंतादयोराजानोऽपि वशमागता स्ततोयदाज वयोरेषदारकोजातो भविष्यति तदा आवां एतस्य दारकस्य एतदनुरूपं गुणं गुणनिःपन्नं पूर्वं व्याख्यातार्थं सार्थकं नाम करिष्यावः वर्द्धमानइति यतः सर्वैः प्रकारैरावां वृद्धिंप्राप्तौ ततआव योरद्यमनोरथसंप्राप्तिर्जाता ततो भवतु कुमारो वर्द्धमाननाम्ना ततः श्रमणस्यभगवतोमहावीरस्यमातापितरौ वर्द्धमानइतिनामकुरुतः अथभगवतः सार्थकंनामत्रयंकथयंति तत्सूत्रं समणेभगवंमहावीरे कासवगुत्तेणं तस्सणंतओनामधिज्जा एवमाहिज्जंति तंजहा अम्मापिउसंतिए वद्धमाणे१ सहसंमुइयाए समणे२ अयलेभयभेरवाणं परीसहोवसग्गाणं खंतिखमेपडिमाणंपालए धीमं अरइरइसहे दविए वीरियसंपन्ने देवेहिंसेनामं कयंसमणेभगवंमहावीरे३ व्याप श्रमणोभगवान्महावीरः काश्यपगोत्रस्तस्यत्रीणिनामानि एवं आख्यायंते अधीयंतेवा तद्यथा मातृपितृसत्कंनामवर्द्धमानइति १ सहसमुइयाए समणे सहभाविनी समुदिता रागद्वेषाभावः तया श्राम्यतीति श्रमणस्तपोनिधिः अमूचरखेदतपसोरितिवचनात् २ तथाभयमकस्मात्सेरवं

५ कल्पल·

सिंहादिभयं तयोर्विषये अचलो निःप्रकंप स्तद्गोचरत्वात् परीषहाः क्षुत्पिपासादयो द्वाविंशतिः उपसर्गादि
व्यादिभेदेन षोडश तान् क्षांत्या क्षमते न तु असमर्थतया यः पुनः प्रतिमानां भद्रादीनां एकरात्रिक्यादीनां वा तद्
भिग्रहविशेषाणां वा पालकः पारगो वा पुनः धीमान् ज्ञानचतुष्टयवान् पुनः अरतिरत्योः सहः समर्थः तन्निग्रहे
क्षमः पुनर्द्रव्यं तद्गुणभाजनं द्रव्यं च भव्ये इति वचनात् रागद्वेषरहित इति द्रव्यः पुनः वीर्यसंपन्नः तस्य सिद्धिग
मने निश्चितेपि तपश्चरणादौ प्रवर्त्तनात् अतो महावीर इति नाम देवैः कृतं ३ अथ भगवान् किंचिन्न्यूनाष्टवर्षीयो
जातः परं क्रीडशो दिव्यरूपधारी ज्ञानत्रयसहितः ध वलदंतपंक्तिः पद्मगर्भगौरवर्णः सुगंधः श्वासोच्छ्वासः
देवमनुष्यैः परिवृतः एकदा बालैः सह तिंदूसकेन क्रीडाविशेषेण लोके आमलकीक्रीडा इति प्रसि
द्धेन अरमत तत्स्वरूपं चेदं बहवो बाला मिलंति तेषां मध्ये एको वामटंकाधस्मात् लकुटं बलात्
निक्षिपति अन्ये च सर्वेपि द्रुतं समीपवर्त्तिवृक्षस्योप रि चटंति एकस्तं लकुटं लात्वा आगत्य वृक्षाधोवर्त्ति
धूलिपुंजोपरि रोपयित्वा वृक्षोपरि चटतां चटितानां म ध्ये यं हस्तेन पादादौ स्पृशति स हारितः अथ च उप
रि चटितानां मध्ये कोपि अकस्मादनीर्य तं लकुटं गृह्णाति तदा आरूढो जितः प्राक्तनः पुनर्हारितः जेता च हा
रितपृष्ठौ चटित्वा संकेतितं स्थानं याति एतस्यां क्रीडायां जायमानायां इंद्रेण सभामध्ये प्रोक्तं भो देवाः अद्य श्री
महावीरस्य बालत्वेपि यादृक् निर्भीकत्वं च वर्त्तते तादृक् कुत्रापि नास्ति तत एको देवस्तद्वचनमश्रद्दधानो
बालरूपं विधाय क्रीडनवृक्षं महाभुजंगमेन बुध्ने अवेष्टयत् तं च महाभयंकरं फूत्कुर्वंतं सर्पं दृष्ट्वा सर्वेपि ३८
बाला नष्टा महावीरेण निर्भीकेण गृहीत्वा रज्जुवद्दूरे उच्छालयित्वा निःक्षिप्तः पुनः सुरश्चिंतयति इत्थं जि

तो न भीतः अन्यथा त्रासयिष्यामि अत्रांतरे श्रीवीरस्तिंदूसकक्रीडां करोति तत्र सोपि सुरो बालरूपं कृत्वा कु
मारैः समं क्रीडति सुरबालो हारितो रममाणस्तत्स्कंधे वाहनीकृत्य चचाल हृष्टोपरि चटितो भगवान् ततः स सुरबा
लो वेत्तालरूपं कृत्वा सप्ततालदेहमानः सन् भगवत्त्रापणार्थं वर्द्धितुं प्रवृत्तः ततो भगवता ज्ञानेन तत्स्वरूपं
ज्ञात्वा वज्रमयमुष्टिप्रहारो दत्तः ततो मायी देवश्चारारटिं मुक्त्वा शशकवच्छरीरं संकुच्य पतितः ततो भगव
द्बलादिगुणरंजितश्चलत्कुंडलाभरणो भूत्वा भगवंतं प्रणिपत्य करकमलयुगलं संयुज्य एवमस्तावीत् हे स्वामि
न् यादृशस्त्वं सभामध्ये इंद्रेण वर्णितस्ततोप्यधिकतर रः त्वमसि दृष्टः वारं २ निजापराधं क्षामयामि मादोर
णम्य देवः स्वस्थानं प्राप्तः इति आमलकीक्रीडाक रणं॥ अथ भगवतो लेखशालाकरणं कथ्यते॥ तस्य
विस्तारस्त्वयं शुभदिवसे शुभमुहूर्त्ते वर्द्धमान पितरौ समस्तमित्रज्ञातिकुटुंबादीन् भोजनव
स्त्राभरणकेसरछंटनतिलककरणादिना सत्कु र्वंति पुनर्लेखशालिकानां दानार्थं वरसोला साक
रखांड गुंदवडा द्राष पारिक टोपरा पच्चुर सिंघो डा अखोड बदाम चारउली चारबी फलहलि नालेर
सोपारी बीजोरा सोनानाषमिया रतनना वरतणा रूपानी पाटी कलमफल पानना बीडा प्रमुखनानाविधव
स्तूनि सार्द्धं लात्वा भगवतः स्नानं कारापयित्वा प्रधानवस्त्राणि परिधाप्य सर्वरत्नाभरणानि मुकुटकुंडल
तिलकादीनि यथास्थाने परिधाप्य हस्तिस्कंधे भगवंतं निवेश्य मस्तकधृतछत्र वीज्यमानचामर गीयमान
गीत दीयमानदान वाद्यमानविविधनिर्घोष नृत्यनाटकादि विच्छित्त्या उपाध्यायशालाद्वारदेशे भगवान् आ
नीतः तावता पाठकब्राह्मणेन चिंतितं इतः पूर्वं मम शालायां सामान्यछात्राः पाठनाय आगता परमद्य उदा

५ कल्पल. उत्सवोमहसमेत स्वतो गर्वेण उच्चैरासने स्थापयित्वा स्वयं विविधवस्त्राणि दिव्याभरणानि परिधाय उपविष्टः
अत्रांतरे इंद्रस्य आसनं चलाचलं जातं किंवत् वातकंपितध्वजावत् पुनः समुद्रसंक्रांतचंद्रवत् पुनः मत्तहस्ति
कर्णवत् पुनः कुलटाचित्तवत् पुनर्मूषातापितहेमवत् तत इंद्र अवधिना ज्ञात्वा आगत्य पित्रोः पुरः प्राह अ
हो भवादृशानां मोहो भगवंतो विनापि अध्ययनं विद्वांसो भवंति नहि आम्रे तोरणबंधनं नापि सुधायाः माधु
र्यकरणं न च सरस्वत्याः सलेपावनं नहि चंद्रस्य धवलीकरणं संभवति परं भवंतु मातापितरौ मोहिनो रक्षाः ह
र्षाः ततः इंद्रो वृद्धब्राह्मणरूपं कृत्वा भगवंतं उच्चै- र्योग्यासने उपवेश्य उपाध्यायमनोगतान् संदेहान्
भगवंतं पृच्छति स्म भगवांश्च तेषां उत्तराणि दत्त- वान् उपाध्यायश्च कथ्यमानानि उत्तराणि शृण्व-
न् एवं अचिंतयत् अहो एते व्याकरणसंदेहा मम बाल्यावस्थातः आरभ्य अभूवन् परं न के-
नापि पंडितेन भग्ना अनेन बालेनापि भग्नाः अहो । एतस्य बालस्य ज्ञानमिति आश्चर्ये क्रियमाणे इं-
द्र उपाध्यायं पंडितं प्राह भो पंडित बालं मा जानीहि अयं त्रिभुवनस्वामी ज्ञानत्रयसहितः सर्वज्ञप्रायो
महावीरदेवः इंद्रेण दशधा सूत्राणि पृष्टानि संज्ञासूत्र १ परिभाषासूत्र २ विधिसूत्र ३ नियमसूत्र ४ प्रति-
षेधसूत्र ५ अधिकारसूत्र ६ अतिदेशसूत्र ७ अनुवादसूत्र ८ विभाषासूत्र ९ निपातसूत्र १० भगवता च एतेषां
दशानां व्याकरणसूत्राणां प्रत्युत्तराणि दत्तानि तदा तत्र स्थाने इंद्रव्याकरणं जातं ततः उपाध्यायविप्रेणापि ७९
भगवान् महावीरदेवो गुरुः कृतः ततो विप्रस्य बहुदानादिना संतोषं कृत्वा भगवान् तथैव विभूत्या स्वगृहे ग-
तः इंद्रोपि भगवंतं प्रणम्य स्वस्थानं गतः इति लेखशालाकरणं ॥ अथ भगवतो विवाहकरणं ॥ अथ यदा भगवा-

न् यौवनावस्थां प्राप्तः भोगसमर्थो जातः तदा प्रसेनजित्सामंतनृपस्य पुत्री यशोदां मातापितृभ्यां परिणायि-
तः तया सह सुखमनुभवतो भगवतः प्रियदर्शनानाम्नी पुत्री जाता सा निजभागिनेयस्य जमालेः परिणायि-
ता भगवतश्च अष्टाविंशतिवर्षाणि जातानि तदवसरे मातापितरौ देवलोकं गतौ आवश्यकाभिप्रायेण च-
तुर्थदेवलोकं श्रीआचारांगाभिप्रायेण तु श्रीपार्श्वनाथश्रावकत्वात् अच्युतद्वादशं देवलोकं गतौ अथ भग-
वतः पितृप्रमुखकुटुंबस्य नामानि प्राह ॥ तत्र सूत्रं ॥ समणस्स भगवओ महावीरस्स पिया कासवगुत्तेणं तस्स
तओ नामधिज्जा एवमाहिज्जंति तं सिद्धत्थेइ वा सिज्जं- सेइ वा जसंसेइ वा ३ १ समणस्स० महा० माया वासि-
ट्ठगुत्तेणं तीसे तओ नामधिज्जा एवमाहिज्जंति तं ति- सलाइ वा १ विदेहदिन्नाइ वा २ पियकारिणीइ वा
३ २ समणस्स भ० महा० पित्तिज्जे सुपासे ३ जि- ट्ठे भाया नंदिवद्धणे ४ भगिणी सुदंसणा ५ भारि-
या जसोदा कोडिन्नागुत्तेणं ६ समण० महा० धू- या कासवगुत्तेणं तीसे दो नामधिज्जा एवमाहिज्जं-
ति तं अणुज्जाइ वा १ पियदंसणाइ वा २ ७ समण- स्स० महा० नत्तुई कोसियागुत्तेणं तीसे दो नामधिज्जा
एवमाहिज्जंति तं सेसवईइ वा १ जसवईइ वा २ ८ व्या० भगवतः पिता काश्यपगोत्रीयस्तस्य त्रीणि नामानि
सिद्धार्थः १ श्रेयांसः २ यशस्वी च ३ भगवतो माता वासिष्ठागोत्रीया तस्या अपि त्रीणि नामानि त्रिशला १ विदेह-
दिन्ना २ प्रीतिकारिणी ३ च पुनर्भगवतः पितृव्यः सुपार्श्वः ज्येष्ठो भ्राता नंदिवर्द्धनो भगवतो भगिनी सुदर्शना
जमालेर्माता भगवतो भार्या यशोदा कौडिन्यगोत्रीयाः भगवतः पुत्री काश्यपगोत्रीया तस्या नामद्वयं
अनुद्या प्रियदर्शना च सा जमालेर्दत्ता भगवतो दौहित्री कौशिकगोत्रीया तस्या नामद्वयं शेषवती

यशोवतीचर अथ भगवान् कीदृशो जातस्तत्र सूत्रं॥ समणे भगवं महावीरे दक्खे दक्खपइण्णे पडिरू
वे आलीणे भद्दए विणीए नाए नायपुत्ते नायकुलचंदे विदेहे विदेहदिन्ने विदेहजच्चे विदेहसूमाले
तीसं वासाइं विदेहंसि कट्टु अम्मापिईहिं देवत्तगएहिं गुरुमहत्तरएहिं अब्भणुन्नाए समत्तपइन्ने इ
ति व्याख्या दक्षः कलासु दक्षा प्रतिज्ञा तन्निर्वाहकतया पट्वी प्रतिज्ञा यस्य सः प्रतिरूपस्तु गुणसंक्रमणे द
र्पणत्वात् आलीनः सर्वगुणैराश्लिष्टो गुप्तेंद्रियो वा भद्रकः सरलः भद्रो वृषभस्तद्वद्गच्छतीति भद्रगो भद्रदो वा
कल्याणदायित्वात् विनीतो विनयवान् सुशिक्षितो वा जितेंद्रियो वा विनयो हि इंद्रियजयस्तत्सहि
तश्च शास्त्रं पवित्रमर्हति तस्य च पावकाः प्रसीदंति ततश्च सर्वश्रियो भवंतीति ज्ञातः प्रख्यातः ज्ञा
तः सिद्धार्थस्तस्य पुत्रो ज्ञातपुत्रः न च पुत्रमात्रेण काचित् सिद्धिः स्यादत आह ज्ञातकुलचं
द्रः विदेहः प्रथमसंहननसंस्थानोपेतत्वात् अथ॥ वा दिग्धीकृत उपलेपे विगतो देहो लेपो यस्मात्स वि
देहो भोगेष्वपि वैराग्यवत्वात् विदेहदिन्ना त्रिशला तस्या अपत्यं वैदेहदिन्नः संस्कृते तु विदेहदत्ताया
अपत्यं वैदेहदत्त इति तस्यापत्यं वीरस्य पुत्रत्वात् अभिधानाय आह विदेहजच्चेति भीमो भीमसेन इतिन्यायात् विदे
हा त्रिशला तस्यां जाता विदेहजा अर्चा शरीरं यस्य स विदेहजार्चः अथवा विदेहोऽनंगः कंदर्पः स यात्यपी
डयितव्यो यस्य स विदेहयात्यः विशेषेण दीप्यते लिप्यते पापैर्डीवोऽस्मिन्निति विदेहो गृहवासः तत्रैव सु ८८
कुमालो न तु नर्त्तितकालचक्राद्युपसर्गसहने तु वज्रकर्कशत्वात् त्रिंशद्वर्षाणि गृहवासे कृत्वा स्थित्वा तत्र भ
गवान् अष्टाविंशतिवर्षांते मातापित्रोर्देवलोकं गतयोः आवश्यकानुसारेण चतुर्थदेवलोकं आचारांगानु

सारेण श्रीपार्श्वनाथस्य श्रावकत्वात् अनशनेन द्वादशदेवलोकं प्राप्तयोः प्रतिज्ञा संपूर्णाशीत्यादीक्षायामुद्यतो ज्ञा
तस्तदा नंदिवर्द्धनेन ज्येष्ठभ्रात्रा शोकं देवं क्षते क्षारं मा क्षेप्सीः पित्रोर्विरहार्त्तस्य मम दुस्सहस्तव विरह इति
स्थीयतां त्वया वर्षद्वयं ततः पितृस्थानीय ज्येष्ठभ्रातृनंदिवर्द्धनस्याग्रहेण भावमुनीभूय वस्त्रालंकारविभू
षितोपि वैराग्यान्निरवद्यवृत्तिः सन् तस्थौ ततो गुरुर्ज्येष्ठभ्राता नंदिवर्द्धनः महत्तरकाश्च राज्यप्रधानास्तैरभ्य
नुज्ञातो दत्तार्थदत्तानुमतिः समत्तपइन्ने समाप्ता पूर्णीभूता प्रतिज्ञा नाहं समणो होहं अम्मापियरंमि जीवं
ते इत्यादि रूपा यस्य स एतस्मिन्नवसरे स्वामिष्टहस्ता तानंदिवर्द्धनो राज्ये प्रधानैः स्थापितः अथ यदा भ
गवान् जातो तदा लोके एवं प्रसिद्धिर्जाता तयत् ऋषभमहावीरश्च एदशः स्वप्नसूचितो जात
इति हेतोरयं चक्रवर्ती भविष्यति ततएनां प्रसिद्धिं श्रुत्वा स्वस्वमातापितृभिः स्वस्वकुमा
रपुत्राः श्रेणिकचंडप्रद्योतनादयो भगवत्सेवार्थं मुक्ता अभूवन् भगवति च गृहस्थावासे घोरा
नुष्ठानं कर्त्तुं प्रवृत्ते सति नायं चक्रवर्ती भविष्यतीति स्वगृहे गताः॥ अथ भगवतो घोरानुष्ठाने प्र
क्रियमाणे वर्षमेकं जातं एतावता एकोनत्रिंशत्तमे वर्षे व्यतीते किंजातं॥ तत्र सूत्रं॥ पुणरवि लोगंतिएहिं
जीयकप्पिएहिं देवेहिं ताहिं इट्ठाहिं कंताहिं पियाहिं मणुन्नाहिं मणोरमाहिं उरालाहिं कल्लाणाहिं सिवा
हिं धन्नाहिं मंगल्लाहिं मियमहुरसस्सिरीयाहिं हियगमणिज्जाहिं हिययपल्हायणिज्जाहिं गंभीराहिं
अपुणरुत्ताहिं वग्गूहिं अणवरयं अभिनंदमाणा य अभिथुव्वमाणा य एवं वयासी जय जय नंदा जय
जय भद्दा भद्दं ते जय जय खत्तियवरवसहा बुज्झाहि भयवं लोगनाहा पवत्तेहि धम्मतित्थं हियसुहनिस्से

५
कल्पल·

यसकरं सव्वलोए सव्वजीवाणं भविस्सइत्तिकट्टु जयजयसद्दं पउंजंति॥ व्या० पुनरपीति विशेषोद्योत
न एकंताव त्स्वयमेव समाप्तप्रतिज्ञो विशेषतश्च लोकांतिकदेवैर्बोधित इति गम्यं तृतीयायां ऽन्यथानु
पपत्तेः लोकांते भवा लोकांतिका ब्रह्मलोकवासिनः सारस्वताद्याः एकांतसम्यग्दृष्टयः स्थानांगवृत्तौ लो
कांते वा उदयिकभाव लोकावसाने भवा अनंतरभवे मुक्तिगमनात् इत्युक्तत्वात् एकावतारिणः क्व
चित्तु संग्रहण्यवचूर्णौ एते च नियमेन अष्टमे भवे सिध्यंति इत्युक्तं न च भगवांस्तेषामुपदेशमपेक्षते स्व
यंबुद्धत्वात् जीतमवश्यमाचरणीयं कल्पितं कृतं यैस्ते जीतकल्पिता जीतेन अवश्यंभावेन कल्पइ
ति जीतकल्पः स एषामस्तीति जीतकल्पितास्ते :विभक्तिव्यत्ययात् ते लोकांतिकास्ताभिरिष्टा
दिभिः पूर्वव्याख्याताभिर्गीर्भिः वाणीभिः गंभीराभिर्महाध्वनिभिः अभिनंदंताः भिः का
मिप्रियाः मधुराः गंभीराः गाढिताः इति पाठ स्तत्र उरवधार्यमपूर्वश्रोतृन् ग्राहयंति यास्ता
ग्राहिकास्ततः पदचतुष्टयस्य कर्मधारयः अभ वरं तं भगवंतं अभिनंदयंतः समृद्धिमंतं आचक्षा
णाः अभिष्टुवंतश्च गुणोत्कीर्त्तनं कुर्वंत एवमवादिषुर्व्यजिज्ञपयन् हे भगवन् त्वं जय २ जयं लभस्व।
भद्रं ते ऽस्तु हित्वं नंदति समृद्धो भवति इति नंद आमंत्रणे दीर्घत्वं प्राकृतत्वात् अथवा जयत्वं जगन्नंद भुवन
समृद्धिकारक जयं लभस्व एवं भवतां भद्रं कल्याणवान् कल्याणकारी वा भद्रं ते भवतु इति शेषः हे क्षत्रिय
वरवृषभ क्षत्रियाणां मध्ये अत्यंतश्रेष्ठ हे भगवन् त्वं बुध्यस्व धर्मतीर्थं धर्मविधानं तीर्थं प्रवचनं प्रवर्त्तय।
किं० धर्मतीर्थं हितं पथ्यवत् सुखं शर्म शुभं वा कल्याणं निःश्रेयसं मोक्षस्तस्य करं केषां सर्वलोके सर्वजी ८१

वानां सूक्ष्मादीनां रक्षोपदेशदानादिना भविष्यतीति कथयित्वा जयजयशब्दं प्रयुंजते अथ भगवान् लोकांति
कदेवप्रतिबोधात् पूर्वमपि कीदृश आसीत्तत्र सूत्रं॥ पुव्विंपिणं समणस्स भगवओ महावीरस्स माणुस्सगाओ गिह
त्थधम्माओ अणुत्तरे आभोइए अप्पडिवाई नाणदंसणे हुत्था तएणं समणे भगवं महावीरे तेणं अणुत्तरेणं आ
भोइएणं नाणदंसणेणं अप्पणो निक्खमणकालं आभोएइ व्या० श्रमणस्य भगवतो महावीरस्य पूर्वमपि मि
नुष्योचिता गृहस्थधर्मा द्विवाहादेः अनुत्तरं सर्वोत्कृष्टं परमावधेः किंचिन्न्यूनं आभोगिकं आभोगप्रयोज
नं अप्रतिपात्या केवलोत्पत्तेरनिवर्त्तकं अवधिज्ञानं अवधिदर्शनं च आसीत् तेन कारणेन भगवान्
तेन अनुत्तरज्ञानदर्शनेन आत्मनो निःक्रमणकालं दीक्षासमयं आभोएइ विलोकयति वि
लोक्य च किं कृतवान् तत्र सूत्रं॥ आभोएत्ता चिच्चा हिरण्णं चिच्चा सुवण्णं चिच्चा धणं चिच्चा
रज्जं चिच्चा रट्ठं एवं बलं वाहणं कोसं कोट्ठागारं। चिच्चा पुरं चिच्चा अंतेउरं चिच्चा जणवयं चिच्चा
विउलधणकणगरयणमणिमुत्तियसंखसिलप्पवालरत्तरयणमाइयं संतसारसावइज्जं वि
च्छड्डित्ता विगोवित्ता दाणं दायारेहिं परिभाइत्ता दाणं दाइयाणं परिभाइत्ता व्या० विलोकयित्वा त्य
क्त्वा हिरण्यादीनां पदानां व्याख्या पूर्ववत् ज्ञेया विच्छर्द्दित्वा विशेषेण त्यक्त्वा विगोप्य गुप्तं भक्त्वा का
शीकृत्य दानातिशयात् अथवा विगोप्य गुप्तिगोपनं कुत्सनयोः कुत्सनीयमेतदस्थिरत्वादित्युक्त्वा दा
नं दीयते इति दानं धनं दायाय दानार्थं आकंक्षंति इत्युक्ति अथवा परि दायाराः याचकास्तेभ्यः परि
भाइत्ता परिभाज्य विभागेन दत्वा अथवा दायः स्वस्व सपैदनं परिभाज्य दापयित्वा दायो भागोऽस्ति

५
कल्पल·

एषां दायिका गोत्रिकास्तेभ्यो दानं धनविभागं परिभाज्य विभागशो दत्वा तत्र भगवता वर्षं यावत् क्रिय
द्दानं दत्तं तदाह प्रातर्भोजनकालं यावत् ज्ञाता इत्यनुसारेण प्रभातात् इकं भोजनकालं यावत् प्रहरद्व
यादिकमित्यर्थः चत्वारिंशद्भिः रेकः सुवर्णः स्यात् इति विक्रमादित्यप्रबंधे अष्टौ हाटककोट्य इत्यत्र व्याख्या
तत्वात् एका सुवर्णानां कोटिः अष्टौ लक्षाः प्रत्यहं दीयते वरद वरं २ इति वरवरिका त्रिकचतुष्कचत्वरादिषु
स्थानेषु घोष्यते यः यत् याचते तत्सर्वं इंद्रादेशात् देवा आनीय पूरयंति वार्षिकदानमानं यथा त्रीणि श
तानि अष्टाशीतिश्च कोट्यः अशीतिर्लक्षाश्च सुव र्णानां अथ यदा भगवान् दीक्षाया मुद्यतो जातस्त
दा नंदिवर्द्धनो राजा इंद्राद्याश्च देवाः कीदृशं दीक्ष ामहोत्सवं कुर्वंति तमाह॥ पूर्वं नंदिवर्द्धनो राजा
अष्टोत्तरसहस्र १००८ सुवर्णमय १ रूप्यमय २ मणिमय ३ सुवर्णरूप्यमय ४ सुवर्णमणिम
य ५ रूप्यमणिमय ६ स्वर्णरूप्यरत्नमय ७ मृन्मया न् कलशान् निःक्रमणाभिषेकसामग्रीनिमित्तं
कारयंति एवमिंद्रा अपि आभियोगिकदेवपार्श्वात् सुवर्णादिकलशान् तावंतः अष्टधा कारयंति ते
दिव्याः कलशा नंदिवर्द्धनकारितकलशेषु दिव्यानुभावेन प्रविष्टास्ततो ऽतीव नंदिवर्द्धनकलशाः शोभंते स्म
ततो नंदिवर्द्धनो राज्ञा भगवंतं स्वर्णसिंहासने पूर्वाभिमुखं निवेश्य देवानीतक्षीरोदनीरैस्तीर्थमृत्तिकाभिः स
र्वकषायैश्च अभिषेकं करोति एवं इंद्राद्या अपि देवास्तैः स्वकीयैः कलशैरभिषेकं कृतवंतः ततो देवा भृं ८२
गारदर्पणादीनि हस्ते गृहीत्वा भगवदग्रे जय २ शब्दं प्रयुंजानास्तिष्ठंति ततो देवसंबंधिचंदनेन गात्रमनु
लिप्तं कल्पवृक्षपुष्पमालाः परिधापिताः एकं श्वेतवस्त्रं परिधापितं यस्य पल्लवे लक्षा ततो मुकुटतिलककुंड

लकेयूरहारकटककटिसूत्रमुद्रिकादिसर्वाभरणैः सर्वशरीरं विभूषितं ततो नंदिवर्द्धनेन राज्ञा चंद्रप्रभानाम्नी
शिबिका आनीय स्थापिता सा कीदृशी इत्यादि अनेकस्तंभशतसंनिविष्टा मणिकनकविचित्रा पंचाशद्धनुर्दी
र्घा पंचविंशतिधनुर्विस्तीर्णा षट्त्रिंशद्धनुरुच्चा एतस्याः शिबिकाया मध्ये देवानीतशिबिका प्रविष्टा नंदि
व्यानुभावेन अतीव सुंदरा जाता तस्याः शिबिकाया मध्ये स्वर्णसिंहासनं स्थापितं तत्र भगवान् पूर्वाभिमुख
ः उपविष्टः प्रभोर्दक्षिणतः कुलमहत्तरिका हंसलक्षणपटशाटिकामादाय तिष्ठति वामपार्श्वे प्रभोरंबधा
त्री उपकरणमादाय तिष्ठति पृष्टे च एका स्फारसा रशृंगारा तरुणी स्त्री धवलछत्रं मस्तके धृत्वा तिष्ठति
ईशानकोणे च एका स्त्री गंगानीरभृतं शृंगारं गृही त्वा तिष्ठति आग्नेयकोणे तु एका स्त्री कनकदंड
मणिविचित्रं व्यजनं लात्वा भद्रासने निषीदति ततः पूर्वं तां शिबिकां यावत् नंदिवर्द्धनराजादि
ष्टाः हृष्टाः पुरुषा उत्पाटयंति अत्रांतरे शक्रः शि बिकाया दाक्षिणात्यां उपरितनीं बाहामुत्पाटय
ति १ एवं ईशानेंद्र उत्तरामुपरितनीं बाहां २ चमरें द्रो ऽधस्तनीं दाक्षिणात्यां बाहां ३ बलींद्रो ऽधस्तनी
मुत्तरां बाहां ४ शेषाः भवनपति ५ व्यंतर ६ ज्योतिष्क ७ वैमानिकेंद्राः ८ यथायोग्यं शिबिकामुत्पाटयंति
ततः शक्रेशानवर्जास्तां शिबिकामुद्वहंति शक्रेशानौ तु चामराभ्यां वीजयतः तदवसरे देवा दुंदुभिनाद
यंति स्म ६ पंचवर्णानि पुष्पाणि सर्वत्र विक्षिपंति स्म आगच्छद्भिर्देवैर्विविधैर्गगनतलं कीदृशं शोभते स्म यथा
कुसुमितं वनषंडं १ यथा वा शरत्काले पद्मसरः २ अथवा यथा अतसीवनं कुसुमितं ३ अथवा यथा चंपक
वनं तिलकवनं पुष्पितं नंदनवनं वा शोभते पुनरपि स्त्रियो निजर कर्तव्यं स्वकीयं २ व्यापारांश्च मुक्त्वा दृर्यं

निर्घोषं कृत्वा कौतुककौतुकाविकलाः सन्तो भगवद्विलोकनाय समागताः ॥ पुनर्भगवतो दीक्षामहोत्सव
विच्छित्तिं आह भगवति शिबिकारूढे प्रवृत्ताग्रे गंतुं प्रवृत्ते तस्य प्रथमतया रत्नमयानि अष्टौ मंगलानि पुर
तः क्रमेण प्रस्थितानि तद्यथा स्वस्तिकः १ श्रीवत्सः २ नंद्यावर्त्तः ३ वर्द्धमानः ४ भद्रासनं ५ कलशः ६
मत्स्ययुग्मं ७ दर्पणश्च ८ तदनंतरं आलोकदर्शनीयानि क्रमेण पूर्णकलशः शृंगार चामराणि ततो गग
नतलमुल्लिखंती लहलहायमाना वैजयंती तदनंतरं विमलवैडूर्यरत्नमयं प्रलंबमानकोरंटमाल्यदा
मशोभितं चंद्रमंडलसदृशं छत्रं तदनंतरं मणिक नकविचित्रं पादपीठसहितं सिंहासनं तदनंतरं
१०८ आरोहणरहिता तुरंगमाः तदनंतरं १०८ प्रधानकुंजराः तदनंतरं १०८ घंटापताकानां
दीघोष नानाप्रकारप्रहरणैः भृता रथाः तद नंतरं १०८ सुंदररूपवंतः पुरुषाः तदनंतरं
हयानीकं ततो गजानीकं ततो रथानीकं ततः प दात्यनीकं ततः आकाशतलमुल्लिखन् लघुप
ताकासहस्रमंडितो योजनसहस्रप्रमाणो रत्नमये महान् उच्चैर्महेंद्रध्वजः ततो बहवः खड्गग्राहाः
कुंतग्राहाः पीठग्राहाः फलकग्राहाः ततो हासकारकाः नर्मकारकाः कांदर्पिकाः उग्रा भोगा राजन्याः
क्षत्रिया राजानो मांडलिका मंत्रिणो महामंत्रिणः श्रेष्ठिनः सार्थवाहा देवा देव्यश्च सर्वेपि अग्रे गच्छंतो भग
वतो जय २ शब्दं प्रयुंजते भगवतः पृष्ठे हस्तिस्कंधारूढः कोरंटमाल्यदामसहितेन ध्रियमाणछत्रेण वि
राजमानः श्वेतचामराभ्यां वीज्यमानश्च तुरंगसेनापरिवृतो नंदिवर्द्धनो राजा अनुगच्छति अथ भगवान्
कदा कया च विच्छित्त्या नगरमध्ये निस्सरति तत्सूत्रं तेणं कालेणं २ समणे भगवं महावीरे जेसे हेमंता ८३

णं पढमे मासे पढमे पक्खे मग्गसिरबहुले तस्स णं मग्गसिरबहुलस्स दसमीपक्खेणं पाईणगामिणीए
छायाए पोरिसीए अभिनिविट्ठाए पमाणपत्ताए सुव्वएणं दिवसेणं विजएणं मुहुत्तेणं चंदप्पभाए सिबिया
ए सदेवमणुयासुराए परिसाए समणुगम्ममाणमग्गे संखियचक्कियनंगलियमुहमंगलियवद्धमाणपूसमा
णघंटियगणेहिं ताहिं इट्ठाहिं कंताहिं पियाहिं मणुन्नाहिं मणामाहिं उरालाहिं कल्लाणाहिं सिवाहिं ध
न्नाहिं मंगल्लाहिं मियमहुरसस्सिरीयाहिं वग्गूहिं अभिनंदमाणा अभिथुव्वमाणा य एवं वयासी जय
२ नंदा जय २ भद्दा भद्दं ते अभग्गेहिं नाणदंसणच रित्तेहिं अजियाइं जिणाहिं इंदियाइं जियं च पा
लेहि समणधम्मं जियविग्घोवि य वसाहि तं देव सिद्धिमज्झे निहणाहि रागदोसमल्ले तवेणं धिइ
धणियबद्धकच्छे मद्दाहि अट्ठकम्मसत्तू झाणे णं उत्तमेणं सुक्केणं अप्पमत्तो हराहि आराह
णपडागं च वीर तिलुक्करंगमज्झे पावय वितिमिरमणु त्तरं केवलवरनाणं गच्छय मुक्खं परं पयं जिणवरो
वइट्ठेण मग्गेणं अकुडिलेणं हंता परीसहचमुं जय २ खत्तियवरवसहा बहूइं दिवसाइं बहूइं पक्खाइं
बहूइं मासाइं बहूइं उऊइं बहूइं अयणाइं बहूइं संवच्छराइं अभीए परीसहोवसग्गाणं खंतिखमे
भयभेरवाणं धम्मे ते अविग्घं भवउ त्तिकट्टु जय २ सद्दं पउंजंति ॥ व्या० ॥ तस्मिन् काले तस्मिन् समये यो हेमंत
स्य ऋतोः प्रथमो मासः प्रथमः पक्षो मार्गशीर्षबहुलः एतावता मार्गशीर्षमासस्य कृष्णदशमीदिवसे पाईणगा
मिणीए छायाए पूर्वदिग्गामिन्यां छायायां पोरिसीए पौरुष्यां पाश्चात्यायां अभिनिर्वृत्तायां जातायां प्रमा ×चतुर्थप्रहरे×
णप्राप्तायां सुव्रते दिवसे विजये मुहूर्ते चंद्रप्रभायां शिबिकायामारूढमिति गम्यं सदेवैर्मनुजैर

×कोटिप्राप्तायां अथ नागप्राप्तायां ×२

५
कल्पल·

सुरैर्वर्तितया सा सदेवमनुजासुरा तया परिषदा जनसमुदायेन समनुगम्यमानं अनुव्रज्यमानं भगवंतं
अग्गेति अग्रे भगवतः अग्रतो शांखिकाद्यैः परिवृतं तत्र शांखिकाः शंखदनगर्त्तशांखहस्ता मंगलकारिणः
शंखवादका वा चक्रिकाः चक्रप्रहरणहस्ताः कुंभकारतैलिकादयो वा लांगलिकाः गलावलंबितस्वर्ण
दिमयहलाकारधारिणो भट्टविशेषाः कर्षका वा मुखमांगलिकाः मुखे मंगलं येषां ते मुखमांगलिकाः
मंगलपाठकाः वर्द्धमानाः स्कंधारोपितनराः पुष्पमाणा मागधाः उरोदत्तस्थानीया मान्या वा घंटया चरं
तीति घांटिकाः राउलिकाः तेषां गणास्तैस्ताभिरिष्टादिविशेषणाभिर्वाग्भिरभिनंदंतो भिष्टुवंतश्च एवं
मातृकुलमहत्तरादिभ्यस्वजना एवमवादिषुः किं तदाह॥ जयजयेत्यादि प्राग्वत् असंभग्नैर्निरती
चारैर्ज्ञानाद्यैः स्वपलक्षितस्त्वं अजितानि इंद्रियाणि जय वशीकुरु जितं च साध्वापन्नं श्रम
णधर्मं पालय जितविघ्नोपि च त्वं हे देव सिद्धिमध्ये अपि च समुच्चये अत्र सिद्धिशब्देन श्रमणधर्मस्य
वशीकारस्तस्य मध्यं लक्षणया प्रकर्षः तत्र त्वं निरंतरायं तिष्ठ इत्यर्थः अतएव रागद्वेषमल्लौ तपसा बाह्या
भ्यंतरेण साधकतमेन निहत्य निगृह्णाण कीदृशः सन् धिइधणियबद्धकच्छे धृतौ संतोषधैर्यं वा धणियं
अत्यर्थं बद्धकक्षः सन् पुनः अष्टकर्मशत्रून् मर्दय केन ध्यानेन आर्त्तरौद्रप्रतिषेधाय आह उत्तमे
णं उत्तमसा तमोतीतेन शुक्लेन अप्रमत्तः सन् गृहाण च आराधनापताकां हे वीर त्रैलोक्यमेव
रंगमल्लाखवाटकस्तन्मध्ये प्राप्नुहि वितिमिरं अनुत्तरं केवलज्ञानं गच्छ च मोक्षं परमं पदं केन किं कृ
त्वा ऋषभादिजिनोक्तेन मार्गेण रत्नत्रयरूपेण सरलेन अदोषेण मोक्षप्रापकत्वात् हत्वा परीषहचमूं ८४

जय क्षत्रियवरवृषभ ज्ञातक्षत्रियोद्भिपरच मूढंदंति स्तोजसा बहूनि दिवसानि बहून् पक्षान् बहून्
मासान् बहून् ऋतून् हेमंतादीन् बहूनि अयनानि षण्मासानि दक्षिणायनोत्तरायणरूपाणि बहूनि व
र्षाणि यावत् अभीतः परीषहोपसर्गेभ्यः भैरवभयानां क्षांत्या क्षमो न तु असमर्थतादिना तव धर्मे उ
क्तसंयमे अविघ्नं विघ्नाभावो भवतु इति कृत्वा इत्युच्चार्य जय २ शब्दं प्रयुंजते स्वजना एवं पुनर्भ
गवान् कथंविधिना नगरमध्ये निर्गच्छति॥ तत्र सूत्रं॥ तए णं समणे भगवं महावीरे नयणमालासहस्से
हिं पिच्छिज्जमाणे वयणमालासहस्सेहिं अभिथुव्वमाणे२ हिययमालासहस्सेहिं उन्नंदिज्ज
माणे२ मणोरहमालासहस्सेहिं विच्छिप्पमाणे२ कंतिरूवगुणेहिं पिच्छिज्जमाणे२ अंगुलिमालास
हस्सेहिं दाइज्जमाणे२ दाहिणहत्थेणं बहूणं नरनारिसहस्साणं अंजलिमालासहस्सेहिं प
डिच्छमाणे२ भवणपंतिसहस्साइं समइक्कमाणे२ तंतीतलतालतुडियगीयवाइयरवेणं महुरेण
मणहरेणं जयजयसद्दघोसमीसिएणं मंजुमंजुणा। घोसेण य पडिबुज्झमाणे२ सव्विड्ढीए सव्वजुईए स
व्वबलेणं सव्ववाहणेणं सव्वसमुदएणं सव्वायरेणं सव्वविभूइए सव्वविभूसाए सव्वसंभमेणं सव्वपगईहिं सव्व
नाडएहिं सव्वतालायरेहिं सव्वोरोहेणं सव्वपुप्फगंधमल्लालंकारविभूसाए सव्वतुडियसद्दसंनिनाएणं म
हया इड्ढीए महया जुईए महया बलेणं महया वाहणेणं महया समुदएणं महया वरतुडियजमगस
मगप्पवाइएणं संखपणवपडहभेरिझल्लरिखरमुहिहुडुक्कदुंदुहिनिग्घोसनाइयरवेणं कुंडपुरं नगरं मज्झंमज्झे
णं निग्गच्छइ२त्ता जेणेव नायसंडवणे उज्जाणे जेणेव असोगवरपायवे तेणेव उवागच्छइ२त्ता असोगव

रपायवस्स अहे सीयं ठावेइ २ त्ता सीयाउ पच्चोरुहइ २ त्ता सयमेव आभरणमल्लालंकारं ओमुयइ २ त्ता
सयमेव पंचमुट्ठियं लोयं करेइ २ त्ता छट्ठेणं भत्तेणं अपाणएणं हत्थुत्तराहिं नक्खत्तेणं जोगमुवागएणं एगं दे
वदूसमादाय एगे अबीए मुंडे भवित्ता अगाराओ अणगारियं पव्वइए॥ व्या० ततः श्रमणो भगवान्महा
वीरः कीदृशः सन् नगरमध्ये निर्गच्छति नयनमालाः श्रेणिस्थितजननेत्रपंक्तयस्तासां सहस्रैः एवमग्रेपि व
चनमालासहस्रैः वदनमालासहस्रैर्वा अभिष्टूयमानः हृदयमालासहस्रैरभिनंद्यमानः उत्साहबलेन स
मृद्धिं नीयमानो जय जीव नंदेत्यादि पर्यालोचमान मनोरथमालासहस्रैरस्याहं किंकरा भवाम इत्या
दिभिर्जनविकल्पैर्विशेषेण स्पृश्यमानः कांतिरू पगुणैर्हेतुभिः प्रार्थ्यमानो भर्तृतया स्वामितया
वा स्त्रीपुरुषजनेनाभिलष्यमाण इत्यर्थः अं गुलिमालासहस्रैः दाइज्जमाणे त्ति दर्श्यमा
नो दक्षिणेन हस्तेन नरनारीसहस्राणां अंजलिमालासह स्राणि प्रतीच्छन् गृह्णन् भवनपंक्तिसहस्राणि समति
क्रामन् उल्लंघयन् तंत्रीणां गीते गीतमध्ये यद्वादितं वादनं तेन घोषवस्तेन कीदृशेन मधुरेण मनोहरेण
पुनः किंभूतेन जयशब्दघोषमिश्रितेन पुनः किंभूतेन मंजुमंजुना न ज्ञायते कोपि किमपि जल्पतीति अति
कोमलेन वा घोषेण च लोकानां स्वरेण प्रतिबुध्यमानः सावधानीभवन् पुनः सर्वर्द्ध्या समस्तछत्रादिराजचि
ह्नरूपया द्युत्या आभरणादीनां द्युतिर्वा इष्टवस्तुयोगतः तया सर्वबलेन बलं हस्त्यश्वरथपदातिरूपं
चतुरंगसैन्यं सर्ववाहनेन वाहनं करभवेसरशिबिकाशकटयानादिसमुदायः पौरादिमेलापके
न सर्वादरेण सर्वौचित्यकृत्यकरणेन सर्वविभूत्या विभूतिः संपत् तया सर्वविभूषया विभूषा शोभा

तया सर्वसंभ्रमेण संभ्रमः प्रमोदकृतौत्सुक्यं सर्वसंगमेन संगमः स्वजनमेलापकः सर्वप्रकृतिभिः प्रकृ
तयोऽष्टादश नैगमादिनगरवास्तव्यलोकास्ताभिः सर्वनाटकैः नाटकादीनि सुगमानि सर्वतालाचरैः स
र्वावरोधेन सर्वपुष्पगंधमल्लालंकारविभूषया व्याख्या प्राग्वत् सर्वतूर्यशब्दसंनिनादेन सर्वतूर्यशब्दा
नां मीलनेन यः संगतो निनादो महाघोषस्तेन अल्पेष्वपि ऋद्ध्यादिषु सर्वशब्दप्रवृत्तिर्दृष्टा इत्यत आह मह
ता इड्ढीए इत्यादि व्याख्या प्राग्वत् महत्या ऋद्ध्या महत्या द्युत्या महता बलेन महता वाहनेन महता समु
दयेन महता वरतूर्ययमकसमकप्रवादितेन पुनः शंखपणवपटहभेरिझल्लरिखरमुखिहुडुक्कदुंदुभिनि
र्घोषनादितरवेण कुंडपुरं नगरं मध्यंमध्येन भूत्वा निर्गच्छति निर्गत्य च यत्रैव ज्ञातखंडवनं उ
द्यानं यत्रैव अशोकवरपादपः तत्रैव उपा गच्छति उपागत्य च अशोकवरपादपस्य अ
धस्तात् शिबिकां ठावेइ स्थिरीकरोति स्थिरीकृत्य च शिबिकातः प्रत्यवरोहति अवतरति उत्तरती
त्यर्थः उत्तीर्य च स्वयमेव आभरणमाल्यालंकारं उम्मु चति अवतारयतीत्यर्थः तदाभरणं कुलमहत्तरि
का हंसलक्षणपटशाटकेन प्रतीच्छति उन्मुच्य च स्वयमेव पंचमुष्टिकं लोचं करोति शक्रश्च हंसलक्षण
पटशाटकेन केशान् प्रतीच्छ्य गृहीत्वा क्षीरसमुद्रे प्रवाहयति तस्मिन्प्रस्तावे शक्रेण वाद्यनिर्घोषो वाद्यमा
नः स्थापितः अंगुलीमूर्ध्वीकृत्य निरोल इति शब्दश्च तदा भगवान् सिद्धानां नमस्कारं कृत्वा सर्वसावद्ययो
गं समुच्चरति तथाहि करेमि सामाइयं सव्वं सावज्जं जोगं पच्चक्खामि इत्यादि अत्रांतरे इति पदं नोच्चरति
तस्य गुरोरभावात् सदैव कल्पत्वाच्च केन तपसा अपानकेन चतुर्विधाहारेण षष्ठेन तपसा उत्तरफाल्गुनीन

॰एकया मुष्ट्या कूर्चस्य चतसृभिः शिरस इति पंचमौष्टिकं लोचं॥=५

५
कल्पलता

हस्तोत्तरेणसहयोगं गते सति एगं एकं देवदूष्यवस्त्रं दिव्यवस्त्रविशेषं इंद्रेण भगवतः स्कंधे अर्पितं तत् आदा
य गृहीत्वा एको रागद्वेषसहायाभावात् अद्वितीय एकाकी एव नतु ऋषभस्य चतुःसहस्रा राज्ञां म
ल्लिपार्श्वौ त्रिभिस्त्रिभिः शतैः वासुपूज्यः षट्शतैः शेषाः एकोनविंशतितीर्थंकराः सहस्रेण समं प्रव्रजि
ताः मुंडो भूत्वा द्रव्यतः शिरःकूर्चलुंचनेन भावतः क्रोधाद्यपनयेन अगारात् गृहात् निःक्रम्येति शेषः अ
नगारितां साधुतां आगमोक्तविधिना प्रव्रजितः श्रमणीभूतः भगवता यदा चारित्रं गृहीतं तदानीमेव
भगवतश्चतुर्थं मनःपर्यवज्ञानं समुत्पन्नं ततः इं द्रादयः सर्वेपि देवाः श्रीमहावीरं वंदित्वा नंदीश्वर
द्वीपे यात्रां कृत्वा स्वस्वस्थानं गताः भगवानपि बंधुव र्गं आपृच्छ्य विहृतः बंधुवर्गोपि भगवंतं वंदित्वा
विविधखिन्नः सन् निवृत्य स्वगृहे गतः अथ भग वान् ततो विहृत्य जनमार्गं त्यक्त्वा पल्लीमार्गे
ण मुहूर्त्तशेषे दिवसे कर्मारग्रामसमीपे रात्रौ का योत्सर्गे स्थितः तत्र एको गोपो दिवसे वृषभान्
वाहयित्वा संध्यायां एतत्पार्श्वे चरंतु इति कृत्वा गोदो हार्थं ग्रामे गतः प्रत्यागतश्च तान् अपश्यन् स्वामि
नं प्राह क्व गता मे वृषभाः ब्रूहि भगवान् मौनित्वात् न ब्रूते ततोऽन्यत्र रात्रौ तेन गवेषिताः परं न दृष्टाः क्वापि
पुनर्भगवत्समीपमागतः तदवसरे वृषभा अपि अन्यत्र भ्रांत्वा २ भगवत्समीपमागताः गोपेन दृष्टाः त
दा गोपेन कुपितं रे पाषंडिन् त्वया ज्ञातं अहमेतान् वृषभान् लात्वा यास्यामि इति प्रच्छन्नं त्वया वृषभा
एतावंतं कालं स्थापिताः भवन् ततो गोपो रुषाक्रांतो दामनं गृहीत्वा यावन्नाथं हंतुमुद्यतस्तावत् अ
वधिना ज्ञात्वा इंद्र आगत्य तं तर्जयामास भो रंक पाश रे सिद्धार्थराजपुत्रं अद्य प्रव्रजितं त्वं न जा ८६

नासीति दूरीकृतः १ ततः इंद्रो भगवंतं प्राह हे स्वामिन् तव प्राक्कृतं कर्म प्रभूतं अस्ति वर्त्तते तेन तव द्वा
दशवर्षाणि यावत् उपसर्गा भविष्यंति तावंतं कालं अहं तान् उपसर्गान् निवारयन् तव वैयावृत्त्यं करो
मि प्रभुः प्राह भो इंद्र न एयं भूयं न एयं भविस्सइ न एयं भवइ जन्नं अरिहंता देविंदस्स असुरिंदस्स वा
निस्साए केवलनाणं उप्पाडिंसु उ सिद्धिं वा वच्चंति अत्रावसरे मारणांतोपसर्गस्य वारणार्थं बिडौजसा सिद्धा
र्थः स्थापितः स्वामिमातृष्वसृपुत्रो व्यंतरः १ इत्युक्त्वा सिद्धार्थनामा व्यंतरो भगवतो मातृष्वस्रेयः समागत्य इंद्रं प्राह
अहं भगवतो वैयावृत्त्यं करोमि ममादेशं देहि ततः इं द्रेणोक्तं त्वया भगवान् न मोच्यः इत्युक्त्वा इंद्रोपि स्वस्था
नं गत इति द्वितीयदिने कोल्लाकसंनिवेशे बहुल ब्राह्मणगृहे भगवता गृहस्थकांस्यपात्रे पायसेन
मधुघृतसंयुक्तेन पारणं कृतं प्रथमपारणकं गृ हस्थपात्रे परमान्नेन चकारेति आगमिकां तद्वा
चो प्रथमं पारणकं सपात्रधर्मज्ञापनार्थं पात्रे एव। विहितवान् इति कल्पकिरणावल्यां देवैश्च पंच दि
व्यानि प्रकटितानि चेलोत्क्षेपः १ गंधोदकपुष्पवृष्टि :२ दुंदुभिनादः ३ आकाशे अहो दानमिति घोषणं
४ सार्धद्वादशकोटिस्वर्णवसुधारावृष्टिश्चेति ५ इयं वसुधारावृष्टिरुत्कृष्टा जघन्या तु सार्धद्वादशल
क्षस्वर्णवृष्टिर्ज्ञेया ततो भगवान् विहृत्य मोराकसंनिवेशं गतः तत्र सिद्धार्थवयस्यो दूइज्जंतक नामा कु
लपतिर्मिलितो भगवता पूर्वस्नेहात् बाहुः प्रसारितः तेनापि कुशलवार्त्ता पृष्टा तत्र एकरात्रिं स्थित्वा प्र
भाते विहारकरणे दूइज्जंतकेन प्रोक्तं हे स्वामिन् अष्टौ मासान् शेषकालेऽन्यत्र भ्रांत्वा वर्षाकाले अत्र
स्थेयमिति भगवता अंगीकृतं ततो भगवान् शेषे कालेऽन्यत्र विहृत्य तत्र मोराकसंनिवेशे आगत्य ए

कस्यकस्यचित्कुलपुत्रस्य अग्रगृहे उटजोऽस्थितः दैवयोगेन मेघवृष्टिर्न जाता तेन गावस्तृणानि भक्षयं
ति भगवान् न निवारयति ततः कुलपुत्रकस्य अप्रीतिर्जाता तदा भगवता अभिग्रहपंचकं गृहीतं
अप्रीतिस्थाने न स्थेयं १ कायोत्सर्गस्थानकं २ मौनं कार्यं ३ पाणौ भोजनं ४ गृहस्थस्य विनयो
न कार्यः ५ इति भगवता च इंद्रेण सुरभिचंदनादिना अनुलिप्तमासीत् दीक्षासमये स च गंधो मासचतु
ष्टयेनापि न गतस्तेन तद्गंधाकृष्टैर्भ्रमरैर्गात्रं कदर्थितं सुंदररूपत्वात् तरुणस्त्रीभिः स्वसंगत्वेन प्रार्थना
कृता तरुणपुरुषैः स्वामित्वेन प्रार्थना कृता एवं भ गवतश्चतुर्मासान् साधिकान् यावत् अनुलो
मप्रतिलोमा उपसर्गा जाताः ॥ अथ भगवान् की दृशो जातः तत्सूत्रं ॥ समणे भगवं महावीरे सं
वच्छरं साहियं मासं जाव चीवरधारी होत्था तेणं परं अचेलए पाणिपडिग्गहिए समणे भग
वं महावीरे साइरेगाइं दुवालसवासाइं निच्चं वोस ट्ठकाए चियत्तदेहे जे केइ उवसग्गा उप्पज्जंति
तं० दिव्वा वा माणुसा वा तिरिक्खजोणिया वा अणुलो मा वा पडिलोमा वा ते उप्पन्ने सम्मं सहइ खमइ ति
तिक्खइ अहियासेइ ११७ व्या० श्रमणो भगवान् महावीरः साधिकमासं संवत्सरं यावत् चीवरधारी दीक्षा
ग्रहणे वामस्कंधे इंद्रसमर्पितवस्त्रधारकोऽभवत् ततः साधिकमासवर्षादूर्ध्वं अचेलको वस्त्रविवर्जित
आसीत् कथमित्युक्ते संबंधमाह भगवता यदा दीक्षा गृहीता तदा इंद्रेण देवदूष्यवस्त्रं भगवतो वा ८७
मस्कंधे स्थापितं ततः पश्चात् भगवतः पितृमित्र सोमदेवो विप्रो महादरिद्रः करद्वयं योजयित्वा दीना
दीनवचनेन श्रीवीरमिति विज्ञपयतिस्म देव कृपानाथ देव परदुःखभंजक हे मम मित्रपुत्र देव दारिद्र्य

लतालवित्र मम मूलतो विज्ञप्तिमवधारय मां च निस्तारय यो मम सहायो मय्येव सह जातो मय्येव संव
र्धितः परिणयनसमयेऽपि मया सहैव मत्पत्नीं परिणीतवान् किं बहुना तं बुद्धेव स्वकर्मप्रकृतिरिव म
मकोटकं क्षणमपि नामुंचत् मम धनार्जननिमित्तं परदेशगमनसमये भणितः हे दालिद्द वियक्ख
ण वत्ताएक्क सुणिज्ज अम्हे देसंतरि चल्लिया तुंहि घरि रहिज्ज १ ततो मया सह आजन्मप्रीतिमुंच
न् दरिद्रसहचरः प्राह पडिवन्नउ गिरुआं तणउ अविहडजाणसुजाण उमदेसंतरि चल्लिया तउ
अम्हे अग्गेवाण २ ततो मया निवारितोऽपि मया स ममैव योगं गामंतरं यथैव यमुनां नो नर्मदां शर्मदां
ततस्तत्पुत्रसावात्परदेशप्रतिगृहं प्रतिकनंति। श्यायाचमानेऽत्यकृतोऽग्रवर्त्तमानमपि मानको
दिपरूपति यदुक्तं दीसंति जोगसिद्धा अं जणसिद्धा वि के वि दीसंति दालिद्दजोग।
सिद्धा पासे वि ठिया न दीसंति २ पुनरपि देव दारिद्र नमस्तुभ्यं सिद्धोऽहं तव दर्शनात् अहं स
र्वं प्रपश्यामि न मां पश्यति कश्चन ३ इति देवोऽसा द्यमेकृतेऽपि परदेशे बहुपरिभ्रमणे सा गृहीतो
ऽहं न किमपि धनं लब्धवान् यथागतस्तथैवागतः ततो दारिद्र्यपुरस्सरं स्वगृहे प्रविशंतं मां मम भार्या अना
र्यडिंभनिर्विचार्या यष्टिमादाय सन्मुखं धाविता निष्ठुरकठोरवचनैः प्राह च रे निर्लज्जशिरोमणे रे आजन्म
दरिद्र रे दुर्भगि रे निर्गुणनाथ रे ढोलण अद्य यावत् धनं विना साक्षाद्दरिद्ररूपं किं करोमि त्वया किमपि ना
नीतं ममापि गृहे तव सहचरसान्निध्यात् अन्नं नास्ति उदकं नास्ति नास्ति गृहे युगंधरी शाकमथो लव
णं नास्ति तन्नास्ति यद्दृश्यते १ एतादृशं स्वरूपं वर्तते अपि च मम गृहे किमपि नास्ति अतो मम गृहे दारिद्र्यमेव

लद्दकति यदुक्तं डसुघरिलइंसिनरीकइपादउ डसुघरिवलद्दनदीसइगाभउ डसुघरिनारिनझमीष
लकइ तसुघरिदालिद्दलद्देलद्दकइ १ अपिच धनेनैवमान्यतास्यात् यदुक्तं धनैर्ङ्कुलीनाःकुलीनाःक्रि
यंते धनैरेवपापात्पुनर्निस्तरंति धनिभ्योविशिष्टोनलोकेपिकश्चि द्धनेचार्जयध्वं १ पुनर्दनंविनाजीवन्नपि
मृतइव यतः धनमर्जयकाकुत्स्थ धनमूलमिदंजगत् अंतरंनैवपश्यामि निर्द्धनस्यमृतस्यच २ पुनःसा
प्रात् रेनिर्भाग्यश्रीवीरेणवार्षिकदानेदीयमानेसर्वेषांदारिद्र्यदुःखप्रलयंविधायमानेत्वंपरदेशेकि
ष्टगतः जाज्ञापचनसमयेक्वाकस्येवतवचंचुपाके ऽजातः अश्ववाभेघेवर्षतिवनदीतटस्थजवा
सावनस्पतिशुल्कोजातः अपवारानौदिवामे घेवर्षतिसत्यपिपलाशेपत्रत्रयमेवस्यात्
रेअनिष्टरेपापिष्ट इत्यादिभिर्निष्ठुरवचनैर्ब कुभिर्निर्भर्त्स्यगलग्राहंतयाग्रहनिष्का
सितः ततः आगच्छदालिद्दपारुइदालिद दा लद्दचिक्रएपासेपिन्माणीपुनइंमारएमांन्ह
तिणकंआ अउनासे १ इतिहेतोः अनन्यगतिक त्वंप्रभुरितोपिकृपापरत्वात्कुर्वंदास्यतिकिं
चिन्मदीरइतिविचार्यअत्रतिनिर्द्धार्य तवसमीपंसमेतोस्मि ततोहेवीरत्वंममदारिद्र्यरूपर्य ममम
मेरसंभरय नचाज्ञेयंवार्षिकदानावसरेसर्वैःआसं त्वयाकिमपिकथंनप्रासं यतःस्वामिन्कनक ८८
धारासिस्त्वयिसर्वत्रवर्षति अस्यच्छत्रसंछन्ने मयितायांतिविंदवः १ मयाविचारितंरेमनच
न्द्रउवकरि चिंताजातिमपामि फलतितरउहीपामीयै जितरउलिस्थउजिलाजि १ पुनः यांउर
वनतशाण कर्दितिकार्तिंगते प्रयाचयिद्दिगंतद्धकसार्द्ध पुनरीदृशाः १ इत्यादिशिष्टाचारविचा

रमाचरन् श्रीमहावीरदेवःकृपयार्द्धं ...र्द्धंविप्रायदत्तवान् अपरेषांचइतिअज्ञापयत् ज्ञांसंपइतोदेऊधन
इणपरिछरकइवीर पितामिजंबासणसणी आधउंदीधउंचीर १ ततोविप्रश्रीरार्द्धलात्वास्वगृहायचलि
तो द्वारसमीपेसमागच्छंतंसचीरंविप्रंदृष्ट्वा ब्राह्मणीहर्षितासती सम्मुखायसन्मुखमागत्यकरद्वयंयोजयि
त्वाएवमवादीत् हेप्राणनाथ हेममजीवनहेकांतहेसुलगमेघस्येवमार्गेत्विहइयमानेसमेतः त्वांविनाअह
कुलंविनामत्सीवटलवलंती अस्थां इत्यादिमृष्टविशिष्टवचनरचनाकथनपूर्वं अपर्वरीत्याजीत्यास्नान
मज्जनभोजनपानताबूलअदानमानसन्मानसुख स्वजोत्यासोमप्रमुखसुखोपचारैरुपचरितोसार्द्ध
याचूर्णंमुद्गमादधानोगतःस्वर्णकारसमीपंद क्षिकावंधार्द्धं ततस्वर्णकारेणापिचुटितंनताह
मितिविचार्य सोमविप्रस्योक्तं रेविप्रएतस्य द्वितीयखंडं आनयययासंधितं सत्लक्षम
लंस्यादि ततः तवममचद्वयोरपिदारिद्र्यनाशः स्यात् ततोविप्रःपश्चाद्वलित्वाप्रवर्द्धमानलोतो
वर्द्धमानस्वामिसमीपमागमत् परंपुनर्याचितेज्ञा तलज्जोविप्रश्चलितस्म कथंपुनर्याचे अतिलोलोपिद
सोनप्रभुः अथलगवानपिज्ञास्यति अहोविप्रस्यलोल्यं ततोमार्गेणंनप्रभुक्तमिति मौनंकृत्वास्थितोन
पुनर्यचितामालितिंचीरार्द्धंलज्जया यतो लज्जावारेप्रभुं असंपयासएशप्रगिरेमगि दिन्नमानकवाम
देहीतिनमग्गियावाणी १ एवंसाधिकमासंयावद्भगवतःपृष्ठिमनुगच्छन् दक्षिणवाचालासन्नसुव
र्णवालुकानदीतटस्थतरुकंटकेविलग्नदेवदूष्यार्द्धं अग्रहीत् भगवानपिसिंहावलोकनेनतदृ
हीत् ममत्वेनेत्यन्ये १ संडिलेपतितं अरुंडिलेवा इत्यन्ये २ सहसाकारेणइत्यपरे ३ शिष्याणांवस्

पात्रादिसुलसंसाविनवाइतिकेचित् ४ कंटकेलग्नत्वात स्वसंततेः कषायवाजल्पात्कंटकप्रायत्वामा
कलव्य निर्ममतया ७ नर्नडयाद ततोविप्रोपि झतझत्पमात्मानंमन्यमानः संप्रणमिनोरथ सूर्णकारपार्श्वे
खंडद्वयंसंधयित्वा तूर्णकारस्यापिस्वेप्सितंदत्वा स्वयंसोमविप्रोयावज्जीवंसुखीबभूव तथापाणिपत
द्ग्रहिकः पाणिपात्रः स्वामीद्विसावरणधर्मख्यापनार्थयथावस्त्रंगृहीतवान् तथाप्रथमपारणकं
सपात्रधर्मज्ञापनायपात्रेएवाऽकरोत् ततःपरंपाणिपात्रइत्याम्नायः श्रमणोभगवान्महावीरः साधिका
निद्वादशवर्षाणिनित्यंव्युत्सृष्टकायः परिकर्मवर्जनात् त्यक्तदेहः परीषहसहनात् येकेच
नउपसर्गाउत्पद्यंते दिव्यावामानुषावातिर्यग्संबंधिनोवा तान्सम्यक्सहते तयासावेनक्ष
मतेक्रोधाभावेन तितिक्षते दैन्याभावेन अध्यासयतिअविचलकायतया ७
नर्भगवान्दीक्षानंतरंकीदृशोजातस्तत्रसूत्रं। तएणंसमणेभगवंमहावीरेअणगारेजाए इरि
यासमिए भासासमिए एसणासमिए आयाणभंडमत्तनिक्खेवणासमिए उच्चारपासवणखेलजल्लसिंघाणपारिठावणि
यासमिए मणसमिए वयसमिए कायसमिए मणगुत्ते वयगुत्ते कायगुत्ते गुत्ते गुत्तिंदिए गुत्तबंभयारी अकोहे अमाणे
अमाए अलोभे संते पसंते उवसंते परिनिव्वुडे अणासवे अममे अकिंचणे छिन्नगंथे निरुवलेवे कंसपा
ईइवमुक्कतोए संखेइवनिरंजणे जीवेइव अप्पडिहयगई गगणमिवनिरालंबणे वाउव्व अप्पडिबद्धे सा ८७
रयसलिलंवसुद्धहियए पुक्खरपत्तंवनिरुवलेवे कुम्मोइवगुत्तिंदिए खग्गिविसाणंवएगजाए विहगइ
वविप्पमुक्के भारंडपक्खीइवअप्पमत्ते कुंजरोइवसोंडीरे वसभोइवजायथामए सीहोइवदुद्धरिसे मं

दरोइवअप्पकंपे सागरोइवगंभीरे चंदोइवसोमलेसे सूरोइवदित्ततेए जच्चकणगंवजायरूवे व
सुंधराइव सव्वफासविसहे सुहुयहुयासणोइवतेयसाजलंते नत्थिणंतस्सभगवंतस्सकत्थइपडिबंधे
वइ सेयपडिबंधेचउव्विहेपन्नत्ते तं दव्वउ खित्तउ कालउ भावउ दव्वउणं सचित्ताचित्तमीसएसुदव्वेसु
खित्तउ गामेवा नगरेवा अरण्णेवा खित्तेवा खलेवा घरेवा अंगणेवा नहेवा कालउ समएवा आवलिया
एवा आणापाणुएवा थोवेवा खणेवा लवेवा मुहुत्तेवा अहोरत्तेवा पक्खेवा मासेवा उऊएवा अयणेवा
संवच्छरेवा अन्नयरेवा दीहकालसंजोए भावउ कोहेवा माणेवा मायाएवा लोहेवा भएवा हासे
वा पिज्जेवा दोसेवा कलहेवा अब्भक्खाणेवा पेसुन्नेवा परपरिवाएवा अरइरईवा मायामोसेवा मि
च्छादंसणसल्लेवा ९७४ तस्सणंभगवंतस्सनोएवंभवइ ११७ सेणंभगवंवासावासवज्जं अट्ठगि
म्हहेमंतेएमासे गामेएगराईए नगरेपंचराईएवा वासीचंदणसमाणकप्पे समतणमणिलेट्ठुकंचणे
समदुक्खसुहे इहलोयपरलोयअप्पडिबद्धे जीवियमरणेयनिरवकंखे संसारपारगामी कम्मसत्तु
निग्घायणट्ठाए अब्भुट्ठिए एवंचणंविहरइ॥ व्या० ततश्चदीक्षाग्रहणानंतरंभगवान् अनगारोजातो न
विद्यतेअगारंगृहंयस्यसअनगारः पुनः कीदृशः ईर्यायांगमनागमनादौसमितः सम्यक्प्रवृत्तः पुनः
की। भाषायांभाषणेसमितः पुनः की। एषणायांद्विचत्वारिंशद्दोषविशुद्धाहारग्रहणेसमितः पुनः की। आ
दानेग्रहणेउपकरणस्येतिगम्यं भांडमात्रयावस्त्राद्युपकरणपरिच्छदस्य अथवाभांडस्यवस्त्रादेर्मृन्मय
भाजनस्यवा मात्रस्यपात्रविशेषस्यनिक्षेपणविमोचनेसमितः सुप्रत्युपेक्षणादिना पुनःकी। उच्चारः पु

५ कल्पल०

रीरं प्रश्रवणं मूत्रं खेलो निष्ठीवनं सिंघानो नासिकामलं जल्लः शरीरमलः तेषां परिष्ठापना परित्यागस्तत्र स
मितः शुद्धस्थंडिलाश्रयणात् एतच्चांत्यसमितिद्वयं भगवतो भांडसंघाताद्यभावेपि समितीनामखंडनार्थ
मित्युक्तं पुनः कीं मनःसमित इत्यादि मनःप्रभृतीनां कुशलानां प्रवर्त्तकः मनोगुप्त इत्यादि तेषामकु
शलानां निषेधको यतः समितिः सत्प्रवृत्तिः गुप्तिस्त्वसन्निरोधः अत एव गुप्तः सर्वथा गुप्तत्वात् गुप्तेंद्रियः
शब्दादिषु रागाद्यभावात् गुप्तं नव गुप्तिमत् ब्रह्मचरतीत्येवंशीलः गुप्तिंद्रियब्रह्मचारीति पाठे
गुप्तानि इंद्रियाणि शब्दादिषु रागाद्यभावात् श्रोत्रादीनि ब्रह्मचर्यं मैथुनविरतिरूपं वसत्यादि
नवगुप्तिसद्भावात् आसेवते इत्येवंशीलो यः स पुनः कीं अक्रोधोऽमानोऽमायोऽलोभ इति पद
चतुष्टयं सुगमार्थं पुनः कीं अत एव शांतोऽन्तर्वृत्त्या पुनः कीं प्रशांतो बहिर्वृत्त्या पुनः
कीं उपशांत उभययतो यद्वा मनःप्रभृत्यपेक्षया शांतादीनि पदानि अन्ये त्वाहुः शांत उपशमी
प्रशांत इंद्रियनोइंद्रियैः उपशांतः क्रोधाद्यकरणेन अथवा शांतो लवसत्तमणात् प्रशांतः प्रकृष्टचित्त
त्वात् उपशांतो निवृत्तः पापेभ्यः प्रशमप्रकर्षाय एकार्थपदत्रयमिति अत एव पुनः कीं परिनिर्वृत्तः सकल
संतापवर्जितः पुनः कीं अनाश्रवो हिंसादिसप्ताश्रवनिवृत्तेः पुनः कीं अमम आसि छगिक ममेति
शब्दरहितः पुनः कीं अकिंचनो निर्द्रव्यः पुनः कीं छिन्नग्रंथो मुक्तहिरण्यादिग्रंथः क्वचित् छिन्नसोए त्ति ९०
पाठस्तत्र छिन्नशोकः छिन्नश्रोता वा छिन्नसंसारप्रवाह इत्यर्थः पुनः कीं निरुपलेपो द्रव्यभावमलरहि
तत्वात्तत्र द्रव्यतो देहमलो भावतो मिथ्यात्वादिमलस्तस्माद्रहितः निरुपलेपत्वमेवोपमाभिराह पुनः कीं

कांस्यपात्रीवमुक्तं तोयमिव तोयं बंधहेतुत्वात् स्नेहो येन सः पुनः कीं संख इव निरंजनः रंजनं रं
गणं वा रागाद्युपरंजनं तस्मान्निर्गतः पुनः कीं जीव इव अप्रतिहतगतिः सर्वत्र अचिंत्येन अस्खलि
तविहारात् संयमे वा अप्रतिहतवृत्तिः पुनः कीं गगनमिव निरालंबनो देशग्रामकुलादिनिश्रारहित
त्वात् पुनः कीं वायुरिव अप्रतिबद्धः क्षेत्रादौ प्रतिबंधाभावेन अचिंत्येन सततविहारत्वात् पुनः कीं
शारदसलिलमिव शुद्धहृदयः कालुष्याभावात् पुनः पुष्करपत्रमिव निरुपलेपः पंकजलक
ल्पस्वजनविषयस्नेहरहितत्वात् पुनः कीं कूर्म इव कच्छप इव गुप्तेंद्रियः सहि कदाचित् ग्रीवा
पादचतुष्टयरूपांगपंचकेन गुप्तः स्यादेवं भगवानपि इंद्रियपंचकेन पुनः कीं खड्गी गंडका
खड्गी जीवस्तस्य विषाणं शृंगं एकमेव स्यात् तद्वदेको जात एकत्वतो रागादिसहायवैक
ल्यात् पुनः कीं विहग इव विप्रमुक्तो मुक्तपरिकरत्वात् अनियतवासाच्च पुनः कीं भारंडप
क्षीव अप्रमत्तो निद्राद्यभावात् भारंडपक्षिणोः किल एकं शरीरं पृथग्ग्रीवं त्रिपादं च स्यात्तौ च अ
त्यंतमप्रमत्ततयैव निर्वाहं लभेते इति तदुपमानं यदुक्तं श्रीज्ञातांगवृत्तौ भारंडपक्षिणो हि एकोद
राः पृथग्ग्रीवा अन्योन्यफलभक्षिणः जीवद्वयरूपा भवंति ते सर्वदा चकितचित्ता भवंतीति ^ पुन
ः कीं कुंजर इव शौंडीरः कर्मशत्रुसैन्यं प्रति शूरः पुनः कीं वृषभ इव जातस्थामा स्वीकृतमहाव्रतभा
रवहनं प्रति जातबलो निर्वाहकत्वात् पुनः कीं सिंह इव दुर्द्धर्षः परीषहादिमृगैरनभिभवनीयः
पुनः कीं मेरुरिव अनुकूलप्रतिकूलोपसर्गवातैरचलितसत्वः पुनः कीं सागर इव गंभीरो हर्षशोका

× एवमेव व्याख्यातं पाईहरो उपातिकवृत्तौ च भारंडपक्षिणः ख्यातास्त्रिपदी मर्त्यभाषिणः द्विजीवा द्विमुखाश्चैकोदरा भिन्नफलेषिणः १ ...× इति पाठ — श्रीसूत्रकृत वृत्तौ ४

५

॥कल्पल॰ दिकारकसंपर्केपि अविरक्तचित्तः पुनः की॰ चंद्र इव सौम्यलेश्यः अनुपतापहेतुमनःपरिणामः पुनः की॰
सूर इव दीप्ततेजाः द्रव्यतः शरीरदीप्त्या भावतो ज्ञानेन परेषां क्षोभकत्वाद्वा पुनः की॰ जात्यकनकमिव जा
तं संपन्नं रूपं स्वरूपं रागादिकुद्रव्यविरहात् यस्य अपगतदोषकुद्रव्यत्वेन उत्पन्नस्वस्वभाव इत्यर्थः पुन
की॰ वसुंधरा इव सर्वान् अनुकूलेतरान् शीतोष्णादीन् उपसर्गान् विषहते यः पुनः की॰ सुहुतो घृतादित
र्पितः स चासौ हुताशनश्च अग्निः तद्वत्तेजसा ज्ञानरूपेण तपस्तेजसा वा ज्वलन् दीप्यमानः अत्र चइमेसिं
पयाणं इमि संघयणगाहाओ इति वाक्यं वृद्धिकैर्दृ   गाथेकुचिद्वादर्शे दृश्यते कंसे संखे जीवे इत्यादि
पुनर्भगवद्गुणोत्कीर्तनं प्रकारांतरेणाह॥ ना   स्त्ययं पक्षो यदुत तस्य भगवतः क्वचित् प्रति
बंधो भवति स च प्रतिबंधश्चतुर्विधो भवति   तद्यथा द्रव्यतः सचित्ताचित्तमिश्रितेषु द्र
व्येषु १ क्षेत्रतश्च ग्रामेवा नगरेवा अरण्येवा क्षे   त्रे धान्यनिःपत्तिभूमौ खले धान्यमलनप्रदेशादि
स्थंडिले गृहे वा अंगणे वा नभसि आकाशे प्रतिबं   धो भवति २ कालतः समये समयः सर्वनिकृष्टः
कालः उत्पलपत्रशतव्यतिभेदजरत्पटशाटिकापाटनादिदृष्टांतसाध्यः आवलिकायां असंख्यातस
मयरूपायां आणापाणुए इति उच्छ्वासनिःश्वासकाले स्तोके सप्तोच्छ्वासमाने क्षणे बहुतरोच्छ्वासरूपे ल
वे सप्तस्तोकमाने मुहूर्ते लवसप्तसप्ततिमाने अहोरात्रे वा पक्षे वा मासे वा ऋतौ द्विमासे वा अयने द ८१
क्षिणायनादौ संवत्सरे वर्षे वा अन्यतरस्मिन् दीर्घकालसंयोगे युगपूर्वादौ प्रतिबंधो न भवति ३ भावतश्च
क्रोधे वा माने वा मायायां वा लोभे वा भये हास्ये लोकादि सप्तविधे हास्ये हर्षे वा पिज्जंमि अनभिव्यक्तमायालो

भस्वभावे अभिष्वंगमात्रे प्रेमणि द्वेषे अनभिव्यक्तक्रोधमानस्वरूपे अप्रीतिमात्रे अथवा रागः सुखाभिज्ञस्य
सुखानुस्मृतिपूर्वः सुखे तत्साधनेपि अभिरमते विषये गर्द्धः प्रेम तस्मिन् द्वेषो दुःखाभिज्ञस्य दुःखानुस्मृति
पूर्वो दुःखे तत्साधने च अप्रीतिरूपः कलहे असत्यवचनराट्यादौ अभ्याख्याने असद्दोषाविष्करणे पै
शुन्ये प्रच्छन्नं असद्दोषाविष्करणे परपरिवादे विप्रकीर्णपरदोषवचने अरति मोहनीयोदयाच्चित्तोद्वेग
फला रति मोहोदयाच्चित्ताभिरतिः समाहारे अरतिरतिः तत्र मायामृषे मायामोषे वा वेषांतरसाधांतरक
रणेन परवंचनं मायया सह मृषा मायामृषा माय   या वा मोषो मायामोषस्तस्मिन् मिथ्यादर्शनमिथ्या
त्वं शल्यमिव अनेकदुःखहेतुत्वात् तत्र एवं च अ   मुनाप्रकारेण तस्य भगवतो न भवति प्रतिबंधः
तिप्रकृतं वर्षासु प्रावृषि वासो वर्षावासस्तं व   र्जअष्टमासान् ग्रैष्महैमंतिकान् ग्रामे एकरा
त्रो वा समानतया अस्तीति यस्य स एकरात्रिकः एवं   नगरे पंचरात्रिकः वासीचंदनयोः प्रतीतयोः
अथवा वासीचंदने इव वासीचंदने अपकारो   पकारयोः समानो निर्द्वेषरागत्वात्कल्पो विक
ल्पः समाचारो वा यस्य सः पुनः की॰ समानि तुल्यानि उपेक्षणीयतया तृणादीनि यस्य सः पुनः की
दृशः समसुखदुःखः पुनः की॰ इहलोके परलोके च अप्रतिबद्धः पुनः की॰ जीविते मरणे च निरवकांक्षः
पुनः की॰ संसारपारगामी पुनः की॰ कर्मशत्रुनिर्घातनाय अभ्युत्थितः एवं च णं विहरइ इति एवमी
र्यादिसमित्यादिगुणयोगेन विहरति आस्ते इति अथ भगवतो गंगादिपुलिनेषु चक्रांकुशादिलक्ष
णचिह्नितानि पादयोः पदानि दृष्ट्वा कोपि सामुद्रिकः पुरुषः पदानुयायी भगवत्समीपे समागतो भगवं

५
॥ कल्पल॰

तं निर्ग्रंथं दृष्ट्वा विषादं प्राप्तः चित्ते चिंतयितुं लग्नो ऽहो मया लक्षणानुसारेण ज्ञातमासीत् अयं च चक्रवर्त्यादिर्म
हापुरुषः कोपि भावी मम दारिद्र्यं चूरयिष्यति ततः इंद्रेण आगत्य प्रोक्तं भोः सामुद्रिक अयं धर्मचक्रवर्त्ती सु
रासुरनमस्कृतः एतस्य पादरजोपि दारिद्र्यं हरति इति भणित्वा इंद्रेण वंछितकनककरत्नप्रदानेन संतोषित
आसा प्रेरिता अथ भगवान् आषाढचउमासिया अर्द्धमासादनंतरं अस्थिग्रामे गता तत्र प्रथमचउर्मासकं शू
लपाणियक्षायतने स्थितः स च यक्षो रौद्रस्वभावः कस्यापि मानवस्य रात्रौ वासं न ददाति कदाचित्को
पि वसति तदा तं मारयति भगवता इंद्रशर्म्मानामय क्षस्तत्पार्श्वात् रात्रौ वासः प्रार्थितस्तेन प्रोक्तं स
र्वग्रामलोकानां आज्ञां लाहि भगवता ग्रामलोका :पृष्टाः संतः स्वकीयां २ वसतिं ददति परं यक्षाय
तनस्य न कृतस्तस्य कुरत्वात् ततो भगवाने वग्रामलोकाननुज्ञाप्य यक्षप्रतिबोधनार्थ
प्रासादकोणे स्थितः चउर्मास्यां रात्रौ न स्थातव्य। मिति ग्रामलोकैर्निवारितोपि॥ अथ अस्थियाम
स्य उत्पत्तिः कथ्यते॥ धनदेवसार्थवाहस्य धोरेयो वृ षभोभूत् ग्रीष्मे नद्यां वज्रवालुकायां अन्येपि सा
:शकटो भारेणाक्रमसमर्था जाताः ततः एकेनापि स्वामिना प्रसंशितेन पंचशतशकटानि उत्तारितानि पर
त्रुटितांगस्ततो धनसार्थवाहेन चारिपानीयनिमित्तं वर्द्धमानग्रामवास्तव्यानां श्रेष्ठिनां बहुद्रव्यं दत्वा
प्रोक्तं एतस्य वृषभस्य सारणा कर्त्तव्या गतः सार्थवाहः पश्चात्तैर्द्रव्यमनोमानितं कृतं निर्दयत्वेन तस्य सा ५२
रणा न कृता ततो वृषभः क्षुधातृषापीडितः प्राणान् मुक्त्वा शूलपाणिर्यक्षो जातो रुष्टो ग्रामलोकोपरि मा
रिं विकुर्व्य मारिता बहवो लोकाः ततो लोकैर्नतरीतेन विज्ञप्तिः कृता योऽस्मान् मारयति सः प्रकटी भवतु त

तो देववाणी जाता अरे वृषभजीवो ग्रामलोकैः कृपारहितैर्मारितो मया च कुपितेन मारिः पातिता अथ मम
देवगृहं कारयंतु वृषभरूपां यक्षप्रतिमां कारयंतु यात्रां नित्यं पूजां च कारयंतु यथा उपद्रव उपशाम्यति
ततो ग्रामलोकैस्तथैव कृतं मरकोपद्रवो निवृत्तः कल्याणं च जातं मृतकानामस्थ्नां स्थाने २ पुंजो दृष्टस्तेस्म
ततो वर्द्धमानग्रामस्य अस्थिग्राम इति प्रसिद्धिर्जाता स्वामी शूलपाणियक्षप्रासादे अर्द्धमासिकतपसा प्र
थमचउर्मास्यां स्थितः रात्रौ च रुष्टेन यक्षेण अट्टहासः २ हस्ति २ पिशाच ३ नागानां ४ उपसर्गाः कृताः प
रं स्वामी न क्षुब्धः पुनः शिरः १ कर्ण २ नासा ३ दंत ४ नख ५ चक्षुः ६ पृष्ठानां ७ सप्तानां समवेदना कृताः
परं भगवान् ध्यानान्न चलितः तत्समये सिद्धार्थे न प्रोक्तं रे शूलपाणे त्वं न जानासि एनं सिद्धार्थ
राजपुत्रं यस्य इंद्रः सेवकोस्ति ततो भीत :सन् प्रतिबुद्धो भगवंतं क्षामयति स्म उपशां
तश्च भगवतो महिमानमकरोत् ततः प्रभात काले मुहूर्त्तमात्रं निद्राप्रमादं चकार तदा स्वा
मिना दश स्वप्ना दृष्टाः तालपिशाचः १ श्वेतको किला २ विचित्रकोकिलायुग्मं ३ पुष्पमाला द्वि
कं ४ गोवर्गः ५ सरः ६ सागरः ७ सूर्यः ८ अंत्राणि ९ मेरुपर्वतश्च १० प्रभाते भगवतो वंदनार्थं लोका
आगता भगवंतं दृष्ट्वा संतुष्टाः संतो महिमानं चक्रुः तत्र श्रीपार्श्वनाथस्य शिष्यासासोष्टदस्वउत्प
लनामा भगवतो महिमार्थं स्वामि दृष्टनवस्वप्नानां फलं कथयति स्म तथाहि हे स्वामिन् त्वं ताल
पिशाचदर्शनान्मोहपिशाचं निराकरिष्यसि श्वेतकोकिलातः शुक्लध्यानं प्राप्स्यसि २ विचित्रकोकि
लातो द्वादशांगीरूपं प्रवचनं कथयिष्यसि ३ पुष्पमालास्वप्नविचारं न जानामि ततः सिद्धार्थेन प्रोक्तं य

५
॥कल्पल॰

निश्चायकधर्म्मं प्ररूपयिष्यति ४ गोवर्गतश्चतुर्विधसंघस्थापनां करिष्यसि ५ सरोवरदर्शनात् सरोवरव
द्देवजनैः सेव्यो भविष्यसि ६ सागरतः संसारसागरं तरिष्यसि ७ सूर्यात् केवलज्ञानं लप्स्यसे ८ अं
त्रतो यशो लप्स्यसे ९ मेरुतो धर्म्ममेरुवत् निःप्रकंपो भविष्यसि १० ततो भगवान् मोराकसंनिवेशस्य ब
हिरुद्याने कायोत्सर्गे स्थितः ततः सिद्धार्थो भगवतः पूजानिमित्तं प्रभोर्मुखे अवतीर्य गोपानामग्रे निमित्तं
प्राह भो गोप त्वया स्वप्ने अद्य मोदकाः भक्षिताः पुनः प्रभाते कंटकरुदितं सुप्ता क्षेत्रे गच्छता सर्पो दृष्टः
क्षेत्रे च त्वं गमिष्यसि इत्यादि बहु सत्यं ज्ञात्वा गोपाः प्रभोर्महिमानं चक्रुः लोकानां च पुरस्तात् वदंति
स्म अयं ज्ञानी तपस्वी च ततः केनापि दृष्टं अत्र अच्छंदको निमित्ती वसति तस्य कीदृशं ज्ञानं त
तः सिद्धार्थेन प्रोक्तं न किंचित् ततोऽच्छंदकेन पार्श्वस्थितेनाज्ञातवेषेण तृणं अंगुल्योर्गृहीत्वा
पृष्टं भो सिद्धार्थ इदं तृणं छेत्स्यति न वा सिद्धार्थेन प्रोक्तं नेति ततो भगवतो वचनस्यालीककरणा
र्थं छेदनाय उद्यतस्तदा शक्रेण अंगुली छिन्ना अच्छंदकश्च द्वेषं वहन् उपसर्गान् करोति तदा सिद्धार्थेन
लोकानां पुरस्तात् प्रोक्तं अनेन अच्छंदकेन वीरघोषस्य दशपलकं वट्टलकं गृहीत्वा महिषेडहट्टस्य श्री
आवश्यकचूर्णिवचनात् खर्जूरीवृक्षस्य पूर्वस्यां दिशि हस्तादधः स्थापितमस्ति १ पुनः इंद्रशर्म्मब्रा
ह्मणस्य अनेन छागो भक्षितोऽस्ति तस्य अस्थीनि तस्य दक्षिणस्यां दिशि उकुरडके गृहे बदर्या अधः
संति तृतीयं तस्य भार्या कथयिष्यति ततस्तैर्लोकैर्गत्वा तथैव सर्वं दृष्टं भार्या दृष्ट्वा प्राह मत्पतिर्भगिनी
पतिरस्ति ततोऽच्छंदो लज्जितः प्राह हे स्वामिन् यूयं अन्यत्र यास्यथ परं अहं कुत्र यामि इति अप्रीतिं ९३

३

ज्ञात्वा अप्रीतिस्थाने न स्थेयमिति अभिग्रहं स्मृत्वा भगवान् विहृतः वर्द्धमानग्रामांतराले द्वे नद्यौ सुवर्ण
वालुका १ रूप्यवालुका च २ उत्तरवाचालगमनाय मार्गद्वयं एको वक्रो द्वितीयः सरलमार्गस्त्वेकाचक्र
मार्गेण यत्कनकखलनामा तापसाश्रमस्तत्र गतो यक्षगृहमंडपे स्थितश्च तत्राश्रमे चंडकोसिकनामा
सर्पोऽस्ति तस्य संबंधो यथा कश्चिद्ग्रामे गुरवः स्थिता एकः साधुः क्षुल्लकसाधुसहायी कृत्यपारणार्थं गो
चरचर्यायां गतो वर्षाकालत्वेन समुत्पन्नाभेकां एकां मंडूकीं साधुश्चंप तदा क्षुल्लकः प्राह भोः साधो
त्वया मंडूकी हता साधुरीर्ष्यया प्राह एषा पूर्वमेव मृतास्ति न मया मारितास्ति यदि अधिकं वदसि
तदा मुखं संद्दपामि ततः क्षुल्लको मौनं कृत्वा स्थितः ततः प्रतिक्रमणे आलोचनावसरे क्षुल्लके
न पुनः प्रोक्तं भोः साधो मंडूकी मार्गे त्वया चंपिता सा आलोचयितव्या ततो रुष्टः साधुः
क्षुल्लकं हंतुं समुत्थितो धावमानः स्तंभे मस्तकं संग्नं मृत्वा ज्योतिष्कदेवेषु समुत्पन्नस्ततश्च्युत्वा पंच
शततापसपतिर्जातः परं महाचंडप्रकृतिः एकदा राजकुमारान् स्वकीयस्य आश्रमस्य फलानि गृह्ण
तो दृष्ट्वा कोपेन हस्ते परशुं गृहीत्वा तन्मारणाय धावन् अंधकूपे पतितो मृत्वा कनकखलतापसाश्रमे
चंडकौशिको जातः स च सर्पो दृष्टिविषो रोषेण लोभेन च वनं सर्वतः प्रदक्षिणीकुर्वन् पशुपक्षिमनुष्यादि
कं यं पश्यति तं सूर्यसंमुखीभूय दृशा ज्वालयति पूर्वं तापसाश्रमे तापसा एव ज्वालिता अर्द्धदग्धाश्च के
चन नष्टाः स मार्गो लोकैर्मुक्तो भगवान् लाभं ज्ञात्वा लोकैर्निवारितोऽपि यत्र सर्पबिलं तत्पार्श्वे कायो
त्सर्गेण स्थितः सर्पेण निर्गत्य प्रभुर्दृष्टो रुधिरं च गोक्षीरसदृशं धवलं दृष्टं सर्पेण ज्ञातं अन्यमदंदशा

मि तदा भस्मी भवति अत्र रुधिरमपि रक्तं न निसृतं स्वामिनापि प्रोक्तं रे चंडकौशिक बुध्यस्व रे बरा
क ततः सर्पस्य जातिस्मरणं ज्ञानं समुत्पन्नं पूर्वभवो दृष्टस्ततः प्रतिबुद्धेन प्रदक्षिणां दत्वा अनशनं कृ
त्वा कर्मक्षयाय बिले मुखं मुक्त्वाऽस्थात् प्रभुस्तं प्रतिबुद्धं ज्ञात्वा ततश्चचाल सर्पोपि लोकै राद्यमा
नो वेदनां सम्यगधिसह्य प्रभुध्यानात्सहस्रारेऽष्टमे देवलोके देवो जातः भगवता च पारणं नागसेनगृहे
कृतं ततः श्वेतंब्यां नगर्यां प्रदेशीराज्ञा महिमा कृता ततो भगवान् सुरभिपुरं गतः तत्र गंगानद्यां नावमारू
ढो भगवान् तदा घूघूराजवासितं श्रुत्वा खेमलि कोविज्ञः प्राह मरणांतकष्टं भविष्यति परं अस्य
मुनेः प्रभावात् टलिष्यति ततः सिंहजीवः सुदं ष्ट्रनागकुमारो नावं बोलयति तदा कंबलशं
बलाभ्यां स निराकृतः तयोरुत्पत्तिरियं॥ म थुरानगर्यां जिनदासः श्रावकोऽभूत् स च
आभीरस्य मित्रत्वात् वीवाहावसरे खंदरवाद्य घृतादिकं दापयामास स च आभीरो हृष्टः ते
स्मै द्वौ वृषभौ कंबलशंबलनामानौ दत्तवान् स च जिनदासोऽष्टमीचतुर्दश्योः पौषधं सोपवासं क
रोति बलीवर्दौ अपि स्वामिनं तथाविधं एवं कुर्वाणं दृष्ट्वा चतुर्दश्यामुपवासं च कुरुतः एकदा जिनदा
सेन पौषधे गृहीते सति कोपि सुहृत् तौ बलीवर्दौ नीत्वा भांडीरयक्षयात्रायामवाहयत् नीतस्तथा निर्दयं वे
न वाहितौ यथाऽतीवपीडितौ रुधिरेण स्रुतौ पश्चादानीय मित्रगृहे मुक्तौ क्रमात् मंदौ जातौ पानीयमपि
न पिबतः ततोऽनशनं कृत्वा समाधिना मृतौ नागकुमारौ देवौ जातौ इति शंबलकंबलोत्पत्तिः॥ ततो
भगवान् द्वितीयचातुर्मासी राजगृहे नालिंदापाटके तंतुवायमनुज्ञाप्य तंतुवायशालाया एकदेशे

मासक्षपणेन तपसा स्थितः तत्र गोशालको मिलितः तत्र विजयेन श्रेष्ठिना अन्नपारणं दत्तं ततो देवैर्भगवतः पं
च दिव्यानि प्रकटितानि दृष्ट्वा गोशालो दध्यौ यदि एतस्य शिष्यो भवामि तदा ममापि मृष्टान्नपानं लोका दद
ति मामपि मानयंति च ततोहं तव शिष्योस्मि इत्युक्त्वा भगवता समं विहरतिस्म एकदा स्वामी स्वर्णखल
ग्रामं याति गोपैः पायसं पच्यमानं दृष्ट्वा गोशालः प्राह भोजनं एषां भावि न वा तदा सिद्धार्थेन प्रोक्तं भंगो
भावी ततो गोशालकवचनेन तैर्विशेषतः सुरक्षिता स्थाली भग्ना ततो गोशालेन मतं अंगीकृतं यद्भाव्यं
तद्भवत्येव पुनरेकदा स्वामी सिद्धार्थपुरात् कूर्म ग्रामं प्रस्थितो मार्गे सिद्धार्थेन व्यंजमिलितलोका
नामग्रे भगवन्मुखेऽवतीर्य प्रोक्तं अयं तिलस्तं भो महान् भावी अस्य शंबायां सप्त पुष्पजीवा
स्तिलत्वेन निःपत्स्यंते ततो भगवतो वचनं कुपात्रत्वादन्यथा कर्तुं तं तिलस्तंभं मूलत
उन्मूल्य अन्यत्र निःक्षिप्तवान् ततः कियद्दिनै र्व्याघुट्यमानेन गोशालेन भगवतः पृष्टं कुत्र स ति
लस्तंभः ततो भगवान् यस्मिन् स्थाने स निक्षिप्तोऽ भूत्तत्र देवेन वृष्टिः कृता गोखुरचापितो भूम्यंतर्मि
लानि प्रविष्टानि तिलस्तंभः फलितोस्ति तन्मार्गे गतः ततो गोशालस्तं तिलस्तंभं तथाविधं फलितं दृष्ट्वा विशे
षतः स्वमतं दृढीकृत्य तमुन्मूलयितुं लग्नः तावता दंडेन दक्षितो रे दुष्ट वेषसोर्वचनं अन्यथा करिष्य
सि तदा गोशालो रुष्टो विशेषत उपसर्गान् अकरोत् ततो ब्राह्मणग्रामे भगवान् गतः तत्र द्वौ पाटकौ एक
को नंदस्य द्वितीय उपनंदस्य नंदेन स्वामी प्रतिलाभितः उपनंदेन गोशालः पर्युषितवासितकदन्नं
दत्तं ततो रुष्टेन प्रोक्तं मम धर्माचार्यतपःप्रभावात् दह्यतां एतद्गृहं तन्नष्टं वज्जातं ३ ततस्तृतीयचातुर्मा

५
कल्प०

स्यां द्विमासक्षपणेन चंपायां स्थितः ततः कालायां संनिवेशे शून्यगृहे सीहो ग्रामणीपुत्रो गोमतीदा-
स्या सह रममाणो गोशालेन हसितस्तेन बाढं कुट्टितस्तदा प्राह हे आर्य किं न वारयसि प्रभुस्तु मौना-
वलंबी न वक्ति तदा सिद्धार्थः प्राह एवं कार्यं तव कुर्वत इदमल्पं फलं परलोके तु बहुदुःखवशगो भवि-
ष्यसि अथैकदा स्वामी कुमारकसंनिवेशं गतः तत्र श्रीपार्श्वनाथशिष्यो मुनिचंद्रनामा स्थितस्तस्य
साधून् दृष्ट्वा गोशालः प्राह रे के यूयं तदा तैरुक्तं वयं निर्ग्रंथाः गोशालः प्राह कुतो यूयं निर्ग्रंथाः क्व मम
चार्यो निर्ग्रंथो महदंतरं यादृशास्त्वं तादृशस्ते धर्म चार्यो भविष्यति पुनर्ज्वलितं स्वामितपसा युष्मा-
कमुपाश्रयो दह्यतां परं न दग्धः ततः स्वामिस मीपे समागत्योक्तं हे स्वामिन् अद्य युष्मद्वा त
वपसा वो न तादृग्गृहं दह्यते सिद्धार्थेन प्रोक्तं सा धवो न दह्यंते ततो रात्रौ स मुनिचंद्रो जिनक-
ल्पतुलनां कुर्वन् कायोत्सर्गस्थः कुंभकारेण चौरभ्रांत्या व्यापादितः अवधिज्ञानमुत्पाद्य स्व-
र्गं जगाम तन्महिमार्थं सुरैरागत्य महानुद्योतः कृतः तं दृष्ट्वा गोशालः प्राह अहो अद्य तस्य प्र-
श्रयो दह्यते सत्यः स्वामिप्रभावः ततः सिद्धार्थेन यथास्वरूपं प्रोक्तं तथापि कुपात्रस्तत्र गत्वा तच्छिष्यान्
निर्भर्त्सयामास ततः स्वामी चौरायां गतो हेरका इति कृत्वा आरक्षका भगवंतं कूपे क्षिपंति तत्र भवं
गोशालः पश्चाद्भगवान् ततः सोमाजयंत्यौ उत्पलभगिन्यौ संयमं दुष्करत्वेन परित्यज्य प्रव्राजिके
जाते उपसर्गं ज्ञात्वा तं उपसर्गं उपशामयतः ततो भगवान् पृष्टिचंपायां गत्वा चतुर्थमासक्षपणेन चतु-
र्मासीं स्थितः तत्र प्रतिदिनं जीर्णश्रेष्ठिना निमंत्रितेनापि भगवता अभिनवश्रेष्ठिगृहे पारणं कृतं विस्तर ९५

संबंध आवश्यके॥ ततो भगवान् कयंगले गतः तत्र माघमासे दरिद्रस्थविरनामकाः पाखंडस्थाः जागर-
णं दिने गायंति गोशालस्तान् हसन् तैः कुट्टितः परं आर्यशिष्यत्वान्मुक्तः ततः श्रावस्त्यां गतः तत्र पितृदत्त-
स्य भार्या परं संतानं न जीवति तया शिवदत्तनैमित्तिकः पृष्टस्तेन प्रोक्तं गर्भमांसमिश्रं पायसं भोजनं द-
द्या मुनिभ्यो देहि यथा संतानं जीवति तस्मिन्समये गोशालेन स्वामी पृष्टः अद्य मया कीदृशं भोजनं लप्स्ये
सिद्धार्थेनोक्तं मांसमिश्रं तया गोशालो भोजितः स च आगत्य भगवतः कथयामास मया पायसं भुक्तं
भगवता प्रोक्तं तन्मांसमिश्रमस्ति भगवतो वच नेन वमने कृते तथैव [illegible] सूक्ष्ममांसखंडं दृष्टे
ष्टेन गोशालेन प्रोक्तं रे पापिष्टे तव पाटको मम स्वामितपःप्रभावात् दह्यतां तथैव दग्धश्च त-
त एकदा बहुकर्मनिर्जरार्थं लाटदेशं गतः अंतरा द्वौ चौरौ मिलितौ खड्गमुत्पाट्य मार-
णाय धावितौ प्राणांतोपसर्गं ज्ञात्वा इंद्रेण हतौ पुनः स्वामी हरिद्रवृक्षस्याधोऽवतस्थे पथि-
कैः प्रज्वालिताग्निना कायोत्सर्गस्थस्य भगवतः पादौ दग्धौ भगवान् न अपसरति स्म गोशालस्तु
नष्ट्वा गतः ४ ततो भद्रिकायां स्वामी चतुर्मासक्षपणेन पंचमचतुर्मासीं स्थितः एकदा कूपिकसंनिवेशं
गतः चौरिक इति धृतो विजयया प्रगल्भया पार्श्वशिष्यया स्वामी मोचितः गोशालश्च पृथग्भूतः परं यत्र याति
तत्र मारिभिस्तस्कै पतति ततः पुनर्विचारितं वरं स्वामिनैव सार्द्धं ततो मार्गयितुं लग्नः स्वामी वैशाल्यां गतः
तत्र लोहकारशालायां भगवान् कायोत्सर्गे स्थितः ततः षण्मासांते एको लोहकारः षण्मासरोगनिर्ग-
मने नीरोगः सन् उपकरणानि लात्वा शालायामागतः स्वामिनं दृष्ट्वा अमंगलमिति ज्ञात्वा घनेन हंतुं उ

हस्तस्तावता इंद्रेण आगत्य लोकः कारितः षण्मासांते गोशालोऽपि मिलितः ५ ततः पुनर्भद्रिकायां ष
ष्ठचतुर्मासी स्थितः तत्र अष्टमासी यावद्भगवान् निरुपसर्गोऽभवत् ततः सप्तमचतुर्मासी आलभिका
यां देवकुले स्थितो गोशालो बलदेवमुखे लिंगं लगयति ततः भद्रकादिलोकैः कुट्टितः एकदा नवव
धूं परिणीतायां दंतुरवधूं दृष्ट्वा हसितस्तत्रापि कुट्टितः एकदा वज्रजलग्रामे सालवनोद्याने भगवान् कायो
त्सर्गे स्थितः तत्र दृष्टैस्तैर्वेश्मप्रमानितया अतः पूर्यां कटपूतनाव्यंतर्या शीतोपसर्गाः कृताः विघ्नोपश
मे देवैर्महिमा कृता ७ ततोऽष्टमचातुर्मासी राजगृहे भगवान् स्थितः ८ ततोऽनार्यदेशे नवमचतुर्मा
सी स्थितः तत्र बहव उपसर्गा जाताः एकदा स्वामी मगधे राजगृहचंपयोरंतराले गुर्बरग्रामे गोवा
बीकौटिकेन आसन्नस्य ग्रामाद्बहिः पतितं अपत्यं दृष्ट्वा अपुत्रत्वेन गृहीतं तस्य माता च
चौरैश्चंपायां विक्रीता वेश्या जाता सोऽपि तत्र यौवने व्यापारार्थं गतः तां वेश्यां गच्छन् गोवत्सरूप
गोत्रदेव्या प्रपंचेन मातरं ज्ञात्वा प्रतिबुद्धः सन् प्राणामदीक्षां जग्राह सवेश्यायन तपस्वी नाम्ना प्रसिद्धः
कूर्मग्रामे आतापनां करोति गोशालेन पार्श्वे गत्वा त्वं यूकाशय्यातरोऽसीति वचनैर्हीलितस्ततस्तेन रुष्टे
न तेजोलेश्या मुक्ता स्वामिना तस्य रक्षणार्थं शीतलेश्या मुक्ता ततो गोशालेन सिद्धार्थपार्श्वे तेजोले
श्योपायः पृष्टः स्तेनापि कथितः ९ ततो भगवान् दशमचतुर्मासी श्रावस्त्यां स्थितः तत्र गोशालेन ते ९६
जोलेश्या षण्मासान् यावत् सनखमुष्टिमध्यस्थकुल्माससंकृतेन चुलुकप्रमाणपानीयपानेन आ
तापनादिविधिना च साधिता अष्टांगनिमित्तं च शिक्षितं ततोऽजिनोऽपि जिनप्रलापी जातः एकदा

परस्पर

स्वामी म्लेच्छदेशे गतस्तत्र श्वानाद्युपसर्गा जाताः स्तेऽपि सर्वेऽपि सोढाः पुनर्भगवान् दृढभूमौ पेढालोद्याने
पोलासचैत्ये अष्टमतपसैकेन कायोत्सर्गे स्थितोऽस्ति तदवसरे सौधर्मेंद्रेण श्रीवीरप्रशंसा कृता लोकत्रयं
मिलित्वा उपसर्गान् करोति तथापि श्रीवीरो ध्यानान्न चलति, तद्वचनं श्रुत्वा इंद्रस्य सामानिकदेवोऽ
भव्यः संगमनामा अहं तं चालयिष्यामि कोऽयं धान्यकीटकोऽस्मदग्रे इत्यमर्षं कृत्वा आगत्य एकस्यां
रात्रौ विंशतिमुपसर्गान् अनुलोमप्रतिलोमान् अकरोत् तथाहि प्रथमं रजोवृष्ट्या अक्षिकर्णादि
श्रोतः पूर्णः स्वामी निरुच्छ्वासः कृतः १ वज्रतुंडा कीटिकाभिः स्वामिदेहश्चालनीतुल्यः कृतस्तेन
ताः एकेन श्रोतसा प्रविशंति अन्येन निस्सरंति २ पुनर्वज्रमुखैर्दंशैर्देहः खादितः तीक्ष्णतुं
डाभिर्घृतेलिकाभिर्दंशितः ४ एवं वृश्चिकैः ५ नकुलैः ६ सर्पैः ७ मूषकैश्च दंशितः ८
पुनर्हस्तिहस्तिनीभ्यां शुंडया उच्छालितश्चरणयोरधोमर्दितश्च ९ पिशाचरूपं कृत्वा अट्टह
ासादिना त्रासितः १० व्याघ्ररूपेण विच्छुरितः ११ सिद्धार्थत्रिशलारूपं कृत्वा करुणविलापादिना उप
सर्गितः १२ सूपकाररूपेण प्रभोः पादयोर्मध्येऽग्निं प्रज्वाल्य स्थालीमुपस्थाप्य च अन्नं पचति स्म १३ चां
डालरूपेण तीक्ष्णमुखपक्षिणां पंजराणि प्रभोः कर्णबाहुमूलादिषु लंबितानि ते च पक्षिणो संकुट्टयं
ति स्म १४ खरवातो विकुर्वितो यः पर्वतानपि कंपयन् प्रभुमुत्क्षिप्य पातयति स्म १५ कलकलिका
वातेन भगवान् चक्रवद्भ्रामितः १६ पुनर्येन मेरुचूलापि चूर्णी स्यात् तादृशेन सारसहस्रलोहमयच
क्रेण भगवानाहतो भूमौ आजानु निमग्नः १७ प्रांते प्रभातं विकुर्व्य सिलितो भगवान् हे देवार्य अद्या

घावेलि॰

पि कथं तिष्ठसि अस्मात् ज्ञातं स्वामी ज्ञानेन रात्रिं वेत्ति १९ ततो देवर्द्धिं विकुर्व्य दर्शयित्वा चलणति दे
मर्षे अहं तुष्टोस्मि त्वं वृणीष्व वरं तव स्वर्गेण मोक्षेण वा अथवा योजनं स्यात्तं ददामि तथापि अक्षुब्धं दृष्ट्वा
पुनर्देवांगना नाट्यगीतगानतानमानहावभावविभ्रमलीलाविलासादिभिरुपसर्गितः परं भगवान् न
कृत्वापि रोममात्रमपि क्षुभितः २० ततः स्वामिनो बालुकाख्यग्रामं गच्छतो तराले पंचशतचौरा विकुर्वि
ता मातुल इति वदनादादिना विडंबितः ततः सुभूमग्रामे स्वामिरूपं आच्छाद्य स्त्रीणां प्रार्थनां जलीः करो
ति स्म काणाक्षिच दर्शयति स्म पिशाचरूपं वि कुर्व्य स्त्र्यादीन् त्रासयति स्म पुनः हस्तिशीर्षग्रामे
स्त्रीदर्शने त्वचमपकृष्य विकृतिलिंगं करोति स्म ततः कुहूनोपसर्गोऽभूत् स्वामिना चिंतितं एष
वाद्गुम्बाद्रूकारकोऽनेषणां च करोति ततो ग्रामेऽप्रवेशोऽनर्थको ममेति ग्रामाद्बहिरेव ति
ष्ठति भगवान् तथापि कुशिष्यरूपं विकुर्व्य खा त्रं पातयति जनैर्मार्यमाणो वक्ति नाहं जाने गु
रुणा प्रेषितः ततो मोसलिग्रामे शून्यान्तरालि विलो कयति जनैः पृष्टः प्राह मम आचार्यो रात्रौ खात्रं ख
निष्यति इत्यादिकान् उपसर्गान् षण्मासी यावत् अकरोत् संगमः ततो विषण्णः सन् स्वर्गमगात् यावंतं का पिसाचित्र
लं संगमेन उपसर्गाः कृता तावंतं कालं सौधर्मवासिनः सुरा निरानंदा निरुत्साहा उद्विग्नाः संतः स्थि
ताः इंद्रोपि मुक्तनेपथ्यांगरागोऽत्यंतदुःखितः संगीतकादिसुखविमुखः सन् स्थितः ततः संगममा ९७
गच्छंतं दृष्ट्वा कोपात् पराङ्मुखीभूय वामपादेन हत्वा स्वर्गान्निर्वासितोऽग्रमहिषीयुतोऽन्यपरिवारव
र्जितो मेरुचूलायां गत्वा स्थितः तस्य सागरोपमायुरस्ति सांप्रतं तत्र वर्त्तते इति संगमोपसर्गाः॥
ऽदृष्टिंनूव२

॥ ततो वज्रग्रामे गोकुले वत्सपालिका स्थविरया परमान्नेन षण्मासिकतपःपारणे प्रतिलाभितो वसुधारा
वर्षणं जातं इंद्राद्याः सुखसमाधिपृच्छार्थं समागताः २१ ततो भगवान् वैशाल्यां नगर्याम् एकादशं चतुर्मा
सीं स्थितः सुंसमाग्रामे चमरोत्पातो जातः इतश्च भगवता कौशांब्यां नगर्यां पोषवदि १ दिने अभिग्र
हो गृहीतो द्रव्यतः कुल्माषान् सूर्पकोणकस्थितान् क्षेत्रतो देहल्या एकं पादं मध्ये कृत्वा एकपादं बार
तः कृत्वा २ कालतो मध्याह्ने ३ भावतो राजसुता दासीत्वं प्राप्ता पादयो निगडिता मुंडितमुंडिता अ
ष्टमभक्तिका सापि रुदती दास्यति तदाभिग्रह पूर्त्या पारणं च कर्त्तव्यं इत्येवमभिग्रहं लात्वा स
र्वत्र भ्रमति स्म इतश्च चंपापुरी दधिवाहनो रा ज्ञा धारिणी भार्या तस्याः पुत्री वसुमती द्वितीयं
नाम चंदनबाला इति तत्समये कौशांबीन गरी तत्र शतानीको राजा तेन शतानीकेन
परस्परं विरोधभावात् चंपानगरी भग्ना सेना चरैर्यथेच्छं लुंटिता च निःस्वामिकतया एवं स
ति केनचित्पदातिना मातृसुता चंदना धृता अभानी ता च कौशांब्यां गत्वा गेहिनीं करोमीति श्रवणात्
माता मार्गे धारिणी मृता पश्चात्त्वं मम भगिनीति आश्वास्य चंदनबालां जीवंतीं स्थापिता स्वगृहे चानीता प
रं पत्न्याः शंकितः किमनया इमां करिष्यसि ततस्तया तेन पदातिना चंदना चतुःपथे विक्रेतुं मंडिता तदा
सुरूपत्वेन वेश्याभिर्गृहीतुं वांछिता तदा चंदनया ताः पृष्टा युष्माकं कः आचारः ताः प्रोचुः अस्माकं
गृहे मिष्टान्नपानाहारो भुज्यते उत्तमप्रधाननवबहुमूल्यवस्त्राणि परिधीयंते मनोमान्याः पुरुषाः सेव्यंते
परं चंदनायाः स आचारो न रुचितः ततस्ताभिर्बलात्कारे क्रियमाणे शासनदेवतया कासांचिन्नासि
खेचालिंगनवैरूप्याकार

१२
कल्पल॰

काचिल्ला कासांचित्क्षणौस्थिल्लो तत्रस्थालीतान्नह्यागताः ततो जिनधर्मं क्रियमाणं धनावहश्रेष्ठिनमा कार्यं
चंदनाप्रोचे मां त्वं गृहाण ततो धनावहेन मूल्यं दत्वा गृहे आनीता तस्य भार्या मूला तां दृष्ट्वा दध्यौ मम पतिर्न
वीनां भार्यां करिष्यति ततो द्वेषं वहति एकदा पादधावने चंदनावेणी भूमौ रुलंती दृष्ट्वा श्रेष्ठी तां उद्धृत्य
रां नीतवान् तदा तथा कुर्वंतं पतिं दृष्ट्वा दध्यौ मम पतिः उत्तीर्ण वक्ति परं रागग्रस्तः पत्नीं करिष्यति मां मम
सपत्नी सवत्र इति हेतोः कार्यार्थं गते ग्रामे श्रेष्ठिनि मूलया मस्तकं मुंडयित्वा पादयोर्निगडौ क्षिप्त्वा कोर
कवस्त्रं परिधाप्य अपवरकमध्ये कोष्टिकायां क्षि प्ता चंदना च तत्रस्था नमस्कारान् गुणयंती स्वकर्म
निंदंती तिष्ठति उपवासत्रयं च जातं अत्रांत रे श्रेष्ठिना आगत्य पृष्टं क्व गता चंदना मूलाभी
वे अहं न जानामि सा सर्वत्र परिभ्रमति तद श्रेष्ठी परिवारं पप्रच्छ तदा मूलागृहद्वारं द
गुरु॰ वाऽकं विकारं दृष्ट्वा मुक्त्वाऽन्यत्र गता तदा वृद्ध दास्या प्रोक्तं यदि चंदना विलोक्यते तदाऽस्मि
न्नपवरके विलोकय तदा श्रेष्ठी तत्र गत्वा गृहद्वा रमुद्घाट्य कोष्टिकामध्यात् बहिर्निःकासितवा
न् चंदना च एकं पादं मुदंबराद्बहिरेकं पादं मध्ये कृत्वा स्थितास्ति तदा क्षुधितां दृष्ट्वा गृहद्वारस्य ऊटि
तत्वात् रंधनगृहे कुल्माषान् दृष्ट्वा सूर्पे क्षिप्त्वा देउत्रि पारणं कुरु इत्युक्त्वा दत्तवान् स्वयं श्रेष्ठी निगड
भंजनार्थं लोहकाराकारणाय गतः अत्रांतरे गोचरीं कुर्वन् भगवान् तत्रागतः प्रभुं दृष्ट्वा चंदनाह ९८
र्षिता सती प्रभुं प्राह हे स्वामिन् शुद्धमाहारं गृहाण पादौ प्रसारय मा च निस्सारय ततः स्वामिनाउ
पयोगो दत्तो ममाभिग्रहस्य उ विधो मि पूर्णो जातो ह्रपते द्रव्यक्षेत्रकालभावैः परं नो रोदितीति नि

केशवेश॥२

वृत्तः प्रभुस्तदा चंदना दुःखाद्रोदितुं लग्ना ततो भगवता कुल्माषाहारो गृहीतः देवैः पंचदिव्यानि प्रकटि
तानि सार्द्धद्वादशस्वर्णकोटिवृष्टिर्जाता निगडाः स्वर्णमया नूपुराः पतिताः मस्तके वेणी सर्वा व्यक्ता जाता रा
ज्ञा आगत्य प्रोक्तं देउत्रि इदं धनं वसुधारावर्षणरूपं त्वं गृहाण गृहं मंदय चंदना प्राह मम पत्या प्रयोज
नं नास्ति अहं दीक्षां गृहीष्ये तावता तत्र संउलो नाम दधिवाहनस्य कंचुकी चंदनापादयोर्निपत्य प्ररु
लः कथं मृगावत्या भगिनी पद्मावती सा दधिवाहनेन परिणीता धारिणी च पद्मावत्याः सपत्नी इति हेतो
र्धारिण्यपि मृगावत्या भगिन्येवेति तयापि मृगाव त्या मम भगिनी सुता एषेति उपलक्षिता ततः इंद्रे
ण आगत्य चंदना शतानीकस्य समर्पिता कथि तं च सम्यग्रीत्या रक्षणीया यावद्भगवतः केवल
ज्ञानं नोत्पद्यते ततः एषा भगवत्या दीक्षां लास्यति केवलज्ञानमपि अत्रैव भवे सा
वि अत्र भगवता पंचदिनैरूनया षण्मास्याति क्रालब्धा ११ ततो भगवान् द्वादशचतुर्मासीं च
पायां स्थितः १२ ततस्त्रयोदशचतुर्मास्यां नगया मे बहिः कायोत्सर्गे स्थितस्य भगवतः कर्णयोः
काशशलाके गवामदर्शने गोपश्चिक्षेप ते च मिथो मिलिते तदग्रे छित्वाऽदृश्ये चकार स गोपः पूर्वभवे
शय्यापालको भूत् यस्य कर्णयोस्त्रिपृष्ठवासुदेवेन महावीरजीवेन तप्तत्रपु क्षिप्तमासीत् ततो भग
वान् वेदनाक्रांतोऽतिदुर्बलो मध्यमपापायां सिद्धार्थवणिग्गृहे गतः तेन कर्णकीलकस्वरूपं ज्ञा
त्वा खरकवैद्यस्य प्रोक्तं ततो द्वाभ्यां मिलित्वा कर्णकीलकप्रांते आत्रिका दृढदशा रखायां च वृक्षल
दवरकौ बध्वा समकालं मुक्तौ कीलकौ निर्गतौ क्वापि संदंसकाभ्यां कर्षितौ इति लिखितमस्ति क्वापि

अन्यप्रकारेणापि प्रभुणा चरात्रिर्भुक्ता पर्वतो विधासवन्न वृनग्रामे आद्यौ कौतास्यां प्रभुपादुके च क्षाते
ततः प्रभुर्नीरोगो जातः गोपः सप्तम्यां नरकं गतः सिद्धार्थखरकौ देवलोकं गतौ एषु उपसर्गेषु जघन्यः कट
पूतनाकृतं शीतं १ मध्यमेषु कालचक्रं २ उत्कृष्टेषु कर्णशल्योद्धारः ३ इत्युपसर्गाः संपूर्णाः॥ अथ भग
वतस्तपोदिनमानं शिष्यव्यामोहटालनार्थं वार्त्तिकसंस्कृतास्यां लिख्यते॥ छमासी १ तस्य मास ६ चउमा
सी ९ तासां मास ३६ त्रिमासी २ तयोर्मास ६ द्विमासी ६ तासां मास १२ एकमासा १२ तासां मास १२ अर्द्ध
मासी ७२ तासां मास ३६ दउढमासी २ तयोर्मास ३ अढाईमास २ तयोर्मास ५ छम्मासी पंचदिनोन १
तस्य मास ५ दिन २५ छठ २२९ तेषां मास ४५ दि न ८ एक भद्रप्रतिमा तस्या दिन २ एक महाभद्रप्र
तिमा तस्या दिन ४ एक सर्वतोभद्रप्रतिमा ता। स्या दिन १० एकरात्रिकी त्रिदिवसिकी प्रतिमा
१२ तासां मास १ दिन ६ अथ सर्वतपो मासा १२३ दिन ५५ दिनानां मासकरणे मास १ दिन २५ स
र्वतपोमाससमीलने मास १२६ दिन २५ पारणानां मासा ११ दिनानि २० तपसः पारणमासानां दिना
नां च तपसो मासदिनेषु प्रक्षेपे जाते मासा १४९ दिन ४५ दिनानां मासकरणे मासमध्ये प्रक्षेपे च सर्वमा
स १५० दिन १५ मासानां वर्षकरणे वर्षाणि द्वादश १२ मासाश्च षट् दिनानि १५ एतावता द्वादश १२ वर्षा
णि त्रयोदश पक्षाश्च १३ भगवतः छद्मस्थकालः अत्राह शिष्यः ननु द्वादश वर्षाणि त्रयोदश पक्षाश्च ९९
कथं मिलंति भगवता दीक्षा गृहीता मार्गशीर्षवदि १०मी दिने केवलज्ञानं तु वैशाखसुदि १० दिने उत्प
न्नं एवं च सति एकादश पक्षा एव वर्द्धते न त्रयोदश एतावता एको मासो हीयते अत्रोच्यते शृणु साव

धानीत्वय सार्द्धद्वादशाब्दैः सार्द्धद्वियुगे भवतः अथ च युगे २ मासद्वयं वर्द्धति एवं सार्द्धयुगद्वये पंचमासा
वर्द्धते अथ च प्रतिवर्षं षट् दिनानि हीयंते एवं सार्द्धद्वादशावर्षैः पंचसप्ततिदिनानि हीयंते एताव
ताऽर्द्धमासद्वयं हीयते एकमासस्य पक्षद्वयसंबंधी पूर्वोक्तो हीयते एवं सार्द्धमासत्रयं हीयते तत्र
पंचमासेभ्यः पात्यते इत्थं त्रयोदश पक्षा भवंति परं सार्द्धमासः पंचमासमध्ये वर्द्धते तत्रार्थे परमार्थः
श्री आचारांगे उपधानश्रुताख्ये ९ मेऽध्ययने चतुर्थोद्देशके एवं भगवतस्तपः शोभमस्ति त
थाहि छट्ठेणं एगया भुंजे अदुवा अट्ठमेणं दसमेणं दुवालसमेणं एगया भुंजे इति ततः सर्वमि
लति परं श्री आवश्यकादौ बहुस्थपर्यायितः पः संकलनायां केनापि कारणेन आचारांगो
क्तषष्ठादितपः संकलना न कृता तत्परमार्थं तत्त्वज्ञा जानंति एवं सर्वतपसि भगवतो ज
घन्यं तपश्च षष्ठं न चतुर्थं सर्वमपि तपोऽपानकं सर्वछद्मावस्थामध्ये प्रमादस्य अंतर्मुहू
र्त्तकालः तथा भगवतो नंदनभवसंबंधितपोप्येवं नंदनृपेण २४ लक्षवर्षेभ्यः पश्चात्पोट्टि
लाचार्यसमीपे दीक्षा गृहीता तत्र लक्षवर्षदीक्षायां मासमासक्षपणेन पारणं चक्रे ततो लक्षवर्षे
षु ११ लक्ष ८० सहस्र ६ शत ४५ पारणानि उपरि दिन ५ वर्षलक्षस्य ३६६ गुणने दिनानि ३६६००
०० जातानि तेषां तपोदिन ३० पारणकदिन १ एवं ३१ दिनैर्भागे दत्ते ११ लक्षादि पूर्वोक्तमानं स्यात्
इति श्रीवीरतपः संकलना॥ अथ भगवतो ज्ञानकल्याणकमाह॥ तत्र सूत्रं॥ तस्स णं भगवंत
स्स अणुत्तरेणं नाणेणं अणुत्तरेणं दंसणेणं अणुत्तरेणं चरित्तेणं अणुत्तरेणं आलएणं अणुविहारेणं

अणु० वीरिएणं अणु० अज्जवेणं अ० मद्दवेणं अ० लाघवेणं अणुत्तराए खंतीए अणु० मुत्तीए अ०
गुत्तीए अ० तुट्ठीए एवं सच्चसंयमतवसुचरियसोवचियफलनिव्वाणमग्गेणं अप्पाणं भावेमाणस्स दु
वालससंवच्छराइं वइक्कंताइं तेरसमस्स संवच्छरस्स अंतरा वट्टमाणस्स जे से गिम्हाणं दुच्चे मासे चउत्थे
पक्खे वइसाहसुद्धे तस्स णं वइसाहसुद्धस्स दसमीपक्खेणं पाईणगामिणीए छायाए पोरिसीए अभिनि
वट्टाए पमाणपत्ताए सुव्वएणं दिवसेणं विजएणं मुहुत्तेणं जंभियगामस्स नगरस्स बहिया उज्जुवालि
याए नईए तीरे वियावत्तस्स चेइयस्स अदूरसा मंते सामागस्स गाहावइस्स कट्ठकरणंसि साल
पायवस्स अहे गोदोहियाए उक्कुडुनिसिज्जा ए आयावणाए आयावेमाणस्स छट्ठेणं भत्तेणं
अपाणएणं हत्थुत्तराहिं नक्खत्तेणं जोगमु वागएणं झाणंतरियाए वट्टमाणस्स अणंते
अणुत्तरे निव्वाघाए निरावरणे कसिणे पडिपु ण्णे केवलवरनाणदंसणे समुप्पन्ने १२ व्या०
तस्य भगवतः अनुत्तरेण प्रधानेन ज्ञानेन मतिश्रु तज्ञानादिचतुष्टयेन दर्शनेन चक्षुर्दर्शनादिना सम्य
क्त्वेन वा अनुत्तरपदं सर्वत्र पदे पदे विशेषणीयं चारित्रेण महाव्रतादिना आलयेन स्त्र्याद्यसं
सक्तवसत्यादिना विहारेण देशादिषु चंक्रमणादिना वीर्येण विशिष्टोत्साहेन आर्जवेन मायानिग्र
हेण मार्दवेन माननिग्रहेण लाघवेन क्रियासुदक्षत्वेन अथवा लाघवं द्रव्यतोऽल्पोपधित्वं भाव १०७
तो गौरवत्रयत्यागस्तेन क्षान्त्या क्रोधनिग्रहेण मुक्त्या निर्लोभतया गुप्त्या मनोगुप्त्यादिकतया तुष्ट्या
मनःप्रसन्नतया सत्यं सूनृतं संयमः प्राणिदया तपो द्वादशभेदं तेषां सुष्ठुविधिना चरितमाचरणं उप

चयनं उपचितं सह उपचितेन उपचयेन वर्त्तते सोपचितं सत्यसंयमतपःसुचरितेन सोपचितं स्फीतं
फलं मुक्तिलक्षणं यस्य सः तथा स चासौ निर्वाणमार्गश्च रत्नत्रयलक्षणस्तेन आत्मानं भावयतो
वासयतः अनेन आत्मज्ञानमेव मोक्षस्य प्रधानं साधनं इत्युक्तं द्वादश वर्षाणि व्यतीतानि त्रयोदश
स्य वर्षस्य पक्षाधिकषण्मासलक्षणे वर्त्तमानस्य ग्रीष्मकालस्य द्वितीयो मासश्चतुर्थः पक्षः एतावता
वैशाखसुदि १० मी दिवसे प्राचीनगामिन्यां छायायां अभिनिर्वृत्तिमानायां प्रमाणप्राप्तायां प्रहरत्रये
व्यतीते इत्यर्थः सुव्रतनाम्नि दिवसे विजयनाम्नि मुहूर्त्ते जृंभिकानामनगर्या बहिः रिजुवालि
कानाम नद्यास्तीरे व्याहत्तचैत्यत्वात् व्याहत्त चैत्यं तस्य जीर्णोद्यानस्येत्यर्थः जीर्णव्यन्तराय
तनस्य वा विजयावर्त्तनाम्नो वा चैत्यस्य अ दूरसामंते दूरासन्ने उचितप्रदेशे इत्यर्थः श्या
माकनाम्नो गृहपतेः कौटुंबिकस्य कट्ठकरणं सि क्षेत्रे धान्योत्पत्तिस्थाने सालपादपस्य अध
:गोदोहिकायां उत्कुटिकनिषद्यायां तयोर्ल क्षणं उत्पार्ष्णिसमायोगे प्राञ्जरुत्कटिकासनं
पार्ष्णिभ्यां तु भुवस्त्यागे तत्स्याद्गोदोहिकासनं॥ आतापनां कुर्वतः षष्ठेन तपसा अपानकेन उत्तरा
फाल्गुनीनक्षत्रे चंद्रेण सह योगमुपगते ध्यानांतरिकायां वर्त्तमानस्य तत्र ध्यानं चतुर्धा पृथक्त्ववि
तर्कं सविचारं १ एकत्ववितर्कं अविचारं २ सूक्ष्मक्रियमप्रतिपाति ३ उच्छिन्नक्रियं अनिवर्त्ति
४ एषां आद्यभेदद्वये ध्याते शेषभेदद्वयमप्रतिपन्नस्य केवलज्ञानमुत्पन्नं केवलज्ञानोत्पत्तौ भ
गवान् कीदृग् जातस्तत्र सूत्रं॥ तएणं समणे भगवं महावीरे अरहा जाए जिणे केवली सव्वन्नू स

व्वदंसी सदेवमणुयासुरस्स लोगस्स लोगस्स परियायं जाणइ पासइ सव्वलोए सव्वजीवाणं आ
गइं गइं ठिइं चवणं उववायं तक्कं मणो माणसियं भुत्तं कडं पडिसेवियं आवीकम्मं रहोकम्मं अर
हा अरहस्स भागी तं तं कालं मणवयणकायजोगे वट्टमाणाणं सव्वलोए सव्वजीवाणं सव्वभावे
जाणमाणे पासमाणे विहरइ॥ व्या० ततश्च भगवान्महावीरः अर्हन् जातः संपन्नः अशोकादि
महापूजार्हत्वात् अर्हन् क्वचित् अरिहा इति पाठस्तत्र अरीन् रागादीन् हंतीति अरिहा अथवा
अविद्यमानं रहः एकांतं प्रच्छन्नं सर्वज्ञत्वादस्य सः अरहा क्वचित् जाए इत्यत्र जाणए इति
पाठस्तत्र ज्ञायकः ज्ञाता रागादिभावसंबंधि नां स्वरूपकारणफलानां पुनः की। जिनो राग
द्विजेता केवलानि संपूर्णानि शुद्धानि अनं तानि वा ज्ञानादीनि यस्य संति स केवली अ
तएव सर्वज्ञः एकस्मिन् समये विशेषावबोधनात् सर्वदर्शी द्वितीयसमये सामान्यावबोधनात् सदेव
मनुजासुरस्य लोकस्य पर्यायं जानाति एकवचनं पर्या यान् उत्पादव्ययलक्षणान् जानाति केवलज्ञा
नेन पश्यति केवलदर्शनेन च पर्यायान् इत्युक्ते द्रव्यं न जानाति इत्याशंक्य उत्पादव्यययोर्निराधा
रयोरनुपपत्तेः तयोर्ज्ञातयोरविष्वग्भावेन वर्तिष्णु अन्वयि द्रव्यमपि ज्ञातमेव स्यात् अत एवाह सर्व
लोके सर्वलोकवर्तिनां जीवानां आगतिं यतः स्थानाज्जीवा आगच्छंति विवक्षितं स्थानं गतिं यत्र मृत्वा
उत्पद्यंते स्थितिं कायस्थितिं भवस्थितिं च च्यवनं देवलोकाद्देवानां मनुष्यतिर्यक्षु अवतरणं उपपा १०१
तं देवनारकाणां जन्म तेषां जीवानां तर्कं तदीयं मनश्चित्तं मानसिकं चित्तगतचिंतारूपापन्नं भुक्त

ज्ञातं यद्यपि मनो मनोगतयोर्नास्ति वास्तवो भेदस्तथापि व्यवहारतयानुसरणात् अस्त्येव भेदः तथा
च वक्तारो वदंति मम इदं मनसि वर्त्तते इति भुक्तं असनादि कृतं चौर्यादि प्रतिसेवितं मैथुनादि परिसे
वितं वा आविः कर्म प्रकटकृतं रहः कर्म प्रच्छन्नकृतं जानाति पश्यति चेति डमरुकमणिन्यायेन अ
त्रापि संबध्यते अरहा प्राग्वत् अरहस्य भागी न रहस्यमेकांते जघन्यतोपि देवकोटिसेव्यत्वात् तं तं
कालं इति तत्र तत्र काले मनोवचनकाययोगे वर्त्तमानानां सर्वजीवानां सर्वभावान् गुणपर्यायान् तत्र स
हभाविनो गुणा ज्ञानादयः क्रमभाविनः पर्याया : हर्षादयस्तान् जानन् पश्यन् च विहरति॥ अथ
भगवतः केवलज्ञाने उत्पन्ने देवैः समवसरणं कृतं बहवो जनाः कोटिशो देवाश्च आगत्य उपविष्टाः भ
गवता धर्मदेशना क्षणं दत्ता परं न कोपि प्रति बुद्धो न केनापि प्रत्याख्यानाद्यपि कृतं आश्च
र्यभूतत्वात् ततो भगवान् लाभाभावात् ततो रात्रौ एव विहृत्य नवस्वर्णकमलेषु पादौ धरन् अष्टमहा
प्रातिहार्यविराजमानो देवकोटिपरिवृतो द्वादश योजनैर्मध्यमपापायां महसेनवने आगात् तत्र नग
रे सोमिलो ब्राह्मणस्तेन यज्ञार्थं एकादशद्विजोत्तमा आहूताः संति ते किंनामानः कियत्परिवाराश्च तदाह
इंद्रभूतिः १ अग्निभूतिः २ वायुभूतिः ३ व्यक्तः ४ सुधर्मा ५ मंडितः ६ मौर्यपुत्रः ७ अकंपितः ८ अचलभ्राता ९
मेतार्यः १० प्रभासश्चेति ११ पंचानां पंचशतपरिवारः द्वयोः प्रत्येकं सार्द्धत्रिशतपरिवारः द्वयोर्युगलयोश्च
तुर्णामित्यर्थः प्रत्येकं त्रिशतपरिवारः एवं सर्वेषां परिवारमीलने चतुश्चत्वारिंशत् शतानि ब्राह्मणानां
एतेभ्योऽन्येपि वादिनः व्याकरणछंदस्तर्कज्योतिःप्रमुखशास्त्रविदो मिलिताः संति तन्नामानि यथा॥

५
कल्प०

उपाध्याय १ शंकर २ ईश्वर ३ महेश्वर ४ धनेश्वर ५ सोमेश्वर ६ ज्ञानी ७ गंगाधर ८ गदाधर विद्याधर मही
धर धरणीधर भूधर श्रीधर दामोदर देव महादे शिवदे रामदे वामदे कामदे सहदे नरदे वासदे श्रीदे
मेवाडी विश्वपति उमापति प्रजापति विद्यापति लीलापति गणपति नृपति महीपति लक्ष्मीपति देवप
ति गंगापति पंडित जनार्दन गोवर्द्धन विष्णु कृष्ण मुकुंद गोविंद माधव केशव पुरुषोत्तम नरोत्तम
जोसी त्रिवाडी हरिशर्म्म महाशर्म्म अग्निशर्म्म नागशर्म्म देवशर्म यज्ञशर्म नरहर हरिहर प्रमुखाः स
र्वे मिलित्वा यज्ञकर्म्माणि कुर्वंति तस्मिन्समये यज्ञपाटकस्य एकस्मिन् देशे वीरः समवसृतो दे
वैः समवसरणं मंडितं देवाश्च भगवद्वंदनार्थं सा। मागच्छंतो वाद्यनिर्घोषं कुर्वंति ब्राह्मणाश्च तं
वाद्यनिर्घोषं श्रुत्वा हर्षिताः प्रोचुः अहो अ स्माकं यज्ञकर्मणि यागहोममंत्रादिना आ
कृष्टाः संतो देवा आगच्छंति परं ते देवाश्चांडालप १टकमिव यज्ञपाटकं मुक्त्वागता भगवत्समव
सरणे ततः इंद्रभूतिना अमर्षेण चिंतितं अहो मयि सति अन्योपि कोपि पंडितात्ममानी आडंबरक
र्त्ता वर्त्तते अहो लोका भ्रमंति परं देवाः सर्वज्ञबुद्ध्या कथं तत्र गत्वा स्तुवंति वंदंते च अहो देवा यागं
त्यक्त्वा यांति ते किंवत् तीर्थपानीयं वायसा इव १ सरोवरं मंडूका इव २ चंदनं मक्षिका इव ३ सहृदं
करभा इव ४ क्षीरान्नं सूकरा इव ५ सूर्योद्योतं घूका इव ६ निधानं निःसर्गिणा इव ७ रत्नत्रयं पार्श्वस्था इ
व ८ स्वस्त्रीलं कुलटा इव ९ सुगुरुं कुशिष्या इव १० अथवा सदृशो योगो यादृशा एते देवास्तादृ १०२
शो ज्ञानी इंद्रजालिकः तथाप्यहं न सहिष्ये एतं इंद्रजालिकं न च सूर्यद्वयं आकाशे १ नापि केसरिद्व

यमेकस्यां गुहायां २ न च खड्गद्वयमेककोशे तिष्ठेत् ततः इंद्रभूतिना केपि लोकाः पृष्टाः भो अयं इं
द्रजालिकः कलाकुशलः सर्वज्ञतां धरन् वाग्विलासेन देवानपि विप्रतारयन् कीदृग् वर्त्तते लोका
: प्रोचुः अयं सर्वज्ञः केन अस्य स्वरूपं कथयितुं शक्यते ततः इंद्रभूतिः प्राह अहमेनं सर्वज्ञं न
सहे किंवत् तमस्तोमं सूर्यवत् १ करस्पर्शं अग्निवत् २ स्वापदशब्दं सिंहवत् ३ रिपुं क्षत्रियवत् ४
मया वादीशा अपि लक्षीस्थापिता सदा कोयं मम अग्रे गेहेशूरः येन अग्निना शैला दग्धाः के तदग्रे दक्षाः
१ येन वातेन गजा उत्पाटिताः का तदग्रे तूलपुंसि का २ अग्निभूतिः प्राह हे भ्रातस्तव एतत्परिभ्रा
क्रम चालनं किं कीटकोपरि कटकी २ पंक शोषणे सूर्यस्य कः आदरः २ कमलनालच्छेदने
किं खड्गोत्पाटनं ३ मृगोपरि किं सिंहस्य फा लदानं ४ ततो गोतमः प्राह सोमया सर्वेपि
वादिनो जितास्तथाप्ययं तिष्ठति किंवत् मुद्ग पाके कुरडुकणवत् १ पीलितेषु तिलेषु अरंड
मतिलवत् २ दलितेषु गोधूमेषु अखंडगोधूम। कणवत् ३ अगस्तिपीते समुद्रे पानीयबिंदुवत् × खंडिते क्षेत्रे षष्टकणवत् ४ ×
५ सबलस्त्रीसूर्पछंदिते तंडुले तुषवत् तथा जिते अस्मिन् मया न किमपि जितं स्वल्पमपि छिद्रं वि
नाशाय यतः स्वल्पमपि विवरं समुद्रपोतमज्जनाय दुर्गांशपातोपि दुर्गग्रहणाय स्यात् पुनर्गौतमः प्राह
ममाग्रे लाटा वादिनो दूरे गताः कर्णाटाः कष्टहत्पतां गताः मालवा मौनमाश्रिताः मागधा मूका जाताः गौ
र्जरा गर्वमुक्तवंतः काश्मीरा आगत्य प्रणताः तिलंकाः पलायिताः न कोप्यस्ति यो मया सह वादं करोति
वेदयं कर्तुमिच्छति तत् मंडूकः कृष्णसर्पस्य चपेटां दातुमुद्यतः अथवा उंदरो भुजंगमस्य दंष्ट्रापाताय

५

॥कल्पल॰ उच्छ्रितः अथवा वृषभः शृंगैरैरावणस्य प्रहर्त्तुकामः कृति अथवा हस्तीपर्वतपातायउत्सुको जातः शा
कोवाकेसरिस्कंधकेशानाकृष्टुमिच्छति अथवाऽनागमनेनयद्वहं कोपितस्तत्किंकृतं वायुसन्मुखंस्थि
त्वादावाग्निर्ज्वालितः सोस्माय्यकपिककच्छूलतादेहेनआलिंगिता शेषनागस्यमस्तकेस्थितांमणिलातुं
हस्तः प्रसारितः अपिच तावद्गर्जति खद्योतस्तावद्गर्जत्येवंद्रमाः उदितेचसहस्रांशौ नखद्योतो
नचंद्रमाः १ हस्तीतावद्गर्जति यावत्सिंहस्यनादंनशृणोति अथवायामितस्यपार्श्वेयमस्यमालवोदू
रेनास्ति वचनचातुरीवतांअपोषितोरसोनास्ति नापिचक्रिणोजेयंकिमपि सुधियांकिंअज्ञेयं
योगिनांकिंनअस्वाद्यं क्षुधितस्यकिंनखा द्यं कल्पवृक्षाणांकिंनदेयं निर्विण्णानांकिं
अत्यजं गच्छामितर्हितस्यसमीपेतत्पराक्र मंपश्यामि लक्षणेममदक्षत्वं साहित्येममसं
हितामतिः तर्केममकर्कशतानास्ति कस्मिन् शास्त्रेममश्रमोनास्ति अपितुसर्वत्र ततस्तत्रग
त्वा इंद्रजालिकंहतप्रतापंकृत्वासर्वज्ञाभिधानंवरं दूरीकरोमि इत्युक्त्वावादंकर्तुंपंचशतछात्रैः प
रिगीयमानविरुदस्खलितः॥ विरुदावलीयथा॥ सरस्वतीकंठाभरण वादिविजयलक्ष्मीशरण ज्ञात
सर्वपुराण वादिकदलीकृपाण जितवादिवृंद वादिगुरुमगोविंद वादिघूकदिवाकर अज्ञानति
मिरनिशाकर वादिमुखभंजन राजससारंजन कुवादिप्रस्तरखंडन पंडितसत्तामंडन वादिगो १०३
धूमघरट्ट मर्दितवादिमरट्ट वादिमृगसिंहशार्दूल वचोवात्याविध्वस्तवादितूल षट्भाषावल्लिमू
ल परवादिमस्तकशूल वादिकंदकुद्दाल रंजितानेकभूपाल वादिवेश्याभुजंग शास्त्रलहरीतरंग

सरस्वतीभंडार चतुर्दशविद्यालंकार सर्वशास्त्राधार। बहत्तरिकलासत्तारि महाकवीश्वर प्रत्यक्ष
परमेश्वर कूर्चालसरस्वती प्रत्यक्षभारती जितानेकवाद लब्धसरस्वतीप्रसाद इत्यादि अग्रेगत्वा
श्रीमहावीरंदृष्ट्वासोपानेस्थितोदध्यौ किमयंब्रह्मा किंवाईश्वरः किंवाविष्णुः अयंसूर्यइवदुःप्रेक्षः
समुद्रइवदुर्लंघ्योदृश्यते अस्याग्रेकथंमयार्जितंमहत्त्वंरक्षणीयं कीलिकानिमित्तंप्रासादंकोभंक्तुंवांछति
सूत्रार्थीकोहारंत्रोटयेत् लोहार्थंसमुद्रेनौभंगंकुर्यात् भस्मनिमित्तंकश्चंदनंदहेत् विकरीकृतेकः काम
कुंभभंगंकुरुते ततस्तस्यासन्नागमनेभगवतागौ तमोभाषितः हे इंद्रभूते तवस्वागतंवर्त्तते ततोगौ
तमेनचिंतितं अहोअयंममनामापिजानाति। अथवाजगतिप्रसिद्धस्यममनामकोनजानाति
परमयंजानाति मृष्टैर्वाक्यैः संतोषयामिय यावादंनकरोति परंनाहंतुष्टामि इच्छंतन्म
कपिच्छेयशातेनअंदोलितंपतेत् परंयदिमम मनोगतंसंशयंजानातिछिनत्ति तदामेविस्म
योत्तवेत्सर्वज्ञंचजानामि ततोभगवताप्रोक्तं। हेगौतम तवसंशयोवर्त्तते जीवोऽस्तिनवापरं
त्वंवेदपदानामर्थंनजानासि इत्युच्यमानेवीरध्वनिः कीदृक्शुशुभे समुद्रोमथ्यमानइववद्दन्गंगा
प्रवाहोवा आदिब्रह्मध्वनिर्वा वेदपदानिइमानि विज्ञानघनःएवएतेभ्योभूतेभ्यःसमुत्थाय पु
नस्तान्येवअनुविनश्यति नप्रेत्यसंज्ञास्तीति जीवाभावस्त्वयास्थाप्यते परंकाकाव्याख्यानेन
प्रेत्यसंज्ञास्ति अपितुअस्त्येवेति जीवसत्ता पुनरपिसर्वैः अयंआत्माज्ञानमयः चैतन्यमयोवै
आत्मा मनोमयोवैआत्मा वाङ्मयः चक्षुर्मयः श्रोत्रमयः प्रमाणमयः आकाशमयोवायुमय

५
कल्प०

स्नेहोमयो अपोमयः तृष्णामयः क्रोधमयो हर्षमयोऽधर्ममयो वै आत्मा ददद इति दकारत्रयं यो वे
त्ति दानं१ दया२ दमं३ चेति सवै आत्मा यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो
भवति पुण्यः पुण्येन कर्म्मणा पापः पापेन कर्मणा भवति इति यजुर्वेदोपनिषदि ऋचः इति जीवसत्ता
पुनः इदं शरीरं विद्यमानभोक्तृकं भोग्यत्वात् ओदनादिवत् यथा क्षीरे घृतं तिले तैलं काष्ठे अग्नि
: पुष्पे सौरभ्यं चंद्रकांते सुधा तथा जीवोपि देहांतर्गतो ज्ञेयः शरीरात्पृथक् इति वीरमुखाद्वेदपदा
नामर्थं ज्ञात्वा जीवसत्तां च अंगीकृत्य संशयं छि त्वा भगवतः समीपे पंचशतनिजशिष्यब्राह्मणै
: सह दीक्षां जग्राह त्रिपदीं लात्वा द्वादशांगी निर्ममे इति गौतमदीक्षा प्रथमो गणधरः ॥ १
अथ अग्निभूतिर्द्वितीयो भ्राता गौतमं प्रव्रजितं श्रुत्वा चिंतयति इदं कथं भवति नहि प
र्वतो द्रवेत् जलं ज्वलेत् नहि चंद्रो वह्निं वर्षेत् । नहि वह्निः शीतलो भवेत् नापि अमृतान्मृत्यु
: न च विषभक्षणे जीवितं तथापि तत्र गत्वा इं द्रजालिकं हतप्रहतं कृत्वा बांधवं लात्वा आगमि
ष्यामि ततो गतो भगवत्समीपे तथैव स्वागतप्रश्नानंतरं मनोगतः संशयो भग्नः नवरं तस्येति संशयः क
र्म अस्ति न वा तत्र पुण्यः पुण्येन पापः पापेन कर्मणा इति कर्मसत्ता पुनः भुवनोदरवर्त्ति सौभाग्यभाग्य
विरूपता दरिद्रतादि वस्तुसमस्तमपि अविकलकारणजन्यं कार्यत्वात् यद्यत्कार्यं तत्तदविकलका १०५
रणजन्यं यथा घटपटादिः एवमनुमानसिद्धापि कर्मकर्त्री स्फुटैव एवं वीरमुखाद्वेदार्थं श्रुत्वा छि
न्नसंशयः प्रव्रजितः इति द्वितीयो गणधरः ॥ २ एवं तृतीयोपि तथैव प्रतिबुद्धो दीक्षां जग्राह तव

रं तस्य संशयस्त्वयं जीवः शरीराद्भिन्नो न किंतु शरीरमेव जीवः ३ एवं चतुर्थो व्यक्तोऽपि तस्य संशयः पंच
भूतानि संति न वा ४ एवं पंचमः सुधर्म्मा गणधरोपि तस्य संदेहः पुरुषो मृत्वा पुरुष एव जायते स्त्री मृत्वा स्त्री
एव जायते ५ एवं षष्ठोपि मंडितस्तस्य संदेहः कर्म्मणां बंधमोक्षौ वर्तेते न वा ६ एवं सप्तमो मौर्यपुत्रस्त
स्य संदेहः देवाः संति न वा ७ एवमष्टमो अकंपितस्तस्य संदेहो नारकाः संति न वा ८ एवं नवमो अचल
भ्राता तस्य संदेहः पुण्यपापे वर्तेते न वा ९ एवं दशमो मेतार्यस्तस्य संदेहः परलोकोऽस्ति न वा १० एवमे
कादशोपि प्रभासस्तस्य संदेहो निर्वाणमस्ति न वा ११ एवमेकादशापि गणधराः श्रीवीरमुखाद्वेदप
दानामर्थं श्रुत्वा भग्नसंदेहा उत्पन्नवैराग्याः प्र तिबुद्धाः संतो निजपरिवारसहिताः दीक्षां ज
गृहुः सर्वेपि गणधरास्त्रिपदीं लात्वा द्वादशां गीं रचयामासुः विस्तरगणधरवादस्तु श्री
आवश्यकतत्परिकरादिभ्यो ज्ञेयः मया त्वति विस्तरभिया न लिखितोऽस्ति ॥ इति गणधरवा
दः समाप्तः ॥ अथ भगवतः सर्वचतुर्मासीसंख्याम ह ॥ तत्र सूत्रं ॥ तेणं कालेणं २ समणे भगवं महा
वीरे अट्ठिगामनीसाए पढमं अंतरावासं वासावासं उवागए १ चंपं च पिट्ठिचंपं च नीसाए तओ अंतरावा
से वासावासं उवागए ४ वेसालिं नगरिं वाणियगामं च नीसाए दुवालस १२ अंतरावासे १६ रायगिहं न
गरं नालंदं च बाहिरियं नीसाए चउद्दस १४ अंतरावासे ३० भद्दिलियाए ३६ दो भद्दियाए ३८ एगं आ
लभियाए ३९ एगं सावत्थीए ४० एगं पणियभूमीए ४१ एगं पावाए मज्झिमाए हत्थिपालस्स रन्नो रज्जुसभा
ए पच्छिमं अंतरावासं वासावासं उवागए ४२ व्या० तस्मिन् काले २ श्रमणो भगवान् महावीरोऽस्थिग्राम

५
कल्पल.

स्य निश्रया प्रथमं अंतरावासं वर्षारात्रं वासावासं ति वर्षासु उपवसनं उपागतः अंतरावास इति वर्षारात्र
स्याख्या यदुक्तं अंतरघणसामलो भगवंति वर्षारात्रघनश्याम इत्यर्थः १ चंपां च पृष्ठिचंपां च निश्रया
आलंभिकायां वर्षारात्राः ४ एवं वैशालीं वाणिज्यग्रामं च निश्रया द्वादश १६ नालंदा बाहिरिकाः राजगृह
द्वारस्य शाखा बाहिरविशेषः तत्र चतुर्दश ३० षट् मिथिलायां ३६ द्वौ भद्रिकापुर्यां ३८ एक आलभि
कायां ३९ एकः श्रावस्त्यां ४० एकः प्रणितभूमौ वज्रभूमाख्य अनार्यदेशे ४१ एकः पापायां मध्यमायां
हस्तिपालस्य राज्ञो रज्जुकालेखकास्तेषां सभायां परिभुज्यमाना करणशाला जीर्णशुल्कशाला त
स्यां प्राक्किल तस्या अपापेति नाम देवैस्तु पापा पेत्युक्तं कथं भगवतस्तत्र निर्वृतत्वात् बहुश
त्वे जिनत्वे च द्विचत्वारिंशत् वर्षारात्राः पश्चिम शब्दः पर्यंतवाची मंगलार्थं च अपश्चिम इत्यु
क्तं ४२ भगवान् अंत्यवर्षावासमुपागतः॥ अथ भगवतो निर्वाणकल्याणकमाह॥ तत्र सूत्रं॥
तस्स णं अंतरावासस्स जे से वासाणं चउत्थे मासे सत्तमे पक्खे कत्तियबहुले तस्स णं कत्तियबहु
लस्स पन्नरसीपक्खेणं जा सा चरमा रयणी तं रयणिं च णं समणे भगवं महावीरे कालगए विइक्कंते
समुज्जाए छिन्नजाइजरामरणबंधणे सिद्धे बुद्धे मुत्ते अंतगडे परिनिव्वुडे सव्वदुक्खप्पहीणे चंदे
नामं से दुच्चे संवच्छरे पीइवद्धणे मासे नंदिवद्धणे पक्खे अग्गिवेसे नाम दिवसे उवसमे त्ति पवुच्चइ १०५
देवानंदा नामं सा रयणी निरति त्ति पवुच्चई अच्चे लवे मुहुत्ते पाणू थोवे सिद्धे नागे करणे सव्वट्ठसिद्धे मु
हुत्ते साइणा नक्खत्तेणं जोगमुवागएणं कालगए विइक्कंते जाव सव्वदुक्खप्पहीणे॥ व्या० तत्र च

जे से त्ति यस्मिन् अंतरावासे वर्षारात्रे २६ वर्षाकालस्य चतुर्थे मासे सप्तमे पक्षे एतावता कार्त्तिक
बहुलामावसी दिवसे या सा चरमा रजनी दिनापेक्षया पश्चाद्भाविनी रात्रिः यद्वा अमावास्या रात्रिप
र्यंतः तत्र भगवान् कालगतः कालस्थितिस्तत्स्थित्योः कालात्मतः व्यतिक्रांतः संसारात् समुद्यातः स
म्यग् ऊर्द्ध्वं यातः न सुगतादिवत् ते हि ब्रुवते ज्ञानिनो धर्मतीर्थस्य कर्त्तारः परमं पदं गत्वा गच्छंति भू
योपि भुवं तीर्थनिकारतः १ छिन्नं जात्यादीनां बंधनं हेतुभूतं कर्म येन सिद्धः साधितार्थः बुद्धो ज्ञः मु
क्तो भवोपग्राहिकर्मांशेभ्यः अंतकृत्सर्वदुःखानां परिनिर्वृतः कर्मकृतसकलसंतापविरहात्
किमुक्तं भवति सर्वाणि दुःखानि शारीरमानसानि प्रक्षीणानि यस्य युगे हि पंच संवत्सराणि
भवंति तत्र तृतीयं पंचमं च अभिवर्द्धिताख्यं शेषाणि त्रीणि चंद्राख्यानि स च द्वितीयश्चंद्र
संवत्सरः तत्प्रमाणं त्रीणि शतानि चतुःपंचाशदधिकानि अहोरात्राणि द्वादश च द्विषष्टिभागा
दिवसस्य दिन ३५४ भा० ६२।१२ ततश्चंद्रनाम्नि द्वितीये संवत्सरे प्रीतिवर्द्धननाम्नि मासे नंदिवर्द्धने प
क्षे अग्निवेसे दिवसे उवसमे त्ति इति शब्दो वाक्यालंकारे उपसम इत्यपि तस्य नामेत्यर्थः देवानंदा नाम सा
अमावास्या रजनी निर्ऋतिरित्यप्युच्यते तस्यां अर्च्यनाम्नि लवे मुहूर्त्तनाम्नि प्राणे प्राणापाने क्वचित्स्तु
क्तेति नाम सिद्धनाम्नि स्तोके एकादशकरणांतर्वर्त्तिशकुन्यादिस्थिरकरणचतुष्टयमध्ये तृतीये नाग
नाम्नि करणे अमावास्या उत्तरार्द्धभावि तन्नागकरणं भवति सर्वार्थसिद्धनाम्नि मुहूर्त्ते स्वातिनक्षत्रे चंद्रे
ण सह योगं वर्त्तमाने जे से वासाणं चउत्थे मासे इत्यत आरभ्य सूत्रे सर्वत्र प्रथमास्ति फलितार्थकरणे

नपरमार्थतोऽत्राधिकरणत्वात्सप्तमी लिखितास्ति २६ अथ यस्यां रात्रौ भगवान् कालगतस्तत्र देवदेवी
भिः किं कृतं इत्याह तत्सूत्रं॥ जं रयणिं च णं समणे भगवं महावीरे कालगए जाव सव्वदुक्खप्पहीणे
सा णं रयणी बहूहिं देवेहिं देवीहि य ओवयमाणेहिं उप्पयमाणेहि य उज्जोविया आवि हुत्था २७
जं रयणिं च णं समणे० जाव सव्व० सा णं रयणी बहूहिं देवेहिं देवीहि य ओवयमाणेहिं उप्पयमा
णेहि य उप्पिंजलभूया कहकहभूया आवि हुत्था २८ आलापकद्वयं सुगमं पूर्वं व्याख्यातं च॥ अ
थ भगवति मोक्षं गते गोतमस्य किं जातं तत्सू त्रं॥ जं रयणिं च णं समणे भगवं महावीरे काल
गए जाव सव्वदुक्खप्पहीणे तं रयणिं च णं जि ट्ठस्स इंदभूइस्स अणगारस्स अंतेवासिस्स
नायए पिज्जबंधणे वुच्छिन्ने अणंते अणुत्त रे जाव केवलवरनाणदंसणे समुप्पन्ने
२९ यस्यां रात्रौ भगवान्मोक्षं गतस्तदा ज्येष्ठ स्य अंतेवासिनः शिष्यस्य गोतमस्य गोत्रेण इं
द्रभूतेर्नाम्नः ज्ञातजे श्रीमहावीरविषये पिज्जबं धणेत्ति स्नेहबंधने व्यवच्छिन्ने सति त्रुटिते सति के
वलं उत्पन्नं शेषं सुगमं ३० अत्रायं गोतमसंबंधो भगवता स्वनिर्वाणसमये देवशर्मणः प्रतिबो
धार्थं क्वापि गौतमो मुक्तः तं प्रतिबोध्य पश्चादागच्छन् देवसंनिपातं दृष्ट्वा उपयोगेन स्वामिनिर्वाणं
ज्ञात्वा वज्राहत इव शून्यचित्तः क्षणं तस्थौ अवादीच्च हे वीर त्वयि सूर्येऽस्तमिते अद्य मिथ्यात्वतिमिरं
प्रसरति कुतीर्थिकघूका गर्जंति दुर्भिक्षडमरवैरादिनिकराः प्रादुर्भवंति हे वीर त्वां विना भरतक्षे
त्रं राहुग्रस्तचंद्रमाकाशमिव विध्यातदीपं गृहमिव जातं हा हा वीर त्वया किं कृतं यत् ईदृशे

अवसरे अहं दूरीकृतः किमहं आदकं मंडयित्वा बालकवत्तवांचले अलगिष्यं अथवा केवलज्ञान
भागं अमार्गयिष्यं किं वा त्वयि अहं कृत्रिमरागोऽभविष्यं किं वा मुक्तौ संकीर्णं किं वा तव अणरवकरो
ऽभवं किं वा तव भारोऽभवं हे वीर कथं विस्मारितोऽहं अथ कस्याग्रे संदेहान्प्रक्ष्ये को मां गोयमाइ
ति वादयिष्यति हे वीर विरहे अवलिनत्वया महान् विरामः कृतः कस्याग्रे कथयामि वीर वीर वी
मे लग्ना उत्तर्विचारितं अं ज्ञातं वीतरागा अस्नेहा भवंति धिग्ममैकपाक्षिकं स्नेहं अलं स्नेहेन
एकोस्मि नास्ति मे कोपि द्वितीयः एवं ध्यानवतः केवलज्ञानमुत्पन्नं प्रातरिंद्राद्यैर्महिमोत्सव
पूर्वपट्टाभिषेकः कृतः सर्वसंघस्य प्रमोदोऽभू रतः उक्तं यस्यां रात्रौ किं जातं तत्सूत्रं॥ जं
रयणिं च णं समणे० जाव सव्वदुक्खप्प० तं रय णिं च णं नव मल्लई नव लेच्छई कासीको
सलगा अट्ठारस वि गणरायाणो पाराभोयं अमावसाए पाराभोयं पोसहोववासं पट्ठवि
सु गए से भावुज्जोए दव्वुज्जोयं करिस्सामो ३१॥ तस्यां रात्रौ काशिदेशस्य राज्ञो मल्लकि
ज्ञातीया नव तथा कोशलदेशस्य राज्ञो लेच्छकिज्ञातीया नव ते कार्यवशात् गणमेलापकं कुर्वंतीति
गणराजानो १८ अष्टादश ये चेटकमहाराजस्य भगवन्मातुलस्य सामंतास्ते तस्याममावास्यां पारंपर्यंतं भव
स्य आभोगयति प्रापयति यः सः पाराभोगः संसारसागरपारप्रापणप्रवणः अथवा पारं पर्यंतं यावदा
भोगो विस्तारो यस्य सः पाराभोगोऽहोरात्रिकः प्रभातं यावत्संपूर्ण इत्यर्थः तं तथाविधं पोषधोपवासं
पोषधयुक्तोपवासं पट्ठविंसु त्ति प्रस्थापितवंतः कृतवंतः क्वचित् पाराभोए इति पाठ तत्र बारमासो

म्यते अवलोक्यते यैस्ते ह्यारा लोकाः प्रदीपास्तान् कृतवंतः आहारत्यागपौषधरूपमुपवासं वा ऽकार्षुरिति
व्याचक्षते एतदर्थानुपाति च उत्तरसूत्रं गतः स भावोद्योतो ज्ञानरूपो ज्ञानज्ञानिनोः कथंचिदभेदात् ज्ञानम
य उद्योतो भगवान् गतो निर्वाणः अतो द्रव्योद्योतं प्रदीपरूपं करिष्यामः इति हेतोः प्रदीपाः प्रवर्त्तिताः त
तः प्रभृति दीपोत्सवः संवृत्तः कार्त्तिकशुक्लप्रतिपदि च देवैः केवलमहिमा चक्रे अतस्तत्रापि जनप्रमोदः
नंदिवर्द्धननृपश्च भगवन्निर्वाणं श्रुत्वा शोकार्त्तः सन् सुदर्शनया भगिन्या संबोध्य सादरं स्वगृहे आकार्य
भोजितः ततो भ्रातृद्वितीयापर्व प्रवृत्तं पुनः निर्वा णसमये किं जातं तत्सूत्रं॥ जं रयणिं च णं समणे
जाव दुक्खप्पहीणे तं रयणिं च णं खुद्दाए भासरा सीनामा महग्गहे दोवाससहस्सठिई समणस्स
भगवओ महावीरस्स जम्मनक्खत्तं संकंते ज प्पभिइं च णं से खुद्दाए भासरासी महग्गहे
दोवाससहस्सठिई समणस्स जम्मनक्खत्तं सं कंते तप्पभिइं च णं समणाणं निग्गंथाणं निग्गंथी
णय नो उदिए २ पूया सक्कारे पवत्तइ ११२ जया णं से खुद्दाए जाव जम्मनक्खत्ताओ विइक्कंते भविस्स
इ तया णं समणाणं निग्गंथाणं निग्गंथीणय उदिए २ पूया सक्कारे भविस्सइ व्या० यस्यां रात्रौ भगवान्
सर्वदुःखप्रहीणो जातः तस्यां रात्रौ क्षुद्रात्मा क्रूरस्वभावो भस्मराशिनामा त्रिंशत्तमो महाग्रहो द्विवर्षसह
स्रस्थितिः एकराशौ एतावंतं कालमवस्थानात् भगवतो जन्मनक्षत्रं संक्रांतः यदा च जन्मनक्षत्रं संक्रांत
स्तदा तस्य फलमिदं श्रमणानां निर्ग्रंथानां निर्ग्रंथीनां च उदित उदितः स्फीतः स्फीतः पूजा अभ्युत्थानादिरू
पा नादिभिः सत्कारो वस्त्रादिभिर्नो प्रवर्त्तते यदा च अयं भस्मराशिग्रहो जन्मनक्षत्राद् व्यतिक्रांतो भवि

ष्यति तदा पुनरपि निर्ग्रंथानां निर्ग्रंथीनां च पूजा सत्कारो भविष्यति अत एव इंद्रेण तत्समये स्वामी विज्ञ
प्तः हे स्वामिन् त्वयि मोक्षं गते तव संतानस्य वर्षसहस्रद्वयं यावत् पीडां करिष्यति ततः क्षणमायुर्वर्द्धनेन
भस्मग्रहमुखं विफलय ततः स्वामिना प्रोक्तं हे इंद्र त्वं मत्तीर्थभक्त एवं वदसि परं नैवं भूतं भविष्यति भ
वति वा यत्कोऽपि तीर्थंकरो वा चक्रवर्त्यादिर्वा स्वकीयं त्रुटितं आयुः संधातुं समर्थो न भवति भवितव्य
तानुसारेण भस्मग्रहस्योदयो जातः पुनः कल्किकुनृपे मगधदेशे षडशीतिकवर्षायुषि संघस्य उप
द्रवं कुर्वति वर्षसहस्रद्वये संपूर्णे जाते त्वयातः स्मिन् हते भस्मकग्रहे व्यतिक्रांते कल्किनृपपुत्रस्य
धर्मदत्तस्य त्वया स्थापितस्य राज्यादारभ्य तीर्थ स्य पूजा सत्कारो भविष्यति अथ भगवति कालं
गते किं जातं तत्सूत्रं॥ जं रयणिं च णं स मणे भगवं महावीरे कालगए सव्वदुक्ख
प्पहीणे तं रयणिं कुंथु अणुद्धरी नामं समुप्प न्ना जा ठिया अचलमाणा छउमत्थाणं निग्गंथा
णं निग्गंथीण य २ नो चक्खुफासं हव्वमागच्छति १२ ५॥ जा अठिया चलमाणा छउमत्थाणं निग्गंथाणं
निग्गंथीणय चक्खुफासं हव्वमागच्छति १२६ जं पासित्ता बहूहिं निग्गंथेहिं निग्गंथीहि य भत्ताइं पच्च
क्खायाइं किमाहु भंते अज्जप्पभिइ संजमे दुराराहे भविस्सइ॥ व्या० यस्यां रात्रौ भगवान् मोक्षं गत
स्तस्यां रात्रौ कौ पृथ्व्यां तिष्ठतीति कुंथुः प्राणिजातिर्नोद्धर्तुं शक्यते इति अनुद्धरी नाम समुत्पन्ना अणुसूक्ष्मं
देहं धरतीति अणुधरीति चूर्णिः स्थिता इत्यस्य व्याख्यानं या अचलमाना सती निर्ग्रंथानां निर्ग्रंथीनां च
नो नैव चक्षुःस्पर्शं दृष्टिपथं हव्वं शीघ्रं आगच्छति या च अस्थिता चलमाना सा निर्ग्रंथानां निर्ग्रंथी

५
॥कल्प॰

नां च वक्तुः स्पर्शं समायाति यां अणुद्धरीं दृष्ट्वा बहुभिर्निर्ग्रंथैर्बहुभिर्निर्ग्रंथीभिश्च भक्तानि प्रत्याख्यातानि अ
नशनं कृतमित्यर्थः अत्र शिष्यः प्राह किमाकस्मिकं ता गुरवः किं कारणं अणुद्धर्या उत्पन्नो भक्तप्रत्याख्याने
वा इति शिष्येण पृष्टे गुरुराह अद्यप्रभृति दुराराधः संयमो भविष्यति जीवाकुलत्वात् पृथिव्याः संयम
योग्यक्षेत्राभावात् पाषंडिकसंकराच्च ३७ अथ भगवतश्चतुर्विधसंघसंपदमाह॥ तत्र सूत्रं॥ तेणं का
लेणं तेणं सम॰ समणस्स भगवओ महावीरस्स इंदभूइपामुक्खाओ चउद्दस समणसाहस्सीओ उक्कोसिया
समणसंपया हुत्था ३८ स॰ भ॰ म॰ अज्जचंदणा पामुक्खाओ छत्तीसं अज्जियासाहस्सीओ उक्कोसि
आ अज्जियासंपया हुत्था ३९ स॰ भ॰ म॰ सं खसयगपामुक्खाणं समणोवासगाणं एगा सय
साहस्सीओ अउणट्ठिं च सहस्सा उक्कोसिया समणोवासयाणं संपया हुत्था ४० स॰ भ॰ म
॰ सुलसारेवईपामुक्खाणं समणोवासियाणं तिन्नि सयसाहस्सीओ अट्ठारस सहस्सा उक्को
सिया समणोवासियाणं संपया हुत्था ४१ स॰ भ॰ म॰ तिन्नि सया चउद्दसपुव्वीणं अजिणाणं जिण
संकासाणं सव्वक्खरसंनिवाईणं जिणो विव अवितहं वागरमाणाणं उक्कोसिया चउद्दसपुव्वीणं सं
पया हुत्था ४२ स॰ भ॰ म॰ तेरस सया ओहिनाणीणं अइसेसपत्ताणं उक्कोसिया ओहिनाणीणं संपया हु
त्था ४३ स॰ भ॰ म॰ सत्त सया केवलनाणीणं संभिन्नवरनाणदंसणधराणं उक्कोसिया केवलनाणिसं
पया हुत्था ४४ स॰ भ॰ म॰ सत्त सया वेउव्वीणं अदेवाणं देवड्ढिपत्ताणं उक्कोसिया वेउव्वियसंपया हु
त्था ४५ स॰ भ॰ म॰ पंच सया विउलमईणं अड्ढाइज्जेसु दीवेसु दोसु समुद्देसु सन्नीणं पंचिंदियाणं पज्जत्तगा

णं मणोगए भावे जाणमाणाणं उक्कोसिया विउलमईणं संपया हुत्था ४६ स॰ भ॰ म॰ चत्तारि सया वाईणं सदे
वमणुयासुराए परिसाए वाए अपराजियाणं उक्कोसिया वाईसंपया हुत्था ४७ स॰ भ॰ म॰ सत्त अंतेवासिस
याइं सिद्धाइं जाव सव्वदुक्खप्पहीणाइं चउद्दस अज्जियासयाइं सिद्धाइं ४८ स॰ भ॰ म॰ अट्ठसया अणुत्त
रोववाईयाणं गइकल्लाणाणं ठिइकल्लाणाणं आगमेसिभद्दाणं उक्कोसिया अणुत्तरोववाईणं संपया
हुत्था ४९ स॰ भ॰ म॰ दुविहा अंतगडभूमी हुत्था तं जहा जुगंतगडभूमी परियाअंतगडभूमीय जाव त
च्चाओ पुरिसजुगाओ जुगंतगडभूमी चउवासपरिय ाए अंतमकासी ५० व्या॰ तस्मिन् काले तस्मिन् सम
ये श्रमणस्य भगवतो महावीरस्य इंद्रभूतिप्रमु खाः चतुर्दशसहस्राः उत्कृष्टाः श्रमणानां संप
दोऽभवत् १ श्रीमहावीरस्य आर्यचंदनाप्र मुखाः षट्त्रिंशत्सहस्राः आर्याणां सं॰ २
श्रीमहावीरस्य शंखशतकादीनां श्रावकाणां ाएकं लक्षं एकोनपंचाशत्सहस्राश्च सं॰ ३ श्रीवी
रस्य नागसार्या द्वात्रिंशत्पुत्रजननी रेवतीमंख लिपुत्रमुक्ततेजोलेश्याजातातिसारस्य भगव
तस्तथाविधौषधदानेन आरोग्यकर्त्री तथाविधसुलसारेवतीप्रमुखाणां श्राविकाणां त्रीणि लक्षा
अष्टादशसहस्राः श्रा॰ संप॰ ४ श्रीवीरस्य त्रीणि शतानि चतुर्दशपूर्वधराणां संपदः किंवि॰ अजिना
नामपि असर्वज्ञानामपि सतां सर्वाक्षरसंनिपाता वर्णसंयोगा ज्ञेयतया विद्यंते येषां ते तेषां अतो जि
न इव अवितथं सद्भूतार्थं व्याकुर्वाणानां केवलिश्रुतकेवलिनोः प्रज्ञापनायां तुल्यत्वप्रतिपादनात्
५ श्रीवीरस्य त्रयोदशशतानि अवधिज्ञानिनां संपदः किंभूता अतिशेषा अतिशया आमर्षौषध्या

दयस्थानज्ञानां ६ श्रीवीरस्य सप्तशतानि केवलज्ञानिनां संपदः किंभूतानां अतिशेषाकेव संभिन्ने
सिद्धसेनदिवाकरमतेन अन्योन्यमिलिते एकसमयभाविनी जिनभद्रगणिक्षमाश्रमणमतेन तु सं
सम्यक् भिन्ने पृथक् समयभाविनी संपूर्णे वा संभिन्ने वरज्ञानदर्शने धरंतीति ये ते तेषां ७ वीरस्य सप्तश
तानि वैक्रियलब्धिधराणां संपदः किंविशिष्टानां अदेवानामपि देववत् ऋद्धिधराणां ८ श्रीवीरस्य
पंचशतानि विपुलमतिधराणां संपदः विपुला घटोनेन चिंतितः सच सौवर्ण इति द्रव्यतः पाटलिपुत्र
कीय इति क्षेत्रतः २ शारद इति कालतः ३ कृष्ण इतिभावतः ४ इत्यादिविशेषणोपेतमन्यमानत्व
स्कंधग्राहित्वेन विस्तीर्णा मतिर्मनःपर्यायज्ञानं येषां ते विपुलमतयः तेषां तथा किं कुर्वतां स
र्वेषु अर्द्धतृतीयद्वीपेषु द्वयोः समुद्रयोः अस्थितानां संज्ञिनां पर्याप्तानां पंचेंद्रियाणां मनोगत
भावान् दर्शनाभावात् जानतां ऋजुमतयस्तु सामान्यत एव तेषां अर्द्धतृतीयांगुलन्यूनमनुष्यक्षेत्रव
वस्थितानां संज्ञिनां मनोमात्रग्राहकत्वं ततोन्यासामाणाः ३ इत्युक्तं यच्च क्वचित् श्रीऋषभचरित्रादौ
उत्तरं दृश्यते तत्र पश्यतामिव पश्यतां साक्षात्करणादिति व्याख्येयं ९ श्रीवीरस्य चत्वारिशतानि वादि
नां संपदः किंभूतानां सदेवमनुजासुरायां सभायां अजेयानां जेतुं अशक्यानां १० श्रीवीरस्य सप्तश
तानि अंतेवासिनां शिष्याणां सिद्धानि सर्वदुःखप्रहीणानि ११ श्रीवीरस्य चतुर्दशशतानि आर्याणां
सिद्धानि १२ श्रीवीरस्य अष्टशतानि अनुत्तरोपपातिनां शिष्याणां जातानि किंभूतानां गतिर्देवगतिरू
पा कल्याणं येषां ते तेषां पुनः स्थितिर्देवायुरूपा कल्याणी उत्कृष्टा येषां अथवा गतौ प्राणगमनेपि स्थि

तौ जीवितेपि कल्याणं येषां तवनियमसुट्ठियाणं कल्लाणमित्यादिवचनात् अतएव आगमिष्यद्भद्राणां
आगामिभवे सेत्स्यत्वात् दत्तयकुमारादीनामिव १३ श्रीवीरस्य द्विविधा अंतकृद्भूमिः अंतकृतः सर्वांतकृ
तो निर्वाणयायिनः तेषां भूमिः कालः एका युगांतकृद्भूमिः युगानि कालमानविशेषाः तानि च क्रमवर्त्तीनि तत्
साधर्म्यात् ये क्रमवर्त्तिनो गुरुशिष्यप्रशिष्यादिरूपाः पुरुषास्तेपि युगानि तैः प्रमिता अंतकृद्भूमिर्यासा युगां
तकृद्भूमिः १ द्वितीया पर्यायांतकृद्भूमिः पर्यायस्तीर्थंकरस्य केवलित्वकालः तमाश्रित्य अंतकृद्भूमिः तथा
तस्यां तत्र पंचमी द्वितीयार्थे यावत् तृतीयं पुरुष एवयुगं पुरुषयुगं श्रीवीरादारभ्य तृतीयं पुरुष
युगं यावत् साधवः सिद्धाः श्रीवीरः १ सुधर्मस्वामी २ जंबूश्च ३ ततः सिद्धिगतिच्छेदः चतुर्वर्षपर्या
ये केवलिपर्यायापेक्षया भगवति जिने सति अंतं भवांतमकार्षीत् तत्तीर्थे साधुनरः क
श्चिदपीति केवलोत्पत्तेः चतुर्वर्षैः सिद्धिगमनारंभः॥ अथ भगवतः सर्वायुर्वर्षसंकलनामा
ह॥ तत्र सूत्रं॥ तेणं कालेणं २ समणे भगवं महावीरे तीसं वासाइं अगारवासमज्झे वसित्ता साइरे
गाइं दुवालसवासाइं छउमत्थपरियायं पाउणित्ता देसूणाइं तीसं वासाइं केवलपरियायं पाउणित्ता
बावत्तरिं वासाइं सव्वाउयं पाउणित्ता खीणे वेयणिज्जाउयनामे इमीसे उसप्पिणीए दूसमसुसमाए
समाए बहुविइक्कंताए तिहिं वासेहिं अद्धनवमेहिं य मासेहिं सेसेहिं पावाए मज्झिमाए हत्थिवाल
स्स रन्नो रज्जुसभाए एगे अबीए छट्ठेणं भत्तेणं अपाणएणं साइणा नक्खत्तेणं जोगमुवागएणं पच्चूस
कालसमयंसि संपलियंकनिसन्ने पणपन्नं अज्झयणाइं कल्लाणफलविवागाइं पणपन्नं अज्झय

णाइं पावफलविवागाइं छत्तीसं च अपुट्ठवागरणाइं वागरित्ता पहाणं नाम अज्झयणं विभावेमाणे
२ कालगए विइक्कंते समुज्जाए छिन्नजाइजरामरणबंधणे सिद्धे बुद्धे मुत्ते अंतगडे परिनिव्वुडे सव्व
दुक्खप्पहीणे ॥१४७॥ व्या० तस्मिन्काले तस्मिन्समये श्रमणो भगवान्महावीरस्त्रिंशद्वर्षाणि अगारवासे
उषित्वा सार्द्धषण्मासाधिकानि द्वादशवर्षाणि छद्मस्थपर्यायं पालयित्वा सार्द्धषण्मासन्यूनानि त्रिं
शद्वर्षाणि केवलपर्यायं प्रतिपाल्य द्विचत्वारिंशद्वर्षाणि दीक्षां प्रतिपाल्य द्वासप्ततिवर्षाणि सर्वमा
युः प्रतिपाल्य क्षीणे सति वेदनीयायुर्नामगोत्रेऽ स्यामवसर्पिण्यां दुषमसुषमायां बहुव्यतिक्रां
तायां त्रिषु वर्षेषु सार्द्धाष्टमासेषु च शेषेषु नवा शीतिपक्षेषु अवशिष्टेषु इत्यर्थः मध्यमपापा
यां नगर्यां हस्तिपालस्य राज्ञो रज्जुसभा यां एकः कर्मसहायविरहात् अद्वितीय
: एकाकी न ऋषभादिवत् दशसहस्रादिवृतः अपानकेन षष्ठेन तपसा स्वातिनक्षत्रे चंद्रेण
सह योगं उपगते प्रत्यूषकाललक्षणो योऽवस रः समयः तस्मिन् संगतः पर्यंकः पद्मासनं तत्र
निषिण्णः उपविष्टः पंचपंचाशदध्ययनानि कल्याणफलविपाकानि पंचपंचाशदध्ययनानि च पा
पफलविपाकानि षट्त्रिंशत् अपृष्टव्याकरणानि प्ररूपयित्वा पुण्यफलविपाकाध्ययने प्रधा
नं नाम अध्ययनं मरुदेवाध्ययनं विभावयन् प्ररूपयन् कालगत इति शेषं सुगमं॥ अथ भगवति
निर्वाणं प्राप्ते पश्चात्कियति काले लोकसमक्षं कल्पवाचना जाता तत्र सूत्रं॥ समणस्स भगवओ म
हावीरस्स जाव सव्वदुक्ख० नववाससयाइं विइक्कंताइं दसमस्स य वाससयस्स अयं असीइ

मे संवच्छरे काले गच्छइ वायणंतरे पुण अयं तेणउए संवच्छरे काले गच्छइ ॥१४८॥ व्या० श्रीवीर
निर्वृते नवसु वर्षशतेषु अशीत्यधिकेषु इयं वाचना जाता इत्यर्थं व्याख्यायमानेन तथा चतुराणांशी
तिः अस्य सूत्रस्य श्रीवीरनिर्वाणात् सप्तत्यधिकवर्षशतोत्पन्नश्रीभद्रबाहुना प्रणीतत्वात् तस्मादि
यति काले इयं वाचना पुस्तकेषु न्यस्तेति संभाव्यते देवर्द्धिगणिक्षमाश्रमणैर्हि व्यवच्छित्तिं दृष्ट्वा इय
ति काले सर्वे ग्रंथाः पुस्तकेषु न्यस्ता इत्यत एव तत्र ग्रंथे वक्ष्यमाणस्थविरावलीप्रांते देवर्द्धिगणिनमस्का
रं वक्ष्यंति पूर्वं तु गुरुशिष्याणां श्रुताध्ययनाध्या पनव्यवहारः पुस्तकनिरपेक्ष एव प्रवर्त्तते॥
केचित्तु इदमाहुः यदियत्कालातिक्रमे ध्रु वसेन नृपस्य पुत्रमरणार्त्तस्य समाधये आनं
दपुरे सभायां अयं ग्रंथो वाचयितुमारब्ध इति बहुश्रुता एव यथावद्विदंति त्रिनव
तियुत वर्षनवशतपक्षे तु इयता कालेन पंच म्याश्चतुर्थ्यां पर्युषणापर्व प्रवर्त्तते तेणउय
नवसएहिं समइक्कंतेहिं वद्धमाणाउ पज्जोस वणचउत्थी कालगसूरीहिंतो ठविया ॥१॥ वी
सहिदिणेहिं कप्पो पंचगहाणीय कप्पठवणा य नवसयतेणउएहिं वुच्छिन्ना संघआणाए ॥२॥ सा
लाहणेण रन्ना संघाएसेण कारिओ भयवं पज्जुसवणचउत्थी चाउम्मासं चउद्दसीए ॥३॥ चउमासय
पडिक्कमणं पक्खियदिवसंमि चउव्विहो संघो नवसयतेणउएहिं आयरणं तं पमाणंति ॥४॥ इति ती
र्थोद्गारादिषु श्रवणात् इयं पंचमी वाचना अतिविस्तरा जातास्ति परं यः कल्पसूत्रस्य एकादशवा
चना त्रयोदशवाचना पंचदश सप्तदश वा वाचना भवति तदा पंचमीवाचनायाः वाचनाद्वयं का

र्थेन नव वाचनाः सुच सोऽनविच्छित्तिः १ विप्रयाचना २ द्वयोः धिकारः सत्यां वेलायां वाच्यानो चेन्न
हि॥ व्याख्यानं कल्पसूत्रस्य पंचमं सुगमं स्फुटं शिष्यार्थपावकाश्चक्रुः समयादिमसुंदराः १ ५
॥ तत्र प्रथमवाचनायां पंचपरमेष्ठिनमस्कारः ७ नः श्रीमहावीरदेवस्य संक्षेपवाचनया षट्कल्याणका
नि व्याख्यातानि १ द्वितीयवाचनायां श्रीमहावीरदेवस्य च्यवनकल्याणकं दशाश्चर्यसहितं गर्भापहा
रकल्याणकं च व्याख्यातं २ तृतीयवाचनायां श्रीमहावीरदेवस्य मातात्रिशलाक्षत्रियाण्यायै चतु
र्दशस्वप्नादृष्टास्ते व्याख्याताः ३ चतुर्थवाचना यां श्रीमहावीरदेवस्य जन्मकल्याणकं व्याख्यातं
४ पंचमवाचनायां श्रीमहावीरदेवस्य दीक्षा १ ज्ञान २ निर्वाण ३ कल्याणकानि व्याख्यातानि ५
अथ षष्ठवाचनायां पश्चानुपूर्व्या श्रीपार्श्व नाथस्य श्रीनेमिनाथस्य च पंचकल्याणका
नि व्याख्यायंते तत्र पूर्वं श्रीपार्श्वनाथस्य तत्रा पि पूर्वं श्रीपार्श्वनाथस्य दशभवासूच्यादि॥ पो
तनपुरं नाम नगरं तत्र अरविंदो राजा तस्य पौरो हितस्य पुत्रौ भ्रातरौ ज्येष्ठः कमठः १ लघुर्मरुभूति
:२ तत्र कमठः प्रकृत्या शठो दुराचारी मरुभूतिश्च धार्मिकः कमठस्य स्त्री वरुणा मरुभूतेश्च स्त्री वसु
धरा परं सा स्त्रीजातित्वेन चपलस्वभावा एकदा कमठो दृष्टा भ्राता प्रच्छन्नहत्या प्रधानवस्त्रफलादि
प्रदानेन अनुकूलां कृत्वा वसुंधरां प्रार्थयामास जातः संबंधः ततः कमठस्त्रिया वरुणया तत्स्वरूपे १११
ज्ञाते असहिष्णुतया देवरस्य मरुभूतेः प्रोक्तं हे देवर मम सपत्नीत्वं तार्थया समं तुभ्योस्ति न मन्यसे तदा
परीक्षां कुरु ततो मरुभूतिः कपटेन ग्रामांतरे गत्वा आगत्य प्रच्छन्नवेषांतरं गुटिकाप्रयोगेण स्वरसे

दं च कृत्वा रात्रौ स्वगृहद्वारे आगत्य सुप्तः सन् सर्वस्वभ्रातृदुराचारं ददर्श ततः क्रुद्धः सन् प्रभाते राजस
भायां गत्वा राज्ञोग्रे भ्रातृदुराचारं कथयतिस्म ततो रुष्टेन राज्ञा मयूरबंधनेन बद्धा विटंबनां कृत्वा न
गरमध्ये भ्रामयित्वा कमठो बहिर्निष्कासितः ततस्तापसो भूत्वा पर्वते तपस्यां कुर्वन् तिष्ठति नगरमध्येन
याति ततो नगरलोकास्तपस्विनं ज्ञात्वा तत्र गत्वा भोजनादिना भक्तिं कुर्वंति पूजां संति च तदा मरुभूति
रपि अचिंतयत् अहमपि भ्रातृसमीपे गत्वा स्वापराधं क्षामयामि चरणकमले पतामि इति विमृश्य तत्र
गत्वा अधोमुखो यावत्पादयोः पतितस्तावत्तेन क मठेन कोपात् शिलामस्तके मुक्ता मृतो मरुभूतिः
इति प्रथमो भवः १ ततः कमठो भ्रातृघातकः। समेतशिखरपर्वते कुर्कुटसर्पो जातः मरुभू
तिरपि तत्रैव स्थाने हस्ती जातः अथैकदा अरविंदराजेन संध्यासमये पंचवर्णाभ्रप
टलस्वरूपं दृष्ट्वा वैराग्येन दीक्षा गृहीता पश्चा त् अरविंदसाधुः समेतशिखरतीर्थयात्रार्थं
व्रजन् अटवीमध्ये सरोवरतीरे तपस्यां कुर्वन्। कायोत्सर्गे स्थितः मरुभूतिजीवोपि हस्ती सरो
वरे नीरपानार्थं आगतस्तं हस्तिनं मदोन्मत्तं क्रुद्धं दृष्ट्वा यात्रार्थं आगतस्तत्र स्थितः संघः पलायितः त
तोऽरविंदेन राजर्षिणा अवधिज्ञानेन उपलक्ष्य हस्ती प्रति बोधितः उपशमं गतः जातिस्मरणं ज्ञानं उत्पन्नं
श्रावकव्रताभिलाषी सन् मुनिं प्रणम्य हस्ती स्वस्थानं गतः मुनिरपि यात्रार्थं चलितः अथैकदा मरुभूति
जीवो हस्ती उष्णकाले तृषार्तः सरोवरे पानीयपानार्थं प्रविष्टः तदवसरे कमठजीवेन कुर्कुटसर्पेण
कुंभस्थले दष्टो मृतः इति द्वितीयो भवः २ ततो जैनधर्माभ्यासनया मरुभूतिजीवो हस्ती सहस्रारे॰

ष्टमदेवलोकेदेवोजातः कुर्कुटसर्पेदृष्टिघातपापेनपंचमेनरकेनारकीजातः इतितृतीयोभव
: ३ ततोमरुभूतिजीवः ततश्च्युत्वाकिरणवेगनामाविद्याधरोराजपुत्रोजातः सचरूपलावण्यादि
गुणसुंदरः प्राप्तराज्योपिवैराग्यात्कुलक्रमागतंराज्यंत्यक्त्वादीक्षांजग्राह सचप्रतिग्रामंविहर
न्एकदापर्वतगुहायांस्थितः तदानीकमठजीवोपिपंचमनरकान्निःसृत्यतत्रसर्पःसमुत्पन्नो
ऽभूत् ससर्पोमुनिंदृष्ट्वापूर्ववैरात्क्रोधेनदष्टवानतिस्म मुनिर्विषाक्रांतोपिसमाधिनामृतः इतिचतु
र्थोभवः ४ ततोमरुभूतिजीवोऽच्युतनाम्निद्वाद शेदेवलोकेदेवोजातः सर्पोमृत्वापुनःपंचमेन
रकेनारकीजातः इतिपंचमोभवः ५ ततोम रुभूतिजीवोद्वादशमदेवलोकाच्च्युत्वासाग
रोपम२२क्षयेपश्चिममहाविदेहेवज्रना भनामाराजाजातः सोपिवैराग्यात्कुल
क्रमागतंराज्यंपरित्यज्यदीक्षांलात्वा ग्रामनग रादिषुविचरन्सिद्धपदर्व्यांगतः तत्रकमठ
जीवोपिसंसारंभ्रांत्वाभिल्लत्वेनउत्पन्नोस्ति। सं सारभ्रमणंविनापंचसागरोपमांतरंनमिलति
यतः श्रीपार्श्वनाथचरित्रेपिनवक्रमादितिप्रोक्तं तथाहि॥ अदिजीवोपिनरकादुद्धृत्यासुद्भवक्रमा
त् ज्वलनाद्रौसुकच्छस्थेभिल्लोनाम्नाकुरंगकः १ इतितेनभिल्लेनआखेटकार्थंगच्छतानिर्जगृहान्नि
र्गतेनप्रथमंससाधुःसन्मुखमागच्छन्दृष्टः अपशकुनमितिविचार्यबाणेनहतोमृतः इतिषष्ठो
भवः ६ ततःसाधुःसमाधिनामृत्वामध्यमग्रैवेयकेदेवोजातः भिल्लोमहापापीसप्तमनरकेउत्प
न्नः इतिसप्तमोभवः ७ अथमरुभूतिजीवोदेवोमध्यमग्रैवेयकात्च्युत्वामहाविदेहक्षेत्रेसुवर्ण

बाहुनामाचक्रवर्तीजातः षट्खंडराज्यंसर्वंभुक्त्वा अंतेवैराग्यात्त्यक्त्वादीक्षांजग्राह चतुर्थषष्ठाष्ट
मादितपः कुर्वन्विंशतिस्थानकानिसेवित्वा गिरिगह्वरेविहरतिस्म तत्रतदवसरेकमठजीवोपिभि
ल्लोभूत् सनरकान्निःसृत्यसिंहोजातोस्तिससिंहस्तंसाधुंदृष्ट्वापूर्ववैरात्क्रोधेनविदारितवान् इ
तिअष्टमोभवः ८ ततःसाधुःसमाधिनामृत्वाप्राणतेदशमेदेवलोकेदेवोजातः साधुविदारकःसिं
हस्तुचतुर्थनरकेनारकीजातः इतिनवमोभवः ९ अथमरुभूतिजीवोदशमदेवलोकात्च्युत्वाश्री
पार्श्वनाथोजातः कमठजीवःकठोनामतापसो जातो द्वयोःसंबंधःसूत्रेवृत्तौचअग्रेकथयिष्य
ते इतिदशमोभवः १० अथश्रीपार्श्वनाथस्य संक्षेपेणपंचकल्याणकानिकथयति तत्रसू
त्रं॥ तेणंकालेणं२ पासेअरहापुरिसादा णीएपंचविसाहेहुत्था तंजहा विसाहाहिं
चुएचइत्तागब्भंवक्कंते१ विसाहाहिंजाए२ वि साहाहिंमुंडेभवित्ताअगाराओअणगारियंप
व्वइए३ विसाहाहिंअणंतेअणुत्तरेनिव्वाघाएनि रावरणेकसिणेपडिपुन्नेकेवलवरनाणदंस
णेसमुप्पन्ने४ विसाहाहिंपरिनिव्वुए५ अर्थलेशोयथा॥ तस्मिन्काले तस्मिन्समयेश्रीपार्श्वोऽर्हन्
पुरुषादानीयः पुरुषाणांप्रधानःपुरुषाणांवामध्येआदानीयआदेयोग्राह्यनामापंचविशाखो
ऽभवत् पंचापिकल्याणकानिविशाखानक्षत्रेजातानि तथाहि देवलोकात्च्युत्वागर्भेच्युतः
१ विशाखानक्षत्रेजातः २ विशाखानक्षत्रेमुंडोभूत्वाअगारात्अनगारतांप्रपन्नः ३ विशाखान
क्षत्रेकेवलज्ञानंसमुत्पन्नं ४ विशाखानक्षत्रेपरिनिर्वृतोमोक्षंगतः ५ अथच्यवनकल्याणकंवि

६
कल्प०ल०

स्सरतया आह॥ तत्र सूत्रं॥ तेणं कालेणं २ पासे अरिहा पुरिसादाणीए जे से गिम्हाणं पढमे मासे पढ
मे पक्खे चित्तबहुले तस्स णं चित्तबहुलस्स चउत्थीपक्खेणं पाणयाओ कप्पाओ वीसंसागरोवमट्ठिआ
ओ अणंतरं चयं चइत्ता इहेव जंबुद्दीवे २ भारहे वासे वाणारसीए नयरीए आससेणस्स रन्नो वम्मा
ए देवीए पुव्वरत्तावरत्तकालसमयंसि विसाहाहिं नक्खत्तेणं जोगमुवागएणं आहारवक्कंतीए १
भववक्कंतीए २ सरीरवक्कंतीए ३ कुच्छिंसि गब्भत्ताए वक्कंते अथ अर्थलापनिका॥ तस्मिन् काले २ श्रीपार्श्वनाथो
ऽर्हन् पुरुषादानीयः उष्णकाले प्रथममासे प्रथमपक्षे एतावता चैत्रवदिचतुर्थीदिने विंशतिसागरोपमा
णि यत्र स्थितिर्वर्त्तते ईदृशात्प्राणतदेवलोकाच्च्यु त्वाऽस्मिन्नेव जंबूद्वीपे भरतक्षेत्रे वाणारसीनग
र्यां अश्वसेनो नाम राजा तस्य वामा नाम्नी पट्ट राज्ञी तस्याः कुक्षौ अर्द्धरात्रिसमये विशा
खानक्षत्रे चंद्रेण समं वर्त्तमाने गर्भत्वेन अवती र्णः तदा भगवतः कीदृशं ज्ञानमासीत्तत्र सूत्रं॥
पासे णं अरहा पुरिसादाणीए तिन्नाणोवगए आ विजाणइ चइस्सामित्ति जाणइ १ चयमा
णे न जाणइ चुएमित्ति जाणइ ३ पूर्वं श्रीमहावीरदेवाधिकारे व्याख्यातोऽस्ति तथापि अर्थलेशो यथा" दे
वलोकस्थो भगवान् अवधिना जानाति यदहं इतः स्थानात् सांप्रतं च विष्यामि १ च्यवनसमयं न जा
नाति तस्य अतिसूक्ष्मत्वात् २ च्यवनानंतरं जानाति यदहं ततः स्थानात् च्युत्वा अत्र स्थाने समागतः अ
गर्भस्थे भगवति किं जातं तत्र सूत्रं॥ तेणं चेव अभिलावेणं सुविणदंसणविहाणेणं सव्वं जाव निअगं गे ११३
हं अणुपविट्ठा जाव सुहं सुहेणं तं गब्भं परिवहइ॥ अर्थलेशो यथा॥ श्रीमहावीरदेवाधिकारे य

था चतुर्दशस्वप्नदर्शनप्रमुखाधिकारो जातः तथाऽत्रापि ज्ञेयः वामाराज्ञ्याऽपि चतुर्दशस्वप्ना दृष्टा
राज्ञा स्वप्नपाठकान् आकार्य विचारः पृष्टः तैरप्युक्तं त्रैलोक्यनायकः पुत्रो भावी पुनर्ये ये दोहदाः
प्रधानाः उत्पन्नास्ते ते सर्वेऽपि राज्ञा पूरिताः अथ सुखेन वामा गर्भं वहति ततः कदा जन्मकल्याण
कं जातं तत्र सूत्रं॥ तेणं कालेणं २ पासे अरिहा पुरिसादाणीए जे से हेमंताणं दुच्चे मासे तच्चे पक्खे
पोसबहुले तस्स णं पोसबहुलस्स दसमीदिवसेणं नवण्हं मासाणं बहुपडिपुन्नाणं अद्धट्ठमा
णराइंदियाणं विइक्कंताणं पुव्वरत्तावरत्तका लसमयंसि विसाहाहिं नक्खत्तेणं जोगमुवाग
एणं आरोग्गारोग्गं दारगं पयाया जम्मणं सव्वं पासाभिलावेणं भाणियव्वं जाव तं होउ
णं कुमारे पासे नामेणं॥ अर्थलेशो यथा॥ तस्मिन् काले २ श्रीपार्श्वनाथः शीतकाले द्वि
तीयमासे तृतीयपक्षे एतावता पोषवदिद शमी रात्रौ नवसु मासेषु संपूर्णेषु गतेषु पुन
रपि सार्द्धेषु सप्तसु दिनेषु उपरिगतेषु सत्सु वि शाखानाम नक्षत्रे चंद्रयोगेन समं वर्त्तमाने वामा
राज्ञी पुत्रं अजीजनत् तस्मिन् समये श्रीवीराधिकारवत् षट्पंचाशद्दिक्कुमारीभिः मेरौ इंद्रैश्च जन्मो
त्सवो यथा कृतस्तथाऽत्रापि वाच्यः पुनः स्थितिपतिकादिमहोत्सवकरणानंतरं द्वादशे दिने पार्श्व
इति नाम सार्थकं दत्तं यतो गर्भस्थे भगवति शयनस्था वामा राज्ञी माता अंधकारे महाघोरे गच्छंतं कृ
ष्णसर्पं पश्यति स्म इति निरुक्तिवशात्पार्श्वः अथ कीदृशो भगवान् तत्राह॥ नीलकमलवन्नीलच्छ
विः सर्पलांछनः नवहस्तप्रमाणोच्चशरीरः पंचभिर्धात्रीमातृभिः पाल्यमानः क्रमात् यौवनं प्राप॥

तस्मिन् प्रस्तावे कुशस्थलनगरस्वामी प्रसेनजिद्राजा स्वपुत्रीं प्रभावतीं लात्वा अश्वसेनराजसमीपेस
मागत्य प्राह एषा पुत्री मया पार्श्वाय दत्ता ततोऽश्वसेनेन अनिच्छतोपि पार्श्वस्य बलात्कारेण परिणायि
ता यतो भोग्यं कर्म्म न अभुक्तं क्षीयते एकदा गवाक्षस्थेन भगवता बहवो नगरलोका गच्छंतो दृष्टाः
दृष्ट्वा भो किमिति ततः कोप्याह दरिद्रकुलेकोऽपि द्विजसुतो बाल्यत्वे लोकैः कृपया जीवितः कमठ इति
नामा प्रसिद्धिंगतः अन्यदा स्ववद्वारि पुत्रान् आभरणालंकारविभूषितान् दृष्ट्वा ईदृशा देवा इति जा
तिस्मरणं समुत्पन्नं ततो वैराग्यात्तापसव्रतं लब्धो सांप्रतं वाणारसी बहिरुद्याने पंचाग्नितपस्तप
ति कंदमूलादिभोजी महाकष्टं करोति तद्वंद नार्थं नगरलोका इमे यांति ततः कौतुकात्स्वा
म्यपि गजारूढस्तत्र जगाम दृष्टः कमठतापस: पंचाग्नितपः कुर्वन् ततो ज्ञानेन काष्ट
मध्ये सर्प्पं ज्वलंतं दृष्ट्वा भगवानाह अहो अ ज्ञानेर अहो तपस्विन् तव मूढता धर्मस्य तत्वं
दया त्वं तु दयां न वेत्सि दयाकष्टयोरंतरं महत् यथा मेरुसर्षपयोः १ समुद्रकूपयोः २ सौवर्ण
कूप्यनाणकयोः ३ रामरावणयोः ४ हस्तिगर्द्दभयोः ५ सिंहशृगालयोः ६ कांचनलोहयोः ७ राजरंक
योः ८ राज्ञीदास्योः ९ सूर्यखद्योतयोः १० सज्जनदुर्ज्जनयोः ११ कस्तूरीखलयोः १२ कर्पूरलवणयो
:१३ साधुशठस्यवयोर्वा अंतरं १४ ततः कमठतापसेनप्रोक्तं कथं जीवदया नास्ति कथं च अज्ञानक ११४
ष्टं मम ततो भगवान् अग्निकुंडादेकं काष्टं निःकास्य कुठारेण द्विधा कारयित्वा तन्मध्ये ज्वलंतं सर्प्पं
अदर्शयत् सर्प्पस्य पंचपरमेष्टिनमस्कारान् अश्रावयत् सर्पोपि नमस्कारप्रभावेन भगवतो दर्शं

नेन च समाधिना मृत्वा धरणेंद्रो जातः स्वामी स्वगृहे समागतः कमठतापसस्तु तैरेव लोकैर्निंद्यमानोऽ
ज्ञानकष्टतपः कृत्वा भवनवासी मेघकुमारमध्ये मेघमाली नामा देवो जातः अथ भगवतो दीक्षाक
ल्याणकं कथ्यते तत्र सूत्रं॥ पासेणं अरहा पुरिसादाणीए दक्खे दक्खपइन्ने पडिरूवे अल्लीणे भद्द
ए विणीए तीसं वासाइं अगारवासमज्झे वसित्ता पुणरवि लोगंतिएहिं जियकप्पिएहिं देवेहिं ताहिं इ
ठाहिं जाव एवं वयासी जय २ नंदा जय २ भद्दा भद्दं ते जय २ खत्तियवरवसहा जाव जय २ सद्दं पउं
जंति पुव्विंपिणं पासस्स अरहउ पुरिसादाणी यस्स माणुस्सगाउ गिहत्थधम्माउ अणुत्तरे आ
भोइए तं चेव सव्वं जाव दाणं दाइयाणं परिभा इत्ता जे से हेमंताणं दुच्चे मासे तच्चे पक्खे पोसब
हुले तस्सणं पोसबहुलस्स इक्कारसीदि वसेणं पुव्वण्हकालसमयंसि विसालाए
सिबियाए सदेवमणुयासुराय परिसाए तं चेव वसहं नवरं वाणारसिं नयरिं मज्झं मज्झेणं नि
गच्छइ निग्ग जेणेव आसमपए उज्जाणे जेणेव अ सोगवरपायवस्स अहे सीयं ठावेइ २ त्ता सीया
उ पच्चोरुहइ प० त्ता सयमेव आभरणमल्लालंकारं उमुअइ उ० सयमेव पंचमुट्ठियं लोयं करेइ २ त्ता
अट्ठमेणं भत्तेणं अपाणएणं विसाहाहिं नरकत्तेणं जोगमुवागएणं एगं देवदूसमादाय तिहिं पुरि
ससएहिं सद्धिं मुंडे भवित्ता अगाराउ अणगारियं पव्वइए व्या० अस्य व्याख्या प्राग्वद्व
त् ज्ञेया अर्थलापनिका तु इयं॥ श्रीपार्श्वनाथो दक्षो दक्षप्रतिज्ञो विनीतश्च जातः त्रिंशद्वर्षाणि गृह
स्थावासे स्थितस्ततो लोकांतिकदेवैः प्रबोधितः सन् वार्षिकदानं दत्वा शीतकालस्य द्वितीयमासे तृ

६
कल्पल॰

तीयपक्षे एतावता पोषस्यैकादशीदिवसे पूर्वाह्णकाले विशालायां शिबिकायां स्थितो देवमनुष्या
सुरपर्षदा समनुगम्यमानो वाणारसीनगरीमध्ये भूत्वा यत्रैव आश्रमपदं नाम उद्यानं यत्रैव अ
शोकनामा वृक्षस्तत्रैव आगच्छति आगत्य च शिबिकां स्थापयति स्थापयित्वा शिबिकात उत्तरति उ
त्तीर्य च स्वयमेव आभरणालंकारं मुंचति मुक्त्वा च स्वयमेव पंचमुष्टिकं लोचं करोति कृत्वा च चउविधा
हारेण अष्टमेन तपसा विशाखानक्षत्रे चंद्रेण समं योगं वर्त्तमाने एकं देवदूष्यं वस्त्रं स्कंधे समारोप्य
त्रिभिः पुरुषशतैः सार्द्धं मुंडो भूत्वा अगारात् अनगारतां अंगीकृतवान् दीक्षां जग्राह इत्यर्थः
अथ दीक्षाग्रहणानंतरं भगवान् कीदृशः सन् किं करोति तत्र सूत्रं॥ पासे णं अरहा पुरिसा
दाणीए तेसीइं राइंदियाइं निच्चं वोसठ्ठकाए चियत्तदेहे जे केइ उवसग्गा उप्पज्जं
ति तं० दिव्वा वा १ माणुसा वा २ तिरिक्खजोणिया वा ३ अणुलोमा वा पडिलोमा वा ते उप्पन्ने स
म्मं सहइ तितिक्खइ अहियासेइ॥ व्याख्यार्थः पूर्ववत् संबंधलापनिका त्वियं॥ श्रीपार्श्वनाथो दी
क्षानंतरं त्र्यशीति ८३ दिनानि यावत् देहममतां मुक्त्वा ये केचन देवसंबंधिनो मनुष्यसंबंधिनस्तिर्य
ग्संबंधिनो वा अनुकूलाः प्रतिकूला वा उपसर्गा उत्पन्नास्तान् उपसर्गान् सम्यक् सहते तत्र पूर्वं
दीक्षां गृहीत्वा विचरन् द्वितीये दिवसे भगवान् कोपकटनाम्नि संनिवेशे धन्यस्य गृहिणो गृहे पाय ११५
सेन पारणमकरोत् देवैर्वसुधारावृष्टिः कृता अन्यदा स्वामी छद्मस्थः सन् विहरन् कादंबर्या अ
टव्यां गतः तत्र कलिगिरिपर्वतस्य अधस्तात् कुंड नाम सरोवरे कायोत्सर्गे स्थितः तत्र महीधरो ना

म हस्ती पानीयपानार्थं समागतः भगवंतं दृष्ट्वा जातिस्मरणज्ञानं प्राप स्वकीयः पूर्वभवो दृष्टः स
पूर्वभवे एवं हेमलनामा कुलपुत्रको वामनोऽभूत् स्वजनैर्हस्यमानः सुप्रतिष्ठनाम्ना मित्रेण गुरुपा
र्श्वे नीतः तस्य पार्श्वे श्रावकधर्मो गृहीतः परं अंत्यावस्थायां स्वकीयं लघुदेहं निंदन् महादेहनिदानं कृ
त्वा मृत्वा अहमत्र हस्ती महाकायो जातः इति ततो हस्तिना कमलैर्भगवतः पूजा कृता ततस्तस्य हस्ति
नो वृत्तांतं ज्ञात्वा चंपावासी करकंडूराजा तत्रागतः परं करकंडू भगवंतं अदृष्ट्वा बहुतरं खेदं कृतवान् त
तस्तस्य भक्त्या इंद्रेण नवहस्तप्रमाणा श्रीपार्श्वनाथप्रतिमा तत्र स्थाने प्रकटीकृता करकंडूनृपेण
भक्त्या पूजिता चैत्यमपि तत्र कारितं तत्र स्थाने कलिकुंड नामा तीर्थं जातं स हस्ती मृत्वा तत्र चै
त्यव्यंतरोऽधिष्ठायको भूत् १ अथैकदा राजपुरनगरस्वामी ईश्वरनामा राजाभूत् तेन श्री
पार्श्वनाथं कायोत्सर्गस्थं दृष्ट्वा मूर्च्छा प्राप्ता जातिस्मरणज्ञानं उत्पन्नं मंत्रिणा दृष्टं स्वकीयपूर्व
भवं प्राह वसंतपुरनगरे एकः कुष्टी ब्राह्मणोऽभूत् स च दुःखात् गंगानद्यां मरणार्थं पतन् चारणे
न ऋषिणा रक्षितः प्रतिबोधितश्च एकदा स कुष्टी चैत्ये गत्वा प्रत्यहं प्रणमन् पुष्कलिश्रावकेण दृ
ष्टः ततो मुनिपार्श्वे गत्वा पुष्कलिश्रावकेण पृष्टं एतस्य कुष्टिनश्चैत्यागमने दोषो न वा मुनिना प्रोक्तं
दृग्भक्तिं प्रणमतो न हि कोपि दोषः पुनरपि अयं कुष्टी ब्राह्मण आगामिभवे राजपुरे नगरे ईश्वर
नामा राजा भविष्यति पुनरपि श्रीपार्श्वनाथं कायोत्सर्गस्थं दृष्ट्वा जातिस्मरणं ज्ञानं प्राप्स्यति स कु
ष्टी ब्राह्मणोऽहं जात ततः ईश्वरनृपेण भक्त्या प्रभोः प्रासादः कारितो मध्ये प्रतिमा च स्थापिता तत

स्तत्र कलिकुंडेश्वरनामतीर्थं प्रसिद्धं जातं २ अथ भगवतो मेघमालिदेवेन कृत उपसर्गो व्याख्यायते एक
दा भगवान् विहरन् नगरपार्श्ववर्त्तिनं तापसाश्रमं समाजगाम तस्मिन् प्रस्तावे सूर्योऽस्तंगतः भ
गवान् वटवृक्षस्याधस्तात् कूपस्य समीपे मेरुवन्निःप्रकंपः कायोत्सर्गे स्थितो रात्रौ तदवसरे मेघ
माली असुरदेवः पूर्ववैरं स्मरन् कोपाक्रांतो भगवंतं उपसर्गयितुं समागतः पूर्वं तेन वेतालाः विकुर्वि
ताः ततः सिंहाः ततो वृश्चिकाः ततः सर्पाः ततो हस्तिनः परं भगवान् न क्षोभं प्राप्तः मर्यादां समुद्र इव ना
ऽमुंचत् ततो विशेषेण क्रुद्धः सन् चतुर्दिक्षु कालरा त्रिसदृशान् मेघान् विकुर्वितवान् ततो महावातान् म
हाविद्युज्झात्कारान् ततो गर्जितवान् ततः प्रलय कालवत् वर्षितुं लग्नो मुसलधाराभिः क्षणात् पानी
यपूरो भगवतः कंठं यावत् समागतः तथापि श्री पार्श्वो नासिकाग्रे दत्तदृष्टिर्मनागपि न चचाल
तस्मिन् प्रस्तावे कंपितासनो धरणेंद्रो पद्मावती प्रमु खाभिरग्रमहिषीभिः सार्द्धं समागत्य प्रणम्य च श्री
पार्श्वनाथं स्वकीयमस्तकोपरि कृत्वा प्रभोरुपरि फ णान् विस्तारयामास प्रभोरग्रे आकाशे पद्मावती प्र
मुखा अग्रमहिष्यो वेणुवीणादिवाद्यकराणि गीतनृत्यानि चक्रुः ततो धरणेंद्रोऽवधिज्ञानेन मेघमालिनं वर्ष
तं ज्ञात्वा कुपितोऽब्रवीत् अरे किमिदं त्वया आरब्धं रे दुर्मते अनंतशक्तिरपि भगवान् कृपावान् परम
दं तदक्षोभं न सहिष्ये रे पापिष्ठ भगवतः सदुपदेशोऽपि तव वैराय जात उषरवृष्टिवत् मेघवर्षणं लव
णाय यथा स्यात् ततो मेघमाली भयभ्रांतः प्रभोः शरणे प्रविष्टः प्रभुं प्रणम्य स्वापराधं क्षामयित्वा न पु
नः करिष्यामीत्युक्त्वा च स्वस्थानं गतः इंद्रादयोऽपि स्वस्थानं जग्मुः शिवाउर्यां इंद्रो दिनत्रयं प्रभोः शी

र्षे फणछत्रं दधौ ततः सा नगरी अहिछत्रा इति प्रसिद्धिं गता॥ अथ कीदृशस्य सतो भगवतः केवल
ज्ञानं समुत्पन्नं॥ तएणं पासे अरहा पुरिसादाणीए भगवं अणगारे जाए इरियासमिए जाव अप्पाणं भा
वेमाणस्स तेसीइं राइंदियाइं विइक्कंताइं चउरासीइमस्स राइंदियस्स अंतरा वट्टमाणस्स जे से गि
म्हाणं पढमे मासे पढमे पक्खे चित्तबहुले तस्स णं चित्तबहुलस्स चउत्थीपक्खे णं पुव्वण्हकालस
मयंसि धायइपायवस्स अहे छट्ठेणं भत्तेणं अपाणएणं विसाहाहिं नक्खत्तेणं जोगमुवागएणं
झाणंतरियाए वट्टमाणस्स अणंते अणुत्तरे नि व्वाघाए निरावरणे जाव केवलवरनाणदंस
णे समुप्पन्ने जाव जाणमाणे पासमाणे विह रइ॥ अर्थलेशो यथा॥ ततः श्रीपार्श्वनाथो
भगवान् ईर्यासमितो जातो भाषासमित एषणासमित एवं पंचसमितिभिः समितः
तिसृभिर्गुप्तिभिर्गुप्तो जातः एवं श्रीमहावीरा धिकारे यः साधुवर्णकः प्रोक्तः सोऽत्रापि ज्ञे
यः तथा भगवतो दीक्षानंतरं त्र्यशीतिदिनानि व्यतिक्रांतानि चतुरशीतितमस्य दिनस्य अंत
रा वर्त्तमानस्य ग्रीष्मकाले प्रथमे मासे प्रथमे पक्षे एतावता चैत्रवदि चतुर्थीदिने पूर्वाह्णकालस
मये धातकीवृक्षस्याधः षष्ठेन तपसा क्वचित् अष्टमेन तपसा अपानकेन विशाखा नाम नक्षत्रे
चंद्रेण सह योगं वर्त्तमाने ध्यानांतरे वर्त्तमानस्य केवलज्ञानं केवलदर्शनं च समुत्पन्नं तेन सर्वं भग
वान् जानन् पश्यन् विहरति देवैः समवसरणं विरचितं चतुर्विधसंघस्य स्थापना कृता॥ अथ भ
गवतो गणधरादिपरिवारमाह सूत्रं॥ पासस्स णं अरहओ पुरिसादाणीयस्स अट्ठ गणा अट्ठ ग

ण हुत्था तं सुभेय१ अज्जघोसेय२ वासिट्ठे३ बंभयारिय४ सोमे५ सिरिहरे६ चेव वीरभद्दे७
जसेविय८ पासस्स णं अरहओ पु० अज्जदिन्नपामुक्खाओ सोलससमणसाहस्सीओ उक्कोसिया
समणसंपया हुत्था पास० अ० पुप्फचूलापामुक्खाओ अट्ठत्तीसं अज्जियासाहस्सीओ उक्कोसियासंप
या हुत्था पास० अ० पु० सुव्वयपामुक्खाणं समणोवासगाणं एगा सयसाहस्सीओ चउसट्ठिं च सहस्सा
उक्कोसिया समणोवासयाणं सं० हुत्था पासस्स णं अ० पु० सुनंदापामुक्खाणं तिन्नि सयसाहस्सीओ
सत्तावीसं च सहस्सा उक्कोसिया समणोवासिय याणं सं० हुत्था पासस्स णं अ० पु० अद्धुट्ठसया चउ
द्दसपुव्वीणं अजिणाणं जिणसंकासाणं सव्व क्खरजाव चउद्दसपुव्वीणं सं० हु० पासस्स णं
अ० पु० चउद्दससयाओहिनाणीणं दसस याकेवलनाणीणं एगारससया विउव्वी
णं छसया रिउमईणं दससया सिद्धा वीसं अ ज्जियासया सिद्धा अद्धट्ठसया विउलमईणं
छसया वाईणं बारससया अणुत्तरोववाईणं पास० अ० पु० दुविहा अंतगडभूमी हुत्था तं जु
गंतगडभूमी १ परियायंतगडभूमी य २ जाव चउत्थाओ पुरिसजुगाओ जुगंतगडभूमी २ तिवासपरि
याए अंतमकासी॥ एतस्य आलापकस्य अर्थस्तु सुगम एव पूर्वमपि व्याख्यातश्च परं अर्थयोज
नामात्र लिख्यते श्रीपार्श्वनाथस्य अष्टौ गणा एकवाचनिका यतिसंघा अभूवन् अष्टौ गणधरा
स्तेषां गणानां नायकाः सूरयोऽभूवन् आवश्यके तु दश गणधरा उक्ता इह स्थानांगे च अष्टौ त
तो द्वौ सप्तमाष्टमगणधरौ अल्पायुष्कत्वान्नोक्तौ इति संभाव्यते यतः श्रीपार्श्वनाथचरित्रे दश गण ११७

धरसंबंधेषु सप्तमाष्टमगणधरौ जयविजयनामानौ श्रावस्ती नृपतनयौ रात्रौ तथाविधस्वप्नवि
शेषोपलंभेन स्वकीयमायुरल्पं ज्ञात्वा दीक्षां जगृहतुरिति गणधरनामानि यथा शुभः १ आर्यघो
षः २ वासिष्ठः ३ ब्रह्मचारी ४ सोमः ५ श्रीधरः ६ वीरभद्रः ७ यशाः ८ इति पुनः श्रीपार्श्वनाथस्य आर्यदिन्न
प्रमुखाः षोडश श्रमणसहस्राः अभूवन् पुनः श्रीपार्श्वनाथस्य पुष्पचूला प्रमुखा अष्टत्रिंशत् ३८ आ
र्यासहस्रा अभूवन् पुनः श्रीपार्श्वनाथस्य सुव्रतप्रमुखाः श्रमणोपासकाः श्रावका एकं लक्षं चतुःषष्टि
श्च सहस्रा अभूवन् पुनः श्रीपार्श्वनाथस्य सुनंदा प्रमुखाः श्राविकाः त्रीणि लक्षाणि सप्तविंशतिश्च
सहस्रा अभूवन् पुनः श्रीपार्श्वनाथस्य सार्द्धानि सप्तशतानि चतुर्दशपूर्विणः केवलिन इव अभू
वन् पुनः श्रीपार्श्वनाथस्य चतुर्दशशतानि अवधिज्ञानिनः पुनः दशशतानि केवल
ज्ञानिनः पुनः एकादशशतानि वैक्रियलब्धिध राः पुनः षट्शतानि ऋजुमतयः साधवः पुन
र्दशशतानि सिद्धानि साधूनां पुनः विंशतिशता नि साध्वीनां सिद्धानि सार्द्धानि सप्तशतानि विपु
लमतीनां ऋजुमतिविपुलमतीनां विशेषः पूर्वमुक्तोस्ति षट्शतानि वादिनां पुनर्द्वादशशतानि अ
नुत्तरोपपातिनां साधूनां पुनः श्रीपार्श्वस्य द्विविधा अंतकृतां केवलिनां भूमिः स्थानं युगांतकरभूमिः १
पर्यायांतकरभूमिश्च २ तत्र श्रीपार्श्वनाथादारभ्य चतुर्थपुरुषयुगं यावत् सिद्धिगमः प्रवृत्तः स युगां
तकरभूमिः १ अथ च भगवतः केवलज्ञानोत्पत्तेः पश्चात् त्रिषु वर्षेषु सिद्धिगमारंभो जातः स पर्यायांतक
रभूमिः॥ अथ च भगवतः कदा निर्वाणकल्याणं जातं तत्र सूत्रं॥ तेणं कालेणं तेणं समएणं पासे अरिहा

उए तीसं वासाइं अगारमज्झे वसित्ता तेसीइं राइंदियाइं छउमत्थपरियायं पाउणित्ता देसूणाइं सत्तरि वासा
इं केवलपरियायं पाउणित्ता पडिपुन्नाइं सत्तरि वासाइं सामन्नपरियायं पाउणित्ता एगं वाससयं सव्वा
उयं पालइत्ता खीणे वेयणिज्जाउनामगुत्ते इमीसे उसप्पिणीए दूसमसूसमाए बहुविइक्कंताए जे से
वासाणं पढमे मासे दुच्चे पक्खे सावणसुद्धे तस्स णं सावणसुद्धस्स अट्ठमीपक्खेणं उप्पिं संमेयसेल-
सिहरंसि अप्पचउत्तीसइमे मासिएणं भत्तेणं अपाणएणं विसाहाहिं नक्खत्तेणं जोगमुवागएणं पु
व्वण्हकालसमयंसि वग्घारियपाणी कालगए विइक्कंते जाव सव्वदुक्खप्पहीणे॥ अर्थलेशो य
था॥ तस्मिन् काले २ श्रीपार्श्वनाथः त्रिंशद्वर्षाणि गृहे स्थित्वा अशीतिदिनानि छद्मस्थ
पर्यायं पालयित्वा अशीतिदिनैर्न्यूनानि सप्ततिः ७० वर्षाणि केवलपर्यायं पालयित्वा
प्रतिपूर्णानि संपूर्णानि सप्ततिः ७० वर्षाणि दीक्षापर्यायं पालयित्वा एकं वर्षशतं सर्वायुः
प्रतिपाल्य क्षीणे वेदनीयायुर्नामगोत्रे कर्मणि अस्यां अवसर्पिण्यां दुःषमसुषमायां बहुव्य
तिक्रांतायां वर्षाकाले प्रथममासे द्वितीयपक्षे एतावता श्रावणसुदि अष्टमीदिवसे संमेतशिखरि
पर्वतस्य उपरि त्रयस्त्रिंशत्साधुभिः सह मासिकेन भक्तेन अपानकेन तपसा विशाखानक्षत्रे चंद्रे
ण समं योगं वर्त्तमाने पूर्वाह्णकालसमये पुव्वरत्तावरत्तकालसमयंसि इति पाठस्तु लेखकदोषान्मत
भेदाद्वा ज्ञातव्यः वग्घारियपाणित्ति कायोत्सर्गस्थितत्वात् प्रलंबितभुजद्वयः सन् कालगतो व्यति
क्रांतो यावत् सर्वदुःखैः प्रक्षीणो जातः मोक्षं जगाम इत्यर्थः अथ श्रीपार्श्वनिर्वाणात् पुस्तकारूढसि ११८

द्धांतस्य कियदंतरं तत्र सूत्रं॥ पासस्स णं अरहओ जाव सव्वदुक्खप्पहीणस्स दुवालसवाससया
इं विइक्कंताइं तेरसमस्स णं अयं तीसइमे संवच्छरे काले १२३० गच्छइ॥ अयं परमार्थः श्रीपार्श्वनाथ
निर्वाणात् श्रीमहावीरः सार्द्धशतद्वयेन २५० सिद्धः श्रीमहावीरनिर्वाणात् नवशतैः अशीत्यधिकै
र्वर्षैः श्रीसिद्धांतः पुस्तकारूढो जातः इति हेतोः द्वादशशतानि त्रिंशदधिकानि वर्षाणि ज्ञेयानि
इत्यनेन श्रीपार्श्वनाथस्य पंचकल्याणकानि व्याख्यातानि॥ अथ नेमिनाथस्य पश्चानुपूर्व्या पंचक
ल्याणकानि व्याख्यायंते तत्रापि हरिवंशयादवानां उत्पत्तिः कथ्यते॥ तत्र पूर्वं ऋषभस्वामी ततः कु
रुनृपः ततो वीर्यनृपः ततः सुभूमचक्रवर्त्ती ततो बहुषु राजसु गतेषु शांतनराजा अभूत् त
स्य द्वे भार्ये गंगा १ सत्यवती च २ गंगायाः पुत्रो गांगेयो येन कुमारावस्थायामपि स्वयं
शीलव्रतं गृहीत्वा स्वकीयः पिता शांतनो राजा रत्नशेखरविद्याधरस्य पुत्री नाविकगृहे व
र्द्धितां सत्यवतीं परिणायितः शांतनस्य सत्यवत्या द्वितीयभार्यायाः पुत्रद्वयं चित्रांगदः १ चित्र
वीर्यश्च २ चित्रवीर्यस्य भार्यात्रयं अंबिका १ अंबालिका २ अंबा च ३ तासां तिसृणां अनुक्रमेण
एते त्रयः पुत्राः अंबिकाया धृतराष्ट्रः परं जात्यंधः अंबालिकायाः पुत्रः पंडुः अंबायाः पुत्रो विदुरो
जातः धृतराष्ट्रस्य गांधारीय सुबलो राजा तस्य पुत्र शकुनिनामा राजा तस्य सप्त पुत्र्यो गांधारीप्रमु
खाः परिणायिताः गांधार्याः पुत्रो दुष्टकरणजनमारणाद्यशुभस्वप्नसूचितो दुर्योधनो जातः परं
स्वमात्रा अनिःपुण्यो बलात्पातितः त्रिंशन्मासान् गर्भे स्थितो मासषट्कं च पेटिकायां वर्द्धितः एवं धृत

६
कल्प॰

राज्ञ्यस्य पुत्रत्रयं जातं पंडोर्भार्याद्वयं कुंती १ मद्री च २ कुंती शौर्यपुरस्वामिनोऽन्धकवृष्णेः पुत्री स
मुद्रविजयादीनां दशानां दशार्हाणां भगिनी गांधर्वविवाहेन परिणायिता तस्या एकः पुत्रः कर्णः सच
कन्याजातमात्र एव कांस्यपेटीमध्ये क्षिप्य गंगायां वाहितो हस्तिनापुरवासिना सूतनाम्ना सारथि
ना गृहीतः स्वपुत्रीकृत्य स्वगृहे वर्द्धितः पुनः कुंत्याः पुत्रत्रयं मेरु १ क्षीरसमुद्र २ सूर्य ३ चंद्र ४ श्री ५
स्वप्नपंचकसूचितः प्रथमो युधिष्ठिरः १ द्वितीयो भीमः २ तृतीयो गजारूढः शक्रस्वप्नसूचितोऽर्जुनः ३
एवं कुंत्याः पुत्रचतुष्टयं द्वितीया भार्या पंडोर्मद्री सा मद्रकराजस्य पुत्री स्वयंवरे परिणीता तस्या
ः पुत्रद्वयं नकुलः १ सहदेवश्च २ अथांऽबाया ः यः पुत्रो विदुरोऽभूत् स देवकराजपुत्रीं कु
मुद्वतीं परिणीतवान्॥ अथ हरिवंशे यदु नामा राजा तस्य पुत्रः शूरनामा जातस्त
स्य द्वौ पुत्रौ जातौ शौरी १ सुवीरश्च २ शूरराजा शौरिनामपुत्रस्य मथुराराज्यं सुवीरनामपु
त्रस्य च युवराज्यं दत्वा स्वयं दीक्षां लली शौरिः पोपि समये स्वकीयं मथुराराज्यं लघुभ्रातरि सु
वीरे स्थापयित्वा स्वयं कुशावर्त्तदेशे गत्वा स्वनाम्ना शौरिपुरं नाम नगरं अस्थापयत् अथ शौरिपु
रे शौरिनृपो राज्यं करोति सुवीरो मथुरायां राज्यं करोति द्वावपि सगौ भ्रातरौ अथ शौरिनृपस्य
अंधकवृष्णिनामा पुत्रो जातः सुवीरस्य मथुरास्वामिनो भोजवृष्णिनामा पुत्रो जातो भोजवृष्णिनृप ११९
स्य उग्रसेनः पुत्रो यस्य कंसः पुत्रो यस्य च सत्यभामा राजीमती प्रमुखाः पुत्र्यः अथ च शौरिपु
रनगरस्वामिनोऽन्धकवृष्णिनामनृपस्य दश पुत्राः समुद्रविजय १ अक्षोभ्यः २ स्तिमित ३ सागर

४ हिमवंत ५ अचल ६ धरण ७ पूरण ८ अभिचंद्र ९ वसुदेव १० नामानो दश पुत्रा जाताः दशापि
दशार्हा इति कथ्यंते अथ अंधकवृष्णिनामा राजा स्वकीयं शौरिपुरराज्यं ज्येष्ठपुत्रस्य समुद्रवि
जयस्य दत्वा दीक्षां लली एवं भोजकवृष्णिनामा राजाऽपि स्वस्य पुत्रस्य उग्रसेनस्य मथुराराज्यं
दत्वा चारित्रमग्रहीत् एवं सति मथुरायां नगर्यां उग्रसेनो राजा राज्यं करोति शौरिपुरनगरे च समुद्र
विजयो राजा राज्यं करोति॥ अथ नेमिनाथस्य पंच कल्याणकानि संक्षेपवाचनया आह तत्र सू
त्रं॥ तेणं कालेणं २ अरहा अरिट्ठनेमी पंचचित्ते हुत्था तं० चित्ताहिं चुए चइत्ता गब्भं वक्कंते १ त
हेव उक्खेवो जाव चित्ताहिं परिनिव्वुए ५ अर्थः॥ तस्मिन् काले २ अर्हन् अरिष्टनेमिः पंच
चित्रोऽभवत् चित्रानक्षत्रे चंद्रेण सहयोगं वर्त्तमाने देवलोकात् च्युत्वा गर्भे समाग
वान् व्युत्क्रांतः १ एवमुक्खेव उत्ति शब्देनोत्क्षेपालापकस्य उच्चारणं श्रीपार्श्वनाथाधिकारे
विस्तारवाचनासूत्रेण कृतं तथात्र चित्राभिलापेन कार्यमित्यर्थः तथाहि चित्रानक्षत्रे जातः २
चित्रानक्षत्रे दीक्षा गृहीता ३ चित्रानक्षत्रे केवलज्ञानं समुत्पन्नं ४ चित्रानक्षत्रे निर्वाणकल्या
णकं जातं ५ अथ विस्तरवाचनया श्रीनेमिनाथस्य च्यवनकल्याणकं कथ्यते तत्र सूत्रं॥ तेणं
कालेणं तेणं अरहा अरिट्ठनेमी जे से वासाणं चउत्थे मासे सत्तमे पक्खे कत्तियबहुले तस्सणं कत्ति
यबहुलस्स बारसीपक्खेणं अपराजिआओ महाविमाणाओ बत्तीसं सागरोवमट्ठिआओ अणंतरं च
यं चइत्ता इहेव जंबुद्दीवे दीवे भारहे वासे सोरियपुरे नगरे समुद्दविजयस्स रण्णो भारियाए सिवा

६ कल्प॰ल॰

देवीए उच्चरत्ता वरत्तकालसमयंसि जाव चित्ताहिं गंभत्ताए वक्कंते सव्वं तहेव सुविणदंसणदवि
णसंहरणाइ इत्थं भाणियव्वं॥ अर्थः सुगम एव तथापि आलापनिकाश्च दर्श्यते तस्मिन्काले २ अर्हन्
अरिष्टनेमिः वर्षाकालस्य चतुर्थमासे सप्तमपक्षे एतावता कार्तिकवदिद्वादश्यां अपराजितनाम
विमानात् चतुर्थानुत्तरविमानात् यस्मिन्द्वात्रिंशत्सागरोपमस्थितिर्वर्त्तते कश्चित्त्रयस्त्रिंशत्सा
गरोपमाणीति तस्माच्च्युत्वा अस्मिन्नेव जंबूद्वीपे अस्मिन्भरतक्षेत्रे शौरिपुरनामनगरे समुद्रविज
यो राजा तस्य भार्या शिवादेवी तस्याः कुक्षौ अर्द्धरात्रिसमये चित्रानक्षत्रे चंद्रेण सह योगं वर्त्तमा
ने भगवान् गर्भत्वेनावतीर्णः अत्रापि स्वप्नदर्शनं स्वप्नपाठकपार्श्वे स्वप्नानां पृच्छा तत्फलं श्री
समुद्रविजयनृपस्य गृहे द्रव्यसंहरणं च इत्यादिकं सर्वं वाच्यं॥ अथ कदा भगवतो
जन्मकल्याणकं जातं तत्र सूत्रं॥ तेणं कालेणं २ अरहा अरिट्ठनेमी जे से वासाणं पढमे मासे
दुच्चे पक्खे सावणसुद्धे तस्स णं सावणसुद्धस्स पंचमीपक्खेणं नवण्हं मासाणं जाव चित्ताहिं नक्ख
त्तेणं जोगमुवागएणं आरुग्गारोग्गं दारयं पयाया जम्मणं समुद्दविजयाभिलावेणं नेयव्वं जाव तं
होउ णं कुमारे अरिट्ठनेमी नामेणं तं होऊणं अरहा अरिट्ठनेमी॥ अर्थलेशः॥ तस्मिन्काले २ अर्ह
न् अरिष्टनेमिः वर्षाकालस्य प्रथमे मासे द्वितीयपक्षे एतावता श्रावणसुदि पंचम्यां नवमासेषु प्रति
पूर्णेषु सार्द्धसप्तदिनाधिकेषु व्यतिक्रांतेषु चित्रानक्षत्रे चंद्रेण समं योगं वर्त्तमाने आरोग्या कष्टर १२०
हिता शिवा आरोग्यं पुत्रमजीजनत् जन्मोत्सवः सर्वोपि दिक्कुमारी चतुःषष्टीन्द्रकृतः श्रीमहावीर

देवाधिकारवदत्रापि वाच्यः पुनः स्थितिपतिकादि कर्त्तव्यः समुद्रविजयाभिलापेन वाच्यो रिष्टरत्नमयं ने
मिचक्रं आकाशे उत्पतत् माता शिवादेवी स्वप्ने ऽद्राक्षीत् इति रिष्टनेमिः ततो ऽपश्चिमशब्दवन्नञ्वर्जि
त्वे अरिष्टनेमिरिति नामदत्तं कुमारस्तु अपरिणीतत्वात् अथ एकदा पालनस्थे भगवति इंद्रेण नेमेर्ब
लस्य वर्णनं कृतं तदा असहमानाः केपि सुरा बलं परीक्षितुं आगत्य पालनस्थं भगवंतं अपजह्रुः योज
नानां सपादलक्षे अतिक्रांते भगवान् अवधिज्ञानेन सुरविकारं ज्ञात्वा बलं प्रयुंक्ते स्म ततस्ते सुरा भग
वतो बलं असहमाना अधस्तात्पेतुः ज्ञातयो जननी धरित्रीमध्यगताश्च ततः इंद्र आगत्य अनुकंपया
सुरान्मोचयित्वा प्रभुं पालने मुक्त्वा क्षमयित्वा अपराधं क्षामयित्वा स्वर्गं गतः॥ अथ एकदा मथु
रायां उग्रसेनो राजा बहिः क्रीडार्थं गतो कृत तेन तत्र कोपि तापसो दृष्टः पारणार्थं निमंत्र्य
राजा स्वगृहे गतः परं राज्ञो बहुकार्यव्यग्रत्वेन पारणाकारापणं विस्मृतं पुनरपि द्वितीयमा
सक्षपणे तथैव निमंत्रितस्तथैव विस्मृतं पुनस्तृतीयवारेपि तथैव विस्मृतं ततस्तापसेन कोपा
क्रांतेन निदानं चक्रे यद्यत्र मम तपः प्रमाणं तदा ऽस्य उग्रसेनराजस्य दुःखदायको ऽहं स्यामि
ति ततः स तापसो मृत्वा उग्रसेनराजस्य भार्या धारणी तस्याः कुक्षौ अवतीर्णः धारिण्याश्च स्व
पतिहृदयमांसभक्षण मांसदोहदो जातः समंत्रिभिर्यथाकथंचित्पूरितः जन्मानंतरं नाममु
द्रिका १ पत्रिका २ सहितं पुत्रं कांस्यपेटायां प्रक्षिप्य राज्ञा यमुनायां पेटा वाहिता सा कांस्य
पेटा वहंती शौरिपुरनगरे गता तस्मिन्समये प्रातःकाले शौचार्थमागतेन रसवणिजा सुभद्रनाम्ना

न्नासापेटी आगच्छंती गृहीता बहिरानीय उद्घाटिता मुद्रिकां पत्रिकां च तत्रस्थाने रक्षयित्वा मध्य
स्थं बालकं स्वप्रियायाः समर्पयामास तस्य नाम कंस इति दत्तं स च कंसः प्रवर्द्धमानो राजवीर्यत्वा
त् रममाणो डिंभान् कुट्टयति ततो डिंभमातृपित्रादयः कंसमातापित्रोरुपालंभं ददति कंसश्च शि
क्षां न मन्यते ततः सुभद्रेण वसुदेवकुमारस्य सेवार्थं समर्पितः अथ कंसो वसुदेवसेवां कुर्वन् तिष्ठ
ति अस्मिन् प्रस्तावे राजगृहनगरे जरासिंधनामा प्रतिवासुदेवो राज्यं पालयति तस्य सर्वेपि या
दवराजानः सेवकाः संति तस्य जरासिंधस्य। जीवयशा नाम्नी पुत्री वर्त्तते सा राज्ञो जीवात्
प्रिया एकदा राज्ञा नैमित्तिकस्य जीवयशाज न्मपत्रिका दर्शिता एषा कीदृशी भविष्यति इ
ति पृष्टं च ततो नैमित्तिकेन प्रोक्तं सत्यं वदा मि न रोषः कार्यः एषा परिणीता सती उभ
यकुलक्षयकारिणी भविष्यति ततो राज्ञा प्रछ न्नावार्धारक्षिता तस्मिन् समये यादवराजा
नो दीप्तिमंतः संतो जरासिंधस्य आज्ञां न सम्यग् मन्यंते ततो जरासिंधेन समुद्रविजयनृपस्य।
आज्ञा दत्ता यदुत वैताढ्यपर्वतपार्श्वे सिंहपुरे नगरे सिंहनामा राजास्ति सोऽस्मदाज्ञां न मन्यते तं बद्ध्वा
यः समानयति तस्मै अहं जीवयशा पुत्रीं नगरमेकं च ददामि ततस्तं बंधनार्थं चटंतं समुद्रविजयं नि
वार्य वसुदेवः कंसेन सह ससैन्यश्चाल तत्र गत्वा अग्रेगामिना कंसेन सिंहराजा बद्ध्वा वसुदेवाय स
मर्पितः वसुदेवेन च जरासिंधप्रतिवासुदेवाय समर्पितः ततो वासुदेवाय दीयमाना जीवयशा।
ज्ञातपरमार्थेन वसुदेवेन कंसेन सह बद्ध इति कंसाय परिणायिता अथ कंसो जीवयशासार्थं परि १२१

णीय पितृवैरं स्मरन् मथुराराज्यं लात्वा प्रबलसैन्या सह मथुरायां गत्वा स्वपितरं उग्रसेनं काष्ठपंज
रे निःक्षिप्य स्वयं राज्यं करोति स्म तस्मिन् समये अतिमुक्तकः कंसस्य लघुभ्राता पितृदुःखात् वैरा
ग्येण दीक्षां ललौ अस्मिन् समये वसुदेवः शौरिपुरनगरे स्त्रीवल्लभः कुमारपदवीं भुंजानस्तिष्ठति
स्त्रीवल्लभत्वं कथं उपार्जितं तत्सर्वं भवो यथा॥ नंदिषेणनामा कोपि एकः कुलपुत्रकः आसीत् स की
दृग् कुतीर्थी इव कुदर्शनः स्थालीबुध्नमिव श्यामः बिडालवत् पिंगनेत्रः गणेश इव लंबोदरः ह
स्ती इव दंतुरः उष्ट्र इव लंबोष्ठः वानर इव सूर्प कर्णः कुष्टरोगी इव चिपिटघ्राणः त्रिकवत् त्रिको
णमौलिः किं बहुना कुरूपाणां दृष्टांतीभूतः मा तापितरौ मृतौ ततो मातुलगृहे गृहकार्याणि कु
र्वन् युवा जातः ततः परगृहसंडिना लोके न तस्य मनो लग्नं सो किं दृष्ट्वा दासवत् कार्या
णि कुरुषे परं मातुलस्त्वां परिणाययत्यपि नात त्तो सप्रेम स्पष्टः सन् कार्याणि न करोति न परि
णाययत इति हेतोः ततो मातुलेन बहुस्थानेषु। कन्या मार्गिता परं नंदिषेणं न कापि परिणयति
कुरूपत्वात् ततो निजपुत्र्योऽनुक्रमेण अभ्यर्थिताः परं ताः सर्वा अब्रुवन् विषभक्षणं पाशीग्रह
णं प्रमुखं करिष्यामः परं नैव एनं परिणयिष्यामः ततो वैराग्यात् नंदिषेणेन दीक्षा गृहीता सर्वसाधूनां
मया वैयावृत्त्यं कार्यमिति अभिग्रहो गृहीतो देवेन परीक्षा कृता तत्र परीक्षायामपि प्राप्तः ततो नेमिचरित्र

सम्मत्या द्वादश १२ वर्षाणि वसुदेवहिंडि सम्मत्या च पंचपंचाशत् वर्षसहस्राणि ५५ दीक्षां पालयि
त्वा अंतावस्थायां स्त्रीवल्लभो भूयासमिति निदानं चक्रे ततो मृत्वा देवलोके सुखं भुक्त्वा च्युत्वा वसु

६
कल्प०ल०

देवो जातः स पूर्वभवाभ्यस्ततपःप्रभावनिदानेन स्त्रीवल्लभो जातः यत्र २ नगरे भ्रमति तत्र २ नगरस्त्रियो
गृहकार्याणि अर्द्धकृतानि मुक्त्वा पृष्टतः परिभ्रमंति ततः उद्विग्नैर्नागरिकैः समुद्रविजयो विज्ञप्तस्त
तो राज्ञा नागरिकाणां संतोषं कृत्वा वसुदेवस्य कथितं त्वया राजकुले एव कलाभ्यासादिक्रीडा कर्त
व्या नगरमध्ये बहिर्वा भ्रमणं न कार्यं अद्यश्वो वैरिणीतिः श्रूयते ततो वसुदेवेनापि ज्येष्ठभ्रातृवचनं
पितृवन्मान्यमिति तथैव कृतं अन्यदा ग्रीष्मकाले शिवादेव्या विलेपनार्थं चंदनादिकच्चोलकं दा
सीहस्ते समुद्रविजयाय स्वसुर्मुक्तं प्रतोल्यां अंतरास्थितेन वसुदेवेन गच्छंती दासी दृष्टा पृष्टं
किं लात्वा यासि देहि मम सा न ददाति वसुदे वेन उद्दाल्य बलात् हस्तात् गृहीत्वा स्वदेहे विले
पितं ततो रुष्टया नीचजातित्वात् दास्या मर्म वाक्यं प्रोक्तं सोऽईदृशोसि ततो राज्ञा गृहम
ध्ये क्षिप्तोसि वसुदेवेन पृष्टं कथं ततो दास्या सर्वं स्वरूपं कथितं ततो वसुदेवोऽमर्षं कृत्वा रात्रौ
शौरिपुरनगरान्निर्गत्य चितां वह्निना प्रज्वाल्य तन्मध्ये एकं मृतकं दग्ध्वा स्वां जंघां विदार्य तद्
रुधिरेण प्रतोल्यां लिलेख वसुदेवश्चितायां प्रविष्टोस्ति ततो वसुदेवः प्रतिदेशं प्रतिग्रामं प्रति
नगरं वर्षसहस्रं यावत् भ्रमन् विद्याधरप्रमुखनरेश्वराणां द्वासप्ततिः ७२ सहस्र कन्यानां पाणिग्र
हणं चक्रे नानाविधाश्च रूपपरावर्त्तनादिविद्याः शिक्षिताः ततः भ्रमन् व्याघुट्य शौरिपुरनगरे स
मागतः परं वामनं कुब्जं च रूपं कृतं तस्मिन् समये रोहिणीस्वयंवरः प्रारब्धोऽस्ति अनेके राज
सुतत्रस्थिते प्रांतस्थाने वामनोपि मर्दलं वादयन् स्थितो रोहिणी मौलं वसुदेवरूपं पश्यति अ १२२

चिंतितं:

न्ये वामनमेव ततो रोहिणी सर्वनृपान् अवगणय्य वामनस्य कंठे वरमालां चिक्षेप वामनो रोहि
णीं लात्वा निःसृतः समुद्रविजयादयो रुष्टाः कथं अस्मासु सत्सु अयं वामनः कन्यां लात्वा याति
परस्परं युद्धं लग्नं ततो वसुदेवेन विमृष्टं न युक्तं भ्रातृभिः समं युद्धकरणं ततः समुद्रविजयाय बाणे
मुक्तः तत्र लिखितमस्ति वसुदेवः प्रणमतीति ततोऽक्षरवाचनानंतरं समुद्रविजयेन ज्ञातं अयं म
म भ्राता परं केनापि कारणेन वामनरूपं कृतमस्ति ततः सर्वेपि मिलिताः वसुदेवस्य रोहिणी परिणा
यिता कालेन गज १ सिंह २ चंद्र ३ समुद्र ४ स्वप्न उष्टयसूचितः पुत्रो जातः तस्य राम इति नाम तत
ः कंसेन स्वमित्रस्नेहात् वसुदेवः स्वपुर्यां मथु रायां समानीतः पश्चाद्वसुदेवस्य मृत्तिकावती
नामनगरीस्वामिनो देवकराजस्य पुत्री देव की कंसेन परिणायिता गोकोटिसहितं नंद
यशोदाभ्यां दानं करमोचने कृतं एकदा जीवय शा कंसपत्नी स्वस्कंधे देवकीं स्थापयित्वा गर्वे
ण नृत्यंती क्रीडति तस्मिन् समये कंसस्य लघुभ्रा ता अतिमुक्तको मुनिः समेतः जीवयशा प्राह प
हि देवर आयास्यां रम्यते कंठे लगित्वा उन्मत्ता सती उपसर्गं कुर्वती न निवर्त्तते तदा अतिमुक्तकेन
तस्या गर्वोत्तारणार्थं प्रोक्तं रे मूर्खे किं नृत्यसि अस्याः सप्तगर्भमध्ये एको गर्भस्तव भर्त्तृहंता भविष्यति
तेन दुष्टेन कंसेन वसुदेवपार्श्वे सप्तगर्भा याचिता वसुदेवेन अंगीकृतं दास्यामि अथ देवक्या ये
षट् पुत्रा अनुक्रमेण जातास्ते सहिलपुरे नागो नाम श्रेष्ठी सुलसा तस्य भार्या तया पुत्रार्थं हरिनैग
मेषी देव आराधितास्तेन प्रोक्तं त्वं अंगजान् मृतान् जनयिष्यसि परं देवकीपुत्रान् जातमात्रान् आ

६
कल्पल०

नीयप्रछन्नं तव दास्यामि इति सुलसाया देवकीपुत्रा दत्ताः यतो देवक्याः सर्वसवे समप्रसवाः सम
न्नाति अपत्यान्यासन् परमेकं रत्नेरुदंत्यास्तस्याः समर्प्यितं तेन कृष्णस्य सुखं किमपि प्राप्तं अथ
सुलसापुत्राः षडपि मृता एव देवकीपार्श्वे मुक्तास्ते सर्वेपि कंसेन शिलायामास्फाल्य मारिता सप्तमेग
र्भे जाते देवक्या सिंह१ सूर्य२ वह्नि३ गजध्वज४ विमान५ पद्मसरोवराणीति सप्त स्वप्नाः दृष्टा
स्तेन देवक्या यशोदायाः प्रोक्तं तवापत्यं मम देयं मम पुत्रस्त्वया प्रछन्नं रक्षणीय इति अथ कृष्ण
जन्मसमये कंसेन प्राहरिका विशेषतो मुक्ता अ स्तिवन् परं तेषां निद्रा समागता गर्भप्रभावात् स्व
र्गमेषोपितव पुत्रेति श्रवणात् नशाह्च कार वसुदेवः कृष्णं लात्वा निर्गच्छन् प्रतोलीकपाटो
द्घाटने उग्रसेनेन कोसीति पृष्टो वसुदेवेन प्रोक्तं मौनं कुरु यः काष्ठपंजरात् त्वां निःका
स्य राज्ये स्थापयिष्यति सोऽयं ततो वसुदेवः कृ मारिता ष्णं यशोदायाः दत्तवान् यशोदापुत्रीं च देवकी
पार्श्वे मुमोच प्रभाते कंसस्तां सुतां मपि छिन्ननासां चकार अथ कृष्णो नंदगोकुले गृहे वर्द्धते देव
की पुत्रस्नेहात् दवसरे२ यशोदापार्श्वे पर्वमिषं कृत्वा याति अथ वत्सवारसिं१ काडली त्रीज२ गोस्
जउ गोत्राटध इत्यादि मिथ्यात्वपर्वाणि जातानि एकादशवर्षे जाते कृष्णस्य बालक्रीडावर्णनं किवारइ
कृष्णपाणी नाद्यदा ढोलइ किवारइ वइसइमानइ षोलइ किवारइ दहीनी गोली घोलइ किवारइ तर १२३
नो मांषण ब्रासिमां दि नोलइ किवारइ माता सांदक्यां नजाली आणइ किवारइ जसोदा न उकांइ
य उताणइ किवारइ जात उसाप साद्इ किवारइ आगिनइ ज्ञाषवादे किवारइ हसीनइ मा सां

नानतस्फोटन

द्वउडी यइ किवारइ कुसण उमांदी नइ रोयइ किवारइ सुत उउ वादनां आलसमोदइ किवारइ रीसा
णउ उत्रेवदि फोदइ इत्यादि अथ षोडशवार्षिके कृष्णे जाते गोचारणं गोवर्द्धनपर्वतोत्पाटनं गोपांगना
ज्यापि रमणं च लोकप्रसिद्धं सर्वं वाच्यं॥ अथ तदवसरे पुनः कंसेन नैमित्तिकः पृष्टः सर्वोक्तं तव निमित्तं त
द्विघटितं अथ पुनर्वद मम कस्मादपि संशयं वर्त्तते ततो नैमित्तिकः प्राह सो कंस यः कोपितव अ
रिष्टनामानं वृषभं१ केशिनामानं हयं२ खर३ मेष४ नामानौ खरौ वधिष्यति पुनः कालिनामानं स
र्पं वशं करिष्यति५ शार्ङ्ग नाम धनुरारोपयिष्यतिद पुनर्मल्लयुद्धावसरे चाणूर१ मौष्टिक२ ना
मानौ मल्लौ जयिष्यति८ पुनर्गोपुरे तिष्ठंतौ चंपक१ पद्मोत्तर नामानौ गजौ योद्धनिष्यति स
तव हंता ज्ञेयः ततः कंसः तस्य परीक्षार्थं द्विकृते अरिष्टादीन् वने मुमोच कृष्णेन सर्वे
पि ते हताः पुनर्धनुरारोपणावसरं श्रुत्वा कृष्णेन बलभद्रसहितेन वसुदेववारितेनापि रथमा
रुह्य तत्रागत्य धनुरारोपितं पुनर्मल्लयुद्धोत्सवं दृष्टुं रामकृष्णौ समागतौ द्वारे चंपकपद्मोत्तर
नामानौ गजौ हतवंतौ ततः कंसेन प्रोक्तं यः चाणूर१ मौष्टिक नामानौ मल्लौ जयति तस्मै अहं स्वकी
यां स्वसारं सत्यभामां ददामि ततस्तद्वचनश्रवणेन उत्कंठितास्यां तास्यां सह युद्धं कुर्वाणाभ्यां तौ म
ल्लौ हतौ ततोसीतेन कोपं कृत्वा कंसेन प्रोक्तं अरे एतौ कृष्णसर्पौ केन पोषितौ केनापि प्रोक्तं नंदेन कं
सः प्राह अरे आनीयतां स नंदो यथा शिक्षां ददामि ततः कृष्णेन कंसो मंचात् सोम्यां पातयित्वा ह
तः उग्रसेनेन स्वपुत्री सत्यभामा त्रिज्ञातवर्षीया षोडशवार्षिकाय कृष्णाय परिणायिता अथ स

६
कल्प०

समुद्रविजयरामकृष्णैरुग्रसेनो राजा काष्टपंजरान्निःकाश्य मथुराराज्ये स्थापितः जीवयशा कंसप
त्नी च सदंती राजगृहनगरे स्वपितृश्रीजरासिंधपार्श्वे गता जरासंधनृपाय सर्वोपि कंसमारणवृत्तां
तः कथितः जरासिंधप्रति वासुदेवेन प्रोक्तं देव त्वं स्वस्थो भव दुःखं मा कुरु सर्वं सम्यग् भविष्यति ततो
जरासंधनृपेण सोमकनृपो निजदूतो यादवपार्श्वे मुक्तः कथापितं च सो यादवराजानो सम्यक् कृतं
यत्राई मम स्वामी माता कंसो हतो मम पुत्र्या वैधव्यं दत्तं अथ ज्ञास्यते ततो यादवनृपाः सर्वे भयभ्रांता जाता त
तः समुद्रविजयो राजा श्रीकृष्णबलभद्रश्रीने मिकुमारादिसहितः शौरिपुरनगरात् एकाद
श कुलकोटिः उग्रसेनो राजा सप्तकुलकोटीर्म थुरात एवं अष्टादश कुलकोटीर्यादवानां
लात्वा पश्चिमदिशि गंतव्यं यत्र सत्यभामा सानु१ सामर२ नामकं पुत्रयुगलं जनय
ति तत्र स्थातव्यं तत्र भवतां जयो भावीति नैमित्ति कवचनं श्रुत्वा चलिताः पश्चिमां दिशमुद्दिश्य पश्च ×तस्मिन्×
स्मावे कोपाक्रांतं यादवमारणार्थं चटितं जरासंध नृपं निवार्य कालककुमारः पंचशतकुमारसहि
तः प्रतिज्ञां कृत्वा यादवकेटके चटितः अत्यासन्नमागतं कालककुमारं ज्ञात्वा यादवानां रक्षणाय
यादवकुलदेवी स्थविरारूपं कृत्वा मार्गे चितानां सहस्रं कृत्वा मार्गे उपविष्टा सती रोदितुं लग्ना काल
ककुमारेण प्रोक्तं हे स्थविरे कासि त्वं किं तव दुःखं कथं च रोदिषि ततः सा स्थविरा प्राह अहं याद १२४
वानां कुलदेवी यादवाश्च कालककुमारागमनं श्रुत्वा ऽग्रे गंतुं असमर्थाः एतासु चितासु प्रविश्य प
ज्वलिताः मृताः अथ मम कः पूजां करिष्यति इति हेतोः रोदिमि अहमपि चितायां प्रविश्यामि किंतु :

रुदंत्या अस्थितया मया ततः कालककुमारोपि अज्ञानात्तान् कर्षितुं रोषाच्चितायां प्रविष्टो मृतश्च त
तो यादवा निर्भयाः संतश्चलिताः यत्र स्थाने सत्यभामा पुत्रयुग्मं प्रसूता तत्र सर्वेपि स्थिताः श्रीकृ
ष्णेन सुस्थितनामा लवणाधिपतिदेव आराधित उपवासत्रयेण स देव आगत्य कौस्तुभरत्नं१ पांच
जन्यशंखं२ च प्राभृती कृतवान् ततः कृष्णेन प्रोक्तं भो देव नवमवासुदेवाय सन्मायागताय स्था
नं सर्वरीति व्यवस्थां च पालय ततस्तु मिति भणित्वा इंद्रो विज्ञप्त इंद्रेण च धनदपार्श्वान्नवीनां द्वारकां
कृत्वा कृष्णाय समर्पिता कीदृशी सा द्वारिका द्वा दशयोजनानि दीर्घा नवयोजनानि पृथुला य
स्या प्रोन्नतवप्रो नवहस्तोन्नतभूमिगतो द्वा दशहस्तपृथुलः सर्वस्वर्णमयो रत्नकपिशी कं गुल
र्षः सार्धदिनत्रयं यावत् रत्नस्वर्णमणिमा णिक्यविविधवस्त्राभरणधान्यादिसर्व
वस्तुवृष्टिकरणेन धनदेन भृता नगरी सप्तसौ मिका अष्टादशसौमिकैकविंशतिसौमिकैरा
वासैर्विराजमाना साक्षात् स्वर्गपुरीव दृश्यते अथ सर्वेपि यादवा निर्भयाः संतो मुदिताः संत
स्तिष्ठंति श्रीसमुद्रविजयादिभिर्मिलित्वा वासुदेवं मत्वा कृष्णो राज्ये स्थापितः अथ गते कियति का
ले रत्नकंबलव्यवहारिणो वणिजो द्वारिकायां रत्नकंबलानि विक्रीय राजगृहे गताः तत्र जीवय
शां अल्पमूल्येन रत्नकंबलं मार्गयंती प्रति ते प्राहुः वरं द्वारका यत्र कृष्णो राजा यत्र अस्माकं रत्न
×यादव× कंबलानां बहुमूल्यं समागतं इति व्यतिकरेण जीवनस्वरूपं ज्ञात्वा कोपं कृत्वा जरासिंधः सर्वसैन्यं
लात्वा समागतः ततः कृष्णोपि जरासिंधं समागच्छंतं श्रुत्वा द्वारकातो निर्गत्य पंचचत्वारिंशद्योज

नानि अतिक्रम्य सन्मुखमागतः पाडलापंचासराग्रामसीम्नि चउयोजनांतरे सैन्यद्वयमपि स्थितं पर
स्परं युद्धं लग्नं लक्षशो मनुष्या मृताः ततो युद्धे कृष्णं अजेयं मत्वा जरासिंधनृपेन जराविद्या मुक्ता तया
श्रीकृष्णस्य सैन्यं रुधिरं वमन् मूर्छामापपात ततः श्रीनेमिनाथवचनेन श्रीकृष्णेन उपवासत्रयं कृत्वा प
द्मावती आराधिता तयाप्यत्यक्षीभूय धरणेंद्रस्य देवालयात् भावितीर्थंकरस्य श्रीपार्श्वनाथस्य प्रति
मा आनीय दत्ता तदा मंगलनिमित्तं हृष्टेन कृष्णेन शंखो वादितः तत्रैव स्थाने बिंबं स्थापितं शंखपुरण
त् शंखेश्वर इति तीर्थं जातं पुनः श्रीनेमिनाथेनेंद्रेण मातलिसारथिना समं मुक्तो यो रथस्तमास्थ
शंखनादः कृतः तेन जरासिंधसैन्यं निःप्रतापं जातं ततो दिनत्रयं श्रीशंखेश्वरपार्श्वनाथप्र
तिमास्नात्रोदकेन श्रीकृष्णस्य सैन्यं सज्जं जातं पुनर्जरासिंधेन कृष्णाय स्वकीयं च
क्रं मुक्तं परं न प्रभवितं तत तद्देवचक्रं गृहीत्वा कृष्णेन मुक्तं तेन जरासंधस्य मस्तकं छिन्नं मृतो
जरासिंधः देवैः कृष्णस्य उपरि पुष्पवृष्टिं कृत्वा उच्चैः प्रोक्तं रे रे कृष्णो नवमो वासुदेवो जातः अथ
एनमेव सर्वेपि आश्रयध्वं ततः सर्वमपि जरासंधसंबंधि सैन्यं श्रीकृष्णस्य मिलितं अथ श्रीकृष्णवासुदे
वो द्वारिकामागत्य त्रिखंडराज्यं भुंजानस्तिष्ठति अथ द्वारिकायां द्वासप्ततिः ७२ कुलकोट्यो द्वारका
तो बहिश्च षष्टिकुलकोट्यो यादवानां वसंति पुनर्द्वारिकायां के के महापुरुषा वसंति तानाह॥ ·१२५
श्रीसमुद्रविजयादयो दश दशार्हाः १ बलदेवादयः पंचमहावीराः २ श्रीउग्रसेनादयः षोडशस
हस्रा राजानः ३ प्रद्युम्नादयः सार्द्धत्रिकोट्यः कुमाराः ४ शांबादयः ६०सहस्राः दुर्दांतकुमाराः ५ वी

रसेनादयः २१सहस्राः वीराः ६ महासेनादयः षट्पंचाशत्सहस्राः बलवंतो राजानः ७ रुक्मि
णीप्रमुखा द्वात्रिंशत्सहस्राः राज्ञ्यः ३२ ८ अनंगसेनादयोऽनेकसहस्रा गणिकाः ९ एवं प्राज्यरा
ज्यं कुर्वाणेषु यादवेषु सत्सु एकदा इंद्रमहाराजेन श्रीनेमिनाथस्य बलवर्णनं कृतं ततो मिथ्या
दृष्टिदेवा असहमानाः आगत्य श्रीगिरिनारस्य मेखलायां सुरधारानाम नगरं स्थापयित्वा मनुष्यरूपाः
संतस्तस्थुः बहून् द्वारकालोकान् उपद्रवंति पीडयंति तदा श्रीवसुदेवस्य पुत्रः श्रीनेमिनाथस्य भ्रा
ता वीरमानी अनादृष्टिः तेषां निर्घाटनार्थं गतस्तै र्मायामानवैर्जित्वा स्वकीयनगरमध्ये नीतस्त
द्वृत्तांतं श्रुत्वा श्रीसमुद्रविजयं गच्छंतं निवा र्य श्रीरामकृष्णौ गतौ तावपि संग्रामे जित्वा
स्वपुरीमध्ये क्षिप्तौ ततो द्वारकायां कोला हलो जातो यदुत रामकृष्णौ अपहृतौ ततः
सत्यभामाप्रमुखनारीभिः श्रीनेमिर्विज्ञप्तः त्वयि अनंतबलवीर्ये सति तव भ्रातॄन् शत्रवोऽभि
भवंति तत्र वैव लज्जा ततो भगवान् श्रीनेमिरेक रथमारुह्य शत्रुनगरस्य चतुर्दिक्षु सम
तात् रथं भ्रामयति स्म ततो वप्रस्य कपिशीर्षालिपिभ्यः ततो मायाविदेवैः सिंहा विकुर्विताः स्वा
मिनाथहुंकारेणैव त्रासिताः १ पुनस्तैरंधकारं विकुर्वितं भगवता उद्योतबाणो मुक्तः २ पुनस्तै
र्मेघवर्षणं प्रारब्धं भगवता वायव्यशस्त्रं मुक्तं ३ पुनस्तैरंगारवृष्टिः प्रारब्धा भगवता पानीयेन उ
पशामिता पुनर्भगवता मोहनशस्त्रं मुक्तं तेन सर्वेपि शत्रवो मूर्छां गताः अतीव पीडिता जाताः
ततः इंद्रेण आगत्य श्रीनेमिर्विज्ञप्तः हे स्वामिन् मुंच२ वराकान् एते अज्ञानिनोऽनंतबलस्य स

६
कल्प०

गवतो माहात्म्यं न जानंति ततो भगवता कृपया मुक्ता ततो देवा महामहोत्सवेन नगरमध्ये मुक्त्वा स्व
स्व स्वस्थानं गताः अथ श्रीनेमिनाथस्य त्रीणि वर्षशतानि जातानि परं पाणिग्रहणं न वांछति तदा
शिवादेवी माता नेमि पुत्रं प्रति एवमवादीत् हे पुत्र त्वं अस्माकं मनोरथपूरणाय कथं विवाहं अ-
द्यापि न करोषि तदा नेमिः प्राह हे मातः अहं कांचित् योग्यां कन्यकां विलोकयन्नस्मि यदा लप्स्य-
ते तदा तव कथयिष्यामि ततो मौनमाधाय माता स्थिता अथ एकदा श्रीनेमिनाथः आयुधशालायां
गतः सुदर्शनचक्रं कुंभकारचक्रवत् भ्रामितं १ पुनः शार्ङ्गं नाम धनुर्मृणालवन्नामितं २ पुनर्येन कृ-
ष्णस्य कौमोदकीनाम्नी गदा यष्टिवत् उत्पाटिता स्व- कीयभुजाग्रे शृंखलावत् धृता ३ पुनर्येन पां-
चजन्यनामा शंखः पूरितः तस्मिन् पूरिते कंपं जातं तदा स्तंभानुन्मूल्य हस्तिनो नष्टाः
: बंधनानि त्रोटयित्वा च अश्वाः भग्नाः २ नादेन विश्वं बधिरं जातं ३ धराधर कंपिताः ४ नगरीवप्र-
काकंपेषु पर्वताः संचेलुः ६ समुद्रा उच्छलिताः ७ दिग्गजाः त्रासं प्राप्ताः ८ यादवा मूर्छिता इव जाता पृथ्वी पर्वता
९ ब्रह्मांडं संशयविकलं जातं १० पुनर्मल्लाखाटके हरिर्हरिवत् भुजशाखायां हिंदोलितः ततो हरे-
र्मनसि चिंता जाता नायं वासुदेवो मत्तो बलाधिकतया अयं वासुदेवः किं तदा आकाशे कुलदेव-
ता वचनं जातं तथाहि राज्यं यो न समीहते गजघटाटंकारसंराजितं नैवाकांक्षति चारुचंद्रवदना
लीलावतीयौवनाः यः संसारमहासमुद्रमथने लावी च मंथाचलः सोऽयं नेमिजिनेश्वरो विजयते यो- १२६
गीन्द्रचूडामणिः १ ततः कृष्णस्य समाधानं जातं अथ एकदा शिवादेव्या नेमिकुमारं नीरागमिव ज्ञात्वा

गोपीनां प्रोक्तं वसंतसमयोऽस्ति नेमिकुमारं क्रीडार्थं लात्वा यांतु यथा तथा सरागक्रीडया नेमिर्विवा-
हं मन्यते तथा कर्त्तव्यं ततः द्वात्रिंशत्सहस्राः सत्यभामाद्याः जलक्रीडायां नेमिं लात्वा गताः तत्र अन्या-
नाविधायां क्रीडायां क्रियमाणायां तत्र एका प्राह हे देवर तव भ्राता श्रीकृष्णः द्वात्रिंशत्सहस्र-
भार्याः परिणीतवान् त्वं एकामपि भार्यां कथं न परिणयसि अन्या प्राह हे सुभग एतादृशं यौवनं पुन-
र्दुर्लभं कथं निरर्थकं गमयसि मातापित्रोः प्रमोदाय एकां वधूं परिणय वधूमुखदर्शनेन एव मातापित्रोः
संतोषो भवेत् पुनरपि रुक्मिणी प्राह रे वल्लभ दे- वर यदि त्वं मुक्तिं वांछसि तथापि गृहिधर्मं समाश्रय
ततो धर्ममार्गे संचर यत ऋषभादयस्तीर्थंकरा अपि विवाहं पूर्वं कृत्वा स्त्रीभिः सह भोगान् भु-
क्त्वा मुक्तिमपि लेभिरे त्वं तु नवीन एव मुक्तिगा- मी उद्भितः ततः कोपं कृत्वा सत्यभामा प्राह
हे सख्यः अयं देवरो न मानयति आत्मनां क- थितं तदा बलात्कारेण हठं गृह्यते ततो लक्ष्म-
णा प्रमुखाः प्रोचुः अयं देवरः शूरो वर्तते तेन न बलात्कारः कार्यः विनयेन स्नेहेन च यदि मा-
नयति तदा मानयतु ततः सत्यभामादिभिः सहासं नेमिर्भणितः हे देवर एवमस्पर्शमानोऽपि यदेका-
मपि कामिनीं न परिणयसि तद्ज्ञातं शृंगारकातरतया तन्निर्वाहशक्त्याभावेन च उद्यमं मुक्त्वा स्थितोऽ-
सि परं त्वं यदि निर्वाहं कर्त्तुं न शक्नोषि तथापि तव भ्राता श्रीकृष्णस्त्रिखंडभोक्ता समर्थोऽस्ति यथा द्वात्रिं-
शत्सहस्रस्त्रीणां निर्वाहं करोति तथा तवस्त्रिया अपि निर्वाहं करिष्यति तदा नेमेः किंचिन्मुखे हास्यं समा-
गतं तदा सर्वाभिर्गोपीभिः हस्ततालीं दत्वा भणितं मानितो २ देवरेण विवाहो नेमिर्निःस्पृहोऽपि दाक्षिण्येन

मात्रपितृप्रमुखाणां हर्षसंगभयेन च मौनमेव आश्रितः ततः शिवादेवीप्रेरितैः श्रीकृष्णसमुद्रविज
यप्रमुखनृपैः श्रीउग्रसेननृपगृहे राजीमतीकन्या मार्गिता सहर्षं दत्ता च अथ विवाहसामग्र्यां तत्र तत्र
स्थाने जायमानायां सत्यां लग्नदिने श्रीनेमिः परिणयनार्थं अचालीत् अथ नेमिः कीदृशः हस्तिस्कं
धारूढः चामरैर्वीज्यमानो धृतमस्तकछत्रः आकाशे देवीभिर्हरिभिश्च सधवस्त्रीभिर्गीयमानगु
णग्रामः स्वभगिन्या उत्तार्यमाणलवणः समुद्रविजयादिभिरनेकाभिर्यादवकुलकोटीभिः समनु
गम्यमानः अनेकवाद्यनिर्घोषेषु जायमानेषु अ नेकनरनारीभिः सहर्षं वीक्ष्यमाणो गतः श्रीनेमिः
श्रीउग्रसेनराजधवलमंदिरसमीपे दृष्टः श्री नेमिना सारथिः लोकस्य इदं धवलमंदिरं सा
रथिना प्रोक्तं तव श्वसुरस्य श्रीउग्रसेनराज स्य तस्मिन् समये गवाक्षस्थया राजीमत्या
सखीदृष्टा हे सखि क्व मे प्राणपतिर्नेमिस्तदा त याह श्याम हस्तौ विस्तृत्य आगच्छन् नेमिः सख्या द
र्शितो राजीमत्या विचारितं एतादृशं मम मद्भा ग्यं वर्त्तते यन्नेमिर्मां परिणयति तस्मिन् क्षणे रा
जीमत्या दक्षिणांगानि स्फुरितानि जातानि सख्या प्रोक्तं हे सखि कथं हर्षस्थाने विषादः तदा रा
जीमती प्राह हे सखि इंगिताकारैर्ज्ञायते मामम विघ्नं भवति सख्या प्रोक्तं मा अमंगलं वद तोरणाग
मने कः संदेहः तस्मिन् प्रस्तावे श्रीनेमिना पशुपाटको दृष्टः तत्र केके जीवाः क्षिप्ताः संति तथाहि अ
जएडक महिष शशक शूकर शंबर हरिण रोझ रीछ प्रमुखाः चतुःपदाः पुनः तित्तिर मोर बगला सारस
सारिका नीलवास चकोर चक्रवाक कौंच पारेवा चिडकला होला प्रमुखाः पक्षिणः सर्वेपि संकी १२७

र्णस्थाने एकत्रकृताः संति केचित् क्षिप्ताः केचित् क्षुधार्त्ताः केपि तृषापीडिताः महादुःखिनः आर्त्तस्व
रं कुर्वंति तिष्ठंति श्रीनेमिस्तान् तथाविधान् दृष्ट्वा सारथिं प्राह भोः किमेतत् सारथिना प्रोक्तं हे स्वामिन्
तव श्वसुरेण श्रीउग्रसेनेन तव गौरवनिमित्तं रक्षिताः संति तव गौरवकर्त्तव्यं एतैर्मारितैर्भावि श्रीने
मिश्चेतसि अचिंतयत् अहह अहो इदं श्रीउत्तमपि अशक्यं परजीवप्राणापहारेण निजोत्सवकर
णं नरकपाताय भवति अलं मम विवाहेन हे सारथे रथं वालय तस्मिन् समये एको मृगः श्रीनेमिं प
श्यन् स्वकीयग्रीवया स्वभार्यां मृगीं ग्रीवां विधा य प्रेमवशात् भणति अरे मा कोपि एतां मम प्राण
प्रियां मृगीं उपद्रवतु हे स्वामिन् यत एतस्या विर होमम मरणादपि अधिको ऽसह्यः ततो मृगी श्री
नेमिमुखं दृष्ट्वा स्वप्रियं मृगं प्राह हे प्रिय एष म हानुभावः कोपि प्रसन्नवदनः त्रिभुवनस्वा
मी अकारणबंधुः कृपावान् दृश्यते सर्वजीवा नां रक्षार्थं एनं विज्ञपय ततो हरिणो मुखमूर्द्ध्वी
कृत्य नेमिं प्रति प्राह हे करुणानाथ वयं वनेव सामः तृणानि भक्षयामो निर्झरपानीयं च पि
बामस्तेन निरपराधान् अस्मान् मार्यमाणान् त्वं रक्ष रक्ष एवं सर्वेपि पक्षिणः स्वकीयभाषया पूत्कुर्वंति
स्म ततः श्रीनेमिः प्राहरिकान् प्राह भो भवत्स्वामी मम गौरवार्थं एतान् मारयिष्यति ततो नाहं विवा
हं करिष्यामि मुंचत २ एतान् ततः प्राहरिकैर्मुक्ताः पक्षिणः आकाशे उड्डयंत आशिषं ददुः नेमिः
सारथिं प्राह वालय रथं अनेन विवाहेन विषवृक्षसमानेन नरकदायकेन मम अलं वालितो रथः
ततः समुद्रविजयशिवादेवीप्रमुखा बहवोंतराले पतिताः परं नेमिर्न मानयत् प्राह च यथा एते

६
कल्प.

जीवा बंधनैर्बद्धाः दुःखमनुभवंति तथा वयमपि विवाहकरणे कर्मबंधनैर्बद्धाः संसारे तिष्ठामः त
स्मिन्नवसरे राजीमती नेमिं पश्चाद्वलितं श्रुत्वा विरहविलापान् चकार तातहा॥ हा दैव किं जातं इ
त्युक्त्वा मूर्छां गता: ततः सखीभिः चंदनपानीयैः शीतलव्यजनवातैश्च सावधानीकृता तथापि किं अ
करोत्तदाह हारत्रोडइ वलयमोडइ आभरणभांजइ मांडणा मांजइ किंकणीकलापत्रोडइ मस्त
कमोडइ कुंतलकलापविरोलइ आंषि चोलइ दीनदीन बोलइ बइवी डोलइ घुंघट रइ छेटइ
धरती लोटइ आंसूए धरती सिंचइ दुःखइ आप मीचइ अटुं बनइ करइ कांनइ सहेलीयांनइ
अपमानइ घोडइ पाणी माली जिम टलवल इ भूर बापा मती धरती ढलइ षिण रोयइ षि
ण जोयइ षिण ऊध्याहत मुंडहो धरइ षिण आक्रंद करइ षिण ऊंजइ षिण कहइ इत्या
दि पुनर्विलपतिस्म हा यादवकुलदिवाकर हा करुणासागर हा अशरणशरण मां त्वयि
बद्धप्रेमबंधां मुक्त्वा कथं गतः पुनर्मां निरपराधां मुक्त्वा तव गमनं न युक्तं परं मया ज्ञातं त्वं मुक्ति
रूपस्त्रीमोहितो यासि परं सा तु वेश्या इव अनेकजनभुक्तास्ति अहो तव ज्ञातृत्वं पुनर्यदि तव परि
णयनवांछा नाभूत्तदा तोरणे आगत्य पश्चाद्वलित्वा कथं अहं विडंबिता पुनः सख्यः प्रोचुः हे सखि
मा दुःखं कुरु एकहस्तेन कथं ताली पतति त्वं तस्मिन् सरागा परं स त्वयि नीरागः किमनेन बहवो या
दवकुमारा एकैकतः अधिकाः संति तं अन्यं वरं गौरवर्णं परिणयेः अयं तु कालः ततो राजीमती प्रा
ह हे सख्यः कालोप्ययं मम प्रियो ऽनंतगुणाश्रयः श्लाघनीयश्च यथा पृथ्वी कस्तूरिका चित्रावल्लि १२८

कृष्णागरु मेघ कनीनिका केस कषपट्टिका प्रमुखाः काला अपि महोपकारकाः श्लाघनीयाश्च पु
नर्गौरा अपि कालैः शोभां लभमाना दृश्यंते यथा कर्पूरं अंगारेण चंद्रः चिह्नेन नेत्रं कनीनिकया
कज्जलेन वा सोडंमरिखेन स्वर्णं कषपट्टरेषया गौरवर्णे तु गौरत्वं अपगुणाय भवेत् क्षीरं लवणं
च अग्नौ दह्यते हिमं च तापेन गलति अतिगौरः कुष्टीत्युच्यते गोधूमादिचूर्णं तु स्त्रीहस्तमर्दनं सहते
ततो राजीमती प्राह हे सख्यो नेदं वचनं श्राव्यं अस्मिन् भवे नेमिरेव प्रियो यद्यनेन न परिणीता ह
स्तेन हस्तो न गृहीतस्तदा तस्य हस्तं अहं मम म स्तके दापयिष्यामि दीक्षाग्रहणात् सख्यः प्राहुः
हे राजीमति सा धन्या त्वया प्रोक्तं सुलब्धं तव जन्म यस्या ईदृशं शीलं त्रिभुवनराज्यादपि
दुर्लभं पुनरपि राजीमत्या श्रीगिरिनारगि गरे रूपालंभः प्रागपि कथापितः हे गि
रिनारगिरे त्वया नेमेस्तत्रागतस्य स्थानं न दा तव्यं यथा तेन राज्यलक्ष्मीस्त्यक्ता अहं च त्य
क्ता तथा त्वामपि त्यक्त्वा यास्यति अयं त्यजन स्वभावोऽस्ति तथापि न चिरस्थायी भावी तदा गि
रिनारेणापि राजीमत्या प्रत्युत्तरं दत्तं हे राजीमति यदि मां त्यक्ष्यति तदा त्यजतु परं तदीयस्थित्या
मम तीर्थत्वं सर्वजनेन महिमा भविष्यति अथ च त्वमपि अत्रैवागमिष्यसि इत्यादि कविघटना
अथ राजीमती सुखेन शीलं पालयंती सती पितृगृहे तिष्ठति॥ अथ भगवतो दीक्षाकल्याणकमा
ह॥ तत्र सूत्रं॥ अरहा अरिट्ठनेमी दक्खे जाव तिन्नि वाससयाइं कुमारे अगारवासमज्झे वसि
त्ताणं पुणरवि लोगंतिएहिं जियकप्पिएहिं देवेहिं तं चेव सव्वं भाणियव्वं जाव दाणं दाइयाणं

६ कल्प०

परिसाइ त्ता जेसे वासाणं पढमे मासे दुच्चे पक्खे सावणसुद्धे तस्सणं सावणसुद्धस्स छट्ठीपक्खेणं
पुव्वण्हकालसमयंसि उत्तरकुराए सीयाए सदेवमणुयासुराए परिसाए अणुगम्ममाणमग्गे जा
व बारवईए नयरीए मज्झंमज्झेणं निग्गच्छइ त्ता जेणेव रेवयए उज्जाणे तेणेव उवागच्छइ २ त्ता असो
गवरपायवस्स अहे सीयं ठावेइ त्ता सीयाओ पच्चोरुहइ २ त्ता सयमेव आभरणमल्लालंकारं मुय
इ २ सयमेव पंचमुट्ठियं लोयं करेइ २ छट्ठेणं भत्तेणं अपाणएणं चित्तानक्खत्तेणं जोगमुवागएणं
एगं देवदूसमादाय एगेणं पुरिससहस्सेणं सद्धिं मुंडे भवित्ता अगाराओ अणगारियं पव्वइए
अर्थलेशो यथा॥ अर्हन् अरिष्टनेमिः त्रीणि वर्षशतानि कुमारः सन् गृहवासे उषित्वा
पुनर् लोकांतिकदेवैः प्रतिबोधितः संवत्सरदानं दत्वा वर्षाकालस्य प्रथमे मा
से द्वितीयपक्षे एतावता श्रावणशुदिषष्ठीदिवसे प्रभातकाले उत्तराकुरा नाम शिबिका
मारुह्य देवैर्मनुष्यैश्च समनुगम्यमानमार्गः द्वारकानगरीमध्ये गत्वा यत्र रैवतं नाम उद्यानं त
त्र गत्वा अशोकवृक्षस्य अधस्तात् शिबिकातः उत्तीर्य स्वयमेव आभरणालंकारान् मुक्त्वा स्वयमेव पंच
मौष्टिकं लोचं कृत्वा षष्ठेन तपसा अपानकेन चित्रानामनक्षत्रे चंद्रेण समं योगं वर्तमाने एकं देवदूष्यं
वस्त्रं इंद्रेण स्कंधे अर्पितं आदाय सहस्रपुरुषैः सार्द्धं मुंडो भूत्वा दीक्षां जग्राह तदैव चतुर्थं मनःपर्या १२९
यज्ञानं च उत्पन्नं॥ अथ भगवतो ज्ञानकल्याणकमाह॥ तत्र सूत्रं॥ अरहओणं अरिट्ठनेमिस्स चउ
पन्नं राइंदियाइं निच्चं वोसट्ठकाए चियत्तदेहे तं चेव सव्वं जाव पणपन्नगस्स राइंदियस्स अंतरा व

ट्टमाणस्स जेसे वासाणं तच्चे मासे पंचमे पक्खे आसोयबहुले तस्सणं आसोयबहुलस्स पन्नरसीपक्खेणं
दिवसस्स पच्छिमे भागे उज्जिंतसेलसिहरे वेडसपायवस्स अहे छट्ठेणं भत्तेणं अपाणएणं चित्ता
नक्खत्तेणं जोगमुवागएणं झाणंतरियाए वट्टमाणस्स जाव अणंते अणुत्तरे जाव सव्वलोए सव्वजी
वाणं भावे जाणमाणे पासमाणे विहरइ॥ अर्हतः अरिष्टनेमिनः चतुःपंचाशत् दिनेषु गतेषु दीक्षातः पंच
पंचाशत्तमे दिने वर्त्तमाने वर्षाकालस्य तृतीये मासे पंचमे पक्षे एतावता आश्विनवदि अमावास्या दिवसस्य
चतुर्थप्रहरे श्रीगिरिनारपर्वते वेतसवृक्षस्य अधः षष्ठेन भक्तेन क्वचिदष्टमेन अपानकेन चित्रानक्षत्रे
चंद्रेण सह योगं वर्त्तमाने भगवतः केवलज्ञानं समुत्पन्नं देवैः समवसरणं मंडितं भगवता च चतु
र्विधसंघस्य स्थापना कृता॥ अथ भगवतः परिवारसंख्यामाह तत्र सूत्रं॥ अरहओणं अ
रिट्ठनेमिस्स अट्ठारसगणा अट्ठारसगणहरा हुत्था १ अरहओणं अरिट्ठनेमिस्स वरदत्तपामुक्खा
ओ अट्ठारससमणसाहस्सीओ उक्कोसिया समणसंपया हुत्था २ अरहओणं अरिट्ठनेमिस्स अज्जजक्खि
णिपामुक्खाओ चत्तालीसं अज्जियासाहस्सीओ उक्कोसिया अज्जियासंपया हुत्था ३ अर० अरि० नंदपा
मुक्खाणं समणोवासगाणं एगासयसाहस्सीओ अउणत्तरिं च सहस्सा उक्कोसिया समणोवासगसंप०
अर० अरि० महासुव्वयापामुक्खाणं समणोवासियाणं तिन्निसयसाहस्सीओ छत्तीसं च सहस्सा उ
क्कोसिया समणोवासियाणं संप० अर० अरि० चत्तारिसया चउद्दसपुव्वीणं अजिणाणं जिणसंकासा
णं सव्वक्खर जाव हुत्था अ० अ० पन्नरससया ओहिनाणीणं पन्नरससया केवलनाणीणं पन्नरस

६
कल्प०

सया वेउव्वियाणं दससया विउलमईणं अट्ठसया वाईणं सोलससया अणुत्तरोववाइयाणं प
न्नरससमणसया सिद्धा तीसं अज्जियासयाइं सिद्धाइं अ० अ० दुविहा अंतगडभूमी होत्था तं० जुगं
तगडभूमी य परियायंतगडभूमी य २ जाव अट्ठमाओ पुरिसजुगाओ जुगंतगडभूमी दुवालसपरि
याए अंतमकासी ॥ अर्थलेशो यथा ॥ नेमिनाथस्य अष्टादश गणा अभूवन् एवं अष्टादश गणधरा
:२ भगवतः श्रीनेमिनाथस्य वरदत्तप्रमुखा अष्टादशसहस्राः साधवोऽभूवन् भगवतः श्रीनेमिनाथस्य आ
र्ययक्षिणीप्रमुखाः चत्वारिंशत्सहस्रा उत्कृष्ट तः साध्व्योऽभूवन् ४ भगवतः श्रीनेमिनाथस्य नंदप्र
मुखा एकं लक्षं एकोनसप्ततिश्च सहस्राः श्रावका :५ भगवतः श्रीनेमि० महासुव्रता प्रमुखाः त्रीणि ल
क्षाणि षट्त्रिंशच्च सहस्राः श्राविका अ०६ भगवतः श्रीनेमि० चत्वारिशतानि चतुर्दश
पूर्वधरा अ०७ भगवतः श्रीनेमि० पंचदशशतानि अवधिज्ञानिनः ८ भगवतः श्रीनेमि० पंचदशशता
नि केवलिनः ९ भगवतः श्रीने० पंचदशशतानि वैक्रियलब्धिधराः १० भगवतः श्रीने० दशशतानि वि
पुलमतिधराः ११ भगवतः श्रीने० अष्टशतानि वादिनः साधवः १२ भगवतः श्रीनेमि० षोडशशतानि अनुत्त
रोपपातिनो देवा जाताः १३ भगवतः श्री० पंचदशशतानि श्रमणाः सिद्धाः १४ भगवतः श्रीनेमिनाथस्य त्रिंश
च्छतानि साध्व्यः सिद्धाः १५ भगवतः श्री० द्विविधा अंतकृद्भूमिः स्यात् तत्र श्रीनेमिनोऽष्टपुरुषयुगानि या १३०
वन्मोक्षमार्गः प्रवृत्तः स युगांतगडभूमी १ अथ श्रीनेमिनाथस्य केवलज्ञानोत्पत्तेरनंतरं द्वादशवर्षै
र्मोक्षमार्गो व्यूढः सपर्यायांतकृद्भूमी २ भगवतः केवलज्ञानोत्पत्त्यनंतरं राजीमती भगवतः समीपे ग

त्वा दीक्षां जग्राह तदा भगवद्वंदनागतेन श्रीकृष्णेन राजीमत्याः स्नेहकारणं पृष्टं श्रीनेमिर्नवभवान् प्रा
ह ॥ प्रथमे भवे धननृपति नामा राजा जातः तदा धनवती नाम्नी भार्या अभूत् १ ततो द्वितीये भवे सौधर्मे प्रथमदेव
लोके मित्रत्वेन देवौ जातौ २ तृतीये भवे चित्रगति नामा विद्याधरो जातः तस्य भार्या रत्नवती विद्याधरी
३ चतुर्थे भवे चतुर्थब्रह्मदेवलोके मित्रत्वेन देवौ जातौ ४ पंचमे भवे अपराजित नामा राजा जातस्त
स्य भार्या च प्रियमती ५ षष्ठे भवे एकादशे आरणदेवलोके मित्रत्वेन देवौ जातौ ६ सप्तमे भवे शं
खनामा राजा जातः तस्य भार्या यशोमती ७ अष्टमे भवे मित्रत्वेन देवौ जातौ ८ नवमे भवे श्रीनेमिः
राजीमती च ९ इति नव भवे पूर्वस्नेहवत्त्वं ॥ एकदा रथनेमिश्चारित्रं लात्वा उज्जयंते मेघ
वृष्ट्या बाधितो गुहायां प्रविष्टः राजीमत्यपि अज्ञाना तत्र प्रविष्टा रागातुरो रथनेमि
: राजीमत्या प्रतिबोधितो मोक्षं गतः राजीमत्यपि चत्वारि वर्षशतानि गृहवासे स्थित्वा वर्ष
मेकं छद्मस्थावस्थायां स्थित्वा पंच वर्षशतानि केवलज्ञानं प्रतिपाल्य नव वर्षशतानि वर्षमे
कं च सर्वमायुः पालयित्वा नेमेः पूर्वं मोक्षं गता नेमेः पूर्वं कथं मोक्षं गता तत्र का विघटना राजीम
त्या ज्ञातं यो नेमिर्दिव्यरूपां मां त्यक्त्वा मुक्तिं गंतुमिच्छति सा मम सपत्नी कीदृशी वर्त्तते तां विलोकया
मीति ननु राजीमती कियता कालेन नेमेः पूर्वं मोक्षं गता तत्रोच्यते नेमेर्वर्षशतेनाग्रे यथो राजीमती
शिवं इति श्रीतिलकाचार्यकृतदशवैकालिकटीकावचनात् नेमिनिर्वाणात् वर्षशतमंतरं नेमेरा
युर्वर्षसहस्रं राजीमत्या नवशतानि वर्षाधिकानि शतवर्षेण पूर्वं शिवं गता ततो राजीमती यदा

एकवर्षीयाः पुनस्तदा नेमेर्जन्म श्रीउत्तराध्ययनकमलसंयमीहृत्तौ उएवं प्रोक्तं लाल्यमानः पाल्यमानो धा
त्रीभिः क्षेमपूर्वकं प्रभुर्जातो ऽष्टवर्षीयान् वर्द्धमानः कलादिभिः १ तथा ऽपराजिताच्युत्वो ग्रसेननृपतेस्त
दा देवी यशोमतीजीवो राजीमत्यभवत्सुता २ ततो राजीमती नेमेरष्टवर्षैर्लघ्वी कवितरास्तत्सादौ
तु अन्यथा हरूयते तत्वं तु नः केवलिगम्यमिति॥ अथ भगवतो निर्वाणकल्याणकमाह तत्र सूत्रं॥ ते
णं कालेणं २ अरहा अरिट्ठनेमी तिन्निवाससयाइं कुमारवासमझे वसित्ता चउप्पन्नं च राइंदियाणि
छउमत्थपरियायं पाउणित्ता देसूणाइं सत्तवा ससयाइं केवलपरियायं पाउणित्ता पडिपुण्णा
इं सत्तवाससयाइं सामण्णपरियायं पाउणित्ता एगं वाससहस्सं सव्वाउयं पालइत्ता खीणे
वेयणिज्जाउयनामगुत्ते इमीसे उस्सप्पि णीए दूसमसूसमाए बहु वइक्कंताए जे से
गिम्हाणं चउत्थे मासे अट्ठमे पक्खे आसाढसुद्धे तस्सणं आसाढसुद्धस्स अट्ठमीदिवसेणं उप्पिं
उज्जिंतसेलसिहरंसि पंचहिं छत्तीसेहिं अणगार सएहिं सद्धिं मासिएणं भत्तेणं अपाणएणं चित्ता
हिं नक्खत्तेणं जोगमुवागएणं पुव्वरत्तावरत्तकालसमयंसि नेसज्जिए कालगए ८०० जाव सव्वदु
क्खप्पहीणे अरहउ णं अरिट्ठनेमिस्स कालगयस्स जाव सव्वदुक्खप्पहीणस्स चउरासीइं वाससह
स्साइं विइक्कंताइं पंचासीइमस्स वाससहस्सस्स नववाससयाइं विइक्कंताइं दसमस्स य वाससय
स्स अयं असीइमे संवच्छरे कालेगच्छइ॥ अर्थलापनिका त्वेवं॥ तस्मिन्काले २ श्रीनेमिनाथः त्रीणि
वर्षशतानि कुमारवासमध्ये स्थित्वा चतुःपंचाशद्दिनानि छद्मस्थावस्थापर्यायं पालयित्वा देशोना

नि चतुःपंचाशद्दिनैरूनानि सप्तवर्षशतानि केवलपर्यायं पालयित्वा संपूर्णानि सप्तवर्षशतानि दी
क्षां पालयित्वा एकं वर्षसहस्रं सर्वमायुः पालयित्वा क्षीणे वेदनीयादि कर्मचतुष्के अस्यां अवसर्पि
ण्यां दुःषमसुषमानाम्नि अरके बहु व्यतिक्रांते ग्रीष्मकालस्य चतुर्थमासे अष्टमे पक्षे एतावता आषा
ढसुदि अष्टम्यां गिरिनारपर्वतोपरि पंचभिः साधुशतैः षट्त्रिंशदधिकैः सार्द्धं मासिकेन भक्तेन अ
पानकेन चित्रानक्षत्रे चंद्रेण समं योगं वर्त्तमाने अर्द्धरात्रिसमये मोक्षं गतः यावत्सर्वदुःखैः प्रक्षी
णो जातः अथ श्रीनेमिनिर्वाणपुस्तकारूढसि द्धांतकयोः कियदंतरं तत्राह चतुरशीतिवर्ष
सहस्राणि संपूर्णानि तदुपरि नवशतानि च शीत्यधिकानि कथमित्याह श्रीनेमिनिर्वाणा
त् श्रीपार्श्वनाथः त्र्यशीतिवर्षसहस्रैः सा र्द्धसप्तवर्षशतैश्च सिद्धः अथ च श्रीपार्श्वना
थनिर्वाणात् श्रीमहावीरदेवः सार्द्धाभ्यां द्वाभ्यां शताभ्यां सिद्धः ततो द्वाभ्यामंतराभ्यां कृत्वा व
र्षसहस्रं जातं नेमिपार्श्वयोरंतरमीलने त्र्यशीति वर्षसहस्राणि जातानि ततः परं तु नवशतैरशी
त्यधिकैः सिद्धांतः पुस्तकारूढो जातः इति कृत्वा षष्ठी वाचना संपूर्णा जाता श्रीपार्श्वनाथश्रीनेमिना
थयोः पंच २ कल्याणकानि व्याख्यातानि अथ सप्तमवाचनायां चतुर्विंशतितीर्थंकराणां त्रयोविंश
तिरंतरालकालाः कथयिष्यंते ततः श्री आदिनाथस्य पंचकल्याणकानि व्याख्यास्यंते सवर्त्तमानयो
गः॥ व्याख्याने कल्पसूत्रस्य षष्ठं च सुगमं स्फुटं शिष्यार्थपाठकाश्चक्रुः समयादिमसुंदराः १ इति
षष्ठं व्याख्यानं संपूर्णं जातं॥६ अथ सप्तमं व्याख्यानं॥ तत्र पूर्वं प्रथमवाचनायां श्रीपंचपरमेष्ठिनम

स्कारो व्याख्यातः पुनः श्रीमहावीरदेवस्य संक्षेपवाचनया षट् कल्याणकानि व्याख्यातानि १ द्वि
तीयवाचनया च श्रीमहावीरदेवस्य च्यवनकल्याणकं गर्भापहारकल्याणकं च व्याख्यातं २ तृ
तीयवाचनया च चतुर्दश स्वप्ना व्याख्याताः ३ चतुर्थवाचनया च श्रीमहावीरदेवस्य जन्मकल्याणकं
व्याख्यातं ४ पंचमवाचनया च श्रीमहावीरदेवस्य दीक्षा१ ज्ञान२ निर्वाण३ कल्याणकत्रयं व्याख्या
तं ५ षष्ठवाचनया च श्रीपार्श्वनाथ श्रीनेमिनाथ तीर्थंकरयोः पंच२ कल्याणकानि व्याख्यातानि ६ अ
थ सप्तमवाचनायां अंतराणि श्री आदिनाथस्य पंचकल्याणकानि व्याख्यायंते तत्रापि पूर्वं चतु
र्विंशति तीर्थंकराणां त्रयोविंशति २३ अंतराणि व्याख्यायंते तत्र सूत्रं॥ नमिस्स णं अरहओ
कालगयस्स जाव सव्वदुक्खप्पहीणस्स पंच वाससयसहस्साइं चउरासीइं च वाससहस्साइं न
व य वाससयाइं विइक्कंताइं दसमस्स य वाससयस्स अयं असीइमे संवच्छरे काले गच्छइ ८५
मुणिसुव्वयस्स णं अरहओ कालगयस्स इक्कारसवाससयसहस्साइं चउरासीइं च वाससहस्सा
इं नव य वाससयाइं विइक्कंताइं दसमस्स य वाससयस्स अयं असीइमे संवच्छरे काले गच्छइ ८६
मल्लिस्स णं अरहओ जाव प्पहीणस्स पन्नट्ठिं वाससयसहस्साइं चउरासीइं च वाससहस्साइं न
व य वाससयाइं विइक्कंताइं दसमस्स य वाससयस्स अयं असीइमे संवच्छरे काले गच्छइ ८७ अ १३२
रस्स णं अरहओ जाव प्पहीणस्स एगे वासकोडिसहस्से विइक्कंते सेसं जहा मल्लिस्स तं च एयं
पंचसट्ठिं लक्खा चउरासीइं च सहस्सा विइक्कंता तंमि समए महावीरो निव्वुओ तओ परं नव वास

सयाइं विइक्कंताइं दसमस्स य वाससयस्स अयं असीइमे संवच्छरे काले गच्छइ एवं अरगाओ जाव से
यंसो ताव दट्ठव्वं ८८ कुंथुस्स णं अरहओ जाव सव्वदुक्खप्पहीणस्स एगे चउभागपलिओवमे विइक्कं
ते पंचसट्ठिं च सयसहस्सा सेसं जहा मल्लिस्स ८९ संतिस्स णं अरहओ० जाव प्पहीणस्स एगे चउ
भागूणे पलिओवमे विइक्कंते पंचसट्ठिं च सयसहस्सा सेसं जहा मल्लिस्स ९० धम्मस्स णं अरहओ
जाव प्पहीणस्स तिन्नि सागरोवमाइं विइक्कंताइं पन्नसट्ठिं च सेसं जहा मल्लिस्स ९१ अणंतस्स णं
अरहओ जाव सव्व० सत्त सागरोवमाइं विइक्कंताइं पन्नसट्ठिं च सेसं जहा मल्लिस्स ९२ विम
लस्स णं अर० जाव सव्व० सोलस सागरोवमाइं विइक्कंताइं पन्नसट्ठिं च सेसं जहा मल्लिस्स
९३ वासुपुज्जस्स णं अ० जाव स० बायालीसं सागरोवमाइं विइक्कंताइं पन्नसट्ठिं
च सेसं जहा मल्लिस्स ९४ सिज्जंसस्स णं अ० जाव० एगे सागरोवमसए विइक्कंते पन्नसट्ठिं
च सेसं जहा मल्लिस्स ९५ सीयलस्स णं अ० जा० एगा सागरोवमकोडी तिवासअद्धनवमासाहि
य बायालीसवाससहस्सेहिं ऊणिया विइक्कंता एयंमि समए वीरो निव्वुओ तओ वि य णं परं नव सया
इं विइक्कंताइं दसमस्स य वाससयस्स अयं असीइमे सं० ९६ सुविहिस्स णं अरहओ काल
गयस्स जाव सव्व० दस सागरोवमकोडीओ विइक्कंताओ सेसं जहा सीयलस्स तं चेमं तिवास
अद्धनवमासाहिय बायालीसवाससहस्सेहिं ऊणिया विइक्कंता इच्चाइ ९७ चंदप्पहस्स णं
अर० जाव सव्व० एगं सागरोवमकोडिसयं विइक्कंतं सेसं जहा सीयलस्स तं च इमं तिवास अ

छनवमासाहियबायालीसवाससहस्सेहिं ऊणगमिच्चाइ ९८ सुपासस्सणं अ० जाव एगे सागरो
वमकोडिसहस्से विइक्कंते सेसं जहा सीयलस्स तं च इमं तिवासअद्धनवमासाहियबायालीस
वाससहस्सेहिं ऊणिया विइक्कंता इच्चाइ ९९ पउमप्पहस्सणं अरहओ जाव सह० दससागरोव
मकोडिसहस्सा विइक्कंता तिवासअद्धनवमासाहियबायालीससहस्सेहिं इच्चाइयं सेसं ज
हासीयलस्स २०० सुमइस्सणं अ० जाव एगे सागरोवमकोडिसयसहस्से विइक्कंते सेसं जहा
सीयलस्स तिवासअद्धनवमासाहियबाया। लीससहस्सेहिं इच्चाइयं १ अभिणंदणस्सणं
अरहओ जाव स० दससागरोवमकोडिसय सहस्सा विइक्कंता सेसं जहा सीयलस्स ति
वासअद्धनवमासाहियबायालीसस हस्सेहिं इच्चाइ २ संभवस्सणं अ० जाव
सह० तीसं सागरोवमकोडिसयसहस्सा वि इक्कंता सेसं जहा सीयलस्स तिवासअद्धन
वमासाहियबायालीससहस्सेहिं इच्चाइयं ३ अजियस्सणं जाव पहीणस्स पन्नासं सा
गरोवमकोडिसयसहस्सा विइक्कंता सेसं जहा सीयलस्स तिवासअद्धनवमासाहिय बा
यालीससहस्सेहिं इच्चाइ ४ व्या० श्रीपार्श्वनाथ२३तीर्थंकरश्रीमहावीरयोरंतरं सार्द्धद्विशते
वर्षाणां ततः परं ९८० वर्षैः सिद्धांतः पुस्तकारूढो जातः १ श्रीनेमिनाथ२२तीर्थंकरस्य श्रीमहा
वीरयोरंतरं चतुरशीतिसहस्राः वर्षाणि ततः ९८० वर्षैः पुस्तकारूढः २ श्रीनमिनाथ२१तीर्थं
कर श्रीमहावीरदेवयोरंतरं पंचलक्षाश्चतुरशीतिसहस्राश्च वर्षाणि ततः परं ९८० वर्षैः पुस्त १३३

कारूढः ३ श्रीमुनिसुव्रतस्वामि२०तीर्थंकरश्रीमहावीरयोरंतरं एकादशलक्षाः ११ चतुरशीतिसहस्राश्च
वर्षाणि ततः परं ९८० वर्षैः पुस्तकारूढः ४ श्रीमल्लिनाथ१९तीर्थंकरश्रीमहावीरयोरंतरं पंचषष्टिल
क्षाः ६५ चतुरशीतिसहस्राश्च वर्षाणि ततः परं ९८० वर्षैः पुस्तकारूढः ५ श्रीअरनाथ१८तीर्थंकरश्री
महावीरयोरंतरं एका कोटी षट्पंचाशल्लक्षाः ५६ चतुरशीतिसहस्राश्च ८४ वर्षाणि ततः परं ९८० व
र्षैः पुस्तकारूढः ६ श्रीकुंथुनाथ१७तीर्थंकरश्रीमहावीरयोरंतरं पल्योपमस्य एकः चतुर्थो भागः
पंचषष्टिलक्षाः चतुरशीति ८४ सहस्राश्च वर्षा णि ततः परं ९८० वर्षैः पुस्तकारूढः ७ श्रीशांति
नाथ१६तीर्थंकरश्रीमहावीरयोरंतरं पादोनप ल्योपमं पंचषष्टिलक्षाः चतुरशीतिसहस्राश्च
वर्षाणि ततः परं ९८० वर्षैः पुस्तकारूढः ८ श्रीधर्मनाथ१५तीर्थंकरश्रीमहावीरयो
रंतरं त्रीणि सागरोपमाणि पंचषष्टिलक्षाश्चतु रशीतिसहस्राश्च वर्षाणि ततः परं ९८० वर्षैः
पुस्तकारूढः ९ श्रीअनंतनाथ१४तीर्थंकरश्री महावीरयोरंतरं सप्त सागरोपमाणि पंचषष्टिल
क्षाश्चतुरशीतिसहस्राश्च वर्षाणि ततः परं ९८० वर्षैः पुस्तकारूढः १० श्रीविमलनाथ१३तीर्थंकरश्री
महावीरयोरंतरं १६ सागरोपमाणि पंचषष्टिलक्षाश्चतुरशीतिसहस्राश्च वर्षाणि ततः परं ९८० व
र्षैः पुस्तकारूढः ११ श्रीवासुपूज्य१२तीर्थंकरश्रीमहावीरयोरंतरं षट्चत्वारिंशत् ४६ सागरोप
माणि पंचषष्टिलक्षाः चतुरशीतिसहस्राश्च वर्षाणि ततः परं ९८० वर्षैः पुस्तकारूढः १२ श्रीश्रेयां
स११तीर्थंकरश्रीमहावीरयोरंतरं एकं सागरोपमं शतं पंचषष्टिलक्षाः ६५ चतुरशीतिसहस्राश्च

र्बाणि ततः परं ९८० वर्षैः पुस्तकारूढः १३ श्रीशीतलनाथ१० तीर्थंकरश्रीमहावीरयोरंतरं एकासागरो
पमकोटी परं साकीदृशी द्विचत्वारिंशत्सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासैश्च ऊना ततः परं ९८० वर्षैः पु
स्तकारूढः १४ श्रीसुविधिनाथ९ तीर्थंकरश्रीमहावीरयोरंतरं दशसागरोपमकोट्यः परं ताः कीदृ
श्यः द्विचत्वारिंशत्सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासैश्च ऊना ततः परं ९८० वर्षैः पुस्तकारूढः १५ श्रीचं
द्रप्रभस्वामि८ तीर्थंकरश्रीमहावीरयोरंतरं एकं सागरोपमकोटीशतं परं कीदृशं तत् द्विचत्वारिंशत्
सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासैश्च ऊनं ततः परं ९८० वर्षैः पुस्तकारूढः १६ श्रीसुपार्श्व७ तीर्थं
करश्रीमहावीरयोरंतरं एकं सागरोपमकोटिसहस्रं परं तत्कीदृशं द्विचत्वारिंशत्सहस्रैस्त्रि
भिर्वर्षैः सार्द्धाष्टमासैश्च ऊनं ततः परं ९८० वर्षैः पुस्तकारूढः १७ श्रीपद्मप्रभ६ तीर्थंकर
श्रीमहावीरयोरंतरं दशसागरोपमकोटिसहस्राः परं कीदृशाः द्विचत्वारिंशत्सहस्रैस्त्रिभिर्व
र्षैः सार्द्धाष्टमासैश्च ऊनाः ततः परं ९८० वर्षैः पुस्तकारूढः १८ श्रीसुमतिनाथ५ तीर्थंकरश्रीमहावी
रयोरंतरं एकं सागरोपमकोटिलक्षं परं तत्कीदृशं द्विचत्वारिंशत्सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासै
श्च ऊनं ततः परं ९८० वर्षैः पुस्तकारूढः १९ श्रीअभिनंदन४ तीर्थंकरश्रीमहावीरयोरंतरं दशसा
गरोपमकोटिलक्षाः परं कीदृशाः द्विचत्वारिंशत्सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासैश्च ऊनाः ततः परं १३४
९८० वर्षैः पुस्तकारूढः २० श्रीशंभवनाथ३ तीर्थंकरश्रीमहावीरयोरंतरं त्रिंशत्सागरोपमको
टिलक्षाः परं कीदृशाः द्विचत्वारिंशत्सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासैश्च ऊनाः ततः परं ९८० वर्षैः

पुस्तकारूढः २१ श्रीअजितनाथ२ तीर्थंकरश्रीमहावीरयोरंतरं पंचाशत्सागरोपमकोटिलक्षाः प
रं कीदृशाः द्विचत्वारिंशत्सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासैश्च ऊनाः ततः परं ९८० वर्षैः पुस्तकारूढ
: २२ श्रीआदिनाथ१ तीर्थंकरश्रीमहावीरयोरंतरं एकासागरोपमकोटाकोटिः परं कीदृशी द्वि
चत्वारिंशत्सहस्रैस्त्रिभिर्वर्षैः सार्द्धाष्टमासैश्च ऊना ततः परं ९८० वर्षैः पुस्तकारूढः २३ इति २४
तीर्थंकराणां २३ अंतराणि॥ अथ श्रीआदिनाथस्य पंचकल्याणकानि कथ्यंते तत्र श्रीआदिनाथस्य त्र
योदश भवाः प्रथमं कथ्यंते॥ धण १ मिहुण २ सुर ३ महब्बल ४ ललियंग ५ य वयरजंघ ६ मिहुणे य
७ सोहम्म ८ विज्ज ९ अच्चु १० चक्की ११ सव्वट्ठ १२ उसभे य १३ १ जंबूद्वीपे पश्चिममहाविदेह
क्षेत्रे सुप्रतिष्ठितनामनगरे प्रियंकरनामा राजा राज्यं करोति तत्र नगरे धननामा
सार्थवाहः स एकदा वसंतपुरे गमनाय सार्थं मीलयति स्म तदा श्रीधर्मघोषसूरयोऽपि वसं
तपुरे गंतुकामा धनसार्थवाहं पृष्टवंतिस्म सार्थवाहेन प्रोक्तं आगच्छत तस्मिन् प्रस्तावे केनचित्
आम्रफलानि सार्थवाहस्य अग्रे ढौकितानि ततस्तानि सार्थवाहेन श्रीसूरीणां दातुं आरब्धानि ततो गु
रुभिर्द्विचत्वारिंशद्दाहारदोषाः प्ररूपिता एतानि फलानि सचित्तानि ततः साधुभिर्न गृह्यंते इत्युक्ते न
गृहीतानि ततो धर्मघोषसूरयः सार्थेन सह चलिताः वर्षाकाले दृष्टियोगात्सार्थो मार्गे स्थितः बहुदि
नैः शंबलं क्षीणं ततो लोकाः पुष्पफलादिना आजीविकां कुर्वंति श्रीधर्मघोषसूरयस्तु एकांते धर्म
ध्यानं कुर्वंतस्तिष्ठंति ततो बहुवर्षाकाले गते धनसार्थवाहेन पश्चिमरात्रौ साधवः स्मृता अरे अहं

७
कल्पल·

र्षां तिष्ठतां बहु दिनानि जातानि शंबलं सर्वेषां क्षीणं ततो न कोपि तेषां आहारदाता न च ते सचित्तं पुष्पफलादि गृह्णंति ततः कथं ते प्राणवृत्तिं कुर्वंति मया च सार्थे गृहीताः परं न तेषां चिंता कृता अथ कथं तेषां मुखं दर्शयामि लज्जितोपि प्रभाते साधूनां वंदनार्थं गतः साधुगुणान् दृष्ट्वा धर्मोपदेशं श्रुत्वा अपराधं क्षामयित्वा आहारार्थं निमंत्र्य स्वस्थाने आनीताः ततो निर्दोषं घृतं शुद्धभावेन दत्तं तद्दानेन सम्यक्त्वं उपार्जितं ततः सुखेन सर्वेपि वसंतपुरे प्राप्ताः धनसार्थवाहोपि तत्र नगरे क्रयविक्रयं कृत्वा स्वकीये सुप्रतिष्ठितनगरे आगतः ततः कियंतं कालं गृहस्थावासे सुखं भुक्त्वा प्रांते सम्यक्त्वं वमित्वा सदकपरिणामेन मृतः इति प्रथमो भवः १ ततः उत्तरकुरुक्षेत्रे युगलिको जातः इति द्वितीयो भवः २ ततः सौधर्मे प्रथमदेवलोके देवो जातः इति तृतीयो भवः ३ ततश्च्युत्वा पश्चिममहाविदेहक्षेत्रे गंधिलावतीविजये शतबलनामा राजा चंद्रकांता भार्या राज्ञी तस्याः पुत्रो महाबलनामा राजा जातः परं अत्यंत महाविषयलोलुपो महाभोगपुरंदरः विनयवत्यां राज्ञ्यां अन्यास्वपि नारीषु अत्यंतरागवान् धर्मं न करोति धर्मवार्तामपि न शृणोति सर्वदा गीतगानतानमाननाटकप्रियस्तिष्ठति महामोहनिद्रया कालं गमयति एकदा नाटके जायमाने राज्ञः प्रतिबोधाय स्वयंबुद्धनाम्ना मंत्रिणा प्रोक्तं सव्वं विलंबियं गीयं सव्वं नट्टं विडंबणा सव्वे आभरणा भारा सव्वे कामा दुहावहा १ सर्वं गीतं विलपितं विलापसदृशं सर्वं नाटकं विटंबना अंगोपांगसंज्ञानात् सर्वाणि आभरणानि भारभूतानि सर्वेपि कामा दुःखावहा १ राज्ञा श्रुत्वा मंत्रिणे प्रोक्तं॥ १३५

सो मंत्रिन् अप्रस्तावे कथं एवं प्रोक्तं कथं रागावसरे विरागस्ततो मंत्रिणा प्रोक्तं हे राजन् मया प्रस्तावसदृशमेवोक्तं यतश्चारणश्रमणद्वयेन मम अग्रे प्रोक्तं तव स्वामिनो महाबलराजस्य मासमेकमायुरस्ति ततो भीतेन राज्ञा प्रोक्तं भव्यं जातं सुप्तोहं त्वया जागरितः परं अग्नौ लग्ने कथं कूपखननं भविष्यति तदा मंत्रिणा प्रोक्तं मा त्वं विषादं च कुरु एकदिवसपालितमपि व्रतं स्वर्गमोक्षदायकं स्यात् ततो हर्षितो राजा पुत्रं राज्ये स्थापयित्वा सप्तक्षेत्रेषु दानं दत्त्वा अर्हच्चैत्येषु अष्टाह्निकामहोत्सवं कृत्वा सुगुरुसमीपे दीक्षां लली ततो महाबलो राजर्षिर्द्वाविंशतिदिनानि दीक्षां पालयित्वा अनशनं कृत्वा कालं गतः इति चतुर्थो भवः ४ ततः ईशाने द्वितीयदेवलोके श्रीप्रभविमाने ललितांगनामा सामानिको देवो जातः तत्र स्वयंप्रभानाम्नी देवी तया सह विषयसुखं भुंजानस्तिष्ठति एकदा स्वयंप्रभा देवी च्युता ललितांगदेवो विरहवियोगेन मूर्छां प्राप्य रोदनं महता शब्देन ततः स्वयंबुद्धः पूर्वभवमंत्री तत्रैव उत्पन्नोस्ति तेनावधिज्ञानेन स्वस्वामिनः शोकं ज्ञात्वा पूर्वभवधर्ममपि देशो दत्तः परं न लग्नः ततः प्रोक्तं हे स्वामिन् तव भार्या मया ज्ञातास्ति तव मिलिष्यति तथा करिष्यामि शोकं मा कुरु तस्या मिलनोपायो यथा धातकीखंडे पूर्वमहाविदेहक्षेत्रे मंगलावतीविजये नंदिग्रामे नागिलनामा एको गृहस्थो वसति परं महादरिद्री तस्य भार्या नागश्रीः तयोरुपर्युपरि पुत्रीषट्कं जातं प्रायो दरिद्राणां पुत्र्यो बह्व्यो भवंति ततो नागिलेन विचारितं पुनरपि पुत्री भविष्यति तदा मुखं लात्वा गृहं त्यक्त्वा विदेशे यास्यामि ततः सप्तमापि पुत्री जाता ततः उद्विग्नो गतो विदेशे नागश्रीर्दुःखिता

जाता तस्याः पुत्र्या नामापि न दत्तं ततो लोके नाम्ना ऽस्ता बाल्निर्नामिकेति प्रसिद्धा जाता लोकानां गृहे दासी
कर्म कृत्वा आजीविकां करोति अन्यदा धनवतां व्यवहारिणां बालिकानां हस्ते मोदकान् दत्तान् दृष्ट्वा निर्
नामिका मातुः पार्श्वे मोदकं याचते स्म माता प्राह तव पिता मोदकान् आनेतुं विदेशं गतो ऽस्ति स यदा व
ळयाति तावत् त्वं अंबरतिलकनामपर्वतात् काष्ठानि आनय ततः सा रज्जुमादाय अश्रूणि मुंचंती
गता काष्ठग्रहणार्थं पर्वते तत्र युगंधरमुनेः केवलज्ञानं उत्पन्नमस्ति देवैः तत्र महिमा प्रारब्धो ऽस्ति
सापि तं नमस्कर्तुं गता नत्वा धर्मं विश्रुत्वा गुरुं प्राह मम ईदृशी दुःखावस्था कथं गुरुः प्राह
हे सखे त्वया पूर्वभवे धर्मो न कृतो धर्माद्देव सुखं प्राप्यते ततो धर्मं कुरु ततस्तया सम्यक्त्वं श्रा
वकव्रतं च गृहीतं उपाश्रये स्थिता श्रावकधर्मं करोति लोकाश्च धर्मिलि २ इति वदंति स्म
ततः सा तपांसि तप्त्वा युगंधरगुरोः पार्श्वे अनशनं चकार ततो हे ललितांग त्वं तत्र गत्वा तस्याः स्व
कीयं रूपं दर्शय ततो मंत्रिवचनेन तत्र गत्वा ललितांगेन रूपं दर्शितं तया च तदीयरूपमोहितया
निदानं कृतं मम तपः प्रसादात् ललितांगदेवस्य पत्नी भूयासमिति ततो ऽनामिका मृत्वा स्वयंप्रभा देवी
जाता तया समं ललितांगदेवः सुखं भुंक्ते स्म इति पंचमो भवः ५ ततो ललितांगस्ततश्च्युत्वा जंबूद्वीपे पू
र्वमहाविदेहे पुष्कलावती विजये लोहार्गलपुरे सुवर्णजंघो राजा लक्ष्मी राज्ञी तयोः पुत्रो वज्रजंघ
नामा जातः स्वयंप्रभा देवी च तत्रैव विजये पुंडरीकिण्यां नगर्यां वज्रसेननामचक्रवर्ती तस्य पुत्री
श्रीमती नाम्नी जाता एकदा यौवनावस्थायां चंद्रशालायां स्थिता सती कस्यचित् साधोः केवलज्ञा १३६

नमुत्पन्नमस्ति तद्वंदनार्थं आगच्छतो देवान् दृष्ट्वा जातिस्मरणं प्राप चेतसि विचारितं मम स ललितां
गदेवः कुत्र समुत्पन्नो ऽस्ति तमेव परिणयामि तदा सत्यं ततस्तं अजानंती मौनमाश्रित्य स्थिता अनेके उ
पचाराः कृताः परं न जल्पति ततः एकांते धात्रीमात्रा पृष्टा सती एकं पटं आलिख्य दत्ते स्म पंडिता धात्रीमा
ता वज्रसेनचक्रवर्त्तिनो वर्षग्रंथिमहोत्सवे यत्र अनेके राजकुमाराः समागताः संति तत्र तं पटं ला
त्वा राजमार्गे स्थिता तत्र अनुक्रमेण समागतो वज्रजंघः तं पटं दृष्ट्वा जातिस्मरणज्ञानं प्राप कथय
ति स्म च स्वयंप्रभया मम पूर्वभवस्वसार्थया इदं पटे चरितं लिखितमस्ति पुनः पंडितया अ
भिज्ञानान्यपि अकथयत् ततो धात्रीमात्रा श्रीमत्यै सर्वं स्वरूपं कथितं श्रीमत्या च स्वपित्रे
प्रोक्तं एष मे भर्तापतिः ततो वज्रसेनचक्रवर्त्तिना तं वज्रजंघमाकार्य श्रीमतीपरि
णायिता ततः कियंति दिनानि स्थित्वा श्रीमतीं लात्वा वज्रजंघः स्वकीयनगरे समेतः ततः सु
वर्णजंघो राजापि वज्रजंघं पुत्रं राज्ये स्थापयित्वा स्वयं दीक्षां जग्राह अथ वज्रजंघो राजा श्रीम
त्या सह चिरकालं सुखं भुंजानो रात्रौ सुप्तः सन् एवं चिंतयति प्रभाते पुत्रस्य राज्यं दत्वा अहं दीक्षां
गृहीष्यामि तस्यां रात्रौ राज्यग्रहणाय उत्सुकेन पुत्रेण विषधूमप्रयोगेण मातापितरौ मारितौ इ
ति षष्ठो भवः ६ ततस्तौ मृत्वा उत्तरकुरुक्षेत्रे युगलिनौ जातौ इति सप्तमो भवः ७ ततः सौधर्मदे
वलोके मित्ररूपौ देवौ जातौ इत्यष्टमो भवः ८ ततश्च्युत्वा वज्रजंघो जंबूद्वीपे महाविदेहे क्षेत्रे क्षि
तिप्रतिष्ठितनगरे सुविधिवैद्यस्य आनंदनामा पुत्रो जातः तस्मिन्नेव दिने तत्र नगरे अन्ये चत्वारः पु

७ कल्पल०

त्रा जाताः तद्यथा प्रसन्नचंद्रस्य राज्ञो महीधरः पुत्रो जातः १ सुनासीरनाममंत्रिणः सुबुद्धिना
मा पुत्रो जातः २ धननामश्रेष्टिनो गुणाकरनामा पुत्रो जातः ३ सागरनामसार्थवाहस्य पूर्णभ
द्रः पुत्रो जातः ४ अथ श्रीमतीजीवोपि सौधर्मदेवलोकात् च्युत्वा ईश्वरदत्तनामश्रेष्टिनः केशव
नामा पुत्रो जातः ५ एवं एते पंचापि आनंदस्य आदीश्वरजीवस्य परममित्राणि तेषु अपि सहसो
ज्जिनः सहचारिणः सह रममाणाः सुखेन कालं गमयंति अन्यदा वैद्यपुत्रस्य आनंदस्य गृहे
एकः साधुः समागतः परं कीदृशः कुष्टी कृमि समाकुलकायः ततो राजपुत्रेण प्रोक्तं भो वै
द्य तव औषधज्ञानमस्ति परं कृपा नास्ति यत् ईदृशस्य साधोः चिकित्सां न करोषि ततो वैद्य
पुत्रेण प्रोक्तं एकं तैलं मम अस्ति परं गोशी र्षचंदनं रत्नकंबलं च नास्ति ततस्तैः पंचभि
र्मित्रैः द्रव्यं मेलयित्वा हट्टे गत्वा वृद्धवणिजस्य प्रोक्तं भो वृद्ध लक्षद्रव्यं देहि गोशीर्षचंदनं
रत्नकंबलं च ततो वणिजेन प्रोक्तं किं युष्माकं का र्यमस्ति तैः प्रोक्तं साधुः एकः कोष्टरोगपीडि
तो वर्त्तते तस्य प्रतिकार्यं करिष्यामः ततो वृद्धो वणिजो धन्या एते युवानो येषां ईदृशी धर्म्मवांछा इति प्र
तिबुद्धः सन् गोशीर्षचंदनं १ रत्नकंबलं च २ तेभ्यो धर्मार्थं दत्वा स्वयं दीक्षां लात्वा प्रतिपाल्य च मोक्षं ग
तः ततस्ते षडपि मित्राणि औषधसामग्रीं लात्वा मुनेः अनुज्ञां लात्वा चिकित्सां कर्तुं लग्नाः तद्यथा प्रथमं १३७
तैलेन सर्वस्मिन् अंगे अभ्यंगं चक्रुः तस्य प्रभावेन साधुः अचेतनो जातः कृमयश्च जीवा आकुल
व्याकुलाः संतो बहिर्निर्गताः ततः आनंदवैद्यो रत्नकंबलेन साधुशरीरं आच्छादयति स्म ततः सर्वेपि सु
वेष्टितोमस्ति =

समाधिनवत्
= मांसे =
मयः शीतलत्वात् रत्नकंबले लग्नाः ततस्तान् जीवान् वैद्यो गोकलेवरेऽक्षिपत् ततः साधुमास्य गो
शीर्षचंदनेन देहं लिंपति स्म प्रथमे अभ्यंगे त्वग्गता जीवा निर्गताः द्वितीये अभ्यंगे मांसस्थाः तृतीये अ
भ्यंगे अस्थिस्थाः कृमयो निर्गताः ततः संरोहिण्या औषध्या साधुं सज्जं चकार जातः साधोः समाधिः उ
पार्जितं महापुण्यं षड्भिरपि रत्नकंबलगोशीर्षचंदनयोः विक्रयेण चैत्यं कारितं ततः साधुसमीपे षड्भि
रपि मित्रैः दीक्षा गृहीता चारित्रं प्रतिपाल्य जन्मसफलं च कृतं इति नवमो भवः ९ ततस्ते कालं कृत्वा षड
पि द्वादशो अच्युतदेवलोके देवा जाताः इति दशमो भवः १० ततो देवलोकात् च्युत्वा जंबूद्वीपे महाविदेह
क्षेत्रे पुष्कलावतीविजये पुंडरीकिण्यां नगर्यां तीर्थं करो वज्रसेनो राजा धारिणी राज्ञी तयोः पंच पुत्रा
: जाता तत्र वैद्यजीव आनंदो वज्रनाभनाम चक्रवर्ती जातः १ राजपुत्रो महीधरजीवो
बाहुनामा जातः २ मंत्रिपुत्रः सुबुद्धिजीवः सुबा हुनामा जातः ३ श्रेष्टिपुत्रो गुणाकरजीवः पीठ
नामा जातः ४ सागरसार्थवाहपुत्रः पूर्णभद्रजीवो महा पीठनामा जातः ५ षष्ठः केशवः श्रीमतीजीवः सुय
शो नाम राजपुत्रो जातः ६ स वज्रनाभस्य चक्रवर्त्तिनः सारथिर्जातः अथ वज्रसेनतीर्थंकरो वज्रनाभं पुत्रं
राज्ये स्थापयित्वा लोकांतिकदेवैः प्रतिबोधितः सांवत्सरिकदानं दत्वा दीक्षां जगौ वज्रनाभो राजा जातः
चतुरो भ्रातॄन् लोकपालानिव अकरोत् सुयशोनामानं राजपुत्रं च स्वकीयसारथिं अकरोत् श्रीव
ज्रसेनतीर्थंकरस्य केवलज्ञानं उत्पन्नं तदेव वज्रनाभस्य चक्ररत्नं समुत्पन्नं ततः पूर्वसंगवंतं ततः चक्र
रत्नं च पूजयित्वा सकलां पृथिवीं साधयित्वा स्वनगर्यां समागत्य द्वादशवर्षैः राज्याभिषेकं कारयित्वा

७
कल्प. चक्रवर्त्ती जातः अन्यदा वज्रसेनतीर्थंकरः समवसृतः वज्रनाभो धर्मदेशनां श्रुत्वा चतुर्भिर्भ्रातृभिः सार
थिना च सह स्वपितुस्तीर्थंकरस्य पार्श्वे दीक्षां जग्राह वज्रनाभो द्वादशांगीधरो जातः अपरे एकादशांगधराः
जाताः तत्र बाहुनामा साधुः पंचशतसाधूनां सन्नपानानि आनयति १ सुबाहुनामा सर्वसाधूनां विश्राम
णां करोति २ पीठमहापीठसाधू एकांते स्वाध्यायं कुर्वाते ४ ततो बाहुः १ सुबाहुश्च २ आचार्यालोका
श्च प्रशंसंति धन्यावेतौ वैयावृत्त्यं सुष्ठु कुरुतः ततः पीठमहापीठयोः अप्रीतिर्जाता आवां स्वाध्या
यकारकौ तत्र न कोपि प्रशंसति ततो ज्ञायते वद्ध संकर्म न चर्म ततो वज्रनाभो राजर्षिर्विंशतिस्था
नानि संसेव्य तीर्थंकरनामगोत्रं कर्म बद्धवान् १ बाहुनामा साधुः चक्रवर्त्तिश्रियं २ सुबाहुसाधुर्बा
हुबलं ३ पीठमहापीठसाधू स्त्रीगोत्रं कर्म बद्धवंतौ ५ इत्येकादशो भवः ११ ततस्ते सर्वेपि
मृत्वा सर्वार्थसिद्धिं गताः इति द्वादशो भवः १२ अत्र श्री आवश्यकचूर्णौ तु एवं वो क्रमस्ति॥ आदी
श्वरजीवो वज्रनाभः सर्वार्थसिद्धिं गतः ततः पश्चात् षट्पूर्वलक्षा व्यतीताः ततः पश्चात् बाहु १ सुबा
हु २ पीठ ३ महापीठ ४ प्रमुखाः सर्वार्थसिद्धिं गताः नो चेत्कथं मिलति आदीश्वरस्य षट्पूर्वलक्षा जाताः त
तः पश्चात् बाहु १ सुबाहु प्रमुखा जीवा भरतादयः पुत्रा जाताः अथ श्री आदिनाथस्य पंचकल्याणका
नि कथ्यंते तत्र सूत्रं॥ तेणं कालेणं २ उसभे अरहा कोसलिए जेसे गिह्माणं चउत्थे मासे सत्तमे पक्खे आसा
ढबहुले तस्सणं आसाढबहुलस्स चउत्थीपक्खेणं सव्वट्ठसिद्धाउ महाविमाणाउ तित्तीसंसागरोवमट्ठिइ १३८
आउ अणंतरं चयं चइत्ता इहेव जंबुद्दीवे २ भारहेवासे इक्खागभूमीए नाभिकुलगरस्स मरुदेवी भारिया

ए पुव्वरत्तावरत्तसमयंसि आहारवक्कंतीए जाव गब्भत्ताए वक्कंते व्या० तस्मिन्काले २ अस्या अवसर्पि
ण्याः सुषमदुषमनाम्नि तृतीयारके व्यतिक्रांते चतुरशीतिपूर्वलक्षेषु नवाशीतिपक्षाधिकेषु शेषेषु श्री
ऋषभदेवः अर्हन् पुनः किंविशिष्टः कौशलिकः कोशलायां अयोध्यायां भवः उत्पन्नः यः सः ग्रीष्मस्य
उष्णकालस्य चतुर्थेमासे सप्तमे पक्षे आषाढकृष्णपक्षे तस्यापि चतुर्थीदिने सर्वार्थसिद्धान्महाविमाना
१३० त् यत्र त्रयस्त्रिंशत्सागरोपमाणि स्थितिर्वर्त्तते ततः पश्चात् चयं शरीरं त्यक्त्वा अत्रैव जंबूद्वीपे भरत
क्षेत्रे इक्ष्वाकुभूमौ नाभिकुलकरस्य मरुदेवीभार्यायाः कुक्षौ गर्भत्वेन उत्पन्नः॥ अथ कुलकराः
कदा कथं च उत्पन्नास्तत्स्वरूपं चेदं॥ तृतीयस्य अरस्य पल्योपमस्य अष्टमे भागे शेषे सति द
क्षिणभरतार्द्धमध्यमखंडे त्रिभागे गंगासिंधुनद्योर्मध्ये कुलकराणामुत्पत्तिर्जाता तथाहि
पश्चिममहाविदेहे द्वौ वणिजौ अभूतां तयोर्मध्ये एकः सरलः व्यवहारिणः पुत्रः सागरचंद्र
नामा एकश्च वक्रो मायावी च बाह्यपि दानरुचिनौ तेन मायाविना समं सागरचंद्रस्य परमप्रीतिर
स्ति एकदा सागरचंद्रो मित्रेण समं वसंतक्रीडायां वने गतोऽभूत् तदा कापि अपरव्यवहारिणः कुमारी
चौरैर्गृहीताऽभूत् सा आभरणलोभेन मार्यमाणा सागरचंद्रेण मोचिता तस्मिन् गुणरक्ता जाता प्र
त्यावे परिणीता च परं कामातुरेण मित्रेण एकांते प्रार्थिता परं तया सद्दक्षयित्वापि छद्मः कृतः ततो व
क्रमानो मित्रेण शोककारणं दृष्टं तेन मायाव्या स्वदोषस्तस्यै दत्तस्तेन मित्रभार्ययोर्दोषमवगणय्य
प्रीतिरेव कृता कालेन त्रयो मृता दंपती युगलिको जातौ द्वितीयो यो मायावी अभूत् स हस्ती चतुर्दंतो

७
कल्प०

जातः एकदा हस्ती तं युगलिनं दृष्ट्वा जातिं स्मृत्वा स्वस्य स्कंधे आरोप्य चचाल ततोऽन्यैर्युगलिभिर्विमलं
वाहनं अस्येति विमलवाहनो नाम राजा कृतः अथ कालवशात् कल्पद्रुमाणां हानिर्जाता ततः परस्प
रं कलहे जायमाने विमलवाहनो राजा जातिस्मृतिज्ञानी तिज्ञः कल्पद्रुमान् विभज्य दत्तवान् अपराधि
नां च हइति दंडनीतिं कृतवान् अपराधे कृते ह इति उक्ते अपराधी जानाति मम सर्वस्वं अपहृतमिति त
स्य विमलवाहनस्य चंद्रयशाः प्रिया नवशतधनुःप्रमाणं शरीरं इति प्रथमः कुलकरः १ तस्य विमलवा
हनस्य पुत्रः चक्षुष्मान् चंद्रकांता भार्या अष्टशत धनुःप्रमाणं शरीरं तस्यापि हइति दंडनीतिः इति
द्वितीयः कुलकरः २ तस्य पुत्रो यशस्वी सुरूपा भार्या सप्तशतधनुःप्रमाणं शरीरं स्तोकापराधे
हइति महापराधे च मइति दंडनीतिद्वयं कृ तवान् इति तृतीयः कुलकरः ३ तस्य पुत्रः अ
भिचंद्रः प्रतिरूपा भार्या सार्द्धषट्शतधनुःप्रमाणं शरीरं तस्यापि हकारमकारेति दंडनीतिद्वयं इ
ति चतुर्थः कुलकरः ४ तस्य पुत्रः प्रसेनजित् च क्षुःकांता भार्या षट्शतधनुःप्रमाणं शरीरं हकार
मकार दंडनीति कथनेऽपि न निवर्तंते कलहात् युगलिनस्ततो हमधिक्कार दंडनीतित्रयं इति पंचमः कुल ×कृतवान्×
करः ५ तत्पुत्रो मरुदेवः श्रीकांता भार्या सार्द्धपंचशतधनुःप्रमाणं शरीरं हमधिक्कार दंडनीतित्रयं
इति षष्ठः कुलकरः ६ तस्य पुत्रो नाभिराजा मरुदेवी भार्या सपादपंचशतधनुःप्रमाणं शरीरं हमधि १३७
क्कार दंडनीतित्रयं इति सप्तमः कुलकरः ७ इति सप्तकुलकरस्वरूपं कथितं॥ अथ भगवत ऋषभस्य च्यवनक
ल्याणकमाह॥ च्यवनसमये कीदृशं त्रैकालिकं ज्ञानमासीत्तत्सूत्रं॥ उसभेणं अरहा कोसलिए तिन्नि

णोवगए आवि हुत्था तं० चइस्सामित्ति जाणइ ३ अयं आलापकः सुगमः पूर्वं व्याख्यातश्च ततश्च्यव
नानंतरं किं जातं तत्सूत्रं॥ जाव सुमिणे पासइ गयवसहगाहा सव्वं तहेव नवरं पढमं उसभं मुहे
अइंतं पासइ सेसाउ गयं नाभिकुलगरस्स साहइ सुविणपाढगा नत्थि नाभिकुलगरो सयमेव वा
गरेइ व्या० मरुदेवास्वामिनी त्रिशलावत् चतुर्दशस्वप्नान् ददर्श नवरं प्रथमं वृषभं पश्यति मुखे
प्रविशंतं शेषास्तीर्थंकरमातरः प्रथमं गजं पश्यंति त्रिशला तु सिंहं ततः स्वप्नदर्शनानंतरं मरुदेवी नाभि
राजपार्श्वं गत्वा स्वप्नफलं पप्रच्छ स्वप्नपाठकास्तदा न संति ततो नाभिराजा स्वयमेव उत्तरमासि
आह परं इंद्र आगत्य मरुदेव्या अग्रे स्वप्नानां फलं विस्तरेण स्वप्नपाठकवत्कथयति स्म
देवि चतुर्दशस्वप्नप्रभावात् चतुर्दशरज्जुलोकस्वामी पुत्रो भविष्यति॥ अथ भग
वतो जन्मकल्याणकमाह॥ तत्सूत्रं॥ तेणं कालेणं २ अरहा कोसलिए जे से गिम्हाणं पढमे मासे
पढमे पक्खे चित्तबहुले तस्सणं चित्तबहुलस्स अट्ठमीपक्खेणं नवण्हं मासाणं बहुपडिपुन्नाणं
अद्धट्ठमाण राइंदियाणं जाव आसाढाहिं नक्खत्तेणं जोगमुवागएणं आरुग्गा आरुग्गं दारयं पयाया॥
व्या० तस्मिन् काले २ श्री ऋषभोऽर्हन् कौशलिकः यः सः ग्रीष्मकाले प्रथमे मासे प्रथमे पक्षे चैत्रवदि अष्ट
मीदिने नवमासेषु संपूर्णेषु सार्द्धसप्तदिवसेषु च गतेषु उत्तराषाढ नक्षत्रे चंद्रेण सह योगं वर्त्तमाने जातः
आरोग्या कष्टरहिता आरोग्यं नीरोगं पुत्रं युगलसुमंगलारूपं माता मरुदेवी प्रसूता ततः किं जातं तं चे ×तत्सूत्रं॥×
व जाव देवा देवीओ य वसुहारा वासं वासिंसु सेसं तहेव चारगसोहणमाणुम्माणवद्धण उस्सुक्कमा

७ कल्प॰

इयछिइपदिश्रं ऋश्रवकंसबंसाणिग्रवं॥ तदेवयाव हेवा देव्यश्च आगता वसुधारावर्षणं चक्रुः प
रं बंदिगृहशोधनं १ मानोन्मानवर्द्धनं २ शुल्कमोचनं ३ स्थितिपतिकाकरणं ४ प्रपंच ५ नास्ति तदा
नीतेषां व्यवहाराभावात् अथ नामकरणं प्राह॥ उसभेणं अरहा कोसलिए कासवगुत्तेणं तस्सणं पं
चनामधेज्जा एवमाहिज्जंति तं० उसभेइ वा १ पढमराया इ वा २ पढमभिक्खायरे इ वा ३ पढमजिणे
इ वा ४ पढमतित्थयरे इ वा ५ ऋषभोऽर्हन् कौशलिकः काश्यपगोत्रीयस्तस्य पंचनामानि सार्थका
नि कथ्यंते तथाहि ऋषभ ऊर्वोर्वृषभलांछनत्वा त् १ प्रथमो राजा इंद्रेण राज्ये प्रथमं स्थापितत्वात्
२ प्रथमो भिक्षाचरः प्रथमं भिक्षाभ्रमणं १ याच नां च २ प्राप्तित्वात् ३ प्रथमो जिनश्चतुर्विंशति
तीर्थंकराणां आद्यत्वात् ४ प्रथमस्तीर्थंक रः प्रथमं चतुर्विधसंघरूपतीर्थप्रवर्त्तनात्
५ अथ आहाराधिकारः कथ्यते आहारं च श्री तीर्थंकराणां अंगुष्ठे अतिमनोज्ञं देवाः संचार
यंति ततः आहाराभिलाषे सति तीर्थंकराः सुधार समयं स्वकीयमंगुष्ठं मुखे क्षिपंति परं न स्तन्यपयो
गं कुर्वंति बालभावे अतिक्रांते च अग्निपक्वमाहारमाहारयंति परं श्री ऋषभदेवस्य यावद्दीक्षा न गृ
हीता तावंतं कालं देवैरानीतमाहारमकरोत् अथ भगवतो वंशस्थापनां प्राह॥ किंचिन्न्यूने वर्षे जाते
सति रिक्तहस्तः कथं स्वामिसमीपं गमिष्यामीति विचार्य महतीमिक्षुयष्टिं हस्ते गृहीत्वा इंद्रो नाभि १४७
राजस्य उत्संगे स्थितं श्री ऋषभदेवं नत्वा उपविष्टः स्वामी च तस्यां इक्षुयष्ट्यां दृष्टिं अक्षिपत् ततः इंद्र
:प्राह हे भगवन् तव इक्षौ आकूतः अभिलाषः किं इक्षुं भक्षयिष्यसि ततो भगवान् हस्तं प्रसारयामास ते

न देवेना इंद्रेण इक्ष्वाकुरिति वंशस्थापना कृता पुनर्भगवतः पूर्वजा अपि काश्यपं इक्षुरसं अपिब
न् अथवा काश्यप्यां जातं इति काश्यपं गोत्रं अथ बाल्ये व्यतिक्रांते भगवति कश्चित् युगलिकः पु
त्रपुत्रीरूपं युगलं तालवृक्षस्य अधो मुक्त्वा मोहनगृहे प्रविष्टः तदा प्रबलवातेन कंपिता तालवृ
क्षादेकं महत्फलं पपात तेन पुत्रो मृतः पुत्रिका स्थिता तां पुत्रिकां दिव्यरूपां दृष्ट्वा एषा ऋषभस्य
भार्या भविष्यति इति विचार्य नाभिराजेन अंतःपुरे मुक्ता एवं सुनंदा सुमंगलाभ्यां सहितः तत्र सु
नंदा युगलिनी सुमंगला च स्वस्य भगिनी स्वामी ज्ञा नत्रयसहितः कांतिबुद्धिप्रमुखगुणैः सह वर्द्ध
ते अधिकदा धूलिधूसरमुखं रममाणं श्री ऋषभ पुत्रं माता मरुदेवी गृहीत्वा हृदये आश्लिष्य क्ष
णमेकं आनंदेन मीलितनयना सती इदं प्रा ह हे पुत्र त्वं सुधारसभोजी मम स्तन्यपान
मपि न करोषि त्वं सदेव सौभाग्यगुणेन देवव ध्रुलिलिप्तोसि मम उत्संगेपि नायासि अहं तव
माता केन गुणेन तव प्रसादात् अहं इंद्रादिदेव रनामपि मान्या जाता परं मन्मातुः सर्वस्वजनको
प्युपकारः अथ इंद्रेण आगत्य भगवतो विवाहश्चक्रे सुनंदासुमंगलाकन्ये परिणायिते तत्र वधूक
र्त्तव्यानि विवाहयोग्यानि सर्वाणि देवीभिः सह इंद्राणी अकरोत् अथ वरकर्त्तव्यानि देवैः सह इंद्रो
ऽकरोत् ततो विवाहविधिः प्रवृत्ती बभूव स विधिर्वीवाहचूलातो ज्ञेयो न मया लिख्यते प्रसिद्ध
त्वात्॥ अथ भगवतो विषयसुखं भुंजानस्य षट्पूर्वलक्षाणि अतिक्रांतानि तदा बाहुबली भरतः पी
ठजीवो ब्राह्मी इति सुमंगलायाः मिथुनकं जातं एवं सुबाहुजीवो बाहुबली महापीठजीवः सुंदरी

इतिमिथुनकं सुनंदायाजातं एवं पुनरपि सुमंगलायाः एकोनपंचाशत् ४९ युगलानि पुत्ररूपाणि जा
तानि एवं भगवतः पुत्राणां शतं पुत्री द्वयं च जातं॥ अथ भगवतः राज्यस्थापनामाह तस्मिन् समये क
षायबाहुल्यात् जीवानां हकार १ मकार २ धिक्कार ३ दंडनीति त्रयमपि अतिक्रांतं न कोपि दंडनीतिं मन्य
ते ततो युगलिकैः श्रीऋषभदेवसमीपे आगत्य विज्ञप्तं हे स्वामिन् न्यायं कुरु ततो भगवान् आह ना
देन राज्ञा श्रीनाभिः स्वतस्ते गता नाभिसमीपं नाभिः प्राह भवतां राजा श्रीऋषभो भवतु स न्यायं करि
ष्यति अत्रांतरे इंद्रस्य आसनं कंपितं अवधि ज्ञानेन राज्याभिषेकसमयं ज्ञात्वा इंद्र आगत्य
सिंहासने निवेश्य मुकुटहारकुंडलाद्याभ रणानि परिधाप्य राज्याभिषेकं भगवतः कृत
वान् यौगलिका इंद्रादेशात् पद्मसरोव रे जलानयनार्थं गताः परं इंद्राभिषेकानंत
रं समागताः ततो भगवंतं सिंहासने उपविष्टं दिव्यवस्त्राभरणादिविभूषितं इंद्रादिदेवैः प
रिवृतं दृष्ट्वा कृत्यं विचार्य उत्पन्नविवेकाः पानी यं भगवतः पादयोः परिषिषिंचुः ततः इंद्रेण
प्रोक्तं साधु विनीताः पुरुषाः अत्र जाता स्ततः एषा नगरी विनीता अथ सा कीदृशी इंद्रेण वैश्रमण
पार्श्वात् निर्मापिता तदाह द्वादशयोजनदीर्घा नवयोजनपृथुला अष्टद्वारा महाविषमवप्रा ईशान
कोणे नाभिराजस्य चतुरस्रं सप्तभूमिकं गृहं १ पूर्वस्यां दिशि सप्तभूमिकं भरतगृहं २ आग्नेयकोणे बा १४१
हुबलिगृहं तेषां मध्ये एकविंशतिभूमिकं श्रीऋषभदेवगृहं अष्टोत्तरशतं च श्रीजिनभवनानां पु
नरपि अश्वाः १ हस्तिनः २ गावश्च ३ एते चतुःपदा गृहीताः तेषां संग्रहः कृतः पुनः केपि युगलिनः

अपराधानुसारेण दंडदायका उग्राः स्थापिताः १ केपि गुरुस्थानीयत्वेन भोगाः स्थापिताः २ केपि मि
त्ररूपा मंडलाधिपत्यकरणेन राजन्याः स्थापिताः ३ शेषाः पदातिप्रमुखाः क्षत्रियाः स्थापिताः ४
इति चतुर्वर्गपुरुषव्यवस्था कृता अथवा ब्राह्मण १ क्षत्रिय २ वैश्य ३ शूद्र ४ भेदात् तत्र ब्राह्मणा ब्रह्मचर्ये
ण १ क्षत्रियाः शस्त्रपाणयः २ कृषिकर्मकरा वैश्याः ३ शूद्राः प्रेषणकारकाः ४ पुनर्विनीतानगरीमध्ये च
तुरशीति चतुःपथाः स्थापिता तथाहि सौगंधिक १ गांधिक २ तांबूलिक ३ कांदविक ४ सुवर्णकार ५ म
णिकार ६ नाणावर्त्तक ७ सुखभक्षिकाकारक ८ कणापणिक ९ चर्मकार कांस्यकार मालाका
र घृतापणिक तैलिक सौत्रिक कार्पासिक सांमशालिक काष्ठशालिक रंजक कुंभारक
नापित शूचीपति चित्रकार लेखक गांबि क ग्राष्टकारक बंधारक अंगारक नीली
कारक पत्रकारक प्रमुखाश्चतुःपथाः॥ अ थ श्रीऋषभदेवः कीदृग्भूतः राज्यं भुंजन् किं
कृतवान् तत्र सूत्रं॥ उसभेणं अरहा कोसलि एदक्खे दक्खपइन्ने पडिरूवे आलीणे भद्दए वि
णीए वीसं पुव्वसयसहस्साइं कुमारवासमज्झे वसइ त्ता तेवट्ठिं पुव्वसयसहस्साइं रज्जवासमज्झे व
समाणे लेहाइयाओ गणियप्पहाणाओ सउणरुयपज्जवसाणाओ बावत्तरिं कलाओ चउसट्ठिं म
हिलियागुणे सिप्पसयं च कम्माणं तिन्निवि पयाहियाए उवदिसइ उवदिसित्ता पुत्तसयं रज्जे अ
भिसिंचइ॥ व्या० श्रीऋषभदेवो अर्हन् कौसलिको दक्षो दक्षप्रतिज्ञः प्रतिरूप आलीनो भद्रको वि
नीतश्च जातः ततो विंशति पूर्वलक्षाणि कुमारवासमध्ये वसति उषित्वा च त्रिषष्टि पूर्वलक्षाणि रा

ष्यवासमध्ये वसन् लिप्यादिका गणितप्रधानाः शकुनरुतपर्यवसाना द्वासप्तति कलाः ७२ पुरुष
स्य कलाः पुनश्चतुःषष्टिमहिलागुणाः पुनः कर्म्मणां कृषिवाणिज्यादीनां मध्ये शिल्पशतं कथं घटकार १
लोहकार २ चित्रकार ३ वस्त्रकार ४ नापितानां ५ पंचशिल्पानि संति तानि प्रत्येकं विंशति २० भेदयुक्तानि त
तस्तेषां शतमेव भगवता उपदिष्टं अत एव आचार्यस्य उपदेशं विना यज्ज्ञातं तत्कर्म कथ्यते यच्च आ
चार्यस्य उपदेशेन ज्ञातं तत् शिल्पमुच्यते कर्म्मशिल्पयोरयं विशेषः कर्माणि तु स्वयं प्रवृत्तानि त्रीण्य × यं कर्मण ×
पि एतानि प्रजाहिताय लोकानां उपकाराय उप दिशति पुत्रशतं च राज्ये अभिषिंचति स्थापय
ति पूर्वं युगलिनो यदा कालमाहात्म्यहान्या। कल्पवृक्षा वांछितं न ददति तदा कंदाहाराः
मूलाहाराः पत्राहाराः पुष्पाहाराः फला हाराः अभूवन् ततो अपक्वं धान्यं भुंजते
स्म परं न जीर्यति ततः स्वामी विज्ञप्तः स्वामिना प्रोक्तं हस्ताभ्यां घृष्ट्वा आहारयध्वं तथा कृतेऽ
प्यजरणे निस्तुषतंदुलान् कृत्वा भुंग्ध्वं तथा कृते प्यजरणे हस्ततलपुटे स्वेदयित्वा भुंग्ध्वं तथा कृ
तेऽप्यजरणं तस्मिन् प्रस्तावे वनमध्ये वंशघर्षणात् अग्निः संजातः तं ज्वलंतं दृष्ट्वा अपूर्वमिदं रत्नमिति बु
द्ध्या गृहीतुं लग्नास्ते दह्यमाना भीताः संतः श्रीऋषभदेवसमीपे आगत्य कथयामासुः हे स्वामिन् ए
कं अपूर्वं रत्नं उत्पन्नं वर्त्तते परं महाक्रोधि अस्मासु आगमने ज्वालनाय धावति भगवता ज्ञातं अग्नि
रुत्थितः ततो भगवता प्रोक्तं पार्श्वस्थानि तृणलतादीनि छेदयित्वा अग्निरत्नं गृह्णीत ततस्तस्मिन् धा १४२
न्यपाकं कुरुत ततस्ते मनुष्यास्तथा कृत्वा अग्नौ धान्यं प्रक्षिपंति स्म ततो धान्यं दग्धं ततस्ते रागत्य स्वा

मी विज्ञप्तो हे स्वामिन् अयमस्माकमपि क्षुधातुरः सर्वं धान्यं भक्षितं न किमपि पश्चाद्दत्ते ततः प्रभुणा प्रो
क्तं यदा अहं हस्तिस्कंधारूढो निस्सरामि तदा भवद्भिः मृत्पिंडमानीय देयः ते तथा कृते भगवता ह
स्तिकुंभस्थलोपरि मृत्पिंडं स्थापयित्वा नानाप्रकाराणि हांडीकुंडीप्रमुखाणि भाजनानि कृत्वा दत्तानि अ
थ ईदृशानि कृत्वा अग्नौ पाचयित्वा पानीयं धान्यं च मध्ये प्रक्षिप्य अग्नेरुपरि स्थापयित्वा पाकः कर्त्तव्यः त
था कृते पचनारंभप्रवृत्तिर्जाता इति युगलिनामाहारविधिः॥ अत्र लिपिर्भगवता ब्राह्म्या दक्षिणहस्ते
न दर्शिता सा लिपिरष्टादशधा तथाहि हंसलि पि १ भूतलिपि २ यक्षलिपि ३ राक्षसलि· ४ उड्डी
लि· ५ यावनीलि· ६ तुरकीलि· ७ कीरीलि· ८ द्रा विडीलि· ९ मालवीलि· १० सैंधवीलि· ११ नाडी
लि· १२ नागरीलि· १३ लाटीलि· १४ पारसीलि पि १५ अनिमित्तिलि· १६ चाणक्यीलि· १७ मू
लदेवी १८ इति॥ अथवा देशादिविशेषादन्य थापि॥ लाटी १ चोटी २ डाहली ३ कान्नडी ४ गू
जरी ५ सोरठी ६ मरहठी ७ कोंकणी ८ खुरासाणी ९ ससी १० सिंहली ११ हाडी १२ कीरी १३ हम्मीरी १४
परतीरी १५ मागधी १६ मालवी १७ महायोधी १८ तथा गणितं भगवता सुंदर्या वामहस्तेन दर्शितं पुन
र्भरतस्य रूपकर्म दर्शितं पुनर्बाहुबलेः पुरुषादिलक्षणानि दर्शितानि तत्र नंदिसूत्रे उक्ताः ७२ पुरु
षकला इमाः॥ लिखन १ पठन २ गणन ३ गीत ४ नृत्य ५ ताल ६ पटह ७ मुरज ८ वीणा ९ वंस १० भेरी १
१ एतेषां वादनकला हस्ति १२ तुरगशिक्षा १३ धातुर्वाद १४ दृग्वाद १५ मंत्रवाद १६ बलिपलितविना
स १७ रत्नलक्षण १८ नारीलक्षण १९ नरलक्षण २० छंदोबंध २१ तर्कवाद २२ सुनीतिपालन २३ त

७
कल्प०

त्थविचार२४ काव्यकरण२५ ज्योतिर्विचार२६ श्रुति२७ वैद्यक२८ षड्भाषा२९ योग३० रसायनांज
न३१ लिपि३२ स्वप्न३३ इंद्रजाल३४ कृषि३५ वाणिज्य३६ नृपसेवा३७ शकुन३८ वायुस्तंभन३९ अ
ग्निस्तंभन४० मेघवृष्टि४१ लेपन४२ मर्दन४३ ऊर्द्धगमन४४ घटबंध४५ घटभ्रमण४६ पत्रछेदन४७ म
र्मभेदन४८ कलाकृष्टि४९ अंबुवृष्टि५० लोकाचार५१ जनानुवृत्ति५२ फलसरण५३ खड्गधरण५४
क्षुरीबंधन५५ मुद्रा५६ लोहघटन५७ दंतसमारण५८ काष्ठछेदन५९ चित्रकरण६० बाहुयुद्ध६१ दृ
ष्टियुद्ध६२ मुष्टियुद्ध६३ दंडयुद्ध६४ खड्गयुद्ध६५ वाग्युद्ध६६ गरुडदमन६७ सर्पदमन६८ भूत
दमन६९ योगध्यान७० अक्षरज्ञान७१ नामावली ७२ इति पुरुषाणां७२ कलाः स्त्रीणामपि द्वे
कलायथा॥ नृत्य१ औचित्य२ चित्र३ वादित्र४ मंत्र५ तंत्र६ ज्ञान७ विज्ञान८ दंभ९ जलस्तंभ
१० गीतगान११ तालमान१२ मेघवृष्टि१३ फलाकृष्टि १४ आरामरोपण१५ आकारगोपन१६ धर्मविचा
र१७ शकुनविचार१८ क्रियाकल्प१९ संस्कृतजल्प २० प्रसादनीति२१ धर्मनीति२२ वर्णिकावृद्धि२३ सु
वर्णसिद्धि२४ सुरभितैलकरण२५ लीलासंचरण२६ गजतुरगपरीक्षा२७ पुरुषस्त्रीलक्षण२८ सुवर्णर
त्नभेद२९ अष्टादशलिपिपरिच्छेद३० तत्कालबुद्धि३१ वास्तुसिद्धि३२ वैद्यकक्रिया३३ कामक्रिया३४
घटभ्रम३५ सारिपरिश्रम३६ अंजनयोग३७ चूर्णयोग३८ हस्तलाघव३९ वचनपाटव४० भोज्यविधि४ १४३
१ वाणिज्यविधि४२ मुखमंडन४३ शालिखंडन४४ कथाकथन४५ पुष्पग्रथन४६ वक्रोक्ति४७ काव्यश
क्ति४८ स्फारवेष४९ सकलभाषाविशेष५० अभिधानज्ञान५१ आभरणपरिधान५२ नृत्योपचार५३ गृहा

ग्र=

चार५४ काव्यकरण५५ परनिराकरण५६ धान्यरंधण५७ केशबंधन५८ वीणानिनाद५९ वितंडावा
द६० अंकविचार६१ लोकव्यवहार६२ अंताक्षरिका६३ प्रश्नप्रहेलिका६४ इति६४ कलाः स्त्रीणां॥
श्रीऋषभदेवस्य पुत्रशतनामानि यथा॥ श्रीभरत१ श्रीबाहुबलि२ श्रीमस्तक३ श्रीशृंगारक४ म
ल्लिदेव५ अंगज्योतिः६ मलयदेव७ भार्गवनाथ८ अंगदेव९ वसुदेव१० मगधनाथ११ मानवर्त्तिक
१२ मानयुक्त१३ विदर्भदेव१४ वनवासनाथ१५ महीपक१६ धर्मराष्ट्र१७ नायकदेव१८ आशमक१९ दं
डक२० कलिंग२१ ईषिकदेव२२ पुरुषदेव२३ अ कल२४ भोगवर्द्धक२५ वीर्यभोग२६ गणनाथ२७
तीर्थनाथ२८ अर्बुदपति२९ आयुर्वीर्य३० व त्नीवसु३१ नायकसूत्र३२ काक्षिक३३ आन
र्त्त३४ सारिक३५ गद्देष३६ रूपदेव३७ क च्छनाथ३८ सुराष्ट्र३९ नर्मद४० सारस्वत४
१ तापसदेव४२ कुरु४३ जंगल४४ पांचाल४५ सूरसेन४६ पुटपुर४७ कालिंगदेव४८ कासीकु
मार४९ कौशल्य५० भद्रकाश५१ विकाशक५२ त्रिगर्त्त५३ आवर्ष५४ सालुप्य५५ मत्स्यदेव५६ कु
लीयक५७ मूषकदेव५८ वाल्हीक५९ कांबोज६० मधुनाथ६१ सांडक६२ आत्रेय६३ यवन६४ आ
भीर६५ वानदेव६६ वानस६७ कैकेय६८ सिंधु६९ सौवीर७१ गांधार७२ काष्टदेव७३ तोषक७४ शौ
रक७५ भारवाज७६ शूरदेव७७ प्रस्थाल७८ कर्णक७९ त्रिपुर८० अवंतीनाथ८१ देवपति८२ किष्किं
धि८३ नैषध८४ दशार्ण८५ कुसुमवर्ण८६ भोपालदेव८७ पालनाथ८८ कुशल८९ पद्म९० विनि
द्राय९१ वैकेश९२ वैदेह९३ कच्छपति९४ भद्रदेव९५ वज्रनाथ९६ सांद्रभद्र९७ सेनज९८ वत्स

७
॥कल्पल·

नाथ ९९ अंगदेव १०० इति श्रीआदिनाथपुत्रशतं ॥ तत्र भगवता अयोध्याया राज्यं ज्येष्ठपुत्राय श्रीभरताय दत्तं तक्षशिलाराज्यं श्रीबाहुबलये दत्तं अन्येषां च पुत्राणां अंगवंगादिदेशानां राज्यानि दत्तानि अथ भगवतः दीक्षाकल्याणकमाह ॥ तत्र सूत्रं ॥ पुणरवि लोयंतिएहिं जीयकप्पिएहिं सेसं तं चेव सव्वं भाणियव्वं जाव दाणं दाइयाणं परिभाइत्ता जे से गिम्हाणं पढमे मासे पढमे पक्खे चित्तबहुले तस्स णं चित्तबहुलस्स अट्ठमीपक्खे णं दिवसस्स पच्छिमे भाए सुदंसणाए सिबियाए सदेवमणुयासुराए परिसाए समणुगम्ममाणमग्गे जाव विणीयं रायहाणिं मज्झंमज्झेणं निगच्छइत्ता जेणेव सिद्धत्थवणे उज्जाणे जेणेव असोगवरपायवे तेणेव उवागच्छइ २ असोगवरपायवस्स अहे जाव चउमुट्ठियं लोयं करेइ लोयं करेइत्ता छट्ठेणं भत्तेणं अपाणएणं आसाढानक्खत्तेणं जोगमुवागएणं उग्गाणं १ भोगाणं २ राइन्नाणं ३ खत्तियाणं ४ चउहिं सहस्सेहिं सद्धिं एगं देवदूसमादाय मुंडे भवित्ता अगाराओ अणगारियं पव्वइए ॥२०५॥ अथ पुनरपि श्रीऋषभदेवो लोकांतिकदेवैः प्रतिबोधितः सांवत्सरिकदानं दत्वा ग्रीष्मकाले प्रथमे मासे प्रथमे पक्षे एतावता चैत्रवदि अष्टमीदिने दिवसस्य पश्चिमे भागे सुदर्शनानाम शिबिकामारूढो देवैर्मनुजैरसुरैः समनुगम्यमानमार्गः विनीतां राजधानीं मध्यभागेन निर्गच्छति निर्गत्य यत्रैव सिद्धार्थनाम उद्यानं यत्र अशोकवरपादपस्तत्रागच्छति आगत्य च अशोकवरपादपस्य अधस्तात् चतुर्मुष्टिकं लोचं करोति एकाद्विमुष्टिः इन्द्रस्य आग्रहेण रक्षितवान् यतः स्कंधस्था एका केशमुष्टिर्वायुना अंदोलिता सती स्वर्णकलशोपरि १४४

नीलोत्पलपिधान सदृशी शोभते स्म तथा षष्ठेन तपसा अपानकेन उत्तराषाढनक्षत्रे चंद्रेण सह योगं वर्तमाने उग्राणां १ भोगानां २ राजन्यानां ३ क्षत्रियाणां च ४ चतुर्भिः पुरुषसहस्रैः स्वयं कृतलोचैर्यथा भगवान् करिष्यति तथा वयमपि करिष्यामः इति ज्ञानक्षिस्रैः सार्धं एकं देवदूष्य वस्त्रमादाय मुंडो भूत्वा अगारात् अनगारितां साधुतां प्रव्रजितः तदैव च भगवतश्चतुर्थं मनःपर्यायज्ञानं समुत्पन्नं ॥ अथ श्रीऋषभदेवो वृषभगतिः सन् घोरं अभिग्रहं कृत्वा त्यक्तदेहः परिभ्रमति स्म तदा भिक्षां न कोपि जानाति न कोपि ददाति के कीदृशा भिक्षा च राः कीदृशी च भिक्षा ततश्चत्वारोपि सहस्राः उग्रादयः क्षुधापरीषहपीडिताः गंगानदीदक्षिणकूले वनमध्ये तापसा जाताः परं कीदृशाः स्वयंपतितपत्रपुष्पफलाहारिणः वल्कलचीरधारिणः श्रीऋषभदेवमेव ध्यायिनः अथ भगवता यदा दीक्षा गृहीता देशाः पुत्राणां च दत्तास्तदा कच्छमहाकच्छसुतौ नमिविनमी पुत्रवत्पालितौ पार्श्वे न अभूतां पश्चादागतौ राज्यार्थिनौ व्रतस्थमपि भगवंतं सेवितवंतौ तदा धरणेंद्रो भगवंतं नमस्कर्तुं समागतः तदा नमिविनमी प्रभोः पादयोः अग्रे जलच्छटकं दत्वा पुष्पप्रकरं अग्रे मुक्त्वा विज्ञप्तिं चक्रतुः हे स्वामिन् राज्यं देहि तदा धरणेंद्रः प्राह प्रभुस्तु कृतराज्यसंगो देयं किमपि नास्ति युवां भरतं याचेथां ताभ्यां प्रोक्तं यथा भरतः सुत स्तथा आवामपि जिनकाङल्पितौ सुतौ तस्मात्त्वं न आश्रयावहे ततः स्वामिभक्तिसंतुष्टो धरणेंद्रः अष्टचत्वारिंशत्सहस्रविद्याः पाठसिद्धा अदात् ततो गौरी गांधारी प्रज्ञप्ति रोहिणी देवताधिष्ठितमहाविद्याबलेन स्वजनान् उपलोभ्य सर्वान् वि का४

१
कल्पल.

द्याधरान् कृत्वा वैताढ्यपर्वतस्य दक्षिणोत्तरश्रेण्योः पंचाशत् रथनूपुरचक्रवालादिनगराणि षष्टिश्च
गगनवल्लभादिनगराणि अनुक्रमेण स्थापयित्वा राज्यं कुर्वते स्म अथ च धरणेंद्रोपि इष्टं विद्याधरा
णां शिक्षां दत्वा स्वस्थानं गतः का शिक्षा इत्याह रे विद्याधरा यो जिनानां १ जिनचैत्यानां २ चरमशरीरि
णां ३ प्रतिमाप्रतिपन्नानां साधूनां वाधपरास्सन् लंघनं वा करिष्यति परस्त्रियं अवांछंती बलाद्यो रमयि
ष्यति तस्य विद्या निःफला भविष्यति इति रत्नभित्तौ प्रशस्तिम् अलिलिखत् ततः स्वामिसेवाफलं भरताग्र
कथयित्वा स्वजनमादाय दक्षिणश्रेणौ नमिः रा ज्यं कुरुते स्म उत्तरश्रेणौ च विनमिः राज्यं कुरुते
स्म इति नमिविनमिसंबंधः॥ एकदा स्वामी ब हलीदेशे तक्षशिलानगर्यां आगतः स तत्र संध्या
यां उद्याने कायोत्सर्गेण स्थितः तत उद्या नपालकेन बाहुबलेः प्रभोरागमनं कथितं
तस्मै पारितोषिकं दानं दत्वा बाहुबलिर्विचारि तवान् सांप्रतं त्रीणि लक्षाणि पुत्राः स्नेहेव प्र
पौत्रादयः परिवारो मिलितो नास्ति ततः प्रभाते म हत्याविच्छित्त्या वंदनाय गमिष्यामि इति न गतः त
तः प्रभाते सर्वपरिवारं मेलयित्वा नगरीशोभां कृत्वा महाऋद्ध्या गतो भगवद्वंदनार्थं परं भगवान् वायु
रिव अप्रतिबद्धविहारत्वात् संध्यायामेव क्षणं स्थित्वा विहृत्य गतो दूरदेशे ततो बाहुबलिस्तत्र भग
वंतं अदृष्ट्वा महाखेदं चकार कर्णयोरंगुलिं क्षिप्त्वा उच्चैः रुरोद संप्रदायादेवं श्रूयते तत्र बाबा आदि
म इति वदंतो बागिंद्दति ततो बागप्रवृत्तिः ततो बाहुबलिः स्वामिस्थाने यत्र स्वामी कायोत्सर्गे स्थि
तः तत्र स्थाने धर्मचक्रं नाम अष्टयोजनविस्तीर्णं एकयोजनोच्चं सहस्रारं रत्नमयं पीठं चकार तदु १४५

परि भगवतः पादुके स्थापयित्वा अयं भगवानेव इति बुद्ध्यानन नाम लोका अपि सर्वे तथैव महिमां
चक्रुः इति तक्षशिलानगर्यां बाहुबलिसंबंधः॥ अथ भगवतः कियता कालेन कस्मिन्नगरे के
न पारणं दत्तं तत्स्वरूपं कथ्यते॥ तथाहि अथ भगवान् वर्षं यावत् आहारं विना स्थितः परं मेरु
वत् अप्रकंपो ऽदीनमनाः एकदा विचरन् गजपुरे नगरे समागतः तत्र गजपुरस्वामी बाहुब
लिपुत्रः सोमप्रभो राज्यं करोति तस्य पुत्रः श्रेयांसो युवराजा वर्तते तस्यां रात्रौ श्रेयांसः स्वप्ने
मेरुपर्वतं श्यामं जातं संतं अमृतकुंभैर्धौतिं च अधिकं शोभमानं ददर्श १ सोमप्रभो राजा एकः सुभ
टो वैरिभिराक्रांतः सन् श्रेयांससाहाय्यात् जयं लब्धवान् इति स्वप्नं ददर्श २ सुबुद्धिश्रेष्ठी सू
र्यस्य किरणान् पततः श्रेयांसस्तान् सूर्य मंडले स्थापयामास इति स्वप्नं ददर्श ३ रा
जा प्रभाते आस्थाने आगत्य स्थितः स्वप्नविच ारे क्रियमाणे सर्वैः प्रोक्तं अद्य कोपि श्रेयांस
कुमारस्य महान् लाभो भविष्यति तस्मिन् समये श्री ऋषभदेवः प्रतिगृहं गोचरीं परिभ्रमति लो
काः केचित् कन्यां ददति केपि प्रधानवस्त्राणि केपि मणिमाणिक्यरत्नप्रवालादीनि प्रयच्छंति परं भ
गवान् न गृह्णाति ततः कोलाहलो जातः तस्मिन् प्रस्तावे श्रेयांसकुमारो गवाक्षे स्थितः पितामहं श्री
ऋषभदेवं दृष्ट्वा जातिस्मरणं प्राप पूर्वभवसंबंधं ददर्श स्वामी ललितांगः तदा अहं स्वयंप्रभादे
वी १ स्वामी वज्रजंघो राजा तदा अहं श्रीमती भार्या २ ततः उत्तरकुरुक्षेत्रे स्वामी युगलिकोऽहं यु
गलिनी ३ सौधर्मदेवलोके मित्ररूपो देवो ४ स्वामी वैद्यपुत्रः तदा अहं श्रेष्ठिपुत्रः केशवनामा मि

त्रः ५ स्वामी अच्युतदेवलोके देवोऽहमिन्द्रदेवः ६ स्वामी वज्रनाभो राजा अहं सारथिः ७ स्वामी सर्वार्थसिद्धि
विमाने देवोऽहमपि तत्रैव देवः ८ स्वामी ऋषभदेवतीर्थंकरः अहं श्रेयांसनामा भगवतः प्रपौत्रः ९ इति न
वभवसंबंधो मम भगवता सह ततो गवाक्षादुत्तीर्य प्रदक्षिणात्रयं दत्वा विधिना अभिवंद्य स्वगेहांगणे
आनीय स्वप्राभृते आगतानां इक्षुघटानां शतेन सभृद्धेन वा निमंत्रयति स्म हे भगवन् गृहाण इमं ४२
दोषरहितं शुद्धं इक्षुरसं निस्तारय मां इत्युक्ते स्वामी मौनेन स्थितः युगंधरीखलगास्ने वाद्यमानानां हृ
ष्टाणां मुखानि वादश्रवहूरान् भिक्षुकया वहानि इति श्रुत्वा सर्वोपार्जितं अंतरायकर्म त्रुटितं परं अ
त्रांतरे दक्षिणहस्तः श्रेयांसप्रतिगजहस्तेरेणव त्राषे अहो श्रेयांस शृणु अहं श्रीऋषभदेवस्य
आजन्मतः सेवको मया श्रीऋषभदेवस्य प्र सादेन महांति उत्तमकर्तव्यानि कृतानि तेना
हं महतीं प्रतिष्ठां प्राप्तः कर्तव्यानि शृणु इंद्रादिदे वानां प्रत्यक्षं स्वामिनो गृहे न सुधापानं कारितं १
पुनर्वंशस्थापनायां इंद्रहस्तादिक्षुयष्टिं गृहीत्वा मया स्वामिनो वांछा पूरिता २ पुनर्मया भरत
स्य तिलकं कृत्वा विनीतायाः राज्यं दत्तं षट्खंडभोक्ता कृतः एवं बाहुबलिने तक्षशिलानगरी राज्यं दत्तं
शेषाः ९८ नवतिपुत्राणामपि राज्यर्द्धिर्दत्ता ३ पुनः सुनंदा सुमंगला कन्याद्वयं मयैव गृहीत्वा स्वामिनोद
त्तं ४ पुनर्वर्षियावत् स्वेप्सितं दानं दत्वा जगत्त्रयं सुलभमनोवांछितं कृतं ५ पुनरहं छत्रचामरखड्गगदाख
ड्गधनुरंकुशवज्रांकुशादिशस्त्रलक्षणैर्विराजमानः ६ पुनरहं तीर्थयात्राप्रत्यासिर्तागपसोसागप्
राज्ञः कीर्त्तिस्तंभवत्करे रवाधरः ७ पुनश्चौक्षप्रेक्षादिकर्मणि व्यापारवान् पुनर्दाने भोजने देवपूजाया १४६

परमेश्वरस्मरणे प्रतिबंधे अविश्वासे जाते बालदाने सर्वत्रापि सत्कर्माणि ममैव अधिकारः
कथमीदृशोऽहं स्वल्परसस्य अधोभवामि पुनः अशीतिपूर्वलक्षाणि भगवता राज्यसाम्राज्यं पालितं
तस्य भगवतो मया अग्रे भूत्वा कथं याचना कार्यते तस्मादेव कारणान्मया खाद्यनाटकनेपथ्यके
लिलीलां विना मौनी सन् भगवान् ऋषभदेवो ज्ञामितः ततो नाहं रसं स्वीकरोमि इत्युक्ते दक्षिणह
स्तेन वामो हस्तः प्राह रे निर्लज्ज मा मुधा आत्मा प्रशंसां ससि परैः प्रशंसितो निर्गुणोपि गुणवान् भ
वति स्वयं प्रोक्तगुणस्तु सगुणोपि लघुतां याति गुणिनां गुणास्तु स्वयं प्रकटीभवंति कर्पू
ररत्नमण्यादीनामिव एकत्र वसतो र्द्वयोरेकेऽपरस्याग्रे गुणवर्णनं करोति तन्न युक्तं मा
तुरग्रे मातुलस्य वर्णनं यथा अहो श्रेयंऽस श्रीऋषभदेवप्रपौत्र ममापि कर्तव्यानि
शृणु जिनेन यत् स्वीकृतं कन्याद्वयं तस्य मया स्थानं दत्तं स्त्रीणां वामांगत्वात् १ संग्रामे
खेटकमग्रे धृत्वा स्वामिनमहं रक्षामि खड्गमुत्पा द्यद्दक्षिणपाणिः पश्चाद्याति २ धनुरग्रे धृत्वा अ
हं तिष्ठामि अयं तीरं लात्वा कर्णोपविंशतिपिशुनवत् अंकानां गणने व्यवहारो मयि ग्रामचलने
खरोऽपि महिषिशि आगत्य ब्रवीति तदा सिद्धिदाता स्यात् ४ एवं देव्यपि ५ एवं प्रथमप्रयाणे प्रथमयामे
रात्रौ शृगालो अपि महिषिशि स्थाप्य सिद्धिदाः ६ रोगादौ विशेषतो वामपार्श्वशयनं समाधिदायकं
७ वामे सोमचंद्रनाडी रूपे वहमाने कृतं शुभकारि स्यात् ८ पुनः शृणु अनेन परिणयनावसरे कन्या
द्वयहस्तो गृहीतस्तदा नाहं मा कारितः ९ कंसारोपि एकाकिना एव सहितो न ज्ञातं मम सहचरोप्य

७
कल्प०

स्ति परमयं उदरंभरिः १० पुनर्लोजनांते दक्षिणा याचकः ११ पुनर्मिष्टान्नपाने सोऽजनेमम पार्श्वान्मक्षि
का उत्थापयति नाहं सुदाक्षिण्यत्वान्नातिकथयामि १२ पुनरेतस्य चातुर्यगुणोपि नास्ति यतोयं मस्तके
मुकुटं यथातथा वेष्टयति परं रचनया सुंदरसंस्थानमहं करोमि १३ पुनरयं चौर्यकारी १४ द्यूतकारी १५
कियत्कथ्यते आवयोस्तावत्स्वरूपं सर्वज्ञ वेत्ति इत्थं आवयोर्विवादं कुर्वतोर्वर्षमेकं गतं ततो
भगवान्वार्षिकतपःकारी जातः कुटुंबविरोधे दिने श्रेयान् कथंचिद्विरोधे जाते आत्मीया एव आ
त्मीयान्प्रतिबोधयंति पुनरपि भगवतः केवलज्ञानोत्पत्तौ तीर्थप्रवर्त्तने संघस्थापनायां निर्वाणेव
भवत एव कार्यं महतां च स्वकीयं कार्यं परार्थमेव यतो मातृभिः पीतं दुग्धादि बालकायस्या
त् तस्माद्विरोधं टालय इत्युक्त्वा विरतेवाम इत्थं श्रेयांसः प्राह सोहमसौ युवां द्वावपि स्व
स्वकार्ये सत्यौ परमिमां मम प्रार्थनां सफलां कुरु तं एकत्र मिलितं यथा वर्षं क्षुधितस्य भगवतः पा
२ रणं स्यात् मम च उत्तमदानेन संसारसमुद्रोत्तारणं स्यात् ततः श्रेयांसात्यर्थनया द्वावपि हृष्टौ बेम्ना
कारौ मिलितौ श्रेयांसेन शुद्धभावेन इक्षुरसो विहरापितः तच्छिखा च ऊर्ध्वं निस्ससार परं बिंदुमात्रं
नाधःपपात एतत्किं यत् भगवतो लब्धापाणिपात्रे घटसहस्रं माति समुद्रा वा सर्वे मांति भगवता च तत्रैव
स्थेन पारणं कृतं पंचदिव्यानि प्रकटितानि गंधोदकपुष्पवृष्टिः १ वसुधारावृष्टिः २ चेलोत्क्षेपः ३ दे
वदुंदुभिः ४ अहोदानमहोदानमिति उद्घोषः ५ तद्दिनमपि वैशाखसुदितृतीयारूपं पर्वत्वेन मोनुं जातं १४७
पारणस्थाने रत्नपीठं कारितं कोपि प्राह श्रेयआदिमार्गितिं स्यात्तदा एवं भगवत ऋषभदेवस्य इक्षुसुपात्रे र

इक्षुरससमः शुद्ध आहारः २ श्रेयांससमो भावश्च ३ इति भगवतः पारणाधिकारः॥ अथ स्वामिदीक्षानंत
रं मरुदेवा स्वामिनी पुत्रस्नेहेन चिंतयति हे पुत्र त्वं मां म्लानपुष्पमालामिव १ जीर्णवस्त्रखंडमिव २ व
स्त्रलग्नरजोवत् ३ त्यक्त्वा वने भ्रमसि अहं शृणोमि त्वं क्षुधातुरं परं अहं दुर्मरा न म्रिये १ हे सख्यो म
म पुत्रस्य सुंदरीहस्तकंकणझणत्कारः पूर्वमासीत् सांप्रतं तु मशकश्रेणिझणत्कारः श्रूयते १ पुन
र्मत्पुत्रस्य पूर्वं छत्रं ध्रियमाणमासीत् अधुना तु सूर्यमंडलं अत्यंतमुष्णं मस्तके तपति २ पुनः पूर्वं ह
स्तिघोटकसुखासनयानचारी आसीत् इदानीं अनुपानत्कः सन्नेकाकी भ्रमति ३ पुनः पूर्वं सु
कुमालशय्याशायी अभूत् सांप्रतं तु कठिन पृथिव्यां तिष्ठति कायोत्सर्गं च करोति भरता
दयश्च सर्वेपि पृथिवीं पालयंति परं मम पुत्रस्य न कोपि वार्त्तामात्रमपि पृच्छति इति
दुःखकरणेन मरुदेवी अंधा जाता तस्मिन्समये भगवतः केवलज्ञानं उत्पन्नं तत्र सूत्रं॥
उसभेणं अरहा कोसलिए एगं वाससहस्सं निच्चं वोसट्ठकाए चियत्तदेहे जे केइ उवसग्गा उप्प
ज्जंति जाव अप्पाणं भावेमाणस्स एगं वाससहस्सं विइक्कंतं तओणं जे से हेमंताणं चउत्थे मासे स
त्तमे पक्खे फग्गुणबहुले तस्स णं फग्गुणबहुलस्स एगारसीपक्खेणं पुव्वण्हकालसमयंसि पु
रिमतालस्स नगरस्स बहिया सगडमुहंसि उज्जाणंसि निग्गोहवरपायवस्स अहे अट्ठमेणं भ
त्तेणं अपाणएणं आसाढाहिं नक्खत्तेणं जोगमुवागएणं झाणंतरियाए वट्टमाणस्स अणंते जा
व जाणमाणे पासमाणे विहरइ व्या० ऋषभदेवोऽर्हन् कौशलिकः एकं वाससहस्रं नित्यं सु

कल्प॰ व्युत्सृष्टकायः त्यक्तदेहः सन् ये केचन उपसर्गा उत्पद्यंते यावत् आत्मानं भावयतः एकं वर्षस
हस्रं व्यतीतं ततो हेमंतस्य चतुर्थे मासे सप्तमे पक्षे एतावता फाल्गुनवद्येकादशीदिने पूर्वाह्णका
लसमये पुरिमतालनामनगरस्य बहिः शकटमुखे उद्याने वटवृक्षस्य अधः अष्टमेन भक्तेन अ
पानकेन उत्तराषाढनक्षत्रे चंद्रेण समं योगं वर्त्तमाने ध्यानांतरे वर्त्तमानस्य भगवतः केवलज्ञानमुत्प
न्नं तेन सर्वं जानन् पश्यन् विहरति तस्मिन्नेव दिने भरतस्य राज्ञः आयुधशालायां चक्ररत्नोत्पत्ति
र्जाता ततो भरतः केवलज्ञानोत्पत्तिचक्रोत्पत्त्योः समकालं वर्द्धितः क्षणं भरतेन मोहात् वि
चारितं पूर्वं चक्रपूजां करोमि किं वा तातपूजां ततो मोहं परित्यज्य सम्यक् विचारितं श्री
ताते पूजिते सति चक्रमपि पूजितमेव चक्रपूजा इहलौकिकी तातपूजा तु पार
लौकिकी ततोऽधिका ततो भरतः पुत्रनिमित्तं दुःखं कुर्वंती मरुदेवी हस्तिस्कंधे संस्थाप्य
भगवंतं नंतुं चलितः मार्गे दिवडंडसिं श्रुत्वा मरुदेवी प्राह भरतस्य एतानि वादित्राणि भरतेन
प्रोक्तं तव पुत्रस्य ततः पुत्रसमृद्धिदर्शनार्थं उत्सुकतया उन्मीलिते नेत्रे गतं अंधपटलं दृष्टं सम
वसरणं साम्राज्यं देवैः कृतं ततः खेदं चकार अहो पुत्रेण ईदृशी ऋद्धिः प्राप्ता न कदापि मम कुशलसंदे
शसमाचारो दत्तो न कदापि पुत्रेण अहं स्मृता अहं तु पुत्रदुःखेन अंधा जाता अहो मम सरागता। २५८
अहो पुत्रस्य नीरागता न मे कोपि नाहं कस्यापि इति अनित्यभावनया मोहकर्म क्षपयित्वा मरुदे
वी केवलज्ञानं प्राप्य सिद्धा अत्र द्वयोर्मातृपुत्रयोः श्लाघ्यता जाता तथाहि श्रीऋषभदेव समः पुत्र

त्रो न भूतो न भविष्यति येन वर्षसहस्रं पुत्रं अनुगमता क्षुधादिपरीषहदुःखं सहता यत्केवलरत्नं
प्राप्तं तन्निजमातुरानीय दत्तं अथवा मातापि ईदृशी न भूता न भविष्यति यतो यया निजपुत्रार्थं मु
क्तिकन्याशिवमंदिरे स्थितां पुत्रात्पूर्वं निरीक्षितुं गता ततो देवैः केवलमहिमा कृता ततः शरीरं क्षी
रसमुद्रे प्रवाहितं भरतश्चक्रवर्ती समवसरणे गत्वा प्रभुं नत्वा उपविष्टः भगवता च देशना दत्ता
तत्र भरतस्य मरीचिप्रमुखाः पंचशतपुत्राः सप्तशतपौत्राः प्रव्रजिताः दीक्षां जगृहुः तेषां मध्यात्
पुंडरीकादय चतुरशीति गणधरा जाताः ब्राह्मी च प्रवर्त्तिनी जाता सुंदरी सुरूपत्वात् स्त्रीरत्नम् ३
भविष्यतीति भरतेन स्थापिता कच्छमहाकच्छौ विना अन्ये तापसा भगवतः शिष्या जाता
: यस्य वृक्षस्य अधः भगवतः केवलज्ञानमुत्पन्नं तस्य पूजा जाता कालक्रमेण तस्य
वृक्षस्य प्रयागवट इति नाम जातं अथ भरतेन गृहे आगत्य चक्ररत्नस्य अष्टाहिकामहो
त्सवश्चक्रे अथ भरतः षट्खंडसाधनाय सैन्येन सह चलितः अग्रे चक्ररत्नं सहस्रदेवाधिष्ठितं प्र
स्थितं यावतीं भुवं गत्वा तिष्ठति तावद्योजनानि भरतस्य सैन्यं चलितं क्रमेण भरतो महीं षट्खंडां षष्टि
सहस्रवर्षैः साधयामास तत्र गंगादेव्या सह वर्षसहस्रं विषयसुखानि बुभुजे नमिविद्याधरपुत्री
नवीनस्त्रीरत्नोत्पन्ना षष्टिसहस्रवर्षाणि सुंदर्या आचाम्लानि कृतानि तेन दुर्बला ततो भरतेन अ
नुज्ञाता सती सुंदरी साध्वी जाता भरतोऽयोध्यायां समेतः तस्मिन्नवसरे आवेशागारस्य अधिकारि
णा विज्ञप्तं हे स्वामिन् तव बांधवास्तव आज्ञां न मन्यंते ततश्चक्ररत्नं आयुधशालायां न प्रविशति त

७ कल्पल· तो भरतो दूतैर्ज्ञापयामास यदि भवतां राज्यवांछास्ति तदागत्य मम सेवां कुरुत तदा तैरष्टानव
तिकुमारैर्विचारितं तातेन अस्माकं राज्यं दत्तं किमर्थं भरतं सेवामहे ततस्तातपार्श्वे गताः स्वामिना च
अंगारकारकदृष्टांतेन वैतालिकाध्ययनश्रावणेन प्रतिबोधिताः शिष्याः कृतास्तथापि चक्ररत्नं न प्रविश
ति ततो भरतो मुख्यमंत्रिणं विशेषतरं प्राह ततः सोपि प्रणम्य प्राह हे स्वामिन् सुरासुरनरैरपि तवाज्ञां
यो न मन्यते स कोपि नास्ति परं तव लघुभ्राता गर्वपर्वतो महाबली बाहुबली वर्त्तते यस्य दोर्दंडप्रचंड
प्रहारेण पर्वता अपि चूर्णीभवंति तातास्तवतास शूलत एव छेदनीयो व्याधिवत् ततो भरतेन सुवे
गनामा दूतो बाहुबलिं प्रति प्रेषितः प्रथमतश्चल नसमये वस्त्रं कंटके लग्नं १ ततो रथः स्खलि
तः २ सन्मुखं छिक्का जाता ३ दक्षिणो रासभो रवीत् ४ इत्यादि निरपशकुनैर्वार्यमा
णोपि महाटवीं समुल्लंघ्य गतो बहलीदेशवासी म स्थाने ततो मार्गे रजोभरं श्रमाकुलं परदे
शीनं दृष्ट्वा ग्रामलिंके त्र गोप्यः पानीयहारिकाश्च पृच्छंति स्म लोकाः ततः समेतः कस्तव स्वामी तेनो
क्तं भरत इति ताभिः प्रोक्तं अस्माकं कंचुलिकायां एको भरतः १ धातुसंबंधी भरतः २ उदरे रोगवि
शेषो भरतः ३ एतद्भरतत्रयं विना अस्माभिरन्यो भरतो राजा कर्णैरपि न श्रुतः ततः सुवेगेन विचारितं
अहो आश्चर्यं अहो बाहुबलेः प्राज्यं राज्यं साम्राज्यं ततो गतस्तक्षशिला नगरीं स्वर्गपुरीसदृ १४७
शीं प्रविशन् राजद्वारे क्षणं तस्थौ ततो द्वारेर्निरुद्धोपि राजाज्ञया गतो बाहुबलिसमीपं स्वसंज्ञया
आसने स्थापितः पृष्टः भो भरतस्य सपादकोटीपुत्रादीनां च कुशलं वर्त्तते सुवेगः प्राह॥ देवय

नवधयाम
स्य सेवा यत्कुलवद्भिः क्रियते यस्य च श्रीऋषभदेवः सांनिध्यं करोति तस्य कुतो ऽकुशलं परं तव सेवां
विना राज्यं निःफलं जानाति ततो देहि स्वसंगमं न चक्रीयं इयंति दिनानि नागतोऽयं कथं गच्छामि य
तो ज्येष्ठो भ्राता लघोरपराधं सहिष्यति कुलीनानां च ज्येष्ठो भ्राता पितृवन्मान्यः पूज्यश्च भवति ततो
बाहुबलिश्च मत्कृतो ज्ञातपरमार्थोऽवादीत् रे दूत त्वं अबुध्यः स्वस्वामिसेवाकार्ये सावधानः परं त
व स्वामिनः स्नेहो ज्ञातो लघुभ्रातृराज्यहरणात् परं मम तव स्वामिसेवायां प्रयोजनं नास्ति ततो दूतः
प्राह सो यदि तव राज्येनादृशेन कोशेन कृत्यं बेन जीवितव्येन च वांछा वर्त्तते तदा भरतं सेव
स्व ततः कोपं कृत्वा सुवेग दूतो बाहुबलिना तरस्कृतोऽपद्वारेण निःकासितः सोपि झीवंला
त्वा गतो भरतसमीपं द्विगुणवार्त्तया प्रको पितो भरतश्चतुरंगिण्या सेनया सह दापि
तसंभानादो मस्तके धृतछत्रो वीज्यमानचा मरः कृतबंदिजनजयजयारवश्चचाल परं
मार्गे किं कुर्वन् सेनया सरोवराणि शोषयन् गजानां मदजलैः स्थलमपि सरः कुर्वन् बहली
देशसीम्नि गतः सैन्यं च तत्र स्थापितवान् ततो बाहुबलिरपि भरतं समागतं श्रुत्वा स्वसैन्यं लात्वा
दत्तप्रयाणढक्कः संमुखं समागत्य स्थितः कियदंतरे॥ अथ प्रथमं भरतश्चक्रवर्ती श्रीऋषभदेवं हृ
दि ध्यात्वा वज्रसन्नाहं धृत्वा यक्षसहस्राधिष्ठितं हस्तिरत्नं समारूरोह पृष्ठितश्च सपादकोटिपुत्राः प
वंशपौत्राद्य एवं सुभटकोटिपरिवृतः सुषेणसेनानी ततः ८४ लक्षा हस्तिनः ८४ लक्षा अश्वाः ८४
लक्षा रथाः ९६ कोटि पदातयो बहवो विद्याधराः यक्षाः किंनराश्च चलंतिस्म ततो भरतेन रणपट्टे

७
कल्पल

मस्तके बध्वा सुषेण सेनानीः अग्रे कृतः ततो बाहुबलिरपि श्रीऋषभदेवं पूजयित्वा सम्यक् प्रणम्य च
वज्ररत्नमयसन्नाहं परिधाय सर्वांगं रणरणन्नप्यमानो भद्रहस्तिनं समारुरोह पृष्ठतः त्रीणिल
क्षाणि पुत्राः एवं पौत्राः षोडशसहस्रराजानो बहवो विद्याधराः सुभटाः पदातयश्च चेलुः ततो बा
हुबलिनापि निजपुत्रः सिंहरथः सेनानीः कृतः ततो द्वयोः सैन्ययोः सन्मुखं चलतोः पृथिवी कंपिता
तारामंडलं कंपितं समुद्राः समुच्छलिताः भरतसैन्ये षोडशलक्षरणतूर्याणि वाद्यंति एवं बाहुब
लिसैन्येपि क्रियंति लक्षाणि उभयसैन्ययोः सिंधूरारागे आलाप्यमाने स्वामिस्यावष्टंकारे
क्रियमाणे युद्धं लग्नं अश्ववारैः समं अश्ववा रा लग्ना एवं गजारूढैर्गजारूढा रथिभिः समं र
थिनः पदातिभिः समं पदातयः राजभिः समं राजानः खेचरैः समं खेचराः एवं न्या
ययुद्धे जायमाने सुषेणसेनानीः सिंहरथं संमुखमागच्छंतं दृष्ट्वा एवमवोचत् अहं श्रीभर
तस्य पदातिरस्मि त्वं च श्रीबाहुबलेः पुत्रः त्वं मम स्वामी ततस्त्वं प्रथमं शस्त्रं वाहय ततः सिंह
रथेन वाहिते शस्त्रे क्रुद्धः सेनानी खड्गं मुमोच तावदंतराले सिंहरथस्य भ्राता सिंहकेतुस्तेन स्खलि
तः ततो विशेषतः क्रुद्धः सुषेणसेनानीः बाहुबलेः सेनां विलोडयन् तृणवद्भटान् नैव गणयन् बाहु
बलिपार्श्वे गतः तावता अनिलवेगनामा विद्याधरो बाहुबलिपादौ प्रणम्य संमुखं गतः एवं च
प्राह हे सुषेण त्वं श्रीभरतस्य सेनानीः अहं तु श्रीबाहुबलेः पदातिः सामान्योस्मि परं मम बलं प
श्य इत्युक्त्वा लग्नः अथ तौ साक्षान्मल्लौ इव मदोन्मत्तहस्तिनौ इव अमिलतां ततः शराशरि मुष्टा

प्रकं १८ १५७

मुष्टि युद्धं जाते सुषेणः खड्गं गृहीत्वा सिंहरथस्य मस्तके यावन्मुंचति तावता सूर्योस्तंगतः तत्र व्य
वस्था त्रयं कृतमस्ति श्रीऋषभदेवाज्ञा १ सूर्यास्तमनं २ मेघवृष्टिश्च ३ एतत्त्रये जाते न कोपि युध्यति न
कोपि घातं मारयति अथ संध्यायां ये मृता स्ते मृता एव अथ ये किंचिज्जीवंतस्ते भरतसैन्ये काकिणी
रत्नजलेन सज्जी क्रियंते बाहुबलिसैन्ये तु श्रीसोमयशो हृदयाभरणजलेन पुनः प्रभाते युद्धे जा
यमाने सुषेणसेनानीः अनिलवेगं दृष्ट्वा अग्निरिव ज्वलन् अनिलवेगमारणाय आगतः तावता
सिंहरथो मध्ये प्राप्तः अथ अनिलवेगः सद्यंसिनां समुल्लंघ्य यत्र भरतो हस्तिनां दुर्गत्रयं कृ
त्वा मध्ये सुखेन सुप्तोस्ति तत्रागत्य हस्तिनः कर्कराणीव आस्फालयन् आकाशमद्धा
रूपं विकुर्व्य सेनां विलोडयन् ततो भरतो बहिरागत्य दुर्धरं विद्याधरं विज्ञायमाभ
म सुरतसंगोसावीति चक्रं मुमोच तद्दृष्ट्वा अनिलवेगः प्रणष्टः सन् यत्र यत्र याति तत्र तत्र चक्रं
आयाति तदा लवणसमुद्रजलमध्ये वज्रपंजरं कृत्वा षण्मासी स्थितः ततो यावद्बहिर्निःक्रा
संते चक्रेण मारितः पुनरपि अनेके सुभटाः परस्परं युद्धं कुर्वंतिस्म पुनः सूर्ययशाः सोमयशासो
युद्धे जायमाने सूर्ययशाः कटकमुल्लंघ्य बाहुबलिसमीपे प्राप्तः उवाच आगच्छ बहिः गृहाण श
स्त्राणि मारयामि ततो बाहुबलिरपि विहस्य प्राह रे पुत्र तव पराक्रमेण अहं तुष्टोस्मि इक्ष्वाकुवं
शो ईदृशा एव साहसवंतो भवंति परं मम मुष्टिर्दुर्धरास्ति त्वं याहि २ इति देवैर्वारितः एवं द्वादश व
र्षाणि युद्धं जातं न कोपि हारितो न कोपि जितः परं मनुष्याणां संहारो जातो रुधिरनद्यः प्रवृत्ता स्ततो महा

७
कल्प० ऽनर्थं जायमानं दृष्ट्वा सौधर्मेंद्रचमरेंद्राभ्यां भरतः पूर्वं इति बोधितः भो ऋषभस्वामिना जगतः सृष्टिः
कृता भवता तु जगतः संहारः प्रारब्धः ततो भरतेन प्रोक्तं अहं किं करोमि मम चक्रं न प्रविशति बा
हुबलिराज्ञां न मन्यते एवं चेत्तर्हि द्वाभ्यामेव योद्धव्यं किमन्यसंहारेण ततो भरतेन अंगीकृतं ततो
द्वावपि इंद्रौ बाहुबलिसमीपे गतौ विज्ञप्तिस्फुतिकरणपूर्वं प्रोक्तं अंगीकृतं च बाहुबलिनापि
ततो भरतेन वामहस्तकनिष्ठांगुलिचालनात् खातिकापरतोऽन्योन्यशृंखलाबद्धकटक आकर्ष
णात् स्वबलपरीक्षा कृता अथ इंद्रादिदेवैः पं चयुद्धानि स्थापितानि दृष्टियुद्ध १ वाग्युद्ध २ बा
हुयुद्ध ३ मुष्टियुद्ध ४ दंडयुद्धानि ५ एतैः पंचयु द्धैर्यो जितः स जितो ज्ञेयः अत्रांतरे देवैः श्री
आदीश्वरशपथं दत्वा द्वयोः सैन्यं दूरे स्थापि तं अथ सुगंधपानीयसंसिक्ते विकीर्णपं
चविधपुष्पे रणे द्वावपि धृतसन्नाहौ मुकुटाटोप विराजमानौ संमुखं समागतौ देवाश्च आका
शे साक्षिणः स्थिताः पश्यंति ततो द्वावपि भरत। बाहुबली संमुखं धावितौ परस्परं दृष्टौ अनि
मिषौ स्फाटिताक्षौ रक्तमुखौ महासूरवीरौ अभंगसटौ कंचनवर्णौ झलसमुल्लतौ अन्योन्यालोक
नतत्परौ क्षणमात्रं जातौ ततो भरतस्य नेत्रयोः सूर्यदर्शनाद्विजलं समागतं मिलिते नेत्रे ततो देवै
: पुष्पवृष्टिः कृता प्रोक्तं च जितं बाहुबलिना १ पुनर्वाक्युद्धे प्रारब्धे महाघोरः कंपितपर्वतो भरतेन १५२
सिंहनादः कृतः ततो बाहुबलिनापि ब्रह्मांडस्फोटकारकः स्वेदानादः कृतः तेन भरतनादः प्रतिह
तो भरतनादेन बाहुबलिरुत्कर्णो जातो बाहुबलिनादेन च भरतेन कर्णौ पिहितौ अत्रापि देवैः प्रो

क्तं जितं बाहुबलिना २ पुनर्बाहुयुद्धं प्रारब्धं भरतेन गोपुरस्य अर्गला इव बाहुः प्रसारितः
ततो बाहुबलिः कमलनालवत् बाहुं नामयति स्म ततो बाहुबलिना बाहुः प्रसारितस्तं भरतो
नानामयत् प्रत्युत शाखायां वानरवत् हिंदोलितस्ततो देवैः प्रोक्तं जितं बाहुबलिना ३ पुन
र्मुष्टियुद्धं प्रारब्धं ततः कटीबद्धपटीकौ वीरकुंजरौ पादन्यासकंपितधरणीतलौ कृतमहानादौ
ताडितनिजभुजादंडौ संमुखमागतौ ततो भरतेन मुष्टिना बाहुबलिस्ताडितो मस्तके आजा
नुमग्नः पुनर्निमीलितनेत्रः क्षणं स्थित्वा बाहु बलिर्भरतं कंदुकवत् आकाशे उच्छालयित्वा
पतंतं पुनरनुकंपया भुजाभ्यां धृत्वा मस्तके प्र हारं ददौ तेन भरतः आकंठं मग्नः पुनः देवैः प्रो
क्तं जितं बाहुबलिना ४ ततो दंडयुद्धं प्रा रब्धं पूर्वं भरतेन लोहदंडो मुक्तस्तेन बाहु
बलिमुकुटं चूर्णीकृतो जीर्णतृणवत् बाहु बलिरपि मेदिन्यां आजानुमग्नः ततो बाहुब
लिना लोहदंडो भ्रामयित्वा मुक्तो भरतस न्नाहश्चूर्णीकृतो भरतोपि आकंठं मेदिन्यां निम
ज्जतिस्म ततो देवैर्लपितं जितं बाहुबलिना ५ ततो युद्धपंचकेपि बाहुबलिर्जितो भरतो हारितश्च
ततो भरतस्य शंका जाता किमयं चक्रवर्ती नाहं अथवा चक्रवर्तित्वं समुत्पन्नं ततो लक्षयक्षाधि
ष्ठितं चक्रं हस्ते गृहीत्वा भ्रामयित्वा च प्रतिज्ञातो भ्रष्टेन भरतेन बाहुबलिशिरःछेदाय मुक्तं परं स्वगो
त्रे चक्रं न प्रभवतीति बाहुबलिं प्रदक्षिणीकृत्य पुनर्व्याघुट्य भरतहस्ते समागतं ततो जातप्रचंडकोपे
न बाहुबलिना भरतमारणाय मुष्टिमुत्पाट्य ज्ञानसंवेगेन स्वमस्तके लोचः कृतो देवैः पुष्पवृष्टिः कृ

उ
स्पल·

ता जातो महामहोत्सवः ततो भरतेन बहुविलापपरः खिन्नेन बाहुबलिपुत्राय सोमयशसे तक्षशिलारा
ज्यं दत्वा अयोध्यानगर्यां समागतं बाहुबलिरपि लघुबांधवान् कथं वंदिष्ये इति विचार्य वर्षं कायो
त्सर्गे स्थितः ततः श्रीऋषभदेवेन प्रतिबोधाय ब्राह्मीसुंदरीसाध्वीद्वयं मुक्तं तेन प्रोक्तं हे वीर गजाद्
उत्तरेति वचनश्रवणाज्जातसंवेगो वंदनार्थं पदोत्पाटने जातकेवलज्ञानो गतः केवलिपर्षदि इति
भरतबाहुबलियुद्धाधिकारः॥ अथान्यदा अष्टापदे भगवति समवसृते भरतः पंचशतशकटानि
आहारेण भृत्वा आगत्य कुटुंबसहितं भगवंतं भोजनार्थं निमंत्रयति स्म भगवता प्रोक्तं राजपिं
डोयं १ आधाकर्मेदं २ अभ्याहृतं च ३ इति दूष णत्रयं साधूनामग्राह्यमिति न गृहीतं ततः इंद्रेण
भरतस्य आश्वासनार्थं अवग्रहाः पृष्टाः स्वा मिना प्रोक्तं देवेंद्र १ राजेंद्र २ गृहपति ३ सा
गारिक ४ साधर्मिक ५ अवग्रहाः पंच तत्र इंद्रे ण स्वक्षेत्रे साधूनामनुज्ञातं १ भरतेनापि एवं
मा अनुज्ञाताः २ भरतेन प्रोक्तं आहारेण किं क रोमि इंद्रेण प्रोक्तं त्वत्तो ये गुणाधिकास्तान् भोज
य ततो भरतः श्राद्धश्रावकान् अभोजयत् ते च भोजनं कृत्वा जितो भवान् वर्द्धते भयं तस्मान्माहन
२ इति भरतं प्रति प्रोक्तवंतः बहूनां मिलने काकिणीरत्नेन देवगुरुधर्मरूपरेखात्रयं चकृतवान्
ततो लोके यज्ञोपवीतं श्रावकाणां प्रसिद्धं जातं अथैकदा भरतेन इंद्रं पृष्टं मौलरूपं दर्शय ततः इं
द्रेण स्वरूपकनिष्ठांगुली दर्शिता ततो भरतस्तां तेजःपुंजज्वालामालाकुलां दृष्ट्वा चमत्कारं प्राप्य प्रति १५२
वर्षं इंद्रयष्टिमहोत्सवं चकार॥ अथ भगवतः परिवारसंख्यामाह॥ तत्र सूत्रं॥ उसभस्स णं अर

हओ कोसलियस्स चउरासीइ गणा चउरासीइ गणहरा हुत्था उसभस्स णं अरहओ को० उसभसे
णपामुक्खाओ चउरासीइ समणसाहस्सीओ उक्कोसिया समणसंपया हुत्था उस० अ० को० बंभीसुं
दरिपामुक्खाणं अज्जियाणं तिन्नि सयसाहस्सीओ उ० अज्जियासंपया हुत्था उ।अ।को। सिज्जं
सपामुक्खाणं समणोवासिआणं तिन्नि सयसाहस्सीओ पंच सहस्सा उक्को० समणोवासगसंपया
हुत्था उ।अ।को। सुभद्दापामुक्खाणं समणोवासियाणं पंच सयसाहस्सीओ चउप्पन्नं च सहस्सा
उक्कोसिया समणोवासियाणं संपया हुत्था॥ उ।अ।को। चत्तारि सहस्सा सत्त सया पन्नासा
चउद्दसपुव्वीणं अजिणाणं जिणसंकासा णं उक्को० चउद्दसपुव्विसंपया हुत्था उ।अ
।को। नव सहस्सा ओहिनाणीणं उक्कोसियाओहिनाणिसंपया हुत्था उ।अ।को।
वीससहस्सा केवलनाणीणं उ।संप० हुत्था॥ उ।अ।को। वीससहस्सा छच्चसया वेउव्वीणं
उ।सं। हुत्था उ।अ।को। बारससहस्सा छच्चसया पन्नासा विउलमईणं अड्ढाइज्जेसु दीवसमुद्दे
सु सन्नीणं पंचिंदियाणं पज्जत्तगाणं मणोगए भावे जाणमाणाणं पासमाणाणं उ।विउलमइसंपया हु
त्था उ।अ।को। बारससहस्सा छच्चसया पन्नासा वाईणं उ।सं० हुत्था उ।अ।को। वीसं अंतेवासिसह
स्सा सिद्धा चत्तालीसं अज्जियासाहस्सीओ सिद्धाओ उ।अ।को। बावीससहस्सा नवसया अणुत्त
रोववाइयाणं गइकल्लाणाणं जाव भद्दाणं उ।सं। हुत्था॥ व्याख्या॥ ऋषभस्य चतुरशीतिर्गणा ग
णधराश्च अभवन् १ ऋषभस्य ऋषभसेनप्रमुखाणां चतुरशीतिसहस्राः श्रमणानां संपदा अ

सवत्र २ ऋषभस्य ब्राह्मीसुंदरीप्रमुखाणां त्रयो लक्षाः आर्यिकाणां उत्कृष्टा सं० ३ ऋषभस्य
श्रेयांसप्रमुखाणां त्रयो लक्षाः पंचसहस्राश्च श्रावकाणां सं० ४ ऋषभस्य सुभद्राप्रमुखाणां पंच
लक्षाः चतुःपंचाशत्सहस्राश्च श्राविकाणां सं० ५ ऋषभस्य चतुःसहस्राः सप्तशतानि पंचाशच्च
चतुर्दशपूर्विकाणां सं० ६ ऋषभस्य नवसहस्रा अवधिज्ञानिनां सं० ७ ऋषभस्य विंशतिसह
स्राः केवलज्ञानिनां सं० ८ ऋषभस्य विंशतिसहस्राः षट्शतानि च वैक्रियलब्धिधराणां सं० ९ ऋ
षभस्य द्वादशसहस्राः षट्शतानि पंचाशच्च वि पुलमतीनां अर्धतृतीयद्वीपस्थितसंज्ञिपंचेंद्रि
याणां पर्याप्तानां मनोगतभावान् ज्ञायमाना नां साधूनां सं० १० ऋषभस्य द्वादशसहस्राः
षट्शतानि पंचाशच्च वादिनां सं० ११ ऋष भस्य विंशतिसहस्राः अंतेवासिनां सिद्धाः
१२ ऋषभस्य चत्वारिंशत्सहस्रा आर्यिकाणां सिद्धाः १३ ऋषभस्य द्वाविंशतिसहस्रा नवश
तानि अनुत्तरोपपातिकानां गतिकल्याणकानां सं० १४ अथ भगवतोंऽतकृद्भूमिविचारमाह
तत्रसूत्रम्॥ उ। अ। को। दुविहा अंतगडभूमी हुत्था तं। जुगंतगडभूमी परिआ अंतगडभूमीय
जाव असंखिज्जाउ पुरिसजुगाउ जुगंतगडभूमी अंतमुहुत्तपरियाए अंतमकासी॥ व्या० ऋष
भस्य द्विधा अंतकृद्भूमिः युगांतकृद्भूमिः पर्यायांतकृद्भूमिश्च यावदसंख्येयानि पुरुषयुगानि भ
गवतो वंशे पट्टानुक्रमेण सिद्धानि इति युगांतकृद्भूमिः अंतर्मुहूर्त्तपर्याये अंतमकार्षीत् भगव
तः केवले समुत्पन्ने अंतर्मुहूर्त्तेन मरुदेवास्वामिनी सिद्धा इति पर्यायांतकृद्भूमिः॥ अथ भगवतो

मोक्षकल्याणकमाह॥ तत्रसूत्रं॥ तेणं कालेणं तेणं समएणं उसभे णं अरहा कोसलिए वीसं पुव्व
सयसहस्साइं कुमारवासमज्झे वसित्ताणं तेवट्ठिं च पुव्वसयसहस्साइं रज्जवासमज्झे वसित्ताणं तेसीइं
पुव्वसयसहस्साइं अगारवासमज्झे वसित्ताणं एगं वाससहस्सं छउमत्थपरियायं पाउणित्ता एगं पु
व्वसयसहस्सं वाससहस्सूणं केवलिपरियायं पाउणित्ता पडिपुण्णं पुव्वसयसहस्सं सामण्णपरिया
यं पाउणित्ता चउरासीइं पुव्वसयसहस्साइं सव्वाउयं पालइत्ता खीणे वेयणिज्जाउयनामगुत्ते
इमीसे ओसप्पिणीए सुसमदूसमाए समाए बहु वइक्कंताए तिहिं वासेहिं अद्धनवमेहि य मासे
हिं सेसेहिं जे से हेमंताणं तच्चे मासे पंचमे पक्खे माहबहुले तस्स णं माहबहुलस्स ग्रं० ५५००
तेरसीपक्खेणं उप्पिं अट्ठावयसेलसिहरं सि दसहिं अणगारसहस्सेहिं सद्धिं चउद्द
समेणं भत्तेणं अपाणएणं अभीइणा नक्खत्ते णं जोगमुवागएणं पुव्वण्हकालसमयंसि सं
पलियंकनिसन्ने कालगए वइक्कंते जाव सव्व दुक्खप्पहीणे॥ व्या०॥ तेणं कालेणं इति सूत्र
स्य व्याख्यानं सुगमं तथाप्युल्लापनिका यथा॥ तस्मिन् काले २ श्री ऋषभदेवो विंशतिपूर्वलक्षाणि
कुमारवासमध्ये स्थित्वा त्रिषष्टिपूर्वलक्षाणि राज्यवासमध्ये स्थित्वा त्र्यशीतिपूर्वलक्षाणि गृहस्थावा
समध्ये स्थित्वा एकं वर्षसहस्रं छद्मस्थपर्यायं प्रपाल्य एकेन वर्षसहस्रेण ऊनं एकं पूर्वलक्षं केवल
पर्यायं प्रपाल्य संपूर्णं पूर्वलक्षं श्रामण्यपर्यायं साधुत्वं प्रपाल्य चतुरशीति पूर्वलक्षाणि सर्वायुः प्र
पाल्य क्षीणे वेदनीयायुर्नामगोत्रे अस्या अवसर्पिण्याः सुषमदुःषमायाः समायास्त्रिभिर्वर्षैः

अर्द्धनवमैर्मासैर्नवाशीतिपक्षैरित्यर्थः शेषे सति ऋते सति शीतकाले स्पष्टतृतीये मासे पंचमे पक्षे प्रा
प्ते माघवदित्रयोदशीदिने अष्टापदपर्वतोपरि दशभिः साधुसहस्रैः सार्द्धं चतुर्दशभक्तेन उपवास
षट्केन अपानकेन अभीचिनक्षत्रे चंद्रेण समं योगं वर्त्तमाने पूर्वाह्णकालसमये संपल्यंकनिषण्णः
कालगतो व्युत्क्रांतो यावत्सर्वदुःखप्रहीणो जातः देवैः श्रीऋषभस्य १ गणधराणां २ साधूनां ३ चचि
तात्रयं कृत्वा संस्कारः कृतः॥ अथ अंतरकालमाह॥ तत्र सूत्रं॥ उसभस्स णं अरहउ कोसलिय
स्स कालगयस्स जाव सव्वदुक्खप्पहीणस्स तिन्नि वासा अद्धनवमा य मासा वइक्कंता तउ परं
एगा सागरोवमकोडाकोडी तिवासअद्धनवमासाहियबायालीसवाससहस्सेहिं ऊणिया व
इक्कंता एयंमि समए समणे भगवं महावीरे निव्वुए तउ वि परं नव वाससया वइक्कं
ता दसमस्स य वाससयस्स अयं असीइमे संवच्छरे काले गच्छइ॥ व्या०॥ ऋषभस्य मोक्ष
गमनस्य त्रयो वर्षा अर्द्धनवमासाः सार्द्धाष्टमासा इत्यर्थः व्युत्क्रांता व्यतीता इत्यर्थः ततः परं एका
सागरोपमकोटीकोटिः परं कीदृशी द्विचत्वारिंशद्वर्षसहस्रैस्त्रिभिर्वर्षैः अर्द्धनवमैर्मासैश्च ऊ
ना एतस्मिन्समये श्रमणो भगवान्निर्वृतो मोक्षं गतः ततः परं नवशतवर्षाणि अशीत्यधिकानि ए
व गतानि तदाऽयमागमः पुस्तकारूढो जातः एतेन कृत्वा अंतरकालः श्रीआदिनाथस्य पंचकल्या १५४
णकानि व्याख्यातानि अग्रे स्थविरावली व्याख्यास्यते सम्प्रति वर्त्तमानयोगः ततोऽस्मिन्पर्वणि स
मागते एके सत्पात्रा जीवा दानं ददति एके शीलं पालयंति एके तपस्तपंति एके भावनां भावयंति शासना

धीश्वर श्रीमहावीरस्य प्रसादस्ततः परंपरया श्रीसुधर्मस्वामि श्रीजंबूस्वामि श्रीप्रभवस्वामि तावद्या
वत् श्रीवज्रस्वामि ततो गच्छपरंपरया वर्त्तमानभट्टारकस्य आज्ञया श्रीसंघः प्रवर्त्ततां इति वाच्यं॥
इति सप्तमं व्याख्यानं संपूर्णं॥ व्याख्यानं कल्पसूत्रस्य सप्तमं सुगमं स्फुटं शिष्यार्थं पाठकाश्चक्रुः स
मयादिमसुंदराः १७॥ अथ अष्टमं व्याख्यानं॥ तत्र पूर्वं प्रथमवाचनया श्रीपंचपरमेष्ठिनमस्का
रो व्याख्यातः पुनः श्रीमहावीरस्य संक्षेपवाचनया षट्कल्याणकानि व्याख्यातानि १ द्वितीयवाच
नया च श्रीमहावीरदेवस्य च्यवनकल्याणकं गर्भापहारकल्याणकं च व्याख्यातं २ तृती
यवाचनया च चतुर्दश स्वप्ना व्याख्याताः ३ चतुर्थवाचनया च श्रीमहावीरदेवस्य जन्म
कल्याणकं व्याख्यातं ४ पंचमवाचनया च श्रीमहावीरदेवस्य दीक्षा १ ज्ञान २ नि
र्वाण ३ कल्याणकत्रयं व्याख्यातं ५ षष्ठवाचनया च श्रीपार्श्वनाथ नेमिनाथ तीर्थंकरयोः
पंचकल्याणकानि व्याख्यातानि ६ सप्तमवाचनया च अंतरकालः श्रीऋषभदेवस्य च पंचक
ल्याणकानि व्याख्यातानि ७ अथ अष्टमवाचनया स्थविरावली व्याख्यायते॥ तत्र सूत्रं॥ तेणं
कालेणं तेणं समएणं समणस्स भगवउ महावीरस्स नव गणा इक्कारस गणहरा हुत्था १ से केण
ट्ठेणं भंते एवं वुच्चइ समणस्स भगवउ महावीरस्स नव गणा इक्कारस गणहरा हुत्था २ समण
स्स भ० म० जेट्ठे इंदभूई नामं अणगारे गोयमगुत्तेणं पंचसमणसयाइं वाएइ १ मज्झिमए अग्गि
भूई अणगारे गोयमगुत्तेणं पंचसमणसयाइं वाएइ २ कणीयसे अणगारे वाउभूई गोयमगुत्तेणं

पंचसमणसयाइं वाएइ ३ थेरे अज्जवियत्ते भारद्दायगुत्तेणं पंचसमणसयाइं वाएइ ४ थेरे अ
ज्जसुहम्मे अग्गिवेसायणगुत्तेणं पंचसमणसयाइं वाएइ ५ थेरे मंडियपुत्ते वासिट्ठगुत्तेणं अद्धु
ट्ठाइं समणसयाइं वाएइ ६ थेरे मोरियपुत्ते कासवगुत्तेणं अद्धुट्ठाइं समणसयाइं वाएइ ७ थेरे अ
कंपिए गोयमगुत्तेणं थेरे अयलभाया हारियायणगुत्तेणं एए दुन्नि वि थेरा तिन्नि २ समणस
याइं वाएंति ८ थेरे अज्जमेयज्जे थेरे पभासे एए दुन्नि वि थेरा कोडिन्नागुत्तेणं तिन्नि २ समणसयाइं
वाएंति से तेणट्ठेणं अज्जो एवं वुच्चइ समणस्स भगवओ महावीरस्स नव गणा इक्कारस गणह
रा हुत्था ११ सव्वे एए समणस्स भगवओ इक्कारस वि गणहरा दुवालसंगिणो चउद्दसपुव्विणो
समत्तगणिपिडगधारगा रायगिहे नगरे। मासिएणं भत्तेणं अपाणएणं कालगया
जाव सव्वदुक्खप्पहीणा थेरे इंदभूई थेरे अज्जसुहम्मे सिद्धिगए महावीरे पच्छा दुन्नि वि
थेरा परिनिव्वुआ जे इमे अज्जत्ताए समणा निग्गंथा विहरंति एए णं सव्वे अज्जसुहम्मस्स अणगा
रस्स आवच्चिज्जा अवसेसा गणहरा निरवच्चा वुच्छिन्ना॥ व्या०॥ तस्मिन्काले तस्मिन्समये श्रमण
स्य भगवतो महावीरस्य नव गणा एकादश गणधराश्च अभवन् से केणत्ति सेशब्दोऽथशब्दार्थः
केन अर्थेन कारणेन हे भदंत एवं उच्यते गणा नव गणधरा एकादश कथं यतो जावइया उ
स्स गणा तावइया तस्स गणहर त्ति वचनात् यस्य तीर्थंकरस्य यावंतो गणा भवंति तावंतस्तस्य
गणधरा भवंति सर्वजिनानां गणधरमानयोस्तुल्यत्वेपि श्रीवीरस्य कथमेवं तत्रोत्तरमाह॥ १५५

अकंपिता १ चलभ्रात्रोरेकरूपैव वाचना जाता एवं मेतार्यप्रभासयोरपि यत एकवाचनाचारयति समुदा
योहि गण इति नव गणाः श्रीमहावीरस्य ज्येष्ठ इंद्रभूतिनामा अनगारो गौतमगोत्रीयः स पंचशतश्रमणान्
वाचयति वाचनां ददाति १ मध्यमोऽग्निभूतिनामा अनगारो गौतमगोत्रीयः सोपि पंचशतश्रमणान् वाच
यति २ कनिष्ठो लघुर्वायुभूतिनामा गौतमगोत्रीयः सोपि पंचशतश्रमणान् वाचयति एते त्रयोपि
भ्रातरः ३ चतुर्थ आर्यव्यक्तनामा भारद्वाजगोत्रीयः सोपि पंचशतश्रमणान् वाचयति ४ पंचमः
सुधर्मस्वामी अग्निवैश्यायनगोत्रीयः सोपि पंचशतश्रमणान् वाचयति ५ षष्ठो मंडिकपुत्रो
वाशिष्टगोत्रीयः मंडिकश्चासौ पुत्रश्च धनदेवस्य मंडिकपुत्रः केचित्तु एवं व्याख्यानयंति मं
डित इति धनदेवस्य नामांतरं तस्य पुत्रो मंडितपुत्रः स सार्द्धत्रिशतश्रमणान् वाचयति
६ सप्तमो मौर्यपुत्रः काश्यपगोत्रीयः सोपि सार्द्धत्रिशतश्रमणान् वाचयति अत्र मंडिकमौर्य
पुत्रयोरेकमातृकत्वेन भ्रात्रोरपि यद्भिन्नगोत्राभिधानं तत् पृथक्पितृजनकापेक्षया यतो मंडिक
स्य पिता धनदेवो मौर्यपुत्रस्य मौर्यः पिता माता तु द्वयोरपि एकैव विजयदेवी एवं विरोधोपि न य
तस्तत्र देशे एकस्मिन्पत्यौ मृते द्वितीयपतिकरणं न दोषायेति वृद्धाः ७ अष्टमोऽकंपितो गौतमगो
त्रीयः ८ अचलभ्राता नवमो हारीयायनगोत्रीयः एतौ द्वावपि गणधरौ त्रिशतश्रमणान् २ वाचयत
: ९ दशमो मेतार्यः एकादशः प्रभासः एतौ द्वावपि कोडिन्नगोत्रीयौ त्रिशतश्रमणान् २ वाचयतः
११ तेन कारणेन नव गणा एकादश गणधराश्च एतेषां परिवारः इयान् जातः चत्वारः सहस्राः त्रयः शता

८
कल्प०

निच एते एकादश गणधराः कीदृशा इत्याह एते सर्वेपि गणधराः द्वादशांगिनः आचारांगादिदृष्टिवा
दांतश्रुतवंतः कथं स्वयं तेषां प्रणयनात् पुनः कीदृशाः चतुर्दशपूर्विणः पूर्वाणां अंगांतर्गतत्वेपि
पूर्वं प्रणयनात् अनेकविद्यामंत्राद्यर्थमयत्वात् महाप्रमाणत्वाच्च प्राधान्यख्यापनार्थं पुनरुपादानं
पुनः कीदृ० द्वादशांगित्वं सूत्रमात्रेपि स्यादित आह समस्तगणिपिटकधारकाः गणोस्यास्तीति गणी
तस्याचार्यस्य पिटकमिव रत्नादिकरंडकमिव गणिपिटकं द्वादशांगी तदपि न देशतः स्थूलभद्र
स्येव किंतु समस्तं सर्वाक्षरसंनिपातत्वात् तद्धारयंति सूत्रतोर्थतश्च पुनः की। राजगृहे नगरे मासि
कभक्तेन अपानकेन कालं गताः तत्रापि नवगणधराः भगवति श्रीमहावीरे जीवति सति मोक्षं
गताः परं श्रीगौतमस्वामी वीरनिर्वाणात् द्वादशवर्षैर्मोक्षं गतः अथ च श्रीसुधर्मस्वामी
पंचमो गणधरो वीरनिर्वाणात् विंशतिवर्षैर्मोक्षं गतः परं अज्जाए आर्यतया अद्यतन
युगे वा ये इमे श्रमणा निर्ग्रंथा विहरंति एते आर्यसुधर्मस्य अपत्यानि तत्संतानजा इत्यर्थः अव
शेषा गणधरा निरपत्याः शिष्यसंतानरहिता जाताः स्वस्वमरणकाले स्वस्वगणस्य सुधर्मस्वामिनि निस
र्गात् अथ सुधर्मतः स्थविरावलीमाह॥ तत्र सूत्रं॥ समणे भग० म० कासवगोत्तेणं समणस्स भगम
हावीरस्स कासवगुत्तस्स अज्जसुहम्मे थेरे अंतेवासी अग्गिवेसायणगोत्ते १ थेरस्स णं अज्जसुह
म्मस्स अग्गि० अज्जजंबू थेरे अंतेवासी कासवगुत्ते २ थेरस्स णं अज्जजंबूनामस्स कासवगुत्तस्स अ
ज्जप्पभवे थेरे अंतेवासी कच्चायणसगुत्ते ३ थेरस्स णं अज्जप्पभवस्स क० अज्जसिज्जंभवे थेरे अंतेवा

१५६

सी मणगपिया वच्छसगुत्ते ४ थेरस्स णं अज्जसिज्जंभवस्स मणगपिउणो वच्छसगुत्तस्स अज्जजसभद्दे थे
रे अंतेवासी तुंगियायणसगुत्ते ५॥ व्या० श्रीमहावीरस्य अंतेवासी अग्निवैश्यायनगोत्रीयः श्रीसुधर्मस्वामी
१ सुधर्मस्वामिनोंतेवासी काश्यपगोत्रीयः श्रीजंबूस्वामी २ श्रीजंबूस्वामिनोंतेवासी कात्यायनगोत्रीयः
श्रीप्रभवस्वामी ३ श्रीप्रभवस्वामिनोंतेवासी मनकपिता वत्सगोत्रीयः शय्यंभवः ४ शय्यंभवस्य अं
तेवासी तुंगियायनगोत्रीयो यशोभद्रः ५ अथ एतेषां पंचानां स्थविराणां संबंधो अनुक्रमेण एव ज्ञेय
स्तथाहि॥ अथ श्रीवीरपट्टे श्रीसुधर्मस्वामी तस्य संबंधोयं तथाहि॥ कोल्लागसंनिवेशे धम्मिल्लना
मा ब्राह्मणस्तस्य भार्या भद्दिला तयोः पुत्रः सुधर्मा १४ विद्यानिधानं पंचाशद्वर्षांते वीरसमी
पे दीक्षा त्रिंशद्वर्षाणि यावत् वीरचरणकमलसेवा ८० द्वादशवर्षाणि वीरमोक्षात्
छद्मस्थावस्थायां स्थितः ९२ अष्टौ वर्षाणि केवलपर्यायः १०० एवं सर्ववर्षशतं आयुः प्रपा
ल्य श्रीजंबूस्वामिनं स्वकीयपट्टे स्थापयित्वा मोक्षं गतः १ अथ श्रीजंबूस्वामिचरित्रमिदं॥ एकदा
श्रीवीरदेवसमवसरणे अनेकदेवचतुरयदेवीसहितो महातेजःपुंजविराजमानो देवो वीरं वंदितुं स
मागतः तदा श्रेणिकेन पृष्टं हे स्वामिन् अस्य देवस्य एतादृशी विस्मयकारिणी अधिका कांतिः कथं
ततः स्वामिना प्रोक्तं हे श्रेणिक अनेन देवेन पूर्वभवे महाविदेहक्षेत्रे राजकुमारेण शिवेन वैराग्यं प्रा
प्य द्वादशवर्षाणि महत्तपः कृतं तथाहि उपवासद्वयं कृत्वा पारणे आचाम्लं एवं द्वादशवर्षाणि निरंत
रं तपः कृतं तस्य प्रभावेन पंचमे ब्रह्मदेवलोके देवो महर्द्धिको जातः अयं देवः सप्तमे दिने देवलोक

८
कल्पल·

तच्छ्रुत्वा राजगृहनगरे ऋषभदत्तः श्रेष्ठी धारिणी भार्या तयोः पुत्र उत्पत्स्यते ततस्तस्यैव उत्पन्नः ज-
न्मोत्सवे कृते गर्भस्थे अस्मिन्मात्रा जंबूद्रुमो दृष्टस्ततो जंबूकुमार इति नाम दत्तं क्रमात् यौवनावस्था-
प्राप्तः परं श्रीसुधर्मस्वामिपार्श्वे धर्मं श्रुत्वा वैराग्यवान् जातः मातृपितृप्रमुखाग्रहान्नीरागोपि अष्ट-
कन्यापाणिग्रहणं मेने एकदा सुधर्मस्वामिदेशनां श्रुत्वा दीक्षाया आदेशग्रहणार्थं गृहे आगच्छ-
न् प्रतोल्यां यंत्रादागतप्रस्तरात् मरणमागतं टालयित्वा पश्चान्निवृत्य श्रीसुधर्मस्वामिपार्श्वे ब्रह्मव्रतं
ललौ तस्मिन् गृहीते पि मातृपितृप्रमुखाग्रहात् पाणिग्रहणं चक्रे रात्रौ ता अष्टापि कन्याः प्रति-
बोधयता तालोद्घाटिनीविद्यायुत् चौर्यार्थं प्र- विष्टः प्रभवनामा चौरोपि प्रतिबोधितः प्रभा-
ते जंबूकुमारो दीक्षाग्रहणाय प्रोच्छितः तदा अष्टौ कन्याः ८ अष्टौ तासां मातरः १६ अष्टौ
तासां पितरः २४ जंबूस्वामिनो माता पितरौ एवं २६ चौराणां पंचशत्या सह प्रभवः ५०१ सर्वे
५२७ तैः सह जंबूकुमारो दीक्षां ललौ मुक्तिं च ग- तः येन जंबूकुमारेण नव परिणीता अष्टौ क-
न्या नवनवति स्वर्णकोट्यश्च त्यक्ताः पुनश्चरमकेवली जातः षोडश वर्षाणि गृहस्थत्वे विंशति च
वर्षाणि छाद्मस्थ्ये चतुश्चत्वारिंशत् केवलित्वे इत्यशीति वर्षाणि सर्वायुः प्रपाल्य श्रीमहावीरात् चतुःषष्टिवर्षैः
सिद्धः यस्मिन्मुक्तिं गते एतानि दश उत्तमवस्तूनि विच्छेदं गतानि तद्यथा ॥ मनःपर्यवज्ञानं १ परमाव- १५७
धिज्ञानं २ पुलाकलब्धिः ३ आहारकशरीरं ४ क्षपकश्रेणिः ५ उपशमश्रेणिः ६ जिनकल्पिमार्गः ७
परिहारविशुद्धिचारित्रं सूक्ष्मसंपरायचारित्रं यथाख्यातचारित्रं चेति संयमत्रिकं ८ केवलज्ञानं

९ सिद्धिगमनं च १० इति श्रीजंबूस्वामिनो अहो अधिकं सौभाग्यं यतो यं पतिं प्राप्य अद्यापि शिवश्री-
रन्यं पतिं न वांछति पुनर्जंबूसमः कोपि ईदृशः कोटिपालो न भूतो न भविष्यति यश्चौरानपि मोक्षमार्गवाह-
कान् साधून् करोत् पुनर्जंबूकुमारो वणिग्जातित्वात् महालोभी यतो मुक्तिनगरे प्रविश्य अनंतसौ-
ख्यं प्राप्य अन्यागमननिरोधाय मुक्तौ कपाटं दत्तवान् इति जंबूसंबंधः ॥ श्रीजंबूस्वामिना श्रीप्रभव-
ः सूरिपदे स्थापितः ॥ अथ श्रीप्रभवस्वामिना गच्छमध्ये संघमध्ये च उपयोगो दत्तः कस्य सूरिपदं दीयते
गच्छे पट्टयोग्यं साधुमपश्यता परतीर्थे राजगृहे यज्ञं कुर्वन् शय्यंभवभट्टो दृष्टः ततः श्रीप्रभवसूरि-
णा साधुद्वयं शिक्षयित्वा मुक्तं तेन तत्र गत्वा प्रोक्तं अहो कष्टमहो कष्टं तत्त्वं न ज्ञायते पुन-
ः शय्यंभवभट्टेन श्रुतं ततस्तत्त्वज्ञानेच्छा यं गुरुपार्श्वे गत्वा दृष्टो गुरुः खड्गमुत्पाट्य
तत्त्वं वद गुरुणा विचारितं शिरश्छेदे तत्त्ववक्त- व्यं न दोषः सोयं यज्ञकीलकस्य अधोभागे श्री-
शांतिनाथप्रतिमा शांतिकरी वर्त्तते तेन शांति- र्जायते इत्युक्त्वा स्तंभमुत्पाट्य दर्शिता प्रतिमा
ततो जातजैनधर्मरुचिर्गुरुपार्श्वे गत्वा धर्मं श्रुत्वा दीक्षां जग्राह शय्यंभवभट्टः अथ श्रीप्रभव-
स्वामी गृहवासे वर्षाणि त्रिंशत् छद्मस्थावस्थायां च पंचपंचाशद्वर्षाणि सर्वं आयुः पंचाशीति व-
र्षाणि पालयित्वा श्रीशय्यंभवं स्वपट्टे स्थापयित्वा स्वर्गं जगाम इति प्रभवस्वामिसंबंधः ॥ ३
अथ श्रीप्रभवस्वामिना श्रीशय्यंभवः सूरिपदे स्थापितः पश्चात्सगर्भा शय्यंभवेन सा भार्या मुक्ता स्वस्त्रया
पुत्रो जनितः तस्य मनक इति नाम जातं स लेखशालायां पठन् कलिकरणे क्षुल्लकैः निःपितृ

कइति प्रोक्तः ततो दुःखं कृत्वा मातृपार्श्वे आगत्य पितृनाम पृष्टं तया प्रोक्तं शय्यंभवस्तेनोक्तं क्वास्ति
मात्रा दीक्षास्वरूपं प्रोक्तं ततो गतस्तन्नगरे गुरोर्बहिर्गतस्य एकांते मिलितो मनकः पृष्टं मनकेन श
य्यंभवसूरिः श्रूयते स क्वास्ति गुरुणा प्रोक्तं किं प्रयोजनं मनकेन स्वकीयं स्वरूपं आगमनप्रयो
जनं च ज्ञापितं ततो गुरुः प्रकारांतरेण आत्मानं ज्ञापयामास संसारस्य असारतादर्शनेन प्रतिबोधितो
वलाषे मम दीक्षां देहि गुरुर्वक्ति यदि पितृसंबंधं साधूनां न ज्ञापयसि तदा व्रतं ददामि मनकेन प्रतिप
न्नं ततो दीक्षा दत्ता गुरुणा स्तोकमायुर्ज्ञात्वा सिद्धांतादुद्धृत्य दशवैकालिकं कृत्वा मनकस्य पठ
नाय दत्तं षण्मासेन पठितं ततो मनकः चारित्रमाराध्य स्वर्गं गतः श्राद्धा अग्निसंस्कारं कृत्वा गु
रुपार्श्वे आगतास्तदा यशोभद्रः पार्श्वे स्थिता गुरुस्तिरूपदेशो दत्तः तदा गुरोर्नेत्रयोरश्रु
णि पेतुः ततो यशोभद्रेण संघेन च प्रोक्तं हे प्रभो युष्माकं अनेके साधवः परलोकं गच्छंति
परं कदापि अश्रुपातो न दृष्टः सांप्रतं कथं अश्रुपातः गुरुः प्राह मोहात् को मोहो गुरुणा प्रोक्तं
अयं मनकोऽस्माकं पुत्रो भवति साधुभिः प्रोक्तं कथं न ज्ञापितः पुत्रसंबंधः गुरुणा प्रोक्तं यदि पुत्र
संबंधो ज्ञाप्यते तदा न कोपि वैयावृत्यं कारयति तस्मात्कारणेन कथमात्मनि स्मारः स्यात् ततो गुरु
भिर्दशवैकालिकं सिद्धांते पश्चात् क्षिप्यमाणं संघेन निवारितं ततः श्री शय्यंभवसूरयः स्वकीयपट्टे
श्री यशोभद्रसूरिं स्थापयित्वा श्री वीरात् अष्टानवति ९८ वर्षैः स्वर्गं जग्मुः ४ ॥ अथ यशोभद्रसूरितो
ऽग्रे संक्षेपवाचनया स्थविरावली कथ्यते ॥ तत्र सूत्रं ॥ संखित्तवायणाए अज्जजसभद्दाओ अग्ग

ओ एवं थेरावली भणिया थेरस्स णं अज्जजसभद्दस्स तुंगियायणसगुत्तस्स अंतेवासी दुवे थेरा थे
रे अज्जसंभूइविजए माढरसगुत्ते १ थेरे अज्जभद्दबाहू पाईणसगुत्ते २ थेरस्स णं अज्जसंभूअवि
जयस्स माढरसगुत्तस्स अंतेवासी थेरे अज्जथूलभद्दे गोयमसगुत्ते १ थेरस्स णं अज्जथूलभद्द
स्स गोयमगोत्तस्स अंतेवासी दुवे थेरा थेरे अज्जमहागिरी एलावच्चसगुत्ते १ थेरे अज्जसुहत्थी
वासिट्ठसगुत्ते २ थेरस्स णं अज्जसुहत्थिस्स वासिट्ठगुत्तस्स अंतेवासी दुवे थेरा सुट्ठियसुप्प
डिबुद्धा कोडियकाकंदगा वग्घावच्चसगुत्ता थेराणं सुट्ठियसुप्पडिबुद्धाणं कोडियकाकंद
गाणं वग्घावच्चसगुत्ताणं अंतेवासी अज्जइंददिन्ने कोसियगुत्ते १ थेरस्स णं अज्जइंददि
न्नस्स कोसियगुत्तस्स अंतेवासी थेरे अज्जदिन्ने गोयमसगुत्ते २ थेरस्स णं अज्ज
दिन्नस्स गोयमसगुत्तस्स अंतेवासी थेरे अज्जसीहगिरी जाइस्सरे कोसियगुत्ते ३ थेर
स्स णं अज्जसीहगिरिस्स जाइस्सरस्स कोसियगुत्तस्स अंतेवासी थेरे अज्जवइरे गोयम
गुत्ते ४ थेरस्स णं अज्जवइरस्स गोयमसगुत्तस्स अंतेवासी थेरे अज्जवइरसेणे उक्कोसियगुत्ते थे
रस्स णं अज्जवइरसेणस्स उक्कोसियगुत्तस्स चत्तारि थेरा थेरे अज्जनाइले १ थेरे अज्जपोमिले २ थे
रे अज्जजयंते ३ थेरे अज्जतावसे ४ थेराओ अज्जनाइलाओ अज्जनाइला साहा निग्गया १ थेराओ अ
ज्जपोमिलाओ अज्जपोमिला साहा निग्गया २ थेराओ अज्जजयंताओ अज्जजयंती साहा निग्गया
३ थेराओ अज्जतावसाओ अज्जतावसी साहा निग्गया ४ इति व्या॰ संक्षेपवाचनया कृत्वा

आर्ययशोभद्रात् अग्रत एवं स्थविरावली संलिता तथाहि श्रीआर्ययशोभद्रसूरेस्तुंगियायन
गोत्रस्य द्वौ शिष्यौ एकः संभूतविजयो माढरगोत्रीयः १ द्वितीयो भद्रबाहुः प्राचीनगोत्रीयः २ भद्र
बाहुसंबंधो यथा॥ प्रतिष्ठानपुरवासिनौ वराहमिहिर १ भद्रबाहु २ नामानौ द्वौ भ्रातरौ ब्राह्मणौ अ
भूतां यशोभद्रसूरिपार्श्वे धर्मं श्रुत्वा प्रव्रजितौ क्रमात् चतुर्दशपूर्वधरौ जातौ गुरुणा भद्रबाहो
र्विनीतत्वात् सूरिपदं ददे वराहमिहिरस्य तु अविनीतत्वान्न दत्तं कथं यतो यो गणधरशास्त्रोक्तगौ
तमादिगणधरैर्महापुरुषैः सूत्रं संज्ञार्थं योग्य सः कुपात्रे अयोग्ये स्थापयति स गुरुर्महापा
पी अनंतसंसारी च स्यात् ततो वराहमिहि रो रुष्टः सन् गच्छाद्बहिर्निर्गतः गुरोर्द्वेषं वह
ति स्म चतुर्दशपूर्वलक्षणात् नवीनानि ज्योतिःशास्त्राणि करोति स्म वाराहीसंहि
तानामा ग्रंथो येन कृतः साधुवेषं मुक्त्वा द्वि जवेषं कृत्वा निमित्तैर्जीवति स्म जनलोका
नामग्रे एवं कथयति स्म लोकाः मया एक दा नगराद्बहिर्लग्नं मंडितमासीत् परं विस्मृ
त्वा लग्नं न लग्नं गृहागतेन विचारितं अहो मम ज्ञानस्य विराधना जाता ततस्तल्लग्नं संगं कर्त्तुं
पुनरहं तत्र स्थाने गतः लग्नस्य उपरि तस्य अधिष्ठायकं सिंहं पश्चाद्वेटं कुर्वंतं अपश्यं तथा
पि लग्नस्य स्फोटनसाहसं कृत्वा लग्नोपरि हस्तक्षेपे कृते सिंहः सूर्यो भूत्वा प्राह भो वराहमिहिर व १५७
रं वृणु तुष्टोऽस्मि तदा मया प्रोक्तं नक्षत्रादीनां चारं साक्षाद्दर्शय ततस्तेन अहं सूर्यादीनां यत्र
मंडलानि तत्र नीतः सर्वं सर्वेषां ग्रहाणां चारोदयास्तमनवक्रातिचारस्वरूपं दर्शितं ततोऽहं स

र्वज्ञो निजबलेन अतीतानागतवर्त्तमानस्वरूपं जानामि इति कथयन् राजादीनां चमत्कारदर्शनेन मनां
सि रंजयामास तस्मिन्नगरे भद्रबाहुस्वामी समागतः श्रावकैः प्रवेशोत्सवकरणादिना महती महिमा
कृता परं वराहमिहिरो न सहति तेषां माहात्म्यपातं वांछति ततो राजसभायां गत्वा राज्ञोऽग्रे प्रोक्तं इतः पंच
मे दिने पूर्वतो मेघः समेष्यति १ तृतीयप्रहरप्रांते २ भूरोलिखितकुंडलिकायां अंतः ३ द्विपंचाशत्पल ५२
मितो मत्स्यः पतिष्यति ४ इति निमित्तं श्रुत्वा श्रावकैः श्रीभद्रबाहुस्वामिनः प्रोक्तं गुरुणा प्रोक्तं किंचि
त्सत्यं किंचिदसत्यं कथं ततो गुरुणा प्रोक्तं मेघो न पूर्वतः समेष्यति किंतु ईशानकोणतः तृतीयप्र
हरप्रांते न किंतु दिनघटीषट्के शेषे सति कुंडलिकायां मध्ये न किंतु किंचिद्बहिः द्विपंचाशत्प
लमानो न किंतु वायुना खंडितत्वात् सार्द्धैकपंचाशत्पलमानः पतिष्यति भद्रबा
हुविशेषज्ञाननिमित्तमपि राज्ञा श्रुतं ततः पंचम दिने मेघवृष्टिर्जाता परं सर्वं श्रीभद्रबाहुवचनं
सत्यं जातं वराहमिहिरः सत्यासत्यवादी लोकमध्ये जातो भद्रबाहुस्वामी तु सत्यवादी जातः पुन
रेकदा राज्ञः पुत्रो जातः वराहमिहिरेण वर्षशतायुर्वर्णनेन जन्मपत्रिका लिखिता ततः सर्वेऽपि लोकाः
अक्षतभाजनानि लात्वा वर्द्धापनाय राज्ञो गृहे समेताः एवं दर्शनिलोकाः अपि आशीःप्रदानाय समेता
विना भद्रबाहुं ततो वराहमिहिरेण राज्ञोऽग्रे प्रोक्तं हे राजन् त्वदीयपुत्रजन्म भद्रबाहोर्न रुचितं तेन
नागतः एतत्स्वरूपं श्रावकैर्भद्रबाहुस्वामिनः प्रोक्तं गुरुभिः प्रोक्तं वारं २ कथं गम्यते एकवारं यास्यामि
कथमेवं गुरुणा प्रोक्तं अष्टमे दिने रात्रौ बिलाडिकातो मरणं राजपुत्रस्य भावीति राज्ञापि एतद्वाक्यं श्रुत्वा

बिलाडिकाप्रवेशनादोषनशनं कृतं कारितं च ततोऽष्टमे दिने दैवयोगात् दासीहस्तादर्गला पतिता।
बालकोपरि मृतो बालकः वराहोऽवदत् बिलाडिकातो न मृतो गुरुणा अर्गलायां बिलाडिकारूपं द
र्शितं ततो वराहो लज्जितः ततो वराहोऽन्यत्र गत्वा मृत्वा व्यंतरो भूत्वा जैनानां मरकोपद्रवं करोति स्म मरी विकुर्व्य
ततः श्राद्धकानां उपद्रवनिवारणाय महाम्नायमयं उवसग्गहरं स्तोत्रं कृत्वाऽर्पितं तत्संघेन सर्वत्र
प्रतिगृहं पठितं तत्प्रभावेन व्यंतरो नष्टः ततः जातं सर्वत्र सुखं महाप्रभावं स्तोत्रं गौरपि कदाचित्क
ष्टे विद्धे नष्टे तदापि लोका इदं स्तोत्रं गुणयंति ततः शेषनाग आगत्य विघ्नं वारयति एवं प्र
त्यहं प्रतिगृहं आगच्छन् शेषनागः खिन्नः सन् गुरुं विज्ञपयति स्म अहं संघपार्श्वात् क्षणम
पि स्थातुं न शक्नोमि ततः षष्ठी गाथा अतिशयवती दूरीक्रियतां अहं स्वस्थाने स्थितोपि
गाथापंचकेनापि विघ्नं स्फेटयिष्यामि ततो गुरुणा षष्ठी गाथा भांडागारे क्षिप्ता श्रीभद्रबाहु
स्वामिकृताः श्री आवश्यकनिर्युक्त्यादयो ग्रंथाः अनेके संति एवंविधाः श्रीभद्रबाहुस्वामिनो
वीरात्सप्तत्यधिकवर्षशतेन १७० स्वर्गं जग्मुः ६ श्रीसंभूतिविजयस्य माढरगोत्रस्य अंतेवासी शिष्यः
स्थूलभद्रो गौतमगोत्रीयोऽभूत् तस्य चायं संबंधः श्रीपाटलिपुत्रनगरे नवमनंदमंत्री शकडालः।
तस्य लाछलदे तयोः पुत्रद्वयं स्थूलभद्रः १ सिरियाकश्च २ एकदा वररुचिर्द्विज आगतः स राज्ञानं १६०
प्रत्यहं अष्टोत्तरशतकाव्यैः स्तौति परं मिथ्यात्वित्वात् मंत्री न प्रशंसति तस्य प्रशंसां विना राजा न कि
मपि दत्ते तदा तेन लाछलदे मंत्रिणी आवर्जिता तत्प्रेरणया मंत्रिणा प्रोक्तं सद्यानि काव्यानि

ततो राज्ञा तुष्टेन प्रत्यहं अष्टोत्तरशतदीनारदानं क्रियते स्म ततो मंत्रिणा द्रव्यक्षयं ज्ञात्वा एकादिवा
रसिद्धाः सप्तपुत्रिका अभूवन् तासां श्रावणात् तासां मुखतो साणनात् न नवीनानि काव्यानि इत्यु
क्त्वा निरस्थापितः काशितो राजकुलात् ततो गंगामध्ये यंत्रप्रयोगेण संध्यासमये मुक्तानि दीनाराणि पंचश
तानि गंगायां क्षिप्त्वा प्रभाते वक्ति च गंगादेवी तुष्टा सती ददाति इति ख्यातिं लोकमध्ये करोत् ततो मं
त्रिणा तस्मिन् गुप्तं आनाय्य नृपादिसमक्षं तदीयकूटप्रपंचः प्रकटीकृतः ततो मंत्रिण उपरि द्वेषं व
हन् बालकान् पाठयन् तेषां मुखे इति कथापयति स्म राउ नंद न विजाणइ जं सिगडालु क
रेसि नंदराउ मारी करी सिरियउ रज्ज ठवेसि १ राज्ञा श्रुतं सिरियाकस्य विवाहसामग्री
युद्धसामग्रीमिति ज्ञात्वा रुष्टो राजा कुटुंबसहितं सगडालं मारयिष्यामि ततो मंत्रिण
कुलरक्षणार्थं सिरियाकस्य प्रोक्तं राज्ञः प्रणामसमये त्वया मम मस्तकं छेदनीयं ततो रा
ज्ञ समीपगमने सगडालेन प्रणामः कृतो राजा पराङ्मुखो जातस्ततः सिरियाकेन प्रोक्तं अ
रे यो राज्ञो द्वेषी भवति स इहैव स्वखड्गेन हतः पिता ततो हृष्टेन राज्ञा प्रोक्तं भो सिरियाक त्वं प्र हर्षेण
धानपदाधिकारं स प्राह मम ज्येष्ठभ्राता स्थूलभद्रोऽस्ति तस्याधिकारो दीयतां राज्ञा प्रोक्तं स क्वा
स्ति तेनोक्तं द्वादश १२ वर्षाणि जातानि कोशावेश्यागृहे तिष्ठति द्वादश १२ स्वर्णकोट्यश्च तया स
ह संचिताः राज्ञा स्थूलभद्रमाकार्य प्रोक्तं गृहाण पितुर्मुद्रां ततः स्थूलभद्रो वररुचिकृतप्रपंचेन पितृ
मारणं श्रुत्वा संसारमसारं ज्ञात्वा वैराग्येण स्वयं कृतलोचो रत्नकंबलेन कृतरजोहरणः श्रीसंभू

तिविजयपार्श्वे दीक्षां ललौ ततो राज्ञा सिरियाकस्य मंत्रिमुद्रा दत्ता श्रीस्थूलभद्रो गुरुवदिशात् कोश्या
गृहे चातुर्मासीं स्थितः १ अन्यो द्वितीयः साधुः सिंहगुहायां स्थितः २ तृतीयः सर्पबिलमुखे ३ चतुर्थः
कूपविचालकाष्ठोपरि स्थितः ४ तत्र स्थूलभद्रस्य कावित्वं यथा कालश्च वर्षाकालो मेघा गर्जंति
विद्युत् झात्कारं करोति मोराः केकारवं कुर्वंति बप्पीहापक्षिणः प्रियुप्रियु इति जल्पंति दर्दुरा रटंति
स्वयं चित्रशालायां स्थितः षड्भिरपि रसैः सदा सोऽन्नं कुरुते कोश्या रागवती षोडश शृंगारान् रच
यित्वा सखीभिः सह नृत्यं कुर्वती कामोद्दीपक सरागवचनानि वदंती नाटकमकरोत् परं म
हापुरुषो रोममात्रेन क्षुब्धः प्रत्युत धर्मोपदेशदानेन कोश्या वेश्यां श्राविकामकरोत् चतु
र्मासीपारणे चत्वारोऽपि साधवो गुरुसमीपे गतास्तदा त्रिषु आगतेषु गुरुणा किंचि
दुत्थाय स्वागतं सोऽपि दुःकरकारक इत्युक्तं स्थूलभद्रे आगते तु गुरुणा उत्थाय स्वागतं दुःक
रदुःकरकारक इत्युक्तं ततस्तेषु यः सिंहगुहावासी साधुः सोऽमर्षेण आगामिचतुर्मास्यां स्पर्द्धया
गुरुवारितोऽपि कोश्यागृहे गतस्तां रूपवतीं दृष्ट्वा क्षुब्धः वेश्यया प्रोक्तं धनमानय तेनोक्तं तत्कुत्रा
स्ति कोश्यया प्रोक्तं नेपालदेशे राजा याचकानां सपादलक्षं रत्नकंबलं ददाति तदानीहि ततस्तेन
वर्षाकालेऽपि गत्वा राज्ञः पार्श्वात् रत्नकंबलं प्राप्य आनीय वेश्याया दत्तं तया च स्नानं कृत्वा अंगप्रों
छनं कृत्वा तत्प्रतिबोधार्थं खालमध्ये प्रक्षिप्तं साधुरोह् अहो त्वया अज्ञानेन किं कृतं मया कष्टेन
आनीतं अमूल्यरत्नकंबलं खालमध्ये क्षिप्तं कोश्या प्राह रे मूर्ख त्वया किं कृतं चारित्रं दुर्लभं तत्रय

कर्दमेक्षिप्तं

भर॥यांत॥

लोकसाधकं रत्नकंबलादपि अनंतमूल्यं मम अंगे अशुभमलाविलेषु अशुचिषु निःक्षिप्तं ततः प्रतिबुद्धो
गुरुसमीपे आगत्य मिथ्यादुःकृतं ददे एवं स्वकामिनं रथकारं पुंखपुंखार्पितैर्बाणैः दूरस्थाम्रलुंब्या
नयनकलागर्वितं सर्षपराशिस्थसूच्यग्रपुष्पोपरि नृत्यंती प्राह न दुक्करं अंबयलुंबितोडणं न
दुक्करं सिक्खियनच्चियाए तं दुक्करं तं च महाणुभावो जं सो मुणी पमयवणंमि वुच्छो १ ततो रथका
रोऽपि व्रतं जगृहे अन्यदा द्वादशा १२ वर्षदुर्भिक्षे जाते पाटलीपुरे नगरे अगुणनादिना विस्मृतामेकाद
शांगीं ज्ञात्वा संघेन मिलित्वा दृष्टिवादपठनाय श्रीभद्रबाहुस्वामिसमाहूतिः कृता मुनिद्वयमु
क्तं तत्र गतं परं भद्रबाहुस्वामी प्राह मया सांप्रतं महाप्राणध्यानं प्रारब्धं ततो नागम
नं स्यादिति मुनिद्वयं पश्चात् वलितं पुनः संघेन कथापितं संघादेशं यो न मन्यते तस्य
को दंडः भद्रबाहुस्वामिना प्रोक्तं गच्छबहिः क्रियते परं आगमने ध्यानभंगो भवति ततः
श्रीसंघः शिष्यान् अत्र प्रहिणोतु यथा पाठयामि ततः स्थूलभद्रादि ५०० शिष्याः प्रहिताः गु
रुभिर्वाचनासप्तके दत्ते अन्ये उद्भ्रान्ताः स्थूलभद्रेण दशपूर्वाणि वस्तुद्वयेन ऊनानि पपाठ अन्यदा
यक्षाद्याः सप्तापि साध्व्यः स्थूलभद्रभगिन्यो वंदनार्थं समागता गुरुं वंदित्वा ताः प्रोचुः क्व स्थूलभद्रो गु
रुणा प्रोक्तं गिरिगुहायां पूर्वाणि गुणयन्नस्ति ततो गतास्तत्र आयांतीर्ज्ञात्वा ज्ञानबलेन स्थूलभद्र
श्चमत्कारदर्शनाय सिंहरूपं ऊर्ध्वा छोटं कुर्वंतं कृत्वा स्थितः ताः सिंहं दृष्ट्वा भीता गुरुपार्श्वे गत्वा प्रोचु
स्तत्रास्माकं भ्राता नास्ति सिंहः स्थितोऽस्ति तदा गुरुभिर्ज्ञातं विद्याबलं प्रयुक्तं पुनः प्रोक्तं पुनर्यां

×बांधव×

ताः×

तत्रागतात्रैवास्ति पुनस्तास्तत्रगत्वा भ्रातरं दृष्ट्वा हर्षेण वंदंतेस्म पुनर्यक्षासाध्वीस्वकीयकनि
ष्ठभ्रातृस्थूलभद्राग्रेकथयतिस्म तथाहि अस्माभिः सह सिरियकः प्रव्रजितोभूत् श्रीपर्युषणा
पर्वणि मया उपवासं कारितः स्वर्गंगतः ततोहंतत्प्रायश्चित्तयाचनायश्रीसंघेकायोत्सर्गेस्थिते
शासनदेव्या आगत्य सीमंधरस्वामिसमीपेनीता तन्मुखाच्चूलाद्वयं लात्वा अत्रागता ततस्ताः गु
रून् वंदित्वा स्वस्थानेगताः अन्यदा श्रीस्थूलभद्रः पूर्वमित्रब्राह्मणगृहेगतोभूत् दृष्टं क्रमेमित्रं
सार्थ्याप्रोक्तं दलिद्रत्वेन सिद्धार्थंजगाम स्थू लभद्रेणज्ञानेनज्ञातं अहो अस्यगृहस्य अमु
कस्थानेनिधानंवर्त्तते परंनजानाति ततो निधानस्थानंदर्शयित्वाहस्ता निर्गतः मित्रे
ण आगत्यसार्थवचनेनतत्स्थानंखनि तंमहानिधानंप्रकटीकृतं ब्राह्मणः सु
खीजातः ततः सिंहविकुर्वणंनिधानदर्श नेनअपराधंज्ञात्वा वाचनाग्रहणाय आग
तस्यस्थूलभद्रस्यप्रोक्तं त्वंअयोग्योसि नातःप रंवाचनादानं तथापिश्रीसंघाग्रहेणअन्यस्मै
त्वयानदेया इतिशपथंकारयित्वा अग्रतः सूत्रतोवाचनादत्ता परंनार्थतः एवंविधः श्रीस्थूलभ
द्रोवीरात्पंचदशाधिकद्विशतवर्षैःस्वर्गंगतः ७ ॥ तथाजंबूस्वामीचरमकेवली १ प्रभवस्वामी २
शय्यंभवसूरिः ३ यशोभद्रसूरि ४ संभूतिविजय ४ भद्रबाहु ५ स्थूलभद्र ६ एतेषट्पिश्रुतकेव
लिनः ७ श्रीस्थूलभद्रस्यशिष्यौ आर्यमहागिरिः एलापत्यगोत्रीयः १ द्वितीयः आर्यसुहस्ती
वासिष्ठगोत्रीयः २ तत्रआर्यमहागिरिणा व्यवच्छिन्नेपिजिनकल्पे जिनकल्पतुलनाकृता पुन

र्यस्यआर्यमहागिरेर्गोचर्यांभ्रमतः संस्तवनंश्रेष्ठिगृहेस्थितः श्री आर्यसुहस्तिसूरिः कृतवान् ८
अथश्रीआर्यसुहस्तिसंबंधोयथा ॥ अन्यदादुःकालेजातेधान्यंनलभते लोकोदुःखीजातोरा
जानोपिरंकाजाताः तथापिश्रावकाः साधूनांविशेषतोदानंददुः एकोभिक्षुः साधून् व्रजसिक्षाप्र
तिगृहंलसमानान्दृष्ट्वाप्राह भोमह्यंदीक्षांदत्त साधुभिः प्रोक्तं गुरवोजानंति ततोगुरुसमीपेसमाग
तः गुरुभिर्लाभंविभाव्यदीक्षांदत्वायथेच्छंभोजितः परंविसूचिकयाचारित्रानुमोदनात्मृत्वा
उज्जयिनीनगरेश्रेणिकराजा १ पट्टेकोणिक २ स्तत्पट्टेउदायिराजा ३ तत्पट्टेनवनंदाः १२
तत्पट्टेचंद्रगुप्तः १३ तत्पट्टेबिंदुसारः १४ तत्पट्टे अशोकश्रीः १५ तस्यपुत्रः कुणालः १६ तस्य
पुत्रः संप्रतिनामाराजा १७ भूत् तस्यद्विजात मात्रस्यैवपितामहराज्यंमंत्रिभिर्दत्तं ॥
अनुक्रमेणत्रिखंडभोक्ताजातः एकदारथ यात्रायांआगतंआर्यसुहस्तिसूरिंदृष्ट्वाजा
तिस्मरणज्ञानमुत्पन्नं ततआगत्यगुरूणांपृष्टं हेस्वामिन् अव्यक्तसामायिकस्यकिंफलं त
तोगुरुभिःप्रोक्तं राज्यादिकं ततोविशेषतःप्रत्ययोजातः गुरुभिरपिउपयोगेनज्ञातस्तस्यपूर्व
भवः प्रतिबोधितश्च गृहीतः श्रावकधर्म्मः ततः संप्रतिनृपेनसपादलक्षनवीनप्रासादाःकारि
ताः सपादकोटिबिंबानिकारयित्वाप्रतिष्ठापितानि त्रयोदशसहस्राः जीर्णोद्धाराःकारिताः पंच
नवतिसहस्रपित्तलप्रतिमाःकारिताः सप्तशतानिदानशालासत्राकारशालामंडिता देवगृहप्र
तिमाभिःत्रिखंडमपिपृथ्वीमंडितामकरोत् करोमुक्ता सर्वसाधुवेषधारिस्वकंप्रेषणादि

ना अनार्यदेशानपि साधुविहारयोग्यानकरोत् अनार्यदेशीयनृपान् जैनधर्मरतानकरोत् पुन
र्यं वस्त्रपात्रधान्यदधिदुग्धघृतादिकं प्रासुकं द्रव्यं विक्रयं कुर्वंति तेषां संप्रतिनृपेन ज्ञापितं सो सा
धूनामग्रे सर्वं ढौकनीयं यच्च ते साधवो लांति तन्मे सो देयमेव स च तो च तन्मूल्यं लास्य सद्दितं मम को
ष्ठागारिकः प्रच्छन्नं दास्यति तैस्तथा कृतं साधुभिरपि अशुद्धमपि शुद्धबुध्या गृहीतं संप्रतिनृपः श्री
आर्यसुहस्तिसूरिप्रतिबोधित एवंविधो नृप एवंविधाः श्री आर्यसुहस्तिसूरयश्चारित्रं प्रतिपा
ल्य स्वर्गं जग्मुः ९ श्री आर्यसुहस्तिसूरेर्द्वौ शि ष्यौ कौटिक १ काकंदक २ नामानौ किंभूतौ को
टि० सुस्थितौ सुविदितक्रियानिष्ठौ पुनः किं० कौ० सुप्रतिबुद्धौ सुज्ञाततत्वौ अन्ये पुन आ
चार्या एवमाहुः सुस्थितसुप्रतिबुद्धना मानौ किं० कोटिंशः सूरिमंत्रजापपरिज्ञा
नादिना कौटिकौ पुनः किं० काकंद्यां नगर्यां जातत्वात् काकंदकौ इति विरुदद्वयं विशे
षणद्वयं ११ कौटिककाकंदयोर्व्याघ्रापत्यगोत्र योः शिष्य इंद्रदिन्नः कौशिकगोत्रीयः १२ इंद्र
दिन्नस्य शिष्यो गौतमगोत्रीयो दिन्ननामा जातः १३ दिन्नस्य शिष्यः कौशिकगोत्रीय आर्यसिंहगि
रिर्जातिस्मरो जातः १४ आर्यसिंहगिरेः शिष्यो गौतमगोत्रीयः श्रीवज्रस्वामी १५ श्रीवज्रस्वामिशि
ष्य उत्कौशिकगोत्रीयः श्रीवज्रसेनो जातः १६ वज्रसेनस्य चत्वारः शिष्याः स्थविरा जाताः नागि १६३
ल १ पोमिल २ जयंत ३ तापस ४ एतेभ्यश्चतुर्भ्यश्चतस्रः शाखाः स्वस्वनाम्ना निर्गताः नागिला
१ पोमिला २ जयंती ३ तापसी ४ इति १७ अत्र श्रीसिंहगिरि १ श्रीवज्रस्वामि २ श्रीवज्रसेनसूरीणां

संलग्नः संबंधो यथा॥ श्रीसिंहगिरिगुरोः पार्श्वे सुनंदाख्या भ्राता आर्यशमितो तद्भर्त्ता च धनगिरिर्द्वौ
अपि दीक्षां जगृहतुः सुनंदा च तदा तुंबवनग्रामे गर्भवती मुक्ताभूत् जातः पुत्रो जन्मसमय एव
पितुर्दीक्षां श्रुत्वा जातिस्मरणज्ञानं प्राप ततो मातुरुद्वेगार्थं निरंतरं रोदिति चारित्राभिलाषी जातः मा
ता उद्विग्ना जाता सती तिष्ठति जानाति त्यजामि क्वचित् ददामि कस्मैचित् तस्मिन्प्रस्तावे श्रीसिंहगि
रिसूरयः समेताः धनगिरिर्यदा विहर्तुं निर्गतस्तदा गुरुभिर्ज्ञात्वा प्रोक्तं अद्य गोचरीगमने सचि
त्ता १ अचित्ता २ वा या भिक्षा लभ्यते सा ग्राह्या त तो धनगिरिर्गतः सुनंदागृहे सुनंदा प्राह तव पु
त्रेण संतापिताऽहं गृहाण आत्मीयं पुत्रं सा धुना प्रोक्तं अद्य त्वं ददासि परं पश्चात् दुःखं क
रिष्यसि तया प्रोक्तं नाहं करिष्यामि ततो धनगिरिर्बंधुजनान् साक्षिणः कृत्वा पु
त्रं लात्वा झोलिकामध्ये क्षिप्त्वा समेतो गुरुपार्श्वे गु रुणा च वज्रवद्भारत्वात् वज्र इति नाम दत्तं ततो
न स रोदिति शय्यातरश्राविकास्य पालनार्थं दत्तः स च साध्वीशालायां पालनस्थः षण्मासवयाः साध्वी
भिः पठ्यमानानि एकादशांगानि पपाठ ततः स पुत्रं त्रिवार्षिकं जातं याचते राजसमक्षं संघो मेलि
तः राजाज्ञया गुरुभिर्मुखवस्त्रिकारजोहरणादीनि साधूपकरणानि बालस्याग्रे मुक्तानि मात्रा
पुत्र सुखभक्षिका कंदुक बालक्रीडनकानि मुक्तानि गुरुणा प्रोक्तं रजोहरणं गृहाण मात्रा प्रोक्तं
सुखभक्षिकादीनि ततो बालेन चारित्रं वांछता गृहीतं रजोहरणं मस्तके धृत्वा नृत्यति स्म सन्नो वाद
ः अष्टवर्षं ति गृहीता दीक्षा पश्चान्मात्रापि दीक्षा गृहीता पुनर्यस्य दुर्वलत्वमित्रैः जृंभकदेवैर्महाव

ष्ट्यां उज्जयिनीमार्गे वृष्टौ निवृत्तायां कूष्मांडफलभिक्षायां गृह्यस्वेत्युपदीयमानायां अनिमिषत्वादिना देव
पिंडोयमिति निश्चित्य भिक्षाया अग्रहणे तुष्टैर्वैक्रियलब्धिर्दत्ता पुनर्यस्य ग्रीष्मकाले घृतपूरैः परीक्षां
कृत्वा आकाशगामिनी दत्ता पुनरन्यदा वज्रमुनिर्गुरुषु बहिर्भूमौ गतेषु साधुषु च विहर्तुं गतेषु साधु
संस्तारकवेष्टिका एकीकृत्य स्वयं विचाले स्थित्वा शिष्याणामिव एकादशानामंगानां पृथक् २ वाचनां
दातुमारेभे गुरुभिर्द्वारे आगत्य स्थित्वा च सर्वं श्रुतं ततः साधूनां तस्यातिशयज्ञापनार्थं अन्यदा ग्रामांत
रं गच्छद्भिर्गुरुभिः प्रोक्तं भो शिष्या भवतां वाचना- चार्यो वज्रोस्ति इत्युक्त्वा चलिताः पश्चाद्वज्रेण ते
षां विनीतानां तथा वाचना दत्ता यथाऽनेकवा चनाभिः पठ्यते तथा एकैकया वाचनया पठितं
यदि गुरवः कियंतं कालं विलंबंते तदा वरं यथाऽस्माकं श्रुतस्कंधः पूर्णो भवति ततः
आगते गुरुभिः पृष्टे भो भवतां सुखेन वाच नाजाता तैः प्रोक्तं अतः परमस्माकं वाचनाचा
र्यो वज्र एव भवतु पश्चाद्गुरुणा स्वयमपि वज्रा यारंगवाचना दत्ता ततो वज्रस्वामिना दशपु
रादुज्जयिन्यां गत्वा गुर्वाज्ञया श्रीभद्रगुप्ताचार्यसमीपे दशपूर्वाणि अधीतानि तत आचार्यपदे
स्थापितो गतः पाटलीपुरे रूपेण मा लोकानां मनःक्षोभो भवतु इति व्याख्याने रूपं संक्षिप्य सामा
न्यं कृत्वा राजादीनामग्रे देशना दत्ता द्वितीयदिने साधुभिर्लोकमुखात् श्रुतं अहो गुरूणां देश
ना अमृतश्राविणी परं न तादृशं रूपं गुरुभिः साधुमुखात् श्रुत्वा सहस्रदलस्वर्णकमलोपरि
स्थित्वा स्वाभाविकदिव्यरूपेण धर्मोपदेशो दत्तः सर्वेपि लोका विस्मयं प्राप्ताः पुनरपि यो धनश्रे १६४

ष्ठिपुत्री रुक्मिणी साध्वीभ्यः पूर्वं प्रभुगुणश्रवणे नजातानुरागा पित्रापि धनकोटिसहितां दीयमानां प्रति
बोध्य प्राव्राजयत् पुनर्येन वज्रस्वामिना पदानुसारिलब्ध्या श्रीआचारांगमहापरिज्ञाऽध्ययनाद्यस्या मा
नुषोत्तरपर्वतं यावद्गमनविषयः सा आकाशगामिनी विद्या उद्धृता पुनर्योऽन्यदा उत्तरस्यां दिशि दु
र्भिक्षे जाते श्रीसंघं पट्टे संस्थाप्य पानीयग्रहणार्थं गतं दत्तनामानं शय्यातरमपि लोचकरणेन साधर्मि
को भवतामिति वदंतं पटे आरोप्य आकाशे स्थित एव स्थाने २ मार्गे चैत्यानि वंदमानो महानसीं पुरीं
प्रापयामास तत्र सुभिक्षं परं बौद्धो राजा श्रीप र्युषणापर्वणि समागते बौद्धश्रावकवैरित्वेन रा
ज्ञा जैनचैत्येषु पुष्पाणि निषिद्धानि संघेन वज्र स्वामी विज्ञप्तो मा चिंता क्रियतां इत्युक्त्वा आका
शगामिनीविद्यया आकाशे उत्पत्य माहेश्व "लक्ष्मी ९६" री पुर्यां हुताशननामदेवस्य वने पितृमित्र
मारामिकं तडित्नामानं पुष्पमेलनाय सावध ानीकृत्य हिमवगिरौ प्राप्तः तत्र श्रीदेव्या वंदि
तस्तदानीतया देवपूजार्थं पूर्वं लक्षदलकमल मानीतमासीत्तद्देवतया दत्तं तद्गृहीत्वा पुनः प
श्चाद्वलमानेन हुताशनवनादपि विंशति पुष्पलक्षाणि लात्वा आकाशे विमानमारूढः प्राकृतमित्रजृं
भकदेवकृतगीतगानवादित्रादिमहोत्सवः आगत्य पुष्पलक्षाणि श्राद्धानां दत्वा जैनचैत्येषु महि
मामकारयत् हर्षितः संघः चमत्कृतो राजा जातो जैनश्च पुनरन्यदा दक्षिणापथे विहरन् श्रीवज्र
स्वामी श्लेष्मणि जाते साधूनामग्रे कथयत् अद्य गोचरीगमने शुंठिरानेया तैरानीता गुरुभिः कर्णेप
रि धृता परं विस्मृत्या न भक्षिता परं प्रतिक्रमणे कर्णप्रतिलेखने पतिता गुरुभिर्विचारितं मम दशपूर्व

वज्ररोगे

धरस्य कापि स्मृतिः परमायुरन्तं ततोऽनशनं कर्तुं स्वकीयमायुरल्पं ज्ञात्वा स्वशिष्यस्य वज्रसेनस्य
प्रोक्तं त्वं सोपारकपत्तने याहीति कदा सुभिक्षं स्यादिति पृष्टे यस्मिन् दिने लक्षमूल्येन एकां हंडिकां पच्य
मानां द्रक्ष्यसि तद्दिनादग्रिमदिने सुभिक्षं भविष्यति इत्युक्त्वा मुक्तो वज्रसेनः पश्चात् निजपार्श्वस्थितान् सा
धून् सिद्धामंत्रसमानीतान् विद्यापिंडेन कियद्दिनानि निर्वाहं कृत्वा संविग्नान् पंचशतमितान् साधून् आदाय
अनशनार्थं वार्यमाणमप्यतिष्ठंतं एकं लघुक्षुल्लकं मोचयित्वाऽऽचार्यः पर्वतमारोहत् क्षुल्लकस्तमा
त्मगुरूणामप्रीतिः पश्चादागत्य पर्वतमूल एव तप्त शिलायां सुप्तोऽनशनं कृत्वा सुकुमालशरीरत्वा
त्तत्क्षणमेव शुभध्यानतः स्वर्गं जगाम देवैस्त स्य महिमाने क्रियमाणे ज्ञात्वा साधवो विशेष
तो धर्मे स्थिरा जाताः परं मिथ्यादृष्टिदेवामा द्रकादिभिर्निमंत्रणेन अनशनेऽकृतेऽपस
गिताः ततस्तत्रत्यां अप्रीतिं ज्ञात्वा ततः स्था नादुत्थाय अन्यत्र आसन्नपर्वते अनशनं कृ
त्वा शुभध्यानेन सर्वेऽपि वज्रस्वामिप्रमुखाः स्वर्गं ज ग्मुः ततः इंद्रेण रथसहितेन गिरिं प्रदक्षिणीकृ
त्य वंदितास्तेन तस्य पर्वतस्य उपरि रथचक्ररेखापतनात् रथावर्त्त इति नाम जातं तत्रस्था वृक्षा अ
पि साधूनां नमनात् अद्यापि नम्रीभूता इव तिष्ठंति दृश्यंते च तथैव तस्मिन् स्वर्गगते दशमपूर्वं च
तुर्थं अर्धनाराचं नाम संहननं च विच्छिन्नं तथा तदनु श्रीवज्रसेनः सोपारके जिनदत्तश्रावकस्तस्य
भार्या ईश्वरी तद्द्वयमपि पूर्वं श्रीवज्रस्वामिना प्रतिबोधितमासीत् तस्य गृहे भिक्षार्थं गतः तस्मिन्नव
सरे ईश्वरी श्राविकया चतुःपुत्रयुतया धान्याभावात् लक्षमूल्येन धान्यमानीय हंडिका पाका

र्थं अग्नौ स्थापितास्ति विचारितं मध्ये विषं क्षिप्त्वा धान्यभोजनेन अनशनं कृत्वा सपुत्रा अहं मरिष्या
मि वज्रसेनेन विषं क्षिपंती दृष्टा पृष्टं किमिति मरणोपायः क्रियते तया प्रोक्तं धनं बहु वर्त्तते परं
धान्यं नगरमध्ये न लभ्यते ततो वज्रसेनेन प्रोक्तं श्रीगुरुणा मम अभिज्ञानं लक्षमूल्येन धान्यहंडि
कापाकरूपं प्रोक्तं वर्त्तते आगामिदिने सुभिक्षं भावि तस्या अपि श्रीगुरुवचनस्य आस्था ततस्त
या कथितं यद्येवं जातं तदा मम पुत्राश्चत्वारो वर्त्तंते ते भवतां पार्श्वे दीक्षां गृह्णीष्यंतीति प्र
तिज्ञा कृता ततो प्रादशप्रहरैः पूर्वं उर्वातेन इर तटे निःक्षिप्तानि युगंधरीवाहनानि सुवातेन आ
गतानि सुभिक्षं जातं युगमुहूर्ते ततो युगंधरी नाम जातं ततस्तया चत्वारोऽपि निजपुत्राः ना
गेंद्र१ चंद्र२ निर्वृति३ विद्याधर४ नामानस्ते भ्यो दीक्षा दापिताः पश्चात् स्वयमपि मातापि
तरौ दीक्षां ललतुः ते चत्वारोऽपि जगत्ख्याताः सूर यो जाताः स्वस्वनाम्ना चतस्रः शाखा जाताः तत्राद्या
पि दृश्यते इति श्रीसिंहगिरि१ वज्रस्वामि२ वज्र सेन३ संबंधः २३ एवं श्रीमहागिरि१ श्रीसुहस्ति
सूरि२ श्रीगुणसुंदरसूरि३ श्रीश्यामाचार्य४ स्कंदिलाचार्य५ रेवतीमित्र६ श्रीधर्म७ श्रीभद्रगुप्त८
श्रीगुप्त९ श्रीवज्रस्वामि१० नामानः युगप्रधानाः दशपूर्वधरा जाताः तथा पूर्वं तु संक्षेपवाचनया
स्थविरावली उक्ता॥ सांप्रतं विस्तरवाचनया स्थविरावलीमाह॥ तत्र सूत्रं॥ वित्थरवायणाए
पुण अज्जजसभद्दाउ पुरउ थेरावली एवं पलोइज्जइ॥ अत्रालापके इदं रहस्यं विस्तरवाचनायां
बह्वो वाचनाभेदा लेखकदोषेण जाता स्तत्र स्थविराणां शाखाकुलानि च प्रायः सांप्रतं नाव

त्थुयंते नामांतरतिरोहितानि वा लक्ष्यंते अतो निर्णयः कर्तुं न पार्यते पावे उजारवाणुक्कमित्तत्रा
दर्शी कोडुंबाणीति इह प्रोक्ते क्वचित् कंठधारीति तथा क्वचित् उडुपत्रिका इति क्वचित् सुवर्णप
त्रिका इति एवं कुलेष्वपि क्वचित् उद्देहगच्छ तद्यंतिदाः क्वचित् अद्द उहंगच्छ तद्यंतिदाः तस्माद्
नवकं कृता एव प्रमाणं मा कृत्वमिति तत्र कुलं एकाचार्यसंततिः गणस्त्वेकस्य वाचनाचार्यस्य संततौ
पुरुषविशेषाणां समूहः अथवा एकवाचनाचार्य यतिसमुदायो गणः शाखास्तु विवक्षि
ताद्यपुरुषसंताना यथा वैरस्वामिनाम्ना वैरा शाखा कुलानि तु तच्छिष्याणां पृथग्वंशा
: यथा चांद्रं कुलं नागेंद्रकुलमित्यादि अथवा शाखा इति अत्र गच्छ इति अप्यलाभि न पतंति येन ज्ञा
तेन उग्रतो अथवा एकवाचनाचार्य ... शिष्याः सह गच्छाः गुरुकुलपारतंत्र्यं
ति प्रस्तुत उत्तासयोतीति अत एव ... स्थानाः ॥ स्थविरावली सूत्रपाठो यथा ॥ थेर
स्स णं अज्ज जसभद्दस्स तुंगियायणसगुत्तस्स इमे दो थेरा अंतेवासी अहावच्चा अभिन्नाया हुत्था
तं० थेरे अज्जसंभूइविजए माढरसगुत्ते १ थेरे अज्जभद्दबाहू पाईणसगुत्ते २ थेरस्स णं अज्जभद्दबा
हुस्स पाईणसगुत्तस्स इमे चत्तारि थेरा अं० तं० थेरे गोदासे १ थेरे अग्गिदत्ते २ थेरे जन्नदत्ते ३ थेरे सो
मदत्ते ४ कासवगुत्तेणं थेरेहिंतो गोदासेहिंतो कासवगुत्तेहिंतो इत्थ णं गोदासे नामं गणे निग्गए तस्स
णं इमाउ चत्तारि साहाउ एवमाहिज्जंति तं० तामलित्तिया १ कोडीवरिसीया २ पुंडवद्धणीया ३ दासीख
ब्बडिया ४ थेरस्स णं अज्जसंभूइविजयस्स माढरसगुत्तस्स इमे दुवालस थेरा अं० तं० नंदणभद्दे १ १६६

उवनंदभद्दे २ तह तीसभद्दे ३ जसभद्दे ४ थेरे य सुमिणभद्दे ५ मणिभद्दे ६ पुण्णभद्दे य ७ १ थेरे अ थू
लभद्दे ८ उज्जुमई ९ जंबुनामधिज्जे य १० थेरे य दीहभद्दे ११ थेरे तह पंडुभद्दे य १२ २ थेरस्स णं
अज्जसंभूइविजयस्स माढरसगुत्तस्स इमाओ सत्त अंतेवासिणीओ अहावच्चा अभिन्नाया हुत्था
तं० जक्खा १ जक्खदिन्ना २ भूया ३ तह चेव भूयदिन्ना य ४ सेणा ५ वेणा ६ रेणा ७ भइणीउ थू
लभद्दस्स १ थेरस्स णं अज्जथूलभद्दस्स गोयमसगुत्तस्स इमे दो थेरा अं० तं० थेरे अज्जमहागिरी
एलावच्चसगुत्ते १ थेरे अज्जसुहत्थी वासिट्ठस गुत्ते थेरस्स णं अज्जमहागिरिस्स एलावच्चसगु
त्तस्स इमे अट्ठ थेरा अं० तं० थेरे उत्तरे थेरे बलिस्सहे २ थेरे धणड्ढे ३ थेरे सिरिड्ढे ४ थेरे
कोडिन्ने ५ नागे ६ नागमित्ते ७ थेरे छलुए रोहगुत्ते कोसियगुत्तेणं ८ थेरेहिंतो रोहगुत्ते
हिंतो कोसियगुत्तेहिंतो एत्थ णं तेरासिया निग्गया थेरेहिंतो उत्तरबलिस्सहेहिंतो तत्थ णं
उत्तरबलिस्सहे नामं गणे निग्गए तस्स णं इमाउ चत्तारि साहाउ एवमाहिज्जंति तं० कोसंबिया १
सुत्तिवत्तिया २ कोडुंबाणी ३ चंदनागरी ४ थेरस्स णं अज्जसुहत्थिस्स वासिट्ठसगुत्तस्स इमे दु
वालस थेरा अं० तं० थेरे अज्जरोहणे १ जसभद्दे २ मेहे ३ गणी य कामिड्ढी ४ सुट्ठिय ५ सुप्पडिबु
द्धे ६ रक्खिय ७ तह रोहगुत्ते य ८ इसिगुत्ते ९ सिरिगुत्ते १० गणी य बंभे ११ गणी य तह सोमे १२ द
स दो य गणहरा खलु एए सीसा सुहत्थिस्स २ थेरेहिंतो णं अज्जरोहणेहिंतो कासवगुत्तेहिंतो
तत्थ णं उद्देहगणे नामं गणे निग्गए तस्सिमाउ चत्तारि साहाउ निग्गयाउ छच्च कुलाइं एवमा

८
कल्पलता

हिज्जंति सेकिंतं साहाओ सेकिंतं कुलाइं एवमाहिज्जंति तं उदुंबरिज्जिया १ मासपूरिया २ मइपत्ति
याओ ३ पुन्नपत्तियाओ ४ सेतं साहाओ सेकिंतं कुलाइं एवमाहिज्जंति तं० पढमं च नागभूयं १ बीयं पु
ण सोमभूइयं होइ २ अह उल्लगच्छ तइयं ३ चउत्थयं हत्थलिज्जं तु ४ पंचमगं नंदिज्जं ५ छट्ठं पुण
पारिहासयं होइ ६ उद्देहगणस्सेए छच्च कुला हुंति नायव्वा २ थेरेहिंतो णं सिरिगुत्तेहिंतो हारिय
गुत्तेहिंतो इत्थ णं चारणगणे नामं गणे निग्गए तस्स णं इमाओ चत्तारि साहाओ सत्त य कुलाइं एवमा
हिज्जंति सेकिंतं साहाओ एवमाहिज्जंति तं जहा हारियमालागारी १ संकासिया २ गवेधुया ३
विज्जनागरी ४ सेतं साहाओ सेकिंतं कुलाइं एव माहिज्जंति तं० पढमित्थ वत्थलिज्जं १ बीयं
पुण पीइधम्मगं होइ तइयं पुण हालिज्जं च उत्थगं पूसमित्तिज्जं ४ पंचमगं मालिज्जं ५
छट्ठं पुण अज्जवेडयं होइ ६ सत्तमगं कण्हसहं ७ सत्त कुला चारणगणस्स २ थेरेहिंतो
भद्दजसेहिंतो भारद्दायसगुत्तेहिंतो इत्थ णं उ डुवाडियगणे नामं गणे निग्गए तस्स णं इमाओ
चत्तारि साहाओ तिन्नि कुलाइं एवमाहिज्जंति सेकिंतं साहाओ एवमाहिज्जंति तं० चंपिज्जिया १ भ
द्दिया २ काकंदिया ३ मेहलिज्जिया ४ सेतं साहाओ सेकिंतं कुलाइं एवमाहिज्जंति तं जहा भद्दज
सियं १ भद्दगुत्तियं २ तइयं च होइ जसभद्दं ३ एयाइं उडुवाडियगणस्स तिन्नेव य कुलाइं १ १६७
थेरेहिंतो कामिड्ढीहिंतो कोडालसगुत्तेहिंतो इत्थ णं वेसवाडियगणे नामं गणे निग्गए तस्स णं इमाओ
चत्तारि साहाओ चत्तारि कुलाइं एवमाहिज्जंति सेकिंतं साहाओ २ एवमाहिज्जंति तं० सावत्थिया १

रज्जपालिया २ अंतरिज्जिया ३ खेमलिज्जिया ४ सेतं साहाओ सेकिंतं कुलाइं २ एवमाहिज्जंति तं०
गणियं १ मेहियं २ कामिड्ढियं च ३ तह होइ इंदपुरगं च ४ एयाइं वेसवाडियगणस्स चत्तारि कुलयाइं
१ थेरेहिंतो णं इसिगुत्तेहिंतो काकंदएहिंतो वासिट्ठसगुत्तेहिंतो इत्थ णं माणवगणे नामं गणे निग्गए
तस्स णं इमाओ चत्तारि साहाओ तिन्नि कुलाइं एवमाहिज्जंति सेकिंतं साहाओ एवमाहिज्जंति तं कास
विज्जिया १ गोयमिज्जिया २ वासिट्ठिया ३ सोरट्ठिया ४ सेतं साहाओ सेकिंतं कुलाइं एवमाहिज्जंति तं०
इसिगुत्तियत्थ पढमं १ बिइयं इसिदत्तियं २ मुणेयव्वं तइयं च अभिजयंतं ३ तिन्नि कुला माणवग
णस्स १ थेरेहिंतो सुट्ठियसुप्पडिबुद्धेहिंतो कोडियकाकंदएहिंतो वग्घावच्चसगुत्तेहिंतो इ
त्थ णं कोडियगणे नामं गणे निग्गए तस्स णं इमाओ चत्तारि साहाओ चत्तारि कुलाइं एवमा
हिज्जंति सेकिंतं साहाओ २ एवमाहिज्जंति तं० उच्चानागरि १ विज्जाहरी य २ वइरी य ३ मज्झि
मिल्ला य ४ कोडियगणस्स एया हवंति चत्तारि साहाओ १ सेकिंतं कुलाइं एवमाहिज्जंति तं० प
ढमित्थ बंभलिज्जं १ बीयं नामेण वत्थलिज्जं तु २ तइयं पुण वाणिज्जं ३ चउत्थयं पण्हवाहणयं ४
१ थेराणं सुट्ठियसुप्पडिबुद्धाणं कोडियकाकंदगाणं वग्घावच्चसगुत्ताणं इमे पंच थेरा अंता। थे
रे अज्जइंददिन्ने १ पियगंथे २ थेरे विज्जाहरगोवाले कासवगुत्ते णं ३ थेरे इसिदिन्ने ४ थेरे अरिहद
त्ते ५ थेरेहिंतो णं पियगंथेहिंतो इत्थ णं मज्झिमा साहा निग्गया थेरेहिंतो विज्जाहरगोवालेहिंतो इ
त्थ णं विज्जाहरी साहा निग्गया थेरस्स णं अज्जइंददिन्नस्स कासवगुत्तस्स अज्जदिन्ने थेरे अंते

वासी गोयमसगुत्ते १ थेरस्स णं अज्जदिन्नस्स गोयमसगुत्तस्स इमे दो थेरा अंतेवासी अहावच्चा अभि
ण्णाया हुत्था तं० थेरे अज्जसंतिसेणिए माढरसगुत्ते १ थेरे अज्जसीहगिरी जाइस्सरे कोसियगुत्ते २ थेरे
हिंतो णं अज्जसंतिसेणिएहिंतो माढरसगुत्तेहिंतो इत्थ णं उच्चनागरी साहा निग्गया २ थेरस्स णं अज्ज
संतिसेणियस्स माढरसगुत्तस्स इमे चत्तारि थेरा अंतेवासी० तं० १००० थेरे अज्जसेणिए १ अज्जताव
से २ अज्जकुबेरे ३ अज्जइसिपालिए ४ थेरेहिंतो णं अज्जसेणिएहिंतो इत्थ णं अज्जसेणिया साहा
निग्गया १ थेरेहिंतो णं अज्जतावसेहिंतो इत्थ णं अज्जतावसी साहा निग्गया २ थेरेहिंतो णं अ
ज्जकुबेरेहिंतो इत्थ णं अज्जकुबेरा साहा निग्ग या ३ थेरेहिंतो णं अज्जइसिपालिएहिंतो इत्थ
णं अज्जइसिपालिया साहा निग्गया ४ थेर स्स अज्जसीहगिरिस्स जाइसरस्स कोसि
यगुत्तस्स इमे चत्तारि थेरा अंत० तं० थेरे अज्ज धणगिरी १ थेरे अज्जवइरे २ थेरे अज्जसमिए ३
थेरे अरिहदिन्ने ४ थेरेहिंतो णं अज्जसमिएहिंतो गोयमसगुत्तेहिंतो इत्थ णं बंभदीविया साहा
निग्गया १ थेरेहिंतो अज्जवइरेहिंतो गोयमसगुत्तेहिंतो इत्थ णं अज्जवइरी साहा निग्गया १ थेरस्स
णं अज्जवइरस्स गोयमसगुत्तस्स इमे तिन्नि थेरा अंते० तं० थेरे अज्जवइरसेणिए १ थेरे अज्जपउ
मे २ थेरे अज्जरहे ३ थेरेहिंतो णं अज्जवइरसेणिएहिंतो इत्थ णं अज्जनाइली साहा निग्गया १ थेरे
हिंतो णं अज्जपउमेहिंतो इत्थ णं अज्जपउमा साहा निग्गया थेरेहिंतो णं अज्जरहेहिंतो इत्थ णं
अज्जजयंती साहा निग्गया थेरस्स अज्जरहस्स वच्छसगुत्तस्स अज्जपूसगिरी थेरे अंतेवासी को

सियगुत्ते थेरस्स णं अज्जपूसगिरिस्स कोसियगुत्तस्स अज्जफग्गुमित्ते थेरे अंतेवासी गोयमसगुत्ते
थेरस्स णं अज्जफग्गुमित्तस्स गोयमसगुत्तस्स थेरे अज्जधणगिरी थेरे अंते० वासिट्ठगुत्ते थेरस्स णं
अज्जधणगिरिस्स वासिट्ठगुत्तस्स अज्जसिवभूई थेरे अंतेवासी कुच्छसगुत्ते थेरस्स णं अज्जसि
वभूइस्स कुच्छसगुत्तस्स अज्जभद्दे थेरे अंतेवासी कासवगुत्ते थेरस्स णं अज्जभद्दस्स कासव
गुत्तस्स अज्जनक्खत्ते थेरे अंतेवासी कासवगुत्ते थेरस्स णं अज्जनक्खत्तस्स कासवगुत्तस्स अज्ज
रक्खे थेरे अंतेवासी कासवगुत्ते थेरस्स णं अ ज्जरक्खस्स कासवगुत्तस्स अज्जनागे थेरे अंते
वासी गोयमसगुत्ते थेरस्स णं अज्जनागस्स गोयमगुत्तस्स अज्जजेहिले थेरे अंतेवासी वा
सिट्ठगुत्ते थेरस्स णं अज्जजेहिलस्स वासि ट्ठगुत्तस्स अज्जविण्हू थेरे अंतेवासी माढ
रसगुत्ते थेरस्स णं अज्जविण्हुस्स माढरसगु त्तस्स अज्जकालए थेरे अंते० गोयमगुत्ते थे
रस्स णं अज्जकालगस्स गोयमगुत्तस्स इमे दु वे थेरा अंते० तं० थेरे अज्जसंपलिए १ थेरे अज्ज
भद्दे २ एएसिं दुण्हवि थेराणं गोयमसगुत्ताणं अज्जवुड्ढे थेरे अंतेवासी गोयमसगुत्ते थेरस्स णं
अज्जवुड्ढस्स गोयमसगुत्तस्स अज्जसंघपालिए अंतेवासी गोयमसगुत्ते थेरस्स णं अज्जसंघ
पालियस्स गोयमसगुत्तस्स अज्जहत्थी अंतेवासी कासवगुत्ते थेरस्स णं अज्जहत्थिस्स कासव
गुत्तस्स अज्जधम्मे थेरे अंतेवासी सावयगुत्ते थेरस्स अज्जधम्मस्स सावयगुत्तस्स अज्जसीहे
अंतेवासी कासवगुत्ते थेरस्स णं अज्जसीहस्स कासवगुत्तस्स अज्जधम्मे थेरे अंतेवासी कास

वगुत्तं थेरस्स अज्जधम्मस्स कासवगुत्तस्स अज्जसंडिल्ले थेरे अंतेवासी॥ वंदामि फग्गुमित्तं गोयमं धण
गिरिं च वासिट्ठं कुच्छं सिवभूइं पि अ कोसियं दुज्जंतकण्हे य १ ते वंदिऊण सिरसा भद्दं वंदामि कासव
सगुत्तं नक्खं कासवगुत्तं रक्खं पि य कासवं वंदे २ वंदामि अज्जनागं गोयमं जेहिलं च वासिट्ठं विण्हुं
माढरसगुत्तं कालगमवि गोयमं वंदे ३ गोयमगुत्तकुमारं संपलियं तह य भद्दयं वंदे थेरं च अज्जवु
ड्ढं गोयमगुत्तं नमंसामि ४ तं वंदिऊण सिरसा थिरसत्तचरित्तनाणसंपन्नं थेरं च संघवालिय गोय
मगुत्तं पणिवयामि ५ वंदामि अज्जहत्थिं च का सवं खंतिसागरं धीरं गिम्हाण पढममासे कालग
यं चेव सुद्धस्स ६ वंदामि अज्जधम्मं च सुव्वयं सीललद्धिसंपन्नं जस्स निक्खमणे देवो छत्तं
वरमुत्तमं वहइ ७ हत्थं कासवगुत्तं धम्मं सिवसाहगं पणिवयामि सीहं कासवगु
त्तं धम्मं पि य कासवं वंदे ८ तं वंदिऊण सिर सा थिरसत्तचरित्तनाणसंपन्नं थेरं च अज्ज
जंबुं गोयमगुत्तं नमंसामि ९ मिउमद्दवसंप न्नं उवउत्तं नाणदंसणचरित्ते थेरं च नंदियं
पि य कासवगुत्तं पणिवयामि १० तत्तो य थिरचरित्तं उत्तमसम्मत्तसत्तसंजुत्तं देसिगणिखमास
मणं माढरगुत्तं नमंसामि ११ तत्तो अणुओगधरं धीरं मइसागरं महासत्तं थिरगुत्तखमासमणं
वच्छसगुत्तं पणिवयामि १२ तत्तो य नाणदंसणचरित्ततवसुट्ठियं गुणसमिद्धं थेरं कुमारधम्मं १६९
वंदामि गणिं गुणोववेयं १३ सुत्तत्थरयणभरिए खमदममद्दवगुणेहिं संपन्ने देवड्ढिखमासम
णे कासवगुत्ते पणिवयामि १४ इति स्थविरावलीसूत्रं संपूर्णम्॥ अथ विस्तरस्थविरावल्या

विवरणं क्रियते॥ तत्र श्रीयशोभद्रसूरितः कति स्थविराः १ कति गणाः २ कति शाखाः ३ कति कुलानि जज्ञि
रे तत्सर्वं सूत्रपाठानुसारेण कथ्यते यशोभद्रः स्थविरः तस्य द्वौ शिष्यौ भद्रबाहुः १ संभूतिविजयः २ जा
ताः स्थविराः ३ भद्रबाहुस्वामिनः चत्वारः शिष्याः गोदासो १ अग्निदत्तो २ यज्ञदत्तः ३ सोमदत्तश्च ४ स्थ
विराः ७ गोदासतो गोदासनामा गणो निर्गतः गणः १ गोदासगणस्य च तस्रः शाखा निर्गताः १ तामलित्ति
या १ कोडिवरिसिया २ पोंडवद्धणीया ३ दासीखब्बडिया ४ शाखा ४ संभूतिविजयस्य द्वादश शिष्याः
जाताः नंदणभद्द १ उपनंद २ तीसभद्द ३ जसभद्द ४ सुभद्द ५ गणिभद्द ६ पुन्नभद्द ७ स्थूलभद्द ८
उज्जुमई ९ जंबू १० दीहभद्द ११ पंडुभद्द १२ जाताः स्थविराः एकोनविंशतिः १९ पुनः संभूतिविज
यस्य सप्त अंतेवासिन्यः साध्व्यो जाता जक्खा १ जक्खदिन्ना २ भूया ३ भूयदिन्ना ४ सेणा
स्थाने वजेउ आदर्शेषु एणा ५ इत्यपि वेणा ६ रेणा ७ च एताः स्थूलभद्रस्य भगिन्यः स्थूलभद्रस्य द्वौ
शिष्यौ अज्जमहागिरी १ सुहत्थी २ एवं स्थविराः एकविंशतिः २१ श्रीआर्यमहागिरेरष्टौ शिष्याः॥
उत्तर १ बलिस्सह २ धणड्ढ ३ सिरिड्ढ ४ कोडिन्न ५ नाग ६ नागमित्त ७ छलुयरोहगुत्त ८ एवं स्थविराः एको
नत्रिंशत् २९ अत्र छलुयरोहगुप्तात् त्रैराशिकमतं निर्गतं कथं तदुच्यते श्रीवीरात् चतुश्चत्वारिंशद
धिकपंचशतवर्षेषु व्यतीतेषु अंतरंजिकायां नगर्यां श्रीरोहगुप्ताचार्यस्य श्रीगुप्तः शिष्यो वर्त्तते त
स्मिन् प्रस्तावे एको वादी पोट्टसालनामा परिव्राजकः समागतः परं कीदृशः वृश्चिक १ सर्प २ मूषक ३
मृगी ४ वराही ५ काक ६ शकुन ७ विद्यासिद्ध उदरं मे स्फुटतीति बद्धोदरपट्टः पटहं नगरमध्ये वाद

यामास योमया सह वादं करोति स पटहं स्पृशतु ततो गुप्तेन छिक्तो ऽहं वादं करिष्यामि ततो गुरुणा त
दीयविद्याजेत्रविद्या मयूरी१ नकुली२ बिडाली३ व्याघ्री४ सिंही५ उलूकी६ होलावकी७ एवमुख्या दत्ता
: पुनः प्रोक्तं अन्यविद्याप्रयुंजने इदं मया अभिमंत्रितं रजोहरणं भ्रामय त्वमजेयो भविष्यसि ततो गु
प्तेन बलश्रीनामराजसभायां तेन वादिना समं वादः कृतः परं न जीयते स्म वादिना जीवाजीवौ स्थापि
तौ ततो गुप्तेन दवरकस्यावर्त्तदानेन मुमोक्षितस्या चलाचलो दर्शितः प्रोक्तं जीवो१ ऽजीवो२ नोजीव
श्च३ एवं राशित्रयं स्थापयित्वा तं निर्जित्य जयं लब्ध्वा महामहोत्सवेन गुरुसमीपे समागतो गु
रुणा प्रोक्तं त्वया वादी जितः श्रीजिनशासनस्य उद्दीपना च कृता तथापि परं नोजीवो नास्ति ततः
संघसमक्षं मिथ्यादुःकृतं देहि स च अभिमानी न ददाति उवाच च नोजीवोप्यस्ति कथं मि
थ्यादुःकृतं ददामि ततो गुरुणा समं षण्मासान् वादः कृतः ततः कुत्रिकापणे गत्वा जीवा१ ऽजीव
२ नोजीव३ मार्गणे जीवाजीवौ देवेन दत्तौ नोजीवो न दत्तो ऽसत्वात् तथा १४४ प्रश्नैः निर्जितो गु
रुणा कोपेन तस्य मल्लकं मस्तके संस्का गच्छाद्बहिः कृतः सोपि वैशेषिकमतं प्रवर्त्तयति स्म कथं नव
विधं द्रव्यं९ सप्तदशविधा गुणाः१७ ।२६ पंचविधं कर्म३१ त्रिविधं सामान्यं३४ एकविधो विशेषः
१ ।३५ एकविधः समवायः ३६ ततो जीवा१ ऽजीव२ नोजीव३ नोऽजीव४ भेदैश्चतुर्गुणिता जाता १४४
प्रश्नभेदाः नामव्युत्पत्तिरपि इयं षट्पदार्थप्ररूपकत्वात् षट् गोत्रेण उलूकत्वात् उलूकः षट्चा
सौ उलूकश्च षडुलूकः तमेव व्यनक्ति कोसियगुत्तेणंति उलूककौशिकयोर्न भेदः तथा बलिस्सह

स्थविरात् बलिस्सह नामा गणो निर्गतः एवं गणो द्वौ२ तस्य बलिस्सह गणस्य चतस्रः शाखा जाता
: कोसंबिया१ सुत्तिमत्तिया२ कोडुंबाणी३ चंदनागरी४ एवं शाखाः८ सुहस्तिस्थविरस्य द्वादश
शिष्या जाताः रोहण१ जससद्द२ मेह३ कामिड्ढी४ सुट्ठिय५ सुप्पडिबुद्ध६ रक्खिय७ रोहगुत्त८ इसिगुत्त
९ सिरिगुत्त१० बंभ११ सोम१२ इत्येवं स्थविराः एकचत्वारिंशत् ४१ रोहणस्थविरात् उद्देह नामा गणो
निर्गतः एवं गणास्त्रयः उद्देह गणस्य चतस्रः शाखा जाताः उदुंबरिज्जिया१ मासपूरिया२ मइपत्ति
या३ पुन्नपत्तिया४ एवं शाखा द्वादश१२ पुनरुद्देह गणात् षट् कुलानि जातानि नागभूयं१ सोम
भूइयं२ उल्लगच्छं३ हत्थलिज्जं४ नंदिज्जं५ मारिहासिं६ एवं कुलानि षट्६ सिरिगुत्त स्थवि
रात् चारण नामा गणो निर्गतः एवं गणाश्चत्वारः४ चारण गणात् चतस्रः शाखा निर्ग
ताः हारियमालागारी१ संकासिया२ गवेधुकाया३ विज्जनागरी४ एवं शाखा षोडश१६ पुन
श्चारण गणात् सप्त कुलानि जातानि वत्थलिज्जं१ पीइधम्मगं२ हालिज्जं३ पूसमित्तिज्जं४ मालिज्जं५ अ
ज्जवेडयं६ कण्हसहं७ एवं कुलानि द्वादश१२ भद्रजसस्थविरात् उडुवाडिय नामा गणो निर्गतः एवं ग
णाः पंच५ पुनरुडुवाडियगणस्य चतस्रः शाखा जाताः चंपिज्जिया१ भद्दिज्जिया२ काकंदिया३ मेहलिज्जि
या४ एवं शाखा विंशतिः२० पुनरुडुवाडियगणस्य त्रीणि कुलानि जातानि भद्दजसियं१ भद्दगुत्तियं२
जससहं३ एवं कुलानि१५ कामड्ढि स्थविरात् वेसवाडिय नामा गणो निर्गतः एवं गणाः षट्६ तस्य वे
सवाडियगणस्य चतस्रः शाखा जाताः सावत्थिया१ रज्जपालिया२ अंतरिज्जिया३ खेमलिज्जिया४

एवं शाखाश्चतुर्विंशतिः २४ पुनर्वेसवाडियगणस्य चत्वारि कुलानि जातानि गणियं१ मेहियं२ काम
ड्ढियं३ इंदपुरगं च४ एवं कुलानि एकोनविंशतिः१९ तथा इसिगुत्तिस्थविरात् माणवनामा गणो निर्ग
तः एवं गणाः सप्त७ तस्य माणवगणस्य चतस्रः शाखा जाताः कासविज्जिया१ गोयमिज्जिया२ वासि
ट्ठिया३ सोरट्ठिया४ एवं शाखा अष्टाविंशतिः२८ पुनर्माणवगणस्य त्रीणि कुलानि जातानि इसिगु
त्तियं१ इसिदत्तियं२ अभिजयंतं३ एवं कुलानि द्वाविंशतिः २२॥ सुट्ठियसुप्पडिबुद्धस्थविरतः कोडि
यनामा गणो निर्गतः एवं गणाः अष्टौ८ तस्य कोडि यगणस्य चतस्रः शाखा जाताः उच्चानागरी१ विज्जा
हरी२ वइरी३ मज्झिमिल्लिया४ एवं शाखा द्वात्रिंश त्३२ पुनः कोडिकगणस्य चत्वारि कुलानि जा
तानि बंभलिज्जं१ वत्थलिज्जं२ वाणिज्जं३ प ण्हवाहणयं४ एवं कुलानि षड्विंशतिः॥
२६ पण्हवाहणयकुलात् मलधारगच्छो जात :सुट्ठियसुप्पडिबुद्धानां पंच शिष्या जाताः इंद
दिन्नः१ पियगंथः२ विज्जाहरगोवालः३ इसिदत्तः४ अरिहदत्तः५ एवं स्थविराः षट्चत्वारिंशत्४६
पियगंथस्थविरसंबंधः स एवं श्रीहर्षपुरे नगरे अजयमेरुसन्ने जिनमंदिराणि यत्र त्रीणि शतानि३
०० लौकिकदेवगृहाणि चत्वारिशतानि४०० अष्टौ सहस्राणि ब्राह्मणगृहाणि८००० वणिजां गृ
हाणि षट्त्रिंशत्सहस्राणि३६००० आरामा नवशतानि९०० वाप्यः सप्तशतानि७०० सत्रागाराः
सप्तशतानि७०० यत्र वर्त्तंते तस्मिन् राजा सुहटपालनामा एकदा ब्राह्मणैर्यज्ञे प्रारब्धे छागो होमार
ब्धः तत्र श्रीप्रियग्रंथसूरयः समागतास्तैः श्रावकस्य हस्ते वासक्षेपो दत्तः स च तेन छागमस्तके क्षि

प्तः ततोऽम्बिकाछागमधिष्ठितवती ततः छाग उन्मीय आकाशे स्थित्वा उवाच सो यदा युष्माभिर्दया
रहितैर्निरपराधी अहं हन्ये तथाऽहं चेन्निर्दयः स्यां तदा सर्वान् युष्मान् हन्मि पुनर्हुमता राक्षसानां
कुले यत् कृतं तद्भवतामप्यहं करोमि परं दयादिरूपा अंतरायकारिणी न भवेत् पुनः प्रोक्तं पशुदे
हे यावंति रोमकूपाणि संति तत्पशुमारणे रोमकूपतुल्यानि वर्षसहस्राणि यावत् नरके पशुघात
काः पच्यंते पुनरपि यो दाता स्वर्णमेरुं विसृज्य याचकानां दत्ते पुनर्यः पृथिवीसमस्तां दत्ते एतद्दान
द्वयं पुण्यात्परम् एकं जीवं मार्यमाणं रक्षेत् तत्पुण्य मधिकं पुनरपि दक्षिणासहिता यागाः एकतः प
क्रतस्त्वसयत्ती तस्य प्राणिनो रक्षणं तदधिकं पु नर्दानानां महतामपि कालेन फलं क्षीयते परं
अभयदानस्य क्षय एव नास्ति तदा यज्ञक रकैः प्रोक्तं कस्त्वमात्मानं प्रकाशय तेनो
क्तं अग्निदेवोऽहं मम चेदं वाहनं छागरूपं कथं होतुमारब्धं तैः प्रोक्तं धर्मार्थं देवेन प्रोक्तं प
शुवधे महत्पापं अत्रार्थे प्रियग्रंथसूरयः पृष्ट व्यास्ततस्तैः सूरयः पृष्टाः जीवदयारूपं शुचि
धर्मं प्रोक्तः ततस्ते याज्ञिकाद्याः बहवो लोकाः प्रतिबुद्धाः जाता जैनधर्ममहिमा प्रियग्रंथसूरितो मध्य
मा शाखा निर्गता१ विज्जाहरगोवालितो विज्जाहरी शाखा निर्गता२ एवं शाखाश्चतुस्त्रिंशत् ३४ इंद
दिन्नस्य शिष्यो दिन्नो जाताः स्थविराः सप्तचत्वारिंशत् ४७ दिन्नस्य द्वौ शिष्यौ अज्जसंतिसेणिए१ सीह
गिरी च२ स्थविरा एकोनपंचाशत् ४९ अज्जसंतिसेणितः उच्चानागरी शाखा जाता एवं शाखाः पंचत्रिं
शत्३५ पुनः अज्जसंतिसेणियसूरितश्चत्वारः शिष्या जाताः अज्जसेणिए१ अज्जतावसे२ अज्जकु

बेरे ३ अज्जइसिपालिए ४ एवं स्थविरास्त्रिपंचाशत् ५३ अज्जसेणियसूरितो अज्जसेणिया शाखा निर्गताः १
अज्जतावससूरितो अज्जतावसी शाखा निर्गता २ अज्जकुबेरसूरितोऽज्जकुबेरा शाखा निर्गता ३ अ
ज्जइसिपालियसूरितोऽज्जइसिपालिया शाखा निर्गता ४ एवं शाखाः एकोनचत्वारिंशत् ३९ सीहगिरिसू
रेः समुत्पन्नजातिस्मरणज्ञानस्य चत्वारः शिष्याः धणगिरी १ वइरे २ समिए ३ अरिहदिन्ने ४ एवं स्थविराः
सप्तपंचाशत् ५७॥ आर्यसमितसूरितः बंभदीविया शाखा निर्गताः १ वइरस्वामितो वइरी शाखा
निर्गताः २ एवं शाखा एकचत्वारिंशत् ४१ बंभदीविया शाखाया उत्पत्तिर्यथा॥ आभीरदेशे अच
लपुरासन्ने कन्ना १ बेन्ना नद्योर्मध्ये ब्रह्मद्वीपोऽस्ति   तत्र पंचशततापसाः प्रतिवसंति तेष्वेकस्ताप
सः पादलेपेन पादुकस्थेन बेन्नानदीमुत्तीर्य पा   रणाय याति लोकास्तपसश्चायं शक्तिरिति ज्ञा
त्वा तापसभक्ता जाताः श्राद्धान् प्रति निंदंति यद्   भवतां गुरुषु न कोपि प्रभाववान् इति ततः श्रावकैः श्री
वज्रस्वामिमातुलाः श्रीआर्यसमितसूरयः आका   रिताः तैः प्रोक्तं स्तोकमिदं पादलेपशक्तिरियं न
तपसः शक्तिरिति ततो गुरूपदेशात् श्रावकैः स तपस्वी भोजनार्थं गृहे निमंत्र्य पादपादुकाधावन
पूर्वं भोजितः सत्कृतश्च ततस्तेन समं श्रावका नदीतटे गताः स प्रविष्टमात्र एव लेपाभावात् बुडितुं
लग्नो जाता अपभ्राजना ततः श्रीआर्यसमितसूरयः तत्र समागता लोकबोधनार्थं चप्पुटिकां द
त्त्वा प्राहुः बेन्ने परं पारं यास्यामः इत्युक्ते मिलितं कूलद्वयं लोका विस्मयं प्राप्तास्ततः सूरयः पौरलो
कसहिता एव गतास्तापसस्थाने धर्मोपदेशेन प्रतिबोधिताः सर्वेपि तापसाः पंचशतानि दीक्षिताः १७२

चूर्णप्रयोगोयं न तेषां तपःप्रभाव इति जिनशासनमहिमा जाता सूरयः संघसहिताः स्वस्थानं प्राप्ताः
ततस्तेभ्यस्तापससाधुभ्यो ब्रह्मदीपिका शाखा जाता॥ अथ वइरस्वामिनस्त्रयः वइरसेणे १ पउमे
२ अज्जरहे ३ एवं स्थविराः षष्टिः ६० वइरसेनतो नाइली शाखा निर्गता १ पउमसूरितः पउमा शाखा
निर्गता २ अज्जरहसूरितो जयंती शाखा निर्गता ३ एवं शाखा त्रिषष्टिः ६३ अरहसूरेः शिष्यः पू
सगिरी १ पूसगिरिसूरेः शिष्यः फग्गुमित्ते २ फग्गुमित्तसूरेः शिष्यो धणगिरी ३ धणगिरिशिष्यः सिवभू
ई ४ शिवभूतिशिष्यः एको बोटिकनामाभूत् तस्मा   त् वीरात् सं० ६०९ वर्षे बोटिकमतं जातं दिगंब
रमतमित्यर्थः शिवभूतिशिष्यः अज्जभद्दे ५ अ   र्यभद्दस्य शिष्यो अज्जनक्खत्ते ६ अज्जनक्खत्त
शिष्यः अज्जरक्खे ७ अज्जरक्खशिष्यः अ   ज्जनागे ८ अज्जनागशिष्यः अज्जजेहिले ९
अज्जजेहिलशिष्यः अज्जविण्हू १० अज्जविण्हु   शिष्यः अज्जकालए ११ अज्जकालगस्य द्वौ शि
ष्यौ अज्जसंपलिए १२ अज्जभद्दे २ १३ एतयोर्द्वयोः   शिष्यः अज्जवुड्ढे १४ अज्जवुड्ढशिष्यः संघपालि
तः १५ संघपालितशिष्यः अज्जहत्थी १६ अज्जहत्थिशिष्यः अज्जधम्मे १७ अज्जधम्मशिष्यः अज्जसीहे
१८ अज्जसीहशिष्यः अज्जधम्मे १९ अज्जधम्मशिष्यः अज्जसंडिल्लः २० एवं स्थविरा अशीतिर्जाताः
विस्तरवाचनासत्काः ८०॥ अथ श्रीसुधर्मस्वामि १ जंबूस्वामि २ प्रभवस्वामि ३ शय्यंभवसूरि ४ स्थवि
राः संक्षिप्तवाचनासत्काश्चत्वारः संति तेषां मीलने स्थविराः चतुरशीतिः ८४ शाखाः पंचचत्वारिंशत्
४५ गणा अष्टौ ८ कुलानि च सप्तविंशतिः २७ संति॥ अत्रांतरे वंदामि फग्गुमित्तं च इत्यादि गाथाद्वे

दं वज्र ७ आदर्शेऽशुद्धत्वपते कतिपयउस्त्रके ७ च थेरस्स णं अज्जफग्गुमित्तस्स गोयमसगुत्तस्स अज्जध
णगिरी थेरे अंतेवासी वासिट्ठसगुत्ते इत्यादि यावत् थेरस्स णं अज्जसीहस्स कासवगुत्तस्स अज्जधम्मे थे
रे अंतेवासी कासवगुत्ते थेरस्स णं अज्जधम्मस्स कासवगुत्तस्स अज्जसंडिल्ले अंते० इति पर्यंतं इद्रूपते
तदनंतरं वंदामि फग्गुमित्तं च इत्यादि गाथास्त्रयं च गद्योऽर्थः पुनः पद्यैः संगृहीतः इति पौनरुक्त्यं तावती
यं गाथाश्च सुगमा एव अतो न विवृताः तथाऽत्र स्थविरावलीमध्ये आर्यरक्षिताद्यो नोक्ताः परं तेऽपि स्थ
विरा एवेति तेषां संबंधो लिख्यते॥ दशपुरे नगरे सोमदेवः पुरोहितो रुद्रसोमा भार्या तयोः पुत्रः
आर्यरक्षितो विदेशे गत्वा चतुर्दश विद्याः पठि त्वा आगतो राज्ञा हस्तिस्कंधे समारोप्य महाम
होत्सवेन गृहे प्रापितः मातृस्थ रणेन नाम। परं माता न तादृशी हर्षिता कथमिति पृष्टा
प्राह॥ अहं तु परमार्हता श्राविका त्वया तु न रकपातकारणं विद्याः पठिताः किं तया यदि
मां प्रमोदसे सुबुद्धिश्च तदा दृष्टिवादं पठ ततस्तं स्त एउ मिच्छन् दृष्टीनां दर्शनानां वादो विचारणा
दृष्टिवाद इति नामापि शोभनमस्य इति ध्यायन् रात्रौ मातरं पृष्ट्वा तत्पठनाय चलितः इक्षुवाटकस्थ
स्य स्वमातुलस्य तोसलिपुत्राचार्यस्य समीपे अग्रे गच्छतः सन्मुखमिलनार्थमागच्छन् मित्र द्विज हस्ते
सार्द्धनवपूर्णाः इक्षुयष्टयो दृष्टाः शकुनं विचारितं दृष्टिवादं सार्द्धनवपूर्वाणि यावत्पठिष्यामि ततं १७३
स्ता इक्षुयष्टीर्मातृ रर्प्यणाय आदिश्य गतः। स्तोपाश्रयद्वारे ढड्ढरश्रावकेण समं गुरुन् वंदित्वा
अग्रे उपविष्टः श्राद्धवद् वंदना गुरुभिरसिनव श्राद्धो ढड्ढरश्राद्धस्य उक्तः साधुभिरुपलक्षितोऽयं

पहना दं

श्री गुरूणां भागिनेयो भवति गुरुभिर्देशनां दत्वा योग्यतां ज्ञात्वा सांसारिकलीत्या अन्यत्र गत्वा दीक्षितः
स्वपार्श्वं स्वं श्रुतं पाठितं पूर्वाध्ययनार्थं श्री वज्रस्वामि समीपे प्रेषितस्ततो गच्छन् उज्जयिन्यां श्री भद्रगुप्ताचा
र्यैरनशनं निर्यामयामास तेन कथितं वज्रस्वामिनः पृथगुपाश्रये स्थेयं यतस्तेन सह सोपक्रमायु
रेक एकरात्रिमपि वसेत् स तेनैव सह म्रियते ततस्तत्र गत्वा श्रीवज्रस्वामिनं नत्वा उपाश्रये उपविष्टस्त्वा
स्वयं पृथक् स्थितः श्रीवज्रस्वामिना च तदागमने रात्रौ स्वप्ने दृष्टो यदस्मत्पायसपात्रं केनचित्प्राघूर्ण पायसं ७ इष्ट
केन आगत्य पीतं किंचित्स्तोकमेव स्थितं ततः। प्रातरागतस्य आर्यरक्षितस्य पूर्वाणि अध्यापय
न् दशम पूर्वं यमकेषु अधीयमानेषु पितृभिः : संदेशाकारकैराकारणेऽपि अनागमने तस्य ल
घुभ्राता फल्गुरक्षितो मातृप्रमुखैः प्रेषितः सो पितृ प्रतिबोध्य दीक्षितः ततः स्वगुरुनात्र प्रति
बोधयितुं गमनाय समुत्सुकः पठन्त्र दशमपूर्वं अद्यापि किंचिन् तिष्ठति गुरुभिः प्रोक्तं बिंदुमात्रं
पठितं समुद्रतुल्यं तिष्ठति ततो गमनाय समोत्सा होऽपि किंचित् पठ ततो गुरुभिः ज्ञानोपयुक्तः स्वस्य
स्मिन् विच्छेदं विज्ञाय अनुज्ञा दत्ता ततः फल्गुरक्षितो दशपुरे गतो राज्ञा प्रवेशोत्सवः कृतो मातृ भगिन्या
दीन् असारं संसारस्वरूपं दर्शयित्वा प्राव्राजयत् पिता तु पुत्रानुरागेण प्रव्रजितः स्तुषादि लज्जया धौ दीक्षितः
तिक १ यज्ञोपवीत २ छत्रिका ३ उपानह ४ कमंडलूनि न मुंचति ततो गुरुभिः शिक्षिता बालादयो वदंति स
र्वान् साधून् वयं वंदामहे परं छत्रिकावंतं न ततो वंदनावंचितः छत्रिकां मुमोच एवं क्रमेण कुंडिकां
यज्ञोपवीतं उपानदौ च अमुंचत् धौतिकं तु तथापि न मुक्तवान् अन्यदा अनशनं कृत्वा कोऽपि साधु

चरणत्राणसत्कं २१   चरणत्राण २३

र्ष्टुतो गुरुशिक्षयां वैयावृत्तिकरणार्थं साधुश्च विविदमानेषु सोमदेवेन दृष्टं किमेतन्महान्निर्झरा वहन्ति गुरु
णा प्रोक्तमेवं तर्हि अहं वदामि कंपानं गुरुणा प्रोक्तं उपसर्गसहनेन शक्तिर्भवति तदा वद नोचेन्नहि
अन्यथा ऽरिष्टं भवति ततस्तमुंछिष्यमार्गे विडान् गुरुशिक्षिते बालै र्धौतिकमेकस्य चोलपट्टं परिक्षि
पितः पश्चात्स्थितस्कंधादि प्रवजितपरिवारेण दृष्टो लज्जितः प्राह अथ चोलपट्टपरिक्षेपणेन किं
यद्दृष्टव्यं तद्दृष्टमिति गुरुभिः प्रोक्तं चोलपट्टस्तिष्ठतु तथापि शाट्येनयाति लज्जावक्षी ततो गु
रुभिः साधूनां प्रोक्तं भवद्भिर्नानीयदेयाः स्वयं यास्यतीत्युक्त्वा ऽन्यत्र विहृताः साधुभिरानीय
स्वयमाहारः कृतस्तस्मै न दत्तः स बुभुक्षितः ततस्थौ द्वितीयदिने गुरवः आगताः किं न दृष्ट
स्य आहारो दत्त इति कृत्रिमः कोपः कृतः साधुभिः प्रोक्तं स्वयं कथं न याति ततो गुर
वः स्वयं तदर्थं पंगुरिताः स तो ऽविनयं ज्ञात्वा स्वयमेवगतः कस्यापि ईश्वरस्य गृहे परमंज्ञाना धनाढ्यः समृद्धे
दपद्वारेण गच्छन् गृहस्वामिना प्रोक्तं तो मुख्य मा रेणपदि सऊचे सो लक्ष्मीः यत्र तत्र आयातीत
था को विचारस्तत्र द्वात्रिंशन्मोदकान् भिक्षया लब्धा आगतो गुरुभिर्विचारितं द्वात्रिंशत् शिष्या अ
स्माकं भविष्यंति प्रथमलाभत्वात्ते मोदकाः साधूनां दत्त्वा पुनर्गत्वा परमान्नमानीय स्वयं बुभुजे लब्धि
संपन्नत्वात् सञ्जाधारस्य पद्मे तस्य गच्छे त्रयः साधवः पुष्पमित्रा लब्धिसंपन्नाः दुर्बलिका पुष्पमित्र १ घृ
त पुष्पमित्र २ वस्त्र पुष्पमित्राः ३ चत्वारश्च महाप्राज्ञाः दुर्बलिकापुष्पमित्र १ विंध्य २ फल्गुरक्षित ३ गो
ष्ठामाहिलाः ४ अन्यदा इंद्रेण श्री सीमंधरस्वामिवचसा कालिकाचार्यवत् निगोदसूक्ष्मविचारपृच्छ १३४

या परीक्षिताः वंदित्वा स्तुतिं कृत्वा शालाद्वारं परावृत्य इंद्रः स्वस्थानं गतः ततः श्री आर्यरक्षितसू
रिभिर्बुद्धिहानिं ज्ञात्वा अनुयोगश्चतुर्धा ऽपि पृथक् पृथक् स्थापितः एवंविधाः श्री आर्यरक्षितसूरयः स्थवि
रा जाताः एवं विद्याधरगच्छीयो वृद्धवादि सिद्धसेनौ तयोः संबंध लेशो यथा॥ एकः साधुः वृद्धो ऽपि
उच्चैः स्वरेण पठन् राज्ञा दृष्टः प्रोक्तं च त्वं किं मुशलं फुल्लयिष्यसि ततस्तेन वाग्देवीमाराध्य विद्या
प्राप्य चतुःपथे मुशलं मूर्ध्नि मंदयित्वा राजसमक्षं फुल्लवितं काव्यं च प्राह॥ मुशलः शृंगं शाखया पृथ्व
माणं १ शीतो वह्निः शर्मास्त्ततो निःप्रकंपः ३ योयं क्रूतेसर्द्धिधातन्नकिंचित् ४ वृद्धो वादी कः किमा
दात्रवादी १ तेन वृद्धवादिना सिद्धसेनो विप्रो वादे जितः तस्यैव शिष्यो जातः सिद्धसेनेन श्री
विक्रमादित्य नामा राजा प्रतिबोधितः विक्रमादित्येन च श्री शत्रुंजय यात्रा कृता त
स्य संघे १७० स्वर्णमयादेवालया आसन् पुनः श्री सूरीणामुपदेशेन अन्येपि राजानस्ती र्थोद्धारं
चक्रुः श्री सूरिसान्निध्यात् विक्रमादित्यो राजा संवत्सरं प्रवर्त्तयामास ४७० श्री वीरसंवत्सरमासीत्॥
इति श्री वृद्धवादि सिद्धसेन संबंधः॥ एवं श्री हरिभद्रसूरिरपि महाप्रभावकस्तत्संबंधो यथा॥ हरिभद्र ना
मा विप्रो महाव्याकरणादि शास्त्रपारंगामी सन् प्रतिज्ञां चक्रे यस्य उक्तस्यार्थं अहं न वेद्मि तस्य शिष्यो
भविष्यामि एकदा संध्यायां नगरमध्ये गच्छन् साध्व्या गुणमानां गाथां शुश्राव चक्कि दुगं हरिपणगं पण
गं चक्कीण केसवो चक्की केसव चक्की केसव दुचक्कि केसीय चक्कीय १ श्रुत्वा च प्राह सो सो ऽपि को ऽयं चि
गचिगायमानः शब्दो जायमानो ऽस्ति साध्वी प्राह नवीनेलिंपितेचिग चिगायो जायते एतत् श्रुत्वा विप्रोद

८
कल्प०

ध्यौ मयाद्रावित मर्घ्याऽनवगमात् कोर्थोऽस्या गाथायाः साध्वी प्राह अस्माभिः प्रायो गृहस्थस्याग्रेऽर्थो न क
थ्यते अस्मद्गुरवः उद्याने संति ते कथयिष्यंति ततस्तत्र गत्वा गाथार्थं श्रुत्वा प्रतिज्ञापालनार्थं दीक्षां ल
लौ जैनशास्त्राण्यधिगत्य सूरिपदं प्राप। तस्य श्रीहरिभद्रसूरेर्हंस१ परमहंसौ शिष्यौ बहुशा
स्त्रपारगौ अभूतां परशासनविद्यारहस्यग्रहणार्थं बौद्धाचार्यसमीपे पठितुं गतौ छात्रीभूत्वा बौद्ध
गुरोः पार्श्वे पठतः एकदा पुस्तके खटिकाद्वारा हृष्टाः२ कृतेषु ज्ञातं सूरिणा कावपि जैनौ स्तः तत्प
रीक्षार्थं गुरुरुपरिभूमौ छात्राणामायतुपविष्टः छात्रा उपरि आगच्छंति सोपानके जिनप्र
तिमा मुक्त्वा परीक्षार्थं बौद्धसाधवः प्रतिमोपरि पादौ दत्वा उत्तरंति हंसपरमहंसौ जिनप्रतिमां
वीक्ष्य खटिकया प्रतिमाहृदये यज्ञोपवीतं कृत्वा उत्तीर्णौ ततो बौद्धैर्ज्ञातौ मरणस्य शं
कितौ स्वपुस्तिकां लात्वा स्वदेशं प्रति चलतः बौद्धवचनात् राज्ञा पश्चात्कटकं प्रेषितं प्रथमं ते
न सहस्रयोधी हंसो हतः पश्चाद्भुजबलेनागच्छद्दूरदृष्टचित्रकोटदुर्गपर्यासन्नो गतः परमहंसो
पि हतः तत्सैन्यं पश्चाद्गतं एतत्स्वरूपं ज्ञात्वा गुरुः कोपाक्रांतो जातः गुरुणा उत्तप्ततैलभरितः कटाहः
कृतो मंत्रं जपित्वा२ यदा गुरुः कटाहे कर्करं क्षिपति तदा बौद्धस्यैकः मंत्राकर्षित स्तस्मिन् कटाहे प
तित्वा म्रियते एवं गुरुणा बहवो बौद्धाः आकर्षितास्तथापि कोपो न निवर्तते तदा एकः श्राद्धः एतां गाथां श्रा
वयामास॥ जइ जलइ जलउ लोए कुसत्थपवणाहउ कसायग्गी तं चुज्जं जं जिणवयण वारिसित्तो वि
पज्जलई १ एतां गाथां श्रुत्वा श्रीहरिभद्रसूरिः कोपादुपशांतः कुत्राप्येवं लिखितमस्ति याकिनीमह

वायसपझीवकर्कमसंदंप्रति: ४

हहः॥ जैनं पुनेत्व॥ ज्यग्रप्राजन॥ १३५

त्तराश्राविकां लात्वा शालायामागत्य गुरून् पंचेंद्रियवधालोचनां पप्रच्छ गुरुणा पंचकल्याणेनोक्ते
साध्वी प्राह अज्ञानेनापि एकस्मिन् पंचेंद्रियवधे एतावती आलोचना दीयते तदा जानता सवता एता
वं बौद्धाकर्षणे कियती समेष्यति ततः कोपादुपशांतेन पश्चात्तापं कृत्वा बौद्धा मुक्ताः स्वपापशुद्धिकृ
ते आकर्षितबौद्धप्रमाणानि १४४४ प्रकरणानि ऊढापंचाशकादिप पंचाशक अष्टकषोडशादी
नि अकरोत् पुनः श्रीआवश्यकवृहद्वृत्तिप्रमुखा बह्व्यो विरचितवान् एवंविधाः श्रीहरिभद्रसूर
यो जाताः एवं बप्पभट्टिसूरिरपि प्रभावको येन गोपनगरस्वामी आमनामा राजा प्रतिबोधितो
गुरुवचनात् येन शत्रुंजययात्रा कृता तीर्थोद्धारश्च कारितः अलिग्रहबद्धस्य गच्छतो देवत
या खिरसंदीग्रामे श्रीशत्रुंजयावतारस्य प्रसादः प्रतिमापादुकामंडितस्य दर्शने अभि
ग्रहोपि पूर्णो जातः तत्र शत्रुंजयाभिग्रहः पूर्यते पुनस्तेन आमभूपेन गोपनगरे १०८ गजोच्चै
स्तरप्रासादे १८ भारहेममयी श्रीवीरप्रतिमा स्थापिता सा च अद्यापि तन्मध्ये अस्ति एवंविधाः श्रीबप्प
भट्टसूरयः एवं पादलिप्ताचार्या अपि यः पादलेपेन आकाशे उड्डीय शत्रुंजयगिरिनार आबू अष्टा
पद सम्मेतशिखरादितीर्थेषु देवान् वंदित्वा पारणमकरोत् पुनर्येन कृता निर्वाणकलिकादयो ग्रंथाः
एवं श्रीमलयगिरिर्येन कृता विशेषावश्यकवृत्तिप्रमुखा अनेके अति सुगमा ग्रंथाः कृताः संति एवं
श्रीहेमचंद्रसूरिः पूर्णतल्लगच्छे सार्द्धत्रिकोटिग्रंथकर्त्ता अष्टादशदेशस्वामी श्रीकुमारपालप्रति
बोधको लब्धपद्मावतीवरो बभूव॥ एवं ऊकेशवंशगच्छे श्रीरत्नप्रभसूरिर्येन उसियानगरे को

८
कल्प॰ल॰

रंटानगरे च समकालं प्रतिष्ठा कृता दुष्टक्षयकरणे न चमत्कारश्च दर्शितः एवं मानदेवसूरिः शांतिस्तवकृ
त् एवं भक्तामरस्तोत्रकर्त्ता श्रीमानतुंगसूरिः एवं श्रीखरतरगच्छे नवांगीवृत्तिकारक श्रीस्तंभनकपा
र्श्वप्रकटक श्रीअभयदेवसूरिः एवं श्रीतपागच्छे लघुकर्मग्रंथादिशास्त्रकारक श्रीदेवेंद्रसूरिः पुन
रेवं वादिवेतालश्रीशांतिसूरिः पुनरेवं परकायप्रवेशकृत् श्रीजीवदेवसूरिः पुनरेवं कुमुदचंद्रदिगंब
रवादिजेता श्रीवादिदेवसूरिः एवमनेके प्रभावकपुरुषाः श्रीजिनशासने जाताः संति तेपि स्थविरावली
यां ते वाच्या तथा श्रीकालिकाचार्योपि स्थविरः परं कालिकाचार्यास्त्रयो जाता तत्रैकः श्रीवीरात् सं
० ३७६ वर्षे श्रीश्यामाचार्यः अपरनामा श्रीकालिकाचार्यः श्रीप्रज्ञापनासूत्रकर्त्ता शक्रविदितवृद्ध
श्रीसुधर्मस्वामिनः त्रयोविंशतितमः पुरुषो जातो येन ब्राह्मणीभूतसौधर्मेंद्रस्याग्रे नि
गोदविचारः कथितः केचिद्वदंति अयं कालिकाचार्यस्तथाविधगाथादर्शनात् वीरात् सं० ३२० व
र्षे जातः केचिद्वदंति ३२५ वर्षे केचिद्वदंति चतुर्थ्यां पर्युषणापर्वप्रवर्त्तक एव निगोदविचारव्याख्याता
यथास्थितं बहुश्रुता एव विदंतीति १ द्वितीयस्तु कालिकाचार्यो वीरात् सं० ४५३ वर्षे सरस्वतीभ्रातागर्द्द
भिल्लोच्छेदको बलमित्रभानुमित्रयोर्भागिनेयो जातः अत्रापि यश्चतुर्थ्यां पर्युषणापर्वप्रवर्त्तकः कालिका
चार्यः स एव तयोर्मातुलः प्रोक्तोस्ति यदस्ति तत्प्रमाणं २ तृतीयस्तु कालिकाचार्यः श्रीवीरात् सं० ९९ १७६
३ वर्षे श्रीविक्रमादित्यसंवत्सरात् सं॰ २३ वर्षे जातो येन श्रीवीरवाक्यात् श्रीपर्युषणापर्व श्रीभाद्रप
दसुदिपंचमीतश्चतुर्थ्यां प्रवर्त्तितं एवं कालिकाचार्यास्त्रयो वाच्याः तेषां विस्तरसंबंधस्तु मत्कृतश्री

ज्ञातव्य॰
कालिकाचार्यकथातः पृथगेव ज्ञेयाः तथा यद्दिने नववाचना जायंते तदा स्थविरावल्या एकं व्याख्यानं
सति वेलासंभवे च कालिकाचार्यकथा वाच्या अथ च यदि एकादश त्रयोदश वाचना वा भवंति तदा ए
कं स्थविरावलीव्याख्यानं द्वितीयं कालिकाचार्यकथा सा मत्कृता अतिसरसा पृथगेवास्ति इत्यने
न अष्टमवाचनायां श्रीस्थविरावलीव्याख्याता अग्रे नवमवाचनायां श्रीसाधुसामाचारी गुर्वाव
लीच व्याख्यास्यते सवर्त्तमानयोगः॥ एवमस्मिन् पर्युषणापर्वणि एके दानं ददति एके शीलं पालयं
ति एके तपस्तपंति एके भावनां च भावयंति॥ स शासनाधीश्वर श्रीवीरवर्द्धमानस्वामिप्रसादः एवं
ततः परंपरया श्रीसुधर्मस्वामि जंबूस्वामि श्रीप्रभवस्वामि। तावद्यावत् श्रीवज्रस्वामिनो यावत्
स्वस्वगच्छपरंपरया वर्त्तमानभट्टारकस्याज्ञा। याश्रीसंघः प्रवर्त्ततामिति वाच्यं॥ इत्यष्टमं व्या
ख्यानं संपूर्णम्॥ व्याख्यानं कल्पसूत्रस्य सुगमं स्फुटमष्टमं शिष्यार्थं पाठकाश्चक्रुः समयादिम
सुंदराः॥१॥ अथ नवमं व्याख्यायते॥ तत्र पूर्वं प्रथमवाचनया श्रीपंचपरमेष्ठिनमस्कारो व्याख्या
तः पुनः श्रीमहावीरदेवस्य संक्षेपवाचनया षट् कल्याणकानि व्याख्यातानि १ द्वितीयवाचनया च श्री
महावीरदेवस्य च्यवनकल्याणकं गर्भापहारकल्याणकं च व्याख्यातं २ तृतीयवाचनया च चतुर्दश
स्वप्ना व्याख्याताः ३ चतुर्थवाचनया श्रीमहावीरदेवस्य जन्मकल्याणकं व्याख्यातं ४ पंचमवाचनया
च श्रीमहावीरस्य दीक्षा १ ज्ञान २ निर्वाण ३ कल्याणकत्रयं व्याख्यातं ५ षष्ठवाचनायां श्रीपार्श्वनाथश्री
नेमिनाथतीर्थंकरयोः पंच २ कल्याणकानि व्याख्यातानि ६ सप्तमवाचनया च अंतरकालः श्रीऋषभ

देवस्य पंचकल्याणकानि व्याख्यातानि ७ अष्टमवाचनया च स्थविरावलीव्याख्याता ८ अथ नवमवा
चनायां साधुसामाचारी व्याख्यायते॥ तत्र प्रथमं आषाढचतुर्मासकात्कतिभिर्दिनैः पर्युषणापर्व कर्त्त
व्यः इति दिनसंख्याप्रश्नोत्तररूपा प्रथमसामाचारी प्रोच्यते तत्र सूत्रं॥ तेणं कालेणं २ समणे भ० वासा
णं सवीसइराए मासे वइक्कंते वासावासं पज्जोसवेइ से केणट्ठेणं भंते एवं वुच्चइ समणे भगवं महावीरे
वासाणं सवीसइराए मासे विइक्कंते वासावासं पज्जोसवेइ जउणं पाएणं अगारीणं अगाराइं कडि
याइं उक्कंपियाइं छन्नाइं लित्ताइं घट्ठाइं मट्ठाइं सं पधूमियाइं खाओदगाइं खायनिद्धमणाइं अप्प
णो अट्ठाए कडाइं परिभुत्ताइं परिणामियाइं भ वंति से तेणट्ठेणं एवं वुच्चइ समणे भगवं महावी
रे वासाणं सवीसइराए मासे विइक्कंते वासा वासं पज्जोसवेइ जहाणं समणे भगवं महा
वीरे वासाणं सवीसइराए मासे विइक्कंते वासा० तहाणं गणहरावि वासाणं सवीसइराए मासे
विइक्कंते वासा० ३ जहाणं गणहरा वासा० तहा णं गणहरसीसावि वासा० जहाणं गणहरसी
सा वासा० तहाणं थेरावि वासाणं जाव पज्जोसविंति ५ जहाणं थेरा वासाणं जाव पज्जोसविंति तहा
णं जे इमे अज्जत्ताए समणा निग्गंथा विहरंति एए वियणं वासाणं जाव पज्जोसविंति ६ जहाणं जे इमे अज्ज
त्ताए समणा निग्गंथा वासाणं जाव पज्जोसविंति तहाणं अम्हं पि आयरिया उवज्झाया वा वासाणं जाव
प० ७ जहाणं अम्हं पि आयरिया उवज्झाया वासाणं जाव पज्जोसविंति तहाणं अम्हे वि सवीसइ
राए मासे विइक्कंते वासावासं पज्जोसवेमो अंतरा वियसे कप्पइ पज्जोसवित्तए नो से कप्पइ तं रय १७७

णिं उवाइणावित्तए वा० तस्मिन्काले तस्मिन्समये श्रमणो भगवान्महावीरः आषाढचतुर्मासकदि
नादारभ्य सविंशतिरात्रे मासे व्यतिक्रांते पंचाशद्दिने भूगते भूइत्यर्थः पज्जोसवेइत्ति पर्युषणामकार्षी
त् १ से केणट्ठेणमित्यादि प्रश्नवाक्यं उत्तरमाह जउणमित्यादि यतः प्रायेण अगारिणां गृहस्थानां
अगाराणि गृहाणि ईदृशानि जातानि भवंति किं० अगाराणि कडियाइंति कटैर्युक्तानि कटयुक्ता
नि पुनः किं० उक्कंपियाइं धवलितानि चूर्णिकारस्त्वेवमाह॥ कडियाइं पासेहिंतो उक्कंपियाइं उ
वरिंइति पुनः किं० छन्नाइं तृणादिभिराच्छादिता नि पुनः किं० लित्ताइंति लिप्तानि छगणाद्यैः क्वचि
द्गुत्ताइं इति पाठे गुप्तानि वृत्तिकरणद्वारपिधाना दिभिः पुनः किं० घट्ठाइं विषमभूमिभंजनात् पुनः
किं० अ० मट्ठाइं सुकुमालीकृतानि क्वचित् संमट्ठाइं इति पाठस्तत्र समंतात् मृष्टानि मसृणी
कृतानि पुनः किं० अ० संपधूमियाइं सौगंध्याय धूप दनादिधूपितैर्वासितानि पुनः किं० अ० खाओद
गाइं कृतप्रणालीरूपजलमार्गाणि पुनः किं० अ० खायनिद्धमणाइं खातं निर्द्धमनं खालं गृहात्स
×अप्पणो अन इति× लिलं येन निर्गच्छति येषु तानि एवंविधानि गृहाणि गृहस्थैरात्मार्थं कृतानि परिकर्म्मितानि करोतेः कां
मं करोति इत्यादाविव परिकर्मार्थत्वात् पुनः किं० अ० परिभुत्ताइं परिभुक्तानि तैः स्वयं परिभुज्यमा
नत्वात् अत एव परिणामितानि अचित्तीकृतानि प्रासुकीकृतानि भवंतीत्यर्थः ततः सविंशतिरात्रे मा
से गते अमी अधिकरणदोषा न भवंति यदि पुनः प्रथममेव स्थिताः स्म इति ब्रूयुस्तदा ते गृहस्था मुनी
नां स्थित्या सुभिक्षं संभाव्य तप्तलोहगोलककल्पा दंतालक्षेत्रकर्षणगृहछादनादीनि कुर्युस्तदा चाधि

करणदोषा अतस्तत्परिहाराय पंचाशतादिनैर्वयमत्र स्थिताः स्म इति वाच्यमिति २ यथा श्रीमहावीर
ः पंचाशतादिनैः पर्युषणामकार्षीत् तथा सौधर्मादिगणधरा अपि ३ यथा गणधरास्तथा गणधरशिष्या जं
बूप्रमुखा अपि ४ यथा गणधरशिष्यास्तथा स्थविरा अपि स्थविरकल्पिका अपि ५ यथा स्थविरास्त
था इमे अज्जत्ताए अद्यकालीनाः आर्यतया व्रतस्थविरत्वेन इत्येके श्रमणा निर्ग्रंथा विहरंति एतेपि पं
चाशतादिनैरेव पर्युषणां कुर्वंति यथा इमे अद्यकालीनाः श्रमणास्तथा अस्माकं आचार्या उपाध्या
याश्च कुर्वंति ७ यथाऽस्माकं आचार्या उपाध्या याश्च तथा वयमपि पंचाशता दिवसैः कुर्मः अ
थ अपवादमाह॥ अंतरावियसे कप्पइ प ज्जोसवित्तए अंतरापि च अर्वागपि कल्पते प
र्युषितुं परं न कल्पते तां रजनीं भाद्रपदशु क्लपंचमी उवाइणावित्तए त्ति अतिक्रमि
तुं उपनिवासे इत्यागमिको धातुः वसनिवासे गणसंबंधी वा इह पर्युषणा द्विधा गृहिज्ञाता
गृहिज्ञाता च तत्र अज्ञाता यां वर्षायोग्यपीठफल कादिद्रव्यक्षेत्रकालभावस्थापना क्रियते सा
स्थापना आषाढपूर्णिमायां पंच २ दिनवृद्ध्या यावद्भाद्रपदशुक्लपंचम्यां च एकादशसु पर्वतिथिषु क्रि
यते १ गृहिज्ञाता यां उ यस्यां सांवत्सरिकातीचारालोचनं १ लुंचनं २ पर्युषणायां कल्पसूत्रकर्षणं ३ चै
त्यपरिपाटी ४ अष्टमं ५ सांवत्सरिकप्रतिक्रमणं च क्रियते ६ यया च व्रतपर्यायवर्षाणि गण्यंते सा भा
द्रपदशुक्लपंचम्यां युगप्रधानकालिकसूर्यादेशाच्चतुर्थ्यामपि जनप्रकटं कार्या यत्तु अभिवर्द्धितवर्षे दिन
विंशत्या पर्युषितव्यं तत् सिद्धान्तटिप्पनानुसारेण तत्र हि युगमध्ये पोषो युगांते च आषाढ एव वर्द्धते नान्ये मा

साः तानि च अधुना न सम्यक् ज्ञायंते अतो दिनपंचाशतैव पर्युषितव्यं कालावग्रहश्चात्र जघन्यतो
दिन ७० मानः उत्कर्षतो वर्षायोग्यक्षेत्रांतरालाभाद्वाषाढेन वृष्टेरनुपरमात् मार्गशीर्षेण च सह ष
ण्मासः द्रव्यादिस्थापना चैवं द्रव्यस्थापना पीठफलकतृणडगलरक्षामल्लकादीनां परिभोगः १ स
चित्तादीनां च परित्यागः २ तत्र सचित्तः शिष्यो न परिव्राज्यते अचित्तं वस्त्रादि न गृह्यते मिश्रं सोपधि
कः शिष्यः एवमाहारविकृतिसंस्तारकादिद्रव्येषु परिभोगपरिहारौ योज्यौ १ क्षेत्रस्थापना सक्रो
शयोजनं कारणे वा ग्लानवैद्यौषधादौ चत्वारि पं च वा योजनानि २ कालस्थापना चत्वारो मासा यत्र
तत्र कल्प्यंते ३ भावस्थापना क्रोधादीनां विवेकः ईर्याभाषणादिसमितिषु चोपयोगः इति प्रथमा सा
माचारी १ अथ वर्षास्ववग्रहमानरूपा द्वितीया सामाचारी उच्यते तत्र सूत्रं वासावासं प
ज्जोसवियाणं कप्पइ निग्गंथाण वा निग्गंथीण वा सव्वओ समंता सक्कोसं जोयणं उग्गहं उगि
ण्हित्ताणं चिट्ठित्तं अहालंदमवि उग्गहे २ व्याख्या वर्षाकाले पर्युषितानां स्थितानां कल्पते निर्ग्रं
थानां निर्ग्रंथीनां च सर्वतः समंतात् चतुर्दिक्षु विदिक्षु च सक्रोशं योजनं अवग्रहमवगृह्य अहालंदम
पीति यथेत्यव्ययं निपातः लंदमिति कालस्याख्या यथालंदमपि स्तोककालमपि अवग्रहे स्थातुं क
ल्पते न बहिः लंदकालमपि उदकार्द्रः करो यावता कालेन शुष्यति तावान् कालो जघन्यं लंदं उत्कृ
ष्टं पंचाहोरात्रः तयोरंतरे मध्यमं यथा रेफप्रकृतिरपि अरेफप्रकृतिरपीति एवं लंदमप्यवग्रहे स्थातुं क
ल्पते अलंदमपि यावत् षण्मासान् एकत्र अवग्रहे स्थातुं कल्पते उपाश्रयात् सार्द्धक्रोशद्वयं च तस्य इदि

९
कल्प ल.

स्क ऊर्द्धाधोमध्यग्रामान्विना गजेंद्रपदादिगिरेर्मेखलास्थितानां षट्सु दिक्षु गमनागमनेन पंचक्रोशावग्रहः
यच्चानंतरं विदिक्षु इत्युक्तं तच्चाव्यवहारिकविदिगपेक्षया संभवति दिग्ग्रामोपमूलग्रामादाग्नेय्यादिविदिक्षु
नैश्चयिकविदिक्षु च एकप्रदेशात्मकत्वान्न गमागमसंभवः अटवीजलादिना व्याघाते तु त्रिदिक्कोद्वि
दिक्क एकदिक्को वा अवग्रहो भावनीयः॥ इति द्वितीया सामाचारी॥२ अथ तृतीयां नित्योदकनदीलंघ
नरूपां सामाचारीमाह तत्र सूत्रं॥ वासावासं पज्जोसवियाणं कप्पइ निग्गंथाण वा सव्वउ समंता सक्कोसं
जोयणं भिक्खायरियाए गंतुं पडिनियत्तए जत्थ नई निच्चोयगा निच्चसंदणा नो से कप्पइ सव्वउ
समंता सक्कोसं जोयणं भिक्खायरियाए गंतुं प डिनियत्तए एरावई कुणालाए जत्थ चक्किया
सिया एगं पायं जले किच्चा एगं पायं थले कि च्चा एवं चक्किया एवं ण्हं कप्पइ सव्वउ समंता
सक्कोसं जोयणं गंतुं पडिनियत्तए व्याप वासावासं पर्युषितानां निर्ग्रंथानां निर्ग्रंथीनां च भिक्षानिमित्तए
तादृशीं नदीं लंघयितुं पंच क्रोशान् गंतुं प्रत्यागंतुं च क ल्पते कीदृशी नदी नित्योदका नित्यस्तोकजला तथा न
नित्यस्पंदना निरंतरवाहिनी तो इति तत्र तस्य साधोः कल्पते कया सदृशी इत्याह एरावती नाम्नी नदी कुणा
लानामनगर्यां द्विक्रोशां सदा वहति तादृशीं नदीं लंघयितुं कल्पते कथं स्तोकजलत्वात् यत्र चक्किया शक्नुया
त् सियायदि लंघनविधिमाह एकं पादं जले जलमध्ये कृत्वा निक्षिप्य एकं च पादं स्थले आकाशे कृत्वा यावता १३९
पादाभ्यां अविलोडयन् गंतुं शक्नुयात् तदा तत्परतः स्थितग्रामादौ भिक्षाचर्या कल्पते नान्यथा एकं पादं जला
तः क्षिपति द्वितीयं च पादं जलादुपरि उत्पाटयति तदा कल्प्यते यत्र च जलं विलोड्यते तत्र गंतुं प्रत्यागंतुं न क

ल्पते इत्यर्थः यत्र च न शक्नुया कृत्वा प्रत्यागंतुं तत्र न गच्छेत् यत्र जंघार्द्धं यावज्जलं स दकसंघट्टः नाभिं या
वज्जलं स लेपः२ तत्परतो लेपोपरि ततः ऋतुबद्धे काले भिक्षाचर्यायां यत्र त्रयो दकसंघट्टाः वर्षासु च स
प्त सवेयुस्तत्र क्षेत्रे नोपहन्यते चतुरादिभिश्च तैरष्टादिभिश्च तैरुपहन्यते ते च ऋतुबद्धे गतागतेन षट् व
र्षासु चतुर्दश भवंतुः लेपस्त्वेकोपि क्षेत्रमुपहंति लेपोपरि तु किंवाच्यं तथा यदि चतुरो मासानेकद्वि
त्र्यादिदिनोनान्वा उपोषितः स्यात्तुं न शक्नोति तदा जघन्यतोपि पूर्वं क्रियमाणनमस्कारसहितादेः
पौरुष्यादितपो वृद्धिं कुर्यादिति इति तृतीया सा माचारी॥३ अथ साधूनां परस्परदानरूपां चतुर्थीं
सामाचारीमाह॥ तत्र सूत्रम्॥ वासावासं प ज्जोसवियाणं अत्थेगइयाणं एवं वुत्तपुव्वं भ
वइ दावे भंते एवं से कप्पइ दावित्तए नो से क प्पइ पडिगाहित्तए वासा० अत्थेगइयाणं एवं
वुत्तपुव्वं भवइ पडिगाहेहि एवं से कप्पइ पडि गाहित्तए नो से कप्पइ दावित्तए वासा० अत्थे
गइयाणं एवं वुत्तपुव्वं भवइ दावे भंते पडिगाहे। हि एवं से कप्पइ दावित्तए वि पडिगाहित्तए वि ध
व्या० अस्थि य अस्ति एतत् यदेकेषां साधूनां गुरुत एवमुक्तं पूर्वं भवति गुरुभिरिति गम्यं चूर्णौ तु अ
त्थेगइया आयरिया इत्युक्तं अज्जो सासेइ आयरिउ इति वचनात् अर्थएवानुयोगएकायिता एकायाऽ
र्थैकायिता स्तेषां अथवा अस्ति एतत् यदेकेषां आचार्याणामिदमुक्तं पूर्वं भवतीति व्याख्येयं तत्र
च षष्ठी तृतीयार्थे ततश्च आचार्यैरिदमुक्तं भवति यत् दावे भंते दे भदंत हे कल्याणिन् साधो दावे इति
ग्लानाय दद्याः स्वार्थिकेणो वा द्वापयेः दद्याः अशनादिकमानीयेति गम्यं अनेन च ग्लानादानादेशो

८
कल्पल.

नाद्यचेञ्चउमासिकादौस्वयंनप्रतिगृह्णीयात इत्युक्तं एवमुक्ते सेतस्यसाधोः कल्पतेदातुं मर्यादिग्लाना
यनस्वयंप्रतिगृहीतुंगुरुणा अननुज्ञातत्वात् अथगुरुणोक्तं स्वयंप्रतिगृह्णीयाः ग्लानायअन्यो
दास्यतिनवा अयंलोस्यतेइति ततःप्रतिगृहीतुं कल्पते नग्लानायदातुं अथगुरुणोक्तंस्यात् सदंत
दद्याग्लानायप्रतिगृह्णीयाश्च यदद्यत्वमहमेसीतितदा दानंस्वस्मै प्रतिग्रहणंचकल्पतेगुरु
भिरनुक्तेचेत् ग्लानायआनयतिस्वयंवागृह्णाति तदापारिष्टापनिकादोषः क्षीणादिनाग्लानत्वेवामो
दोद्रवोवा क्षीरादौच धरणाधरणे आत्मसंयम विराधना॥ इतिचतुर्थीसामाचारी॥ ४ अथरस
विकृतित्यागरूपांपंचमींसामाचारीमाह॥ तत्र सूत्रं॥ वासावासंपज्जो नोकप्पइनिग्गंथाणं०
हट्ठाणंआरुग्गाणंबलियसरीराणंइमाओ नवरसविगईओ अभिक्खणं२ आहारि
त्तए तं खीरं१ दहिं२ नवणीयं३ सप्पिं४ तिल्लं५ गुडं६ महुं७ मज्जं८ मंसं९ व्याख्या वर्षाकाले
स्थितानांसाधूनांसाध्वीनां एवंविधानांनवरसवि कृतयोवारं२ गृहीतुंनकल्पंते किं०निर्ग्रंथहृष्टा
नांतरुणत्वेनसमर्थानां युवानोपिकेचित्सरोगाःस्युरित्याह अरोगाणं कश्चित् आरुग्गाणमितिपाठस्त
त्रआरोग्यमस्तिएषामिति अभ्रादित्वात्प्रत्ययेआरोग्यास्तेषां ताहृशा अपि केचित्कृशांगाःस्युरित्याह
बलिकशरीराणां रसप्रधाना विकृतयो रसविकृतयस्ता अभीक्ष्णं२ पुनः२नकल्पंते रसग्रहणंतासां
मोहो दृत्तवहेतुत्वख्यापनार्थं अलीहणग्रहणंतु अपवादालंबनेकदाचिन्नासांपरिभोगानुज्ञार्थंनवग्रह
णात्कदाचित्पक्वान्नंगृह्यते विकृतयो द्वेधा भक्ष्यदधिपक्वान्नाः असंचयिकाः ग्लानत्वेवागुरुबालवृद्ध १८०

तपस्विगच्छोपग्रहार्थंवाश्रावकादरनिमंत्रणाद्ग्राह्याः घृततैलगुडाख्याः संचयिकास्ताः प्रतिलाभयन् श्रा
द्धोवाच्यो महान्कालोस्ति ततोग्लानादिकार्येगृहीष्यामि सवदेत् भूयं गृह्णीत ममचतुर्मासीयावद्भाना
र्थंप्रचुराःसंति ततोग्राह्याः बालादीनांचदेयाः नतरुणानांनिःकारणंमद्यादिवर्जनं यावज्जीवमस्ति त
थापिअत्यंतापवादेकदाचिद्बाह्यभोगार्थंग्रहणेपिकृतपर्युषणानां सर्वथानिषेधः॥ इतिपंचमसामाचारी
॥५ अथग्लानार्थंग्रहणविधिरूपांषष्ठींसामाचारीमाह॥ तत्रसूत्रं॥ वासावासंपज्जोसवियाणं एवंवुत्तपु
व्वंभवइ अत्थिसंतेगिलाणस्स सेयवइज्जा अट्ठोसे यपुच्छियव्वो केवइएणंअट्ठो सेयवइज्जा एवइए
णंअट्ठोगिलाणस्स जंसेपमाणंवयइ सेयपमा णओघेतव्वे सेयविन्नविज्जा सेयविन्नवेमाणेल
भिज्जा सेपमाणपत्ते होउ१ अलाहि२ इयव त्तव्वंसिया सेकिमाहु भंते एवइएणंअट्ठोगिला
णस्स सियाणंएवंवयंतंपरोवइज्जा पडिगाहे हि अज्जो तुमंपच्छा तुमं भोक्खसिवा पाहिसिवा एवंसेक
प्पइपडिगाहित्तए नोसेकप्पइ गिलाणनीसाए पडि गाहित्तए ६ व्याख्या वर्षाकालेस्थितानांनिर्ग्रंथानांनि
र्ग्रंथीनांच अस्ति एतदेकेषांवैयावृत्यकरादीनां एवमुक्तपूर्वंभवति गुरुंप्रतीतिशेषः हे भदंत भगवन्
र्थः प्रयोजनं ग्लानस्यविकृत्या इतिकाक्वा प्रश्नः२ वगातिः एवंउक्ते सचगुरुर्वदेत् अर्थः सेयपुच्छेइतितं
चग्लानं सवैयावृत्यकरः पृच्छति कचित्सेयपुच्छियव्वे इतिपाठः तत्रसग्लानःप्रष्टव्यः किंपृच्छतीत्याह
केवइएणंअट्ठो कियताविकृतिजातेन क्षीरादिनातवअर्थः तेनचग्लानेनस्वप्रमाणेउक्ते सवैयावृत्य
करोगुरोरग्रेआगत्यब्रूयात् एवइएणंअट्ठोगिलाणस्स इयताअर्थोग्लानस्य ततोगुरुराह जंसेत्ति य

त्थमाणं संसाणो वदति तत्थमाणेन सेऽनितद्विकृतिजातं ग्राह्यं तथा सेयावि लविज्जा सच्चवेयाहड्डा करा
द्विविज्ञप्येत् याचेत गृहस्थपार्श्वात् विज्ञापयाउरत्तयाज्ञायां स याचमानो लभेत तद्रक्तं तच्चप्रमाणप्राप्तं
यो मंडातं ततश्च होउ१ अलाहि त्ति साधुप्रसिद्धः इत्युक्तस्यार्थः लवत्थि तिपदं अलाहि त्ति सूत्रमित्यर्थः
अलाहि त्ति निवारणे इति वचनादन्यस्मादाः इति वक्तव्यं स्यात् गृहस्थं प्रति ततो गृही प्राह से किमाहु भंते
अथ किमाहु भदंताः किमर्थं सूत्रमिति ब्रुवंते त्तवंतं इत्यर्थः साधुराह एवइएणं अट्ठो गिलाणस्स एतावता
अर्थो ग्लानस्य सियाकदाचित् णं एतं साधुं एवं वदंतं परो दाता गृही वदेत् किं वदेदित्याह अट्ठो इत्यादि
हे आर्य प्रति गृहाण त्वं पश्चाद्धिकं तत्त्वं सोऽमुसे भुंजीथाः पक्वान्नादि पास्यसि पिबेः दुग्धं क्षीरादि क
चित् पाहि सि त्ति स्थाने पाहिसि पाठस्तत्र तीव वद्य स्वयं वा भुंजीथाः अन्यस्य साधोर्वा दद्याः
ति एवमुक्ते गृहिणा से तस्य साधोः कल्पते प्रतिगृही तुं न तु नस्वलिननिश्रया गाढ्या स्वयं गृहीतुं ग्लानाद्यर्थं
याचितं मंदल्पानानेयमित्याकूतं॥ इति षष्ठी सामाचारी॥६॥ अथ एवंविधे कुले अदृष्टं न याचनीयमिति
स्वरूपां सप्तमी सामाचारीमाह॥ तत्र सूत्रं॥ वासावासं पज्जोसवियाणं थेराणं तहप्पगाराइं कुलाइं कडाइं पत्तियाइं
थिज्जाइं वेसासियाइं संमयाइं बहुमयाइं अणुमयाइं भवंति जत्थ से नो कप्पइ अदक्खु वइत्तए अत्थि ते
आउसो इमं वा२ से किमाहु भंते सड्ढी गिही गिण्हइ वा तेणियं पि कुज्जा ७ व्याख्या वर्षाकाले स्थितानां निर्ग्रंथानां
निर्ग्रंथीनां च एवंविधेषु कुलेषु अदृष्टं वस्तु याचितुं न कल्पते किंविशिष्टानि कुलानि तहप्पगाराइं तथाप्रका १८१
राणि अजुगुप्सितानि कुलानि गृहाणि पुनः किं० कु० कडाइं कृतानि तैरन्यैर्वा श्रावकीकृतानि पुनः

किं० कु० पत्तियाइं प्रत्ययितानि प्रीतिकराणि वा पुनः किं० कु० थिज्जाइं स्थैर्यमस्ति एषु इति स्थैर्याणि
प्रीतौ दाने वा पुनः किं० कु० वेसासियाइं ध्रुवं लप्स्ये इदं तत्रेति विश्वासो येषु इति वैश्वासिकानि पुनः किं०
कु० संमताणि संमतः यतिप्रवेशानि पुनः किं० कु० बहुमयाइं बहवोऽपि साधवो नैको द्वौ वा मता येषु
वस्तूनां वा गृहमानुषाणां मतः साधुप्रवेशो येषु तानि बहुमतानि पुनः किं० कु० अणुमयाइं अनुम
तानि दाने अनुज्ञातानि अथवा अणुः क्षुल्लकोपि मतो येषु सर्वसाधुसाधारणत्वात् न तु मुखं दृष्ट्वा तिल
कं कर्षयंतीति येषु कुलेषु से तस्य साधोः अदक्खु इति याच्यं वस्तु अदृष्ट्वा न कल्पते वक्तुं यथा अत्थि
ते आयुष्मन् अमुकं वा वस्तु अत्र से किमाहु भंते इति सर्वत्र संबध्यते परमेतत्पदं अतिरिक्तं सं
भाव्यते यतो अव्याख्यातत्वात् कुतो यतः स श्रद्धी श्रद्धावान् दानवासनिको गृही तत्साधुया
चितं वस्तु गृह्णीत वा मूल्येन क्रीणीयात् चौर्येण अपि आनीयते हस्तकवितरेत् उंदनं सक्तुमंडका
दि सर्वं कथिते प्रस्तोकेऽग्घे वा क्षिपेत् आपणात् आनयेत् प्रामित्यं वा कुर्यादिति कृपणगृहेऽपि
अदृष्टापि याचने न दोषः इत्यर्थः स तु सदपि दृष्टमपि कृपणत्वान्न ददाति कुतोऽसत् अदृष्टं दद्यात्॥ इति
सप्तम सामाचारी॥७॥ अथ अष्टमी सामाचारी गोचरीगमनरूपामाह॥ तत्र सूत्रं॥ वासावासं पज्जोसवि
यस्स निच्चभत्तियस्स भिक्खुस्स कप्पइ एगं गोयरकालं गाहावइकुलं भत्ताए वा पाणाए वा निक्खमित्तए वा प
विसित्तए वा नन्नत्थ आयरियवेयावच्चेण वा१ एवं उवज्झायवेयावच्चेण वा२ तवस्सि३ गिलाण४ वेयाव
च्चेण वा खुड्डएण वा५ खुड्डियाए वा६ अवंजणजायएण वा७ वासावासं० चउत्थभत्तियस्स भिक्खु

स्स अयं एवइए विसेसे जं से पाउ निक्खम्म पुव्वामेव वियडगं भुच्चा पडिग्गहगं संलिहिय संपमज्जिय से
य संथरिज्जा कप्पइ से तद्दिवसं तेणेव भत्तट्ठेणं पज्जोसवित्तए से य नो संथरिज्जा एवं से कप्पइ दुच्चंपि
गाहावइकुलं भत्ताए वा पाणाए वा निक्खमित्तए वा पविसित्तए वा २ वासावासं छट्ठभत्तियस्स भिक्खु
स्स कप्पंति दो गोयरकाला गाहावइकुलं भत्ताए वा पाणाए वा नि० वा पवि० वा ३ वासावा० अट्ठमभत्ति
यस्स भिक्खुस्स कप्पंति तओ गोयरकाला भत्ताए वा पा० नि० पा० ४ वासावासं विकिट्ठभत्तियस्स भिक्खुस्स
कप्पंति सव्वेवि गोयरकाला गा० भ० पा० नि० प० ५ व्या० वर्षाकाले स्थितस्य निच्चभत्तियस्स नित्यभ
क्ताशिनो भिक्षोः एगं गोयरकालं एकस्मिन् गोचरकाले सूत्रपौरुष्यर्थपौरुष्योरनंतरमित्यर्थः गाहा
वइकुलं गृहस्थगृहं भक्तार्थं पानार्थं वा गंतुं कल्पते अपवादमाह नन्नत्थेति णकारो वाक्यादौ
अलंकारार्थः अन्यत्र आचार्यवैयावृत्त्यात् तदन्यत्र वर्जयित्वा इत्यर्थः आचार्यवैयावृत्त्यं हि
यद्येकवारं भुक्तेन कर्त्तुं न पारयति तदा द्विरपि भुंक्ते तपसो हि वैयावृत्त्यं गरीयः एवमुपाध्याय
तपस्विग्लानवैयावृत्त्यकरेष्वपि तथा अव्वंजणजायएण वा न व्यंजनानि वस्तिकूर्चकक्षादिरोमाणि जा
तानि यस्यासौ अव्यंजनजातः स्वार्थे कः अव्यंजनजातकात् क्षुल्लकात् अन्यत्र यावदद्यापि त
स्य व्यंजनानि नो छिद्यंते तावत् द्विरपि सोऽश्नन् न दुष्यतीत्यर्थः एवं क्षुल्लिकापि अत्र च आचार्यश्च वै
यावृत्त्यमस्यास्तीति अभ्रादित्वात् अप्रत्यये वैयावृत्त्यः वैयावृत्त्यकरः आचार्यवैयावृत्त्यस्तस्मादन्यत्र
एवं उपाध्यायादिष्वपि ज्ञेयं आचार्योपाध्यायतपस्विग्लानक्षुल्लकानां द्विर्भुक्तस्यापि अनुज्ञातत्वात् ए १८२

वमपि द्विर्वारा कार्या १ एवं चतुर्थभक्तिकस्य भिक्षोरयं वक्ष्यमाण एतावान् विशेषो यत्स आचार्योपाध्याय
तपस्विग्लानक्षुल्लकेभ्योऽन्यः साधुश्चतुर्थभोजी प्रातर्निःक्रम्य उपाश्रयादावश्यिकां निर्गत्य पूर्वमेव विक
टं शुद्धमाषादि शुद्धं भुक्त्वा प्रासुकाहारं पीत्वा च तक्रादिकं संसृष्टं कल्पं वा पतद्ग्रहं पात्रं संलिख्य निर्लेपीकृ
त्य संप्रमृज्य च प्रक्षाल्य से य त्ति यदि संस्तरेत् निर्वहेत् तदा तत्र दिने तेनैव भक्तार्थेन भोजनेन परिवसेत्
अथ न संस्तरेत् स्तोकत्वात् तदा दुच्चंपि द्वितीयवेलायामपि विशेदित्यर्थः २ एवं षष्ठभक्तिकस्य द्वौ गोचर
कालौ येन स कल्ये पुपोषण कर्त्ता ३ अष्टमभक्तिकस्य तु त्रयो गोचरकाला न च प्रातरटितमेव
धारयेत् संचयसंसक्तिसर्पाघ्राणादिदोषप्रसंगात् ४ विगिट्ठभत्तियस्सत्ति अष्टमादूर्ध्वं
तपो विकृष्टभक्तं तस्य सर्वेपि गोचरकालाः कल्पंते चतुरोपि प्रहरान् ५ इति अष्ट
मी सामाचारी ॥ ८ ॥ अथ आहारविधिमुक्त्वा नवमी पानकसामाचारीमाह ॥ तत्र सूत्रं ॥ वा
सावा० निच्चभत्तियस्स भिक्खुस्स कप्पंति सव्वाइं पाणगाइं पडिगाहित्तए १ वासावा० चउत्थभ
त्तियस्स भि० क० तओ पाणगाइं तं० उस्सेइमं वा १ संसेइमं वा २ चाउलोदगं वा ३ २ वासा० छट्ठभ
त्तियस्स भिक्खुस्स तओ पाणगाइं पडिगाहित्तए तं० तिलोदए १ तुसोदए २ जवोदए ३ वासावासं अट्ठमभ
त्तियस्स भिक्खुस्स कप्पइ तओ पाणगाइं पडिगाहित्तए आयामए सोवीरए सुद्धवियडे वासावासं विगि
ट्ठभत्तियस्स भिक्खुस्स कप्पइ एगे उसिणवियडे पडिगाहित्तए से वि य णं असित्थे नो चेव णं ससित्थे वा
सा० भत्तपडियाइक्खियस्स कप्पइ एगे उसिणवियडे पडिगाहित्तए से वि य णं असित्थे नो चेव णं स

सिञ्चे से विय णं परिस्सए नो चेव णं अपरिस्सए से विय णं परिमिए नो चेव णं अपरिमिए से विय णं बहुसंप
न्ने नो चेव णं अबहुसंपन्ने ९ सू० ९ एवमाहारविधिमुक्त्वा अत्याख्यानमध्येपि पानकविधिमाह॥ वर्षाका
लेस्थितस्य भिक्षोर्नित्यभक्तिकस्य नित्यमेकाशनिनः सर्वाणि पानकानि पानैषणोक्तानि वक्ष्यमाणानि वोत्स्वे
दिमादीनि गृहीतुं कल्पंते१ तथा चतुर्थभक्तिकस्य भिक्षोरेतानि त्रीणि पानकानि गृहीतुं कल्पंते तथाहि उस्से
इमं उत्स्वेदिमं पिष्टजलं पिष्टभृतहस्तादिक्षालनजलं वा१ संसेइमं वा संस्वेदिमं संसेकिमं वा यत्पर्णाद्युत्का
ल्य शीतोदकेन सिच्यते तत्२ चाउलोदगं वा तंडुलधावनोदकं३ वर्षावासस्थितस्य भिक्षोः षष्ठभक्ति
कस्य इमानि त्रीणि पानकानि गृहीतुं कल्पंते तथाहि तिलोदगं वा महाराष्ट्रादिनिस्त्वचिततिल
धावनं१ तुसोदए वा तुषोदकं व्रीह्यादिधावनं२ जवोदकं यवधावनं ३ तथा वर्षाकाले
स्थितस्य भिक्षोरष्टमभक्तिकस्य इमानि त्रीणि पानकानि प्रतिगृहीतुं कल्पंते तथाहि॥ आयाम
ए आयामकोऽवश्रावणं१ सोवीरए सौवीरकं कांजिकं२ सुद्धवियडे उष्णोदकं वर्णांतरप्राप्तं स्तु
द्धजलं वा३ केवलोष्णजलं तु उसिणवियडे इत्यनेनैवोक्तं४ वर्षाकाले स्थितस्य विकृष्टभक्तिकस्य सा
धोः एकं उसिणवियडेत्ति उष्णजलं प्रतिगृहीतुं कल्पते तदपि कीदृशं असिक्थं सिक्थवर्जितं यतः शा
ये णं अष्टमाद्यूर्द्धं तपस्विनो देहं देवता अधिष्ठितं भवति ५ तथा वर्षाकाले स्थितस्य भिक्षोः भत्तपडियाइक्खि
अस्सत्ति प्रत्याख्यातसर्वभक्तस्य अनशनिन इत्यर्थः एकमुष्णजलमेव प्रतिगृहीतुं कल्पते तदपि असिक्थं सि
क्थवर्जितं परं न ससिक्थं तदपि परिपूतं वस्त्रगलितं अपरिपूते तृणकाष्ठादिगलिलगनात् तदपि परिमितं

अन्यथा अजीर्णं स्यात् क्वचित्तु से विय णं बहुसंपुन्ने इत्यपि दृश्यते तत्र ईषदपरिसमाप्तं संपूर्णं बहुसंपू
र्णं नाम्नः प्राक् बहुज् वा इति बहुप्रत्ययः अनिस्तोकतरं दिदृणमात्रस्यापि नोपशम इति। नवमी सामाचारी
९॥ अथ दशमसामाचारी दत्तिसंख्यारूपामाह॥ तत्र सूत्रं॥ वासावासं पज्जोसवियस्स संखादत्तियस्स भिक्खुस्स कप्पंति
पंच दत्तीओ भोयणस्स पडिगाहित्तए पंच पाणगस्स अहवा चत्तारि भोयणस्स पंच पाणगस्स अहवा पंच भो
यणस्स चत्तारि पाणगस्स तत्थ णं एगा दत्ती लोणासायणमित्तमवि पडिगाहिया सिया कप्पइ से तद्दि
वसं तेणेव भत्तट्ठेणं पज्जोसवित्तए नो से कप्पइ दुच्चंपि गाहावइकुलं भ० पा० नि० प० १० व्या०॥
वर्षाकाले स्थितस्य भिक्षोः संखादत्तियस्सत्ति संख्यया उपलक्षिता दत्तयो यस्य स संख्यादत्ति
कस्तस्य दत्तिपरिमाणवत इत्यर्थः तत्र लवणास्वादनमात्रमपि प्रतिगृहीतात् दत्तिः स्या
त् यतो लवणं किल स्तोकं दीयते यदि तावन्मात्रं सक्तुपानस्य गृह्णाति तदा सापि दत्तिर्गण्य
ते अथ येन साधुना पंच भोजनस्य पंचैव पानकस्य अभिग्रहत्वेन दत्ताः संति तदा भोजनस्य
पानकमध्ये पानकस्य भोजनमध्ये न क्षेप्तव्याः एवं अथवा चतस्रो भोजनस्य पंच तु पानकस्य अ
थवा पंच भोजनस्य चतस्रश्च पानकस्य अत्रापि अन्यदीया दत्तिरन्यस्मिन्न क्षेपणीया पंचेति उप
लक्षणं न्यूनत्वेन चतस्रस्तिस्रो द्वे एका अधिकत्वेन षट् सप्त वा यथाभिग्रहं वाच्याः पुनरिदं रहस्यं
केनचित् पंच दत्तयो भोजनस्य लब्धास्तिस्रश्च पानकस्य ततः पानकसत्का अवशिष्टास्ता भोजने क्षिपति वर्द्धय
तीत्यर्थः भोजनसत्का वा पानके इत्येवं समावेशो न कल्पते इत्यर्थः॥ इति दशमसामाचारी॥१०॥ अथ संख

दिविचार रूपां एकादशमीं सामाचारीमाह॥ तत्र सूत्रं॥ वासावासं नो कप्पइ निग्गंथाण वा जाव उवस्सया
उ सत्तघरंतरं संखडिं संनियट्टचारिस्स इत्तए १ एगे एवमाहंसु नो कप्पइ जाव उवस्सयाउ परेणं संखडिं
संनियट्टचारिस्स इत्तए २ एगे उण एवमाहंसु नो कप्पइ जाव उवस्सयाउ परंपरेणं संखडिं संनियट्टचारि
स्स इत्तए व्या॰ वर्षाकाले स्थितानां निर्ग्रंथानां निर्ग्रंथीनां च उपाश्रयात् शय्यातरगृहादारस्य यावत्स
प्तगृहमध्ये संखडिं संस्क्रियते इति संस्कृतिः उदनपाकस्थाने इत्त एत्ति गंतुं न कल्पते पिंडपातार्थं तत्र न गच्छेदि
त्यर्थः तेषां गृहाणां सन्निहिततया साधुगुणकृत श्रद्धत्वेन उद्गमादिदोषसंभवात् एतावता शय्या
तरगृहं अन्यानि च षट् आसन्नगृहाणि वर्ज्ज येदित्युक्तं कस्य न कल्पते इत्याह॥ संनियट्ट
चारिस्स निषिद्धगृहेभ्यः संनिवृत्तः सन् चर तीति विहरतीति संनिवृत्तसंचारी प्रतिषिद्धवर्ज
कः साधुस्तस्य बहवस्त्वेवं व्याचक्षते सप्तगृहं तरं संखडिं जनसंकुलजेमनवारालक्षिणां गं
तुं न कल्पते तदुक्तं प्रतिसाति तत्प्रमाणीकर्त्तव्यं ॥१॥ द्वितीयमते शय्यातरं अन्यानि च सप्तगृहाणि
वर्ज्जयेदित्युक्तं २ तृतीयमते शय्यातरगृहं अनंतरगृहं सप्त च अन्यानि वर्ज्जयेदित्युक्तं उवस्सयाउ प
रेणंति उपाश्रयात्परतः सप्तगृहांतरं एवं गंतुं न कल्पते परंपरेणंति परंपरया व्यवधानेन सप्तगृहांतरए गंतुं न
कल्पते शय्यातरगृहादनंतरं एकं गृहं ततः सप्तगृहाणीति परंपरता इति एकादशसामाचारी ११ ॥ अथ
ह्रष्टोसत्यां जिनकल्पिकानामाहारग्रहणविधिरूपां द्वादशसामाचारीमाह॥ तत्र सूत्रं॥ वासावासं नो क
प्पइ पाणिपडिग्गहियस्स भिक्खुस्स कणगफुसियमित्तमवि वुट्ठिकायंसि निवयमाणंसि गाहावइकु

लं भत्ताए वा पाणाए वा निक्खमित्तए वा पविसित्तए वा १ वासावासं पाणिपडिग्गहियस्स भिक्खुस्स नो कप्पइ अगिहंसि पिंडवायं पडि
गाहित्ता पज्जोसवित्तए पज्जोसवेमाणस्स सहसा वुट्ठिकाए निवइज्जा देसं भुच्चा देसमादाय से पा
णिणा पाणिं परिपिहित्ता उरंसि वा णं निलिज्जिज्जा कक्खंसि वा णं समाहडिज्जा अहाछन्नाणि वा लेणा
णि वा उवागच्छिज्जा रुक्खमूलाणि वा उवागच्छिज्जा जहा से पाणिंसि दए वा दगरए वा दगफुसिया वा
नो परियावज्जइ वासावासं पाणिपडिग्गहियस्स भिक्खुस्स जं किंचि कणगफुसियमित्तंपि निवडइ
नो से कप्पइ स॰ पा॰ नि॰ प॰ १२ व्या॰ वासावा संवर्षाकाले स्थितस्य पाणिपडिग्गहियस्स त्ति
जिनकल्पिकादेर्भिक्षोः कणगफुसियत्ति कुसारमात्रे अवश्यायो मिहिका वर्षा वा वृष्टि
कायो अप्कायवृष्टिस्तस्मिन् निपतति सति भिक्षार्थं गाथापतिकुले गंतुं न कल्पते १ उ
नर्जिनकल्पिकादेः अगिहंसित्ति अनाच्छादिते आकाशे इत्यर्थः पिंडवायं पडिगाहित्ता
पिंडपातं आहारं प्रतिगृह्य पज्जोसवित्तए आहारयितुं न कल्पते २ कथं कदाचिदर्द्धभुक्ते पि वृष्टि
ष्टिः स्यात् ननु जिनकल्पिकादयो देशोनदशपूर्वधरत्वेन अतिशयज्ञानिनः स्युः प्रागेव उपयोगः कृ
तो भविष्यति तत्कथं अर्द्धभुक्ते वृष्टिः संभवति सत्यं छाद्मस्थिकोपयोगस्तथा वा स्यादन्यथा वा स्यादित्यदो
षः अथ आकाशे भुंजानस्य यदि वर्षे तदा पिंडपातस्य देशमेकदेशं भुक्त्वा देशं च आदाय पाणिं आहारै
कदेशसहितपाणिना द्वितीयहस्तेन परिधाय आच्छाद्य उरसि हृदये निलीयेत् निक्षिपेद्वा णं इति तं सा
हारं पाणिं कक्षायां वा समाहरेत् अंतर्हितं कुर्यात् एवं च कृत्वा यथाछन्नानि गृहादीनि स्वनिमित्तं आ

च्छादितानि लयनानि गृहाणि वृक्षमूलानि वा उपागच्छेत् यथा से तस्य पाणौ दकलेदकादीनि उदकादीनि
न पर्यापद्यंते न विराध्यंते न पतंति वा तत्र दकं बद्दवो बिंदवः स्फरजो बिंदुमात्रं दगफुसियाफु
सारं अवश्याय इत्यर्थः उक्तमेवार्थं निगमयन्नाह वासावासमित्यादि जिनकल्पिकादेः पाणिप
तग्गहिकस्य साधोः यत्किंचित्कणगफुसियमित्तं पि निवडइ नो कप्पइ० कणो लेशस्तन्मात्रं कं
पानीयं फुसियाफुसारमात्रं कनकस्य फुसियातन्मात्रमपि यदि निपतति तदा न कल्पतेति साधोर्गृ
हस्थगृहे गंतुं॥ इति द्वादशी सामाचारी॥ १२॥ अ र्थमुक्तः पाणिपात्रस्य जिनकल्पिकस्य विधिः॥
अथ पतद्ग्रहधारिणः स्थविरकल्पिकस्या हारग्रहणविधिरूपां त्रयोदशीं सामाचारीमा
ह॥ तत्र सूत्रं॥ वासावासं पडिग्गहधारि स्स भिक्खुस्स नो कप्पइ वग्घारियवुट्ठिका
यंसि गाहावइकुलं भ० पा० नि० प० १ क प्पइ से अप्पवुट्ठिकायंसि संतरुत्तरंसि गाहा
वइकुलं भ० पा० नि० प० २ ग्रंथाग्रं ११०० निग्गंथ स्स निग्गंथीए वा गाहावइकुलं पिंडवायपडियाए
अणुपविट्ठस्स निगिज्झिय२ वुट्ठिकाए निवइज्जा कप्पइ से अहे आरामंसि वा १ अहे उवस्सयंसि वा २
अहे वियडगिहंसि वा ३ अहे रुक्खमूलंसि वा ४ उवागच्छित्तए तत्थ से पुव्वागमणेणं पुव्वाउत्ते चाउलोदणे
पच्छाउत्ते भिलिंगसूवे कप्पइ से चाउलोदणे पडिगाहित्तए नो से कप्पइ भिलिंगसूवे पडिगाहित्तए १ तत्थ
से पुव्वागमणेणं पुव्वाउत्ते भिलिंगसूवे पच्छाउत्ते चाउलोदणे कप्पइ से भिलिंगसूवे पडिगाहित्तए नो १८५
से कप्पइ चाउलोदणे पडिगाहित्तए २ तत्थ से पुव्वागमणेणं दोवि पच्छाउत्ताइं एवं से नो कप्पंति दोवि

पडिगाहित्तए ३ जे से तत्थ पुव्वागमणेणं पुव्वाउत्ते से कप्पइ पडि० ४ जे से तत्थ पुव्वागमणेणं प
च्छाउत्ते नो से कप्पइ पडि० ५ वासावासं निग्गंथस्स गाहावइकुलं पिंडवायपडियाए अणुप्पवि
ट्ठस्स निगिज्झिय२ वुट्ठिकाए निवइज्जा कप्पइ से आरामंसि वा अहे उवस्सयंसि वा अहे वियड
गिहंसि वा अहे रुक्खमूलंसि वा उवागच्छित्तए नो से कप्पइ पुव्वगहिएणं भत्तपाणेणं वेलं उवायणावि
त्तए कप्पइ से पुव्वामेव वियडगं भुच्चा पिच्चा पडिग्गहगं संलिहिय२ संपमज्जिय२ एगओ भंडगं कट्टु
सावसेसे सूरिए जेणेव उवस्सए तेणेव उवाग च्छित्तए नो से कप्पइ तं रयणिं तत्थेव उवायणा वि
त्तए वासावासं निग्गंथस्स गाहावइकुलं पिं डवायपडियाए अणुप्पविट्ठस्स निगिज्झिय२
वुट्ठिकाए निवइज्जा कप्पइ से आरामंसि वा अहे उवस्सयंसि वा जाव उवागच्छित्तए
तत्थ नो कप्पइ एगस्स निग्गंथस्स एगाए निग्गं थीए एगओ चिट्ठित्तए १ तत्थ नो कप्पइ एगस्स
निग्गंथस्स दुण्हं निग्गंथीणं एगयओ चिट्ठित्तए। २ तत्थ नो कप्पइ दुण्हं निग्गंथाणं एगाए य निग्गं
थीए एगयओ चिट्ठित्तए ३ तत्थ नो कप्पइ दुण्हं निग्गंथाणं दुण्हं निग्गंथीण य एगयओ चिट्ठित्तए अत्थि
य इत्थ केइ पंचमे खुड्डए वा खुड्डियाए वा अन्नेसिं वा संलोए सपडिदुवारे एवण्हं कप्पइ एगयओ चि
ट्ठित्तए वासावासं निग्गंथस्स गाहावइकुलं पिंडवायपडियाए वा अणुपविट्ठस्स निगिज्झिय२ वु
ट्ठिकाए निवइज्जा कप्पइ से अहे आरामंसि वा उवस्सयंसि वा उवागच्छित्तए तत्थ नो कप्पइ एगस्स
निग्गंथस्स एगाए य अगारीए एगयओ चिट्ठित्तए एवं चउभंगो अत्थि या इत्थ केइ पंचमए थेरे वा थेरिया

८७
कल्पल०

वी अन्नंसि वा संलोए सपडिदुवारे एवं कप्पइ एगयओ चिट्ठित्तए एवं चेव निग्गंथीए अगारस्स य साणि
यचं १२ व्या० उक्तः पाणिपात्रस्य जिनकल्पिकस्य विधिः॥ अथ पतद्ग्रहधारिणः स्थविरकल्पिकविधि
माह॥ वर्षाकाले स्थितस्य साधोः वग्घारियवुट्ठिकायंसि अच्छिन्नधाराहष्टिस्तस्यां यस्यां वा वर्षाक
ल्पः श्च्योतति नीव्रं वा वर्षाकल्पं वा भित्त्वा अंतः कायमार्द्रयति या हष्टिस्तस्यां सत्यां विहर्तुं भक्तपानादि
निमित्तं गृहस्थस्य गृहे गंतुं न कल्पते १ अपवादमाह॥ अशिवादिकारणैः कृततपाः क तपस्विरूद्द ऽ
सहा अर्णिकाषाहता विहरंति कथंकारं अल्पवृ ष्टौ सत्यां उ संतरुत्तरंसि ति अंतरः सौत्रः कल्पः उ
त्तरः ऊर्णिकस्ताभ्यां कल्पाभ्यां प्रावृतस्य साधोः कल्पते गंतुं चूर्णिकारस्त्वेवमाह॥ अंतरं रय
हरणं पडिग्गहो वा उत्तरं पाउरणकप्पो तेहिं सहेति॥१ पुनर्वर्षाकाले स्थितस्य आहारार्थं
गृहस्थगृहे प्रविष्टस्य निर्ग्रंथस्य निगिज्झिय २ स्थित्वा २ हष्टिकायो निपतेत् मेघो वर्षति तदा त
स्य साधोः कल्पते गंतुं आरामं वा अहे उवस्सयं सि वा आत्मनः सांभोगिकानां इतरेषां च उपाश्र
यस्याधः तस्याभावे विकटगृहे आस्थानमंडपिकायां ग्राम्यपर्षदि तत्र स्थितो वेलां हष्टेः स्थिता ऽ
स्थितस्वरूपं च जानाति अशंकनीयश्च स्यात् वृक्षमूले वा ऽ निर्गलकरीरादौ तत्र विकटगृहे वृ
क्षमूलादौ स्थितस्य साधोः पुव्वागमणेणं ति आगमनात् पूर्वकाले अथवा सर्वसाधुरागतः पश्चा १८६
दायुक्तो राद्धुं प्रवृत्तः इति पूर्वागमनेन हेतुना पूर्वायुक्तस्तंडुलोदनः कल्पते पश्चादायुक्तो भिलिंग
सूपो न कल्पते तत्र पूर्वायुक्तः साध्वागमनात् पूर्वमिव गृहस्थैः स्वार्थं पक्तुमारब्धस्तंडुलोदनः स च

ति गृहीतुं कल्पते साधौ च आगते यः पक्तुमारब्धः स पश्चादायुक्तो भिलिंगसूपो मसूरदालिः उडिददालिर्वा स
स्नेहसूपो वा न कल्पते उद्गमादिदोषसंभवात् एवं यदि पूर्वायुक्तो भिलिंगसूपः पश्चादायुक्तस्तंडुलोदन
स्तदा भिलिंगसूपो गृहीतुं कल्पते न तंडुलोदनः २ एवं तंडुलोदनो भिलिंगसूपश्च एतद्द्वयमपि पश्चादायु
क्तं तदा द्वयमपि गृहीतुं साधोर्न कल्पते ३ एवं यदि द्वयमप्येतत् पूर्वायुक्तं तदा द्वयमपि साधोर्गृहीतुं क
ल्पते॥ पुनः संग्रहमाह॥ जे से इत्यादि यस्मात्र साध्वागमनात् पूर्वायुक्तः से तस्य साधोर्गृहीतुं कल्पते॥
यस्मात्र साध्वागमनात् पश्चादायुक्तः से तस्य साधो र्न गृहीतुं कल्पते इत्यर्थः २ तथा वर्षाकाले स्थित
स्य साधोर्भिक्षार्थं प्रविष्टस्य वृष्टिसद्भावेन आरा मे वा उपाश्रयस्य अधो वा विकटगृहस्य अ
धो वा वृक्षमूलस्य अधो वा स्थितस्य साधोर्न कल्पते पूर्वगृहीतेन भक्तपानेन वेलां अति
क्रमयितुं तत्र च तिष्ठतः कदाचिद्वर्षा नोपरमति तत्र का मर्यादा इत्याह॥ कल्पते से तस्य साधो
र्विकटं उद्गमादिदोषशुद्धं भुक्त्वा पीत्वा च संलि ह्य २ संप्रमार्ज्य २ एकत्रायतं सुबद्धं लांदकं पा
त्रकादिकमुपकरणं कृत्वा वपुषा सह प्राहृत्य वर्षत्यपि अनस्तमिते सूर्ये यत्रैवोपाश्रयस्तत्रै
व गंतुं कल्पते परं नो कल्पते तस्य साधोस्तत्रैव तां रात्रिं अतिक्रमयितुं कथं तत्र बहिर्वसतो बह
वो दोषाः एकस्य उ आत्मपरोभयसमुत्थाः साधवो वा वसतो अधृतिं कुर्वंति पुनर्वर्षाकाले स्थि
तस्य साधोर्विकटगृहादौ तिष्ठतः केन विधिना स्थातव्यमित्याह एकः साधुः एकया साध्व्या सह तत्र स्था
नेन तिष्ठेत् कथं शंकादिदोषसद्भावात् चउभंगी एवं एकः साधुरेकया साध्व्या समं न तिष्ठेत् एवं एकः सा

८९
कल्प०

कथमेकाकित्वं साध्वी रित्युच्यते सांघाटिक उपोषितो वा १ असुखितो वा २ कारणिको वा ३ स्यादेकाकी १ अ
त्र चतुर्भंगी एवं एकः साधुरेकया साध्व्या समं न तिष्ठेत् १ एवं एकः साधुः साध्वीद्वयेन सममपि नो तिष्ठेत् २
एवं साधुद्वयेनापि समं एका साध्वी न तिष्ठेत् ३ एवं साधुद्वयेनापि साध्वीद्वयं नो तिष्ठेत् ४ तर्हि कथं तिष्ठेत्
इत्याह॥ अस्ति चात्र कश्चित् पंचमः क्षुल्लकः साधूनां क्षुल्लिका वा साध्वीनां तदा तिष्ठेत् साधुर्हि
आत्मना द्वितीय उत्सर्गतः संयत्या सह न्यादयः षट्कर्णो भिद्यते मंत्र इति न्यायात् पक्षांतरमाह
यदि क्षुल्लकादिर्न स्यात् तदा तत्र अन्येषां ध्रुव कर्मिकलोहकारादीनां वर्षत्यपि अशुद्धस्वक
र्मणि संलोके दृष्टिपथे तत्रापि संउति द्वारे सर्व गृहाणां वा द्वारे एवं वा स्थातुं कल्पते एवं इति वा
क्यालंकारे एवमेव चतुर्भंगी गृहिण्या सह इष्टेया तथाहि एकः साधुः एका गृहिणी १
एकः साधुः गृहिणीद्वयं २ साधुद्वयं गृहिणी एका ३ साधुद्वयं गृहिणीद्वयं एवमपि न ति
ष्ठेत् एवमगारं अस्यास्तीति अभ्रादित्वात् अत्य ये अगारी गृही तेनापि समं चतुर्भंगी ज्ञेया॥
एका साध्वी एको गृहस्थः १ साध्वीद्वयं एको गृहस्थः २ एका साध्वी गृहस्थद्वयं ३ साध्वीद्वयं गृहस्थद्व
यं ४ एवमपि संतिनो स्थातव्यं ३ इति त्रयोदशमी सामाचारी॥१३॥ अथ अदत्तापर्वविहरणनि
षेधरूपां चतुर्दशसामाचारीमाह॥ तत्र सूत्रम्॥ वासावासं नो कप्पइ निग्गंथाण वा निग्गंथीण वा अप
रिन्नएणं अपरिन्नयस्स अट्ठाए असणं वा ४ जाव पडिगाहित्तए से किमाहु भंते इच्छा परो अपरिन्न १८७
एणं भुंजिज्जा इच्छा परो न भुंजिज्जा १४ व्या० वर्षाकाले स्थितानां साधूनां नो कल्पते अपरिज्ञातेन साधु

ना अपरिज्ञातस्य निमित्तं अशनं वा १ पानं वा २ खादिमं वा ३ स्वादिमं वा ४ आहारं प्रतिगृहीतुं अपरिज्ञातेन
ति कोऽर्थः त्वं मम योग्यं अशनादिकं आनयेः इति अपरिज्ञसेन अकथितेन द्विंदिकसाधुना अपरिज्ञसस्य
ति कोऽर्थः अहं तव योग्यं अशनादिकं आनिष्ये इति अपरिज्ञसस्य अनुक्तस्य तत्र किं कारणमिति शि
ष्यः पृच्छति किमाहु भंते हे भदंत अत्र किं कारणं सदंता आहुः गुरुराह इच्छेत्यादि इच्छा चेत् स्यात् तदा परो यस्मै
आनीतं स भुंजीत इच्छा चेन्न अस्ति तदा न भुंजीत यदि च परो निच्छन् दाक्षिण्यात् भुंक्ते तदा तत्
स्य ग्लानिः स्याद् अजीर्णादिना यदि च न भुंक्ते तदा वर्षासु जलदूरितत्वात् अल्पेन स्थंडिलादौ र्लस्या
त्पारिष्ठापनादोषः स्यात् तस्मात् पृष्ट्वा आनेयमि ति॥ इति चतुर्दशसामाचारी॥१४ अथ सप्तस्ने
हायतनरूपां पंचदशसामाचारीमाह॥ त त्र सूत्रं॥ वासावासं नो कप्पइ निग्गंथाण वा उद
उल्लेण वा ससिणिद्धेण वा काएणं असणं वा ४ आहारित्तए से किमाहु भंते सत्त सिणेहायतणा
पन्नत्ता तं० पाणी १ पाणिलेहा २ नहा ३ नहसिहा ४ भमुहा ५ अहरुट्ठा ६ उत्तरुट्ठा ७ अह पुण एवं जा
णिज्जा विगओदए मे काए छिन्नसिणेहे एवं से कप्पइ असणं वा ४ आहारित्तए व्या० वर्षाकाले स्थिता
नां साधूनां साध्वीनां च नो कल्पते एवंविधेन कायेन अशनं वा ४ आहारयितुं किंभूतेन कायेन उ
दकार्द्रेण गलद्बिंदुयुक्तेन पुनः किंभूतेन कायेन सस्निग्धेन ईषद्बिंदुयुक्तेन से किमाहु भंते भगवान्
तीर्थंकरः किमाह अत्र कारणं गुरुराह सत्तेत्यादि सप्त स्नेहायतनानि जलावस्थानस्थानानि येषु
जलं चिरेण शुष्यति तानि सप्तस्थानानि इमानि पाणी हस्तौ १ पाणिरेखा आयुरेखादयः २ नासु चिर

पुदकं तिष्ठति नखाः अग्रंदाः ३ नखशिखास्तेषामग्रभागाः लूने चोर्द्ध्वरोमाणि अरश्मश्रुदाढिका
६ उत्तरोष्ठरोमश्मश्रुणि ७ अथ पुनरेवं जानीयात् ममकायो विगलितोदकोजात उदकबिंदुरहितो
जातः पुनः किं कुर्या छिन्नस्नेहः सर्वथा उपातस्त्रदाऽत्रानादि कुर्यात् इति पंचदशसामाचारी १५ ॥
अथ अष्टसूक्ष्मस्वरूपप्रतिपादिकां षोडशसामाचारीमाह ॥ तत्र सूत्रं ॥ इह खलु निग्गंथाण वा नि
ग्गंथीण वा इमाइं अट्ठ सुहुमाइं जाइं छउमत्थेणं निग्गंथेण वा २ अभिक्खणं २ जाणियव्वाइं पडिले
हियव्वाइं पासियव्वाइं भवंति तं० पाणसुहुमं १ पणगसुहुमं २ बीयसुहुमं ३ हरियसुहुमं ४ पु
प्फसुहुमं ५ अंडसुहुमं ६ लेणसुहुमं ७ सिणेहसुहुमं ८ से किं तं पाणसुहुमे पाणसुहुमे पंच
विहे पन्नत्ते तं० किण्हे १ नीले २ लोहिए ३ हालिद्दे ४ सुक्किल्ले ५ अत्थि कुंथू अणुद्धरी नामं
समुप्पन्ना जा ठिया अचलमाणा छउमत्थाणं निग्गंथाणं २ नो चक्खुफासं हव्वमागच्छति जा
व छउमत्थेणं निग्गंथेण वा २ अभिक्खणं २ जाणियव्वा पासियव्वा पडिलेहियव्वा भवइ से तं पाणसु
हुमे १ से किं तं पणगसुहुमे पणगसुहुमे पंचविहे पन्नत्ते तं० किण्हे १ नीले २ लोहिए ३ हालिद्दे ४ सुक्कि
ल्ले ५ अत्थि पणगसुहुमे तद्दव्वसमाणवन्नए नामं पन्नत्ते जे छउमत्थेणं निग्गंथेण वा जाव पडिलेहिय
व्वे भवइ से तं पणगसुहुमे २ से किं तं बीयसुहुमे २ पंचविहे पन्नत्ते तं० किण्हे १ नीले २ लोहिए ३ हालि
द्दे ४ सुक्किल्ले ५ अत्थि बीयसुहुमे कणियासमाणवन्नए नामं पन्नत्ते जे छउमत्थेणं निग्गंथेणं० जाव १८८
पडिलेहियव्वे भवइ से तं बीयसुहुमे ३ से किं तं हरियसुहुमे २ पंचविहे पन्नत्ते तं० किण्हे १ नीले २

लोहिए ३ हालिद्दे ४ सुक्किल्ले ५ अत्थि हरियसुहुमे पुढविसमाणवन्नए नामं पन्नत्ते जे निग्गंथेण
वा २ अभिक्खणं २ जाणियव्वे पडिलेहियव्वे भवइ से तं हरियसुहुमे ४ से किं तं पुप्फसुहुमे २ पं
चविहे पन्नत्ते तं० किण्हे १ नीले २ लोहिए ३ हालिद्दे ४ सुक्किल्ले ५ अत्थि पुप्फसुहुमे रुक्खसमा
णवन्नए नामं पन्नत्ते जे छउमत्थेणं निग्गंथेण वा २ जाणियव्वे पासियव्वे पडिलेहियव्वे भवइ से तं
पुप्फसुहुमे ५ से किं तं अंडसुहुमे २ पंचविहे पन्नत्ते तं० उद्दंसंडे १ उक्कलियंडे २ पिपीलियंडे ३ ह
लियंडे ४ हल्लोलियंडे ५ जे निग्गंथेण वा २ जाव पडिलेहियव्वे भवइ से तं अंडसुहुमे ६ से
किं तं लेणसुहुमे २ पंचविहे पन्नत्ते तं० उत्तिंगलेणे १ भिंगुलेणे २ उज्जुए ३ तालमूलए ४ सं
बुक्कावट्टे नामं पंचमे जे निग्गंथेण वा २ जाव पडिलेहियव्वे भवइ से तं लेणसु
हुमे ७ से किं तं सिणेहसुहुमे २ पंचविहे पन्नत्ते तं० उस्सा १ हिमए २ महिया ३ करए ४
हरतणुए ५ जे निग्गंथेण वा २ जाव पडिलेहियव्वे भवइ से तं सिणेहसुहुमे १६ व्या० वर्षाका
ले स्थितानां निर्ग्रंथीनां २ च इमानि अष्टौ सूक्ष्माणि यानि छद्मस्थेन निर्ग्रंथेन निर्ग्रंथ्या वा अभीक्ष्णं २ पुन
पुनर्यत्र स्थाननिषीदनादाननिक्षेपादिकाराति तत्र सूक्ष्मत्वादल्पाधारत्वाच्च सूक्ष्माणि ज्ञातव्यानि सू
त्रोपदेशेन पासियव्वाइं द्रष्टव्यानि चक्षुषा ज्ञात्वा दृष्ट्वा च पडिलेहियव्वाइं प्रतिलेखितव्यानि परिहर्त्त
व्यतया विचारणीयानि भवंति इमानि कानि इत्याह ॥ तं० तद्यथा ॥ प्राणसूक्ष्मं १ पनकसूक्ष्मं २ बीजसू
क्ष्मं ३ हरितसूक्ष्मं ४ पुष्पसूक्ष्मं ५ अंडसूक्ष्मं ६ लयनसूक्ष्मं ७ स्नेहसूक्ष्मं ८ शिष्यः प्राह किं तत्प्राणसू

९
कल्प०

क्ष्मं गुरुराह प्राणसूक्ष्मं पंचविधं प्रज्ञप्तं तीर्थंकरगणधरैः एकैकस्मिन्वर्णे सहस्रशो भेदा वर्णप्र
काराश्च संयोगाः ते सर्वेपि पंचसु कृष्णादिषु अंतर्भवंति पंचभेदान् वर्णेनाह॥ प्राणसूक्ष्मं कृष्णं१
नीलं२ लोहितं३ हारिद्रं४ शुक्लं च५ तत्र प्राणसूक्ष्मं द्वींद्रियादयः प्राणाः यथा अनुद्धरी कुंथुः स
ह्यचलन्नेव दृश्यते नस्थितः सन् सूक्ष्मत्वात् तत्प्राणसूक्ष्मं१ शिष्यः आह किं तत्पनकं गुरुराह प
नकसूक्ष्मं पंचविधं कृष्णादिवर्णभेदेन प्रोक्तं पनकः उल्ली सच प्रायो वर्षाकाले भूमीकाष्ठभांडादि
षु जायते यत्र च उत्पद्यते तद्द्रव्यसमवर्णश्च॥ नामं पनकेत्ति नामेति प्रसिद्धो तत्पनकसूक्ष्मं२
अथ किं तत् बीजसूक्ष्मं बीजसूक्ष्ममपि कृष्णादिपंचवर्णभेदेन पंचविधं भवति किं तत्
कणिका शाल्यादिबीजानां मुखमूले न हीइति लोकरूढिः नखिका तत्र बद्धास्थे
तज्ज्ञातव्यं१ द्रष्टव्यं२ प्रतिलेखितव्यं च३ ॥३॥ अथ किं तत् हरितसूक्ष्मं हरितसूक्ष्ममपि कृष्णा
दिवर्णभेदेन पंचविधं तत्त हरितसूक्ष्मं पृथ्वीसमानवर्णं तच्च अल्पसंहननत्वात् केनापि विन
श्यति तदपि बद्धयत्नेन ज्ञातव्यं द्रष्टव्यं प्रतिलेखितव्यं च॥ अथ किं तत् पुष्पसूक्ष्मं पुष्पसूक्ष्ममपि कृ
ष्णादिपंचवर्णभेदेन पंचविधं तच्च पुष्पसूक्ष्मं वटोदुंबरादीनां तत्समवर्णत्वाद् लक्ष्यं तच्च उच्छ्वासे
नापि विराध्यते तदपि ज्ञातव्यं द्रष्टव्यं प्रतिलेखितव्यं च इति पुष्पसूक्ष्मं ५ अथ किं तत् अंडसू १८९
क्ष्मं अंडसूक्ष्ममपि कृष्णादिपंचवर्णभेदेन पंचविधं तद्यथा उद्दंसा मधुमक्षिका मत्कुणाद्याः
तेषामंडानि१ पुनः उक्कलियंडे उत्कलिका लूता कीटतदंडानि २ पिपीलियंडे पिपीलिकाकी

टिकानामंडानि३ पुनः हलियंडे हलिका गृहकोकिला ब्राह्मणी वा तदंडानि ४ पुनः हल्लोलियंडे हल्लोह
लिया अहिलोडी सरडी ककिंडी इत्येकार्थाः तस्या अंडानि एतानि हि सूक्ष्माणि स्युः एतदपि हलियंडं
ज्ञातव्यं द्रष्टव्यं प्रतिलेखितव्यं च सूक्ष्मत्वात् ६ अथ किं तत् लेणसूक्ष्मं लेणसूक्ष्ममपि पंचविधं तद्यथा
लेणत्ति लयनं आश्रयः सत्त्वानां यत्र कीटिकाद्यनेकसूक्ष्मसत्त्वा भवंति उत्तिंगलेणत्ति उत्तिंगाद्वय
का गर्दभाकृतयो जीवास्तेषां लयनं भूमौ उत्कीर्णगृहं उत्तिंगलयनं१ भिंगुलेणत्ति भृगुः शुष्कसराडी
र्णभूमौ दारातरं केदारादिषु स्फुटिता दालिरित्यर्थः उज्जुएत्ति बिलं३ तालमूलएत्ति तालमूलकं
तालमूलकाकारं अधः पृथुः उपरि सूक्ष्मं विवरं संबुक्कावट्टेत्ति शंबूकावर्त्तं भ्रमरगृहं५ एत
दपि लेणसूक्ष्मं ज्ञातव्यं द्रष्टव्यं प्रतिलेखितव्यं च ७ अथ किं तत् स्नेहसूक्ष्मं स्नेहसूक्ष्म
मपि पंचविधं तद्यथा उस्सत्ति अवश्यायो य आकाशात् पतति १ हिमएत्ति हिमं स्त्यानोदबिं
दुः२ महियत्ति महिका धूमरी ३ करगत्ति करकाः घनोपलाः४ हरतणुएत्ति हरितनुर्भूमिनिः
सृततृणाग्रबिंदुरूपो यो यवांकुरादौ दृश्यते ५ एतदपि स्नेहसूक्ष्मं सर्वं ज्ञातव्यं द्रष्टव्यं प्रतिलेखित
व्यं च ८ अष्टस्वपि स्थानेषु साधुना साध्व्या च वर्षाकाले विशेषतो यत्ना कार्या॥ इति षोडश सामाचा
री॥१६॥ अथ गुरुं पृष्ट्वा विहरणं१ विकृतिग्रहणं२ चिकित्सा ३ संलेखना४ धर्म्मजागरिकादि५ क
र्त्तव्यरूपां सप्तदशसामाचारीमाह॥ तत्र सूत्रं॥ वासावासं पज्जोसविए भिक्खू इच्छिज्जा गाहावइकुलं भ०पा०
नि० प० नो से कप्पइ अणापुच्छित्ता आयरियं वा१ उवज्झायं वा२ थेरं वा३ पवत्तिं वा४ गणिं वा५

गणहरं वा गणावच्छेययं वा ० जाव जं वा पुरउं काउं विहरइ कप्पइ से आपुच्छिउं आयरियं
वा जाव जं वा पुरउं काउं विहरइ इच्छामि णं भंते तुब्भेहिं अब्भणुन्नाए समाणे गाहावइकुलं भ
० पा० नि० प० ते य से नो वियरिज्जा एवं नो कप्पइ भ० पा० नि० प० से किमाहु भंते आयरि
या पच्चवायं जाणंति एवं विहारभूमिं वा वियारभूमिं वा अन्नं वा जं किंचि पओयणं एवं गामाणु
गामं दूइज्जित्तए वासावासं भिक्खू इच्छिज्जा अन्नयरिं विगइं आहारित्तए नो से कप्पइ अणापु
च्छित्ता आयरियं वा जाव गणावच्छेययं वा जं वा पुरउं कट्टु विहरइ कप्पइ से आपुच्छित्ताणं
तं चेव इच्छामि णं भंते तुब्भेहिं अब्भणुन्नाए समाणे अन्नयरिं विगइं आहारित्तए तं० एव
इयं वा एवयखुत्तो वा ते य से वियरिज्जा एवं से कप्पइ अन्नयरिं विगइं आहारित्त
ए ते य से नो वियरिज्जा एवं से नो कप्पइ अन्नयरिं विगइं आहारित्तए से किमाहु भं
ते आयरिया पच्चवायं जाणंति वासावासं भिक्खू इच्छिज्जा अन्नयरिं तेगिच्छं आउट्टित्तए
तं चेव सव्वं भाणियव्वं वासावासं भिक्खू इच्छिज्जा अन्नयरं उरालं कल्लाणं सिवं धन्नं मंगल्लं स
स्सिरीयं महाणुभावं तवोकम्मं उवसंपज्जित्ताणं विहरित्तए तं चेव सव्वं भाणियव्वं वासावासं भि
क्खू इच्छिज्जा अपच्छिममारणंतियसंलेहणाझूसणाझूसिए भत्तपाणपडियाइक्खिए पाओव १५०
गए कालं अणवकंखमाणे विहरित्तए निक्ख० पवि० वा असणं वा ४ आहारित्तए उच्चारं पा
सवणं वा परिठावित्तए सज्झायं वा करित्तए धम्मजागरियं वा जागरित्तए ७ नो से कप्पइ अणा

पुच्छित्ता तं चेव ॥७॥ व्या० अथ ऋतुबद्धकाल १ वर्षालक्षणकाल २ कालद्वयसामान्या सामाचारी व
र्षासु विशेषेणोच्यते वर्षाकाले स्थितो भिक्षुः इच्छेत् गाथापतिकुलं गंतुं भक्तपानाद्यर्थं तदा तस्य
नो कल्पते अनापृच्छ्य आयरियं वेत्यादि आचार्यः सूत्रार्थव्याख्यानादिगाचार्यो वा १ उपाध्याय
ः सूत्राध्यापकः २ स्थविरो ज्ञानादिषु सीदतां स्थिरीकर्त्ता उद्यतानामुपबृंहकश्च ३ प्रवर्तको ज्ञा
नादिषु प्रवर्त्तयिता तत्र ज्ञाने एवं गुणय शृणु त उद्देशादीन् कुरु इति दर्शने दर्शनप्रभावका
नि संमत्यादितर्कान् पठ इति चारित्रे शुद्धप्रायश्चित्तमुद्वह इति अनेषणादेः प्रत्युपेक्षिता
दिच मा क्षमा इति यथाशक्ति द्वादशधा तपो विधेहि इति ४ गणी यस्य पार्श्वे आचार्या
सूत्रादि अभ्यस्यंति गणिनो वा अन्ये आचार्याः सूत्राद्यर्थं उपसंपन्नाः ५ गणधर
स्तीर्थकृच्छिष्यादिः ६ गणावच्छेदको यः साधून् गृहीत्वा बहिः क्षेत्रे आस्ते गच्छार्थं क्षेत्रोप
धिमार्गणादौ प्रधावनादिकर्त्ता सूत्रार्थोभयवित् यं वा संघाटकाधिपतित्वेन सामान्यसाधु
मपि पुरस्कृत्य विहरति एतान् आपृच्छ्य तस्य साधोर्विहर्तुं कल्पते कथं पृच्छति इत्याह इच्छामि
भदंताः भवद्भिरभ्यनुज्ञातः सन् गृहस्थगृहे भक्तपानाद्यर्थं गच्छामि इत्युक्ते शिष्येण ते य से विय
रिज्जा इति ते च आचार्यादयः से तस्य साधोर्वितरेयुः अनुज्ञां दद्युः एवं तस्य कल्पते गृहस्थगृ
हे गंतुं आहाराद्यर्थं अथानुज्ञां ते आचार्याः न दद्युस्तदा न कल्पते शिष्य आह किमाहु भंते भदंताः
किमेवमाहुः उत्तरमाह आयरिया पच्चवायं जाणंति इत्यादि बहुवचनांता गणस्य संसूचकात्

९
कल्प ल.

वंतीति न्यायात् आचार्यादयः अल्पपायं अपायं अपायपरिहारं च जानंति अतिक्रांतो ऽपायस्य उ
त्पपायः इति विग्रहेण अपायपरिहारेपि अल्पपायशेषो वर्त्तते अनापृच्छ्यगतानां दृष्टिर्वा लिवेत
अल्पनीका वा उपद्रवेयुः कलहो वा केनचित् आचार्य बालग्लानादि क्षपकप्रायोग्यं वा आहर्त्तं अस
विष्यंते च अतिशयशालिनः तत्सर्वं विदित्वा तस्मै अदापयिष्यन् १ एवं विहारभूमिं वा विहारभू
मिं चैत्यादिगमनं २ एवं विचारभूमिं वा विचारभूमिः शरीरचिंताद्यर्थं गमनं ३ पुनः अन्यं वा जं किं
चित् पत्रं अन्यद्वा प्रयोजनं लेपसीवनलि   खनादि उच्छ्वासादिवर्जं सर्वं आपृच्छ्यैव कर्त्त
व्यमिति तत्त्वं गुरुपारतंत्र्यस्यैव ज्ञानादिरूप   त्वात् गामाणुगामं दूइज्जित्तए त्ति हिंडित्तए सि
क्षाद्यर्थं कारणे वा ग्लानादौ अन्यथा हि   वर्षासु ग्रामानुग्रामं हिंडनमनुचितमेव॥
४ एवं अन्यतरां विकृतिं वा आहर्त्तुं इच्छेत् त   ग्रहणम् अपि आपृच्छ्यैव नो अनापृच्छ्य तत्रा
५ पुव्वइ अंति इयती वा एवइ रेकुत्तो इति प   तावतो वारान् अत्रापि अल्पपायं आचार्या ए
व जानंति यतः अस्य विकृतेः ग्रहणे अस्य अयं अपायो मोहोद्भवादिः ज्ञात्वा दस्य गुणो वेति
५ एवं तेइच्छियंति वातिक पैत्तिक श्लैष्मिक सांनिपातिक रोगाणां आतुर १ वैद्य २ प्रतिचारक ३ भे
षज्यरूपां चतुष्पदां चिकित्सां आउट्टित्तए कारयितुं इच्छेत् तदापि गुरुं आपृच्छ्यैव कारयित १९१
व्या न तु अनापृच्छ्य तत्र आउट्टित्तए उरालग्गामिकः करणार्थे ६ एवं साधुः साध्वी वा इच्छेत् अन्यतरत्
तपो कर्मं ति अर्द्धमासिकादि तपः तदपि गुरुं आपृच्छ्यैव कारयितव्या पुरेन अनापृच्छ्य कर्त्तव्यं॥

अत्र अल्पपायात् अयं समर्थोऽसमर्थो वा अयं वैयावृत्त्यकरो वा अन्यो वा पारणकयोग्यं लाजा
सरणादि संधुक्षणयोग्यं अस्ति नास्ति वा इत्यादिकान् आचार्या एवं विदंति ७ एवं भिक्षुः अप
श्चिमं चरमं मरणं अपश्चिममरणं न पुनर्यत्प्रतिक्षणं आयुर्दलिकानुभवलक्षणं आवीचिक
मरणं तदेव अंतो ऽपश्चिममरणं तस्मिन् भवाः आर्षत्वात् उत्तरपदवृद्धौ अपश्चिममारणांतिकी सा
चासौ संलेखना च संलेख्यते कृशीक्रियते शरीरकषायादि अनयेति संलेखना सा च द्वादशसं
वत्सरादि तिन्ना चत्तारि विचित्ताई इत्यादि अपश्चि   ममारणांतिका संलेखना च तस्या जोषणं सेवा
तया झूसियस्स झूषितशरीरः अत एव प्रत्या   ख्यातभक्तपानः पादपोपगतः कृतपादपोपग
मनः अत एव कालं जीवितकालं मरणक   ालं वाऽनवकांक्षन् अनभिलषन् विहर्त्तुं
इच्छेत् तदापि गुरुमापृच्छ्यैव नो अनापृच्छ्य   यतः अल्पपायान् अयं निस्तारको न वा अस्य
निर्यापकाः संति न वा पुनः क्षपकस्य हि उदर   मलशोधनार्थं त्वगेला नागकेशर तमालपत्र मि
श्रित शर्करा क्वथित शीतल क्षीरलक्षणं समाधिपानकं पाययित्वा पूगीफलादि द्रव्यैः मधुरविरे
चः कार्यते निर्यापिकस्य उद्वर्त्तनाद्यर्थं तस्य अष्टचत्वारिंशद्भिलोक्यते ते संति न वा इत्यादिका
न् आचार्या एव जानंतीति ८ एवं उच्चारं वा प्रश्रवणं वा परिष्ठाविस्सए परिष्ठापयितुं स्युर्गुरु ९॥
एवं धर्मजागरिकां आज्ञाऽपायविपाकसंस्थाननिचय भेद धर्मध्यान विधानादिना जागरणं ध
र्मजागरिका तां जागरिकां अनुपालयितुं गुरुं आपृच्छ्यैव सर्वं कर्त्तव्यं नो अनापृच्छ्य गुर्वाज्ञाकरणेस

वंसि फलीभवतीति रहस्यं १० इति सप्तदशी सामाचारी १७ अथ गोचरचर्यागमनादिषु आतपदा-
नार्थमुक्तोपधिसत्तापनिकाधिकाररूपां अष्टादशीं सामाचारीमाह॥ तत्र सूत्रं॥ वासावासं भिक्खू
इच्छिज्जा वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा अन्नयरिं वा उवहिं आयावित्तए वा पया-
वित्तए वा नो से कप्पइ एगं वा अणेगं वा अपडिन्नवित्ता गाहावइकुलं भ० पा० नि० प० असणं
वा आहारित्तए बहिया विहारभूमिं वियारभूमिं वा सज्झायं वा करित्तए काउस्सग्गं वा ठाणं वा ठा-
इत्तए अत्थि य इत्थ केइ अहासंनिहिए एगे वा अणेगे वा कप्पइ से एवं वइत्तए इमं ता अ-
ज्जो तुमं मुहुत्तगं जाणाहि जाव ताव अहं। गाहावइकुलं जाव काउस्सग्गं वा ठाणं वा ठा-
इत्तए से य से पडिसुणिज्जा एवं से कप्पइ गाहावइकुलं तं चेव सव्वं भाणियव्वं से य
से नो पडिसुणिज्जा एवं से नो कप्पइ गाहा- वइकुलं जाव काउस्सग्गं वा ठाणं वा ठाइत्तए
॥१०॥ वर्षाकाले स्थितो भिक्षुरिच्छेत् वस्त्रं वा। पतद्ग्रहं पात्रं वा कंबलं वा पादप्रोंछनं रजोहर-
णं अन्यतरां उपधिं वा आतापयितुं एकवारं आतापेतुं प्रतापयितुं पुनः २
अनातपेन कुत्सापनादयो दोषाः वस्त्राद्युपधौ आतपे दत्ते एकं वा साधुं अनेकान् वा साधून्
अनापृच्छ्य अंगीकारणं विना गृहस्थगृहे आहाराद्यर्थं गंतुं न कल्पते एवं बहिर्या बहिर्गंतुं
विहारभूमिं विचारभूमिं स्वाध्यायं वा कर्तुं कायोत्सर्गं वा स्थातुं न कल्पते इह चौरस्तयादिना अ-
थ यदि संनिहित यतस्तस्य तदुपधिं चिंतयति तदा कल्पते चिंतकाभावे तु जलक्लेद चौरहरण १०२

कायविराधनोपकरणहान्यादयो दोषाः स्थानपूर्वस्थानं तच्च कायोत्सर्गलक्षणं इमं ता इत्यादि स यति-
रेवं वदेत् हे आर्य त्वं इदं वस्त्रादि तावन्मुहूर्तमात्रं जानीहि विलोकयेः जावतावत्सिसाषमात्रं यावद-
हं गृहस्थगृहादौ आहाराद्यर्थं यामि तदा स च संनिहितसाधुः से तस्य उपधिचिंतनेन इच्छाका-
रयितुः प्रतिशृणुयात् अंगीकुर्यात् वचनमिति शेषः तदा तस्य विहारभूमिं वा विचारभूमिं वा गंतुं
स्वाध्यायं वा कर्तुं कायोत्सर्गं वा स्थातुं सर्वं कल्पते अन्येन साधुना अंगीकरणाभावे तु न कल्पते सर्वं
पूर्वप्रतिपादित दोषसद्भावात्॥ इति अष्टादशी सामाचारी॥१८ अथ ग्लानासनाभिग्रहाधिका-
ररूपां एकोनविंशतितमां सामाचारीमाह॥ तत्र सूत्रं॥ वासावासं नो कप्पइ निग्गंथा० अ-
णभिग्गहिय सिज्जासणिएणं हुंतए आ- याणमेयं अणभिग्गहियसिज्जासणियस्स
अणुच्चाकुइयस्स अणट्ठाबंधियस्स अमि- यासणियस्स अणाताविस्स असमियस्स
अभिक्खणं २ अपडिलेहणासीलस्स अप- मज्जणासीलस्स तहा तहाणं संजमे दुराराह-
ए भवइ अणायाणमेयं अभिग्गहियसिज्जासणियस्स उच्चाकुइयस्स अट्ठाबंधिस्स मिया-
सणियस्स आयाविस्स समियस्स अभिक्खणं २ पडिलेहणासीलस्स पमज्जणासीलस्स तहा
२ संजमे सुआराहए भवइ॥१९॥ व्या०॥ वर्षाकाले स्थितानां निर्ग्रंथानां च २ अनभिगृहीतश-
य्यासनिकेन भवितुं न कल्पते नद्युक्तं न अभिगृहीता नियता शय्यासनानि येन स अनभिगृहीत-
शय्यासनः अनभिगृहीतशय्यासन एव अनभिगृहीतशय्यासनिकः स्वार्थे इकप्रत्ययेन यतीव

र्भासु साधुर्नाम णिकुट्टिमे पिपीलफलकाभिग्रहणस्त्वात् एव साध्विन्यर्थः अन्यथा शीतलायां भू
मौ शय्यने आसने च कुंथ्वादिप्राणविराधना २ जीर्णादिदोषाः स्युः एतच्च कर्मणां दोषाणां वा आ
दानमुपादानकारणं एतत्किं अनभिगृहीतशय्यासनिकत्वं अथवा अभिग्रहो निश्चयः स्वप
रिगृहीतमेव शय्यासनं मया सेव्यं नान्यपरिगृहीतं आदानत्वमेव दृढयति अणभिग्गहि
येत्यादि सुगमं यत एवंविधस्य साधोः संयमो दुराराध्यो दुःप्रतिपाल्यो भवति किं॰ साधोः अ
णुच्चाकुइयस्स अनुच्चाकुचिकस्य कुचपरि स्पंदे कुचोऽपरिस्पंदो निश्चलो यस्य कंबिका
ने चलंति अट्टट्टबंधने हि संघर्षात् मत्कुण कुंथ्वादिवधः स्यात् उच्चाद्स्तादियावद्धोन
पिपीलिकादिवधो न स्यात् सर्पादिर्वा न दशेच्च उच्चा वा सो अकुचा च उच्चाकु
चा कंबादिमयी शय्या सा विद्यते यस्यासौ उच्चाकुचिकः न उच्चाकुचिको अनुच्चाकु
चिको नीचस परिस्पंदशय्यासनस्तस्य पुनः किं॰ साधोः अणट्ठाबंधिस्स अनर्थबंधिनः
पट्टमध्ये अनर्थकं निःप्रयोजनं एकवारोपरि द्वौ त्रीश्च वारान् कं वा सुबंधान् ददाति च
पुस्परिबंधनि वा अन्धकानि बध्नाति तथा च स्वाध्यायपलिमंथादयो दोषास्तवेति यदि च
एकांगिकं चंपकादिपट्टं लभ्यते तदा तदेव ग्राह्यं बंधनादिप्रक्रियापरिहारात् पुनः किं॰ सा १८३
धोः अमियासणियस्स अवद्धासनकस्य स्थानात् स्थानांतरं हि भुंजभुंजः संक्रामन् सत्त्वबधे
प्रवर्त्तते अनेकानि वा आसनानि सेवमानस्य पुनः किं॰ साधोः अणातावियस्स अनातापितः

संस्तारकपाट्टादीनामातपे अदातुः तत्र च पनकसंसक्त्यादयो दोषाः उपभोगे च जीववधः उप॰
भोगाभावे च उपकरणमधिकरणमेवेति पुनः किं॰ साधोः असमितस्य ईर्यादिषु तत्र आद्यचतुर्ष
पंचमसमितिषु असमितो जीवान् हंति भाषाऽसमितः संपातिमान् एषणा २ समितो दस्रमाद्यादे
अक्कायः परिणतो न वेति न जानाति पुनः किं॰ साधोः अभीक्ष्णं २ पुनः २ अप्रतिलेखनाशील
स्य चक्षुषा अदृष्टा पुनः किं॰ साधोः अप्पमज्जणासीलस्स अप्रमार्जनाशीलस्य रजोहरणादि
ना अप्रमृष्टस्थानादिकर्त्तुः आस्तां च दुःप्रति लेखिते दुःप्रमार्जिते संगृहीते नत्वः कृत्सार्थ
त्वात् तथा तेन तेन प्रकारेण संयमो दुराराध्यो ध्यो दुःप्रतिपाल्यो भवति यथा २ तानि २ स्थाना
नि करोति तथा २ संयमाराधना दुःकरा इ त्यर्थः एतद्विपरीतस्य किं स्यादित्याह ॥ अ
णायाणमेयं कम्मणं असंयमस्य वा अना दानं एतत् तेन शय्यासनाभिग्रहवता भाव्यं
कथमनादाने पतितव्यं इत्याह उच्चा अकु चा च शय्या कर्त्तव्या अर्थाय सकृद्बंधपट्टांत
बंधनीया अन्धकानि चत्वारि कार्याणि बद्धासनेन भाव्यं कारणे एव उज्झानात् संस्तारकादी
नि आतापनीयानि ईर्यासमित्यादिषु समितेन यतमानेन भाव्यं प्रतिलेखनाप्रमार्जनाशीले
न च भाव्यं यथा २ एतानि स्थानानि करोति तथा २ संयमः स्वाराधितः सुकरो वा भवति ततश्च मो
क्षो भवति ॥ इति एकोनविंशतितमा सामाचारी ॥ १९ ॥ अथ स्थंडिलाधिकाररूपां विंशतित
मां सामाचारीमाह ॥ तत्र सूत्रं ॥ वासावासं कप्पइ निग्गंथाण वा॰ तउ उच्चारपासवणभूमीउ प

१

कल्पल॰ दिलेहित्तए नतहा हेमंतगिह्मासु जहा णं वासासु से किमाहु भंते वासासु णं उसन्नं पाणा य तणा
य बीया य पणगा य हरियाणि य भवंति २० व्या० वर्षाकाले स्थितानां निर्ग्रंथानां च यथा वर्षा
सु तिस्रः उच्चारप्रश्रवणभूमयः प्रतिलेखयितव्या भवंति तथा हेमंतग्रीष्मकालयोर्न तत्राप्ययं
विशेषः तिस्रः उच्चारप्रश्रवणभूमयः अनधिसहिष्णोरंतःकर्त्तव्याः १ अधिसहिष्णोश्च बहि
स्तिस्रः कार्याः २ इह व्याघाते मध्यात व्याघाते आसन्ने इति तिस्रः अत्र आर्षत्वात् ग्रीष्मशब्दो ब
हुत्वे स्त्रीलिंगश्च वासासु किमिति तद्धेतुप्रश्न यत्करणं तत्राह वर्षासु उसन्नं इति प्रायो बा
हुल्येनेत्यर्थः प्राणाः शंखनकेंद्रगोपकु म्यादयः १ तृणानि घासाः २ बीजानि तत्तद्
वनस्पतीनां ३ अध्नो झिल्लानि ततो हरि तानि जातानि पनकाउल्लयः अथवा
पाणा य तणा य त्ति प्राणानां जीवानां आ यतनानि स्थानभूतानि बीजादीनि इति
योज्यं अयं भावो वर्षाकाले विशेषतः पृथ्वी जीवाकुला भवति तत उच्चारप्रश्रवणभू
मित्रयं कार्यमेव॥ इति विंशतितमा सामाचारी॥२०॥ अथ मात्रकयतनाधिकाररूपां एक
विंशतितमां सामाचारीमाह॥ तत्र सूत्रं॥ वासावासं कप्पइ निग्गंथाण तओ मत्तगाइं गिह्लित्तए।
तंजहा॥ उच्चारमत्तए १ पासवणमत्तए २ खेलमत्तए ३ २१ व्या० वर्षाकाले स्थितानां निर्ग्रंथा
नां २ त्रीणि मात्राण्येव मात्रकाणि गृहीतुं कल्पंते तथाहि उच्चारमात्रकं १ प्रश्रवणमात्रकं २ १५४
खेलमात्रकं ३ चेति मात्रकाणामभावे वेलातिक्रमेण वेगधरणे आत्मविराधना स्यात् वर्ष

ति च बहिर्गमने संयमविराधना स्यात् अत्र चूर्णिः बाहिंणिं तस्स गुम्मिया इ गहणं तेण मत्तए वोसिरित्ता
बाहिं णित्ता परिट्ठवेइ पासवणे वि असिगमाहि उंधरेइ तस्माऽसइ जो जाहे वोसिरइ सो ताहे धरेइ एण
निरुक्कवइ सुवं तो वा उस्सग्गे वितयं चेव उवरिं हेट्ठा पए वा दोरेणं बंधइ गोसे अ संसत्तिया एसु मीए अ
न्नत्थ परिट्ठवेइ त्ति॥ इति एकविंशतितमा सामाचारी॥२१ अथ लोचाधिकाररूपां द्वाविंशतित
मां सामाचारीमाह॥ तत्र सूत्रं॥ वासावासं नो कप्पइ निग्गंथाण परं पज्जोसवणाओ गोलोमप्पमा
णमित्तेवि केसे तं रयणिं उवायणावित्तए अ ज्जेणं खुरमुंडेणं वा लुक्कसिरएण वा होयव्वं
सिया पक्खिया आरोवणा मासिए खुरमुंडे अद्ध मासिए कत्तरिमुंडे छम्मासिए लोए संवच्छरिए वा
थेरकप्पे २२ व्या०॥ वर्षाकाले स्थितानां नि र्ग्रंथानां च नो कल्पते पर्युषणातः परं आषाढ
चउर्मासिकादनंतरं गोलोममात्रा अपि केशा न स्थापनीया आसतां दीर्घाः यावत्तां रजनीं भाद्र
पदसितपंचमीरात्रिं उवाइणावित्तपत्ति अतिक्र मयितुं यतो ध्रुवलोउ जिणाणं निच्चं थेराण वा
सवासासु इत्युक्तं केशेषु हि अप्कायो विराध्यते तत्संगाच्च षट्पदिकाः संमूर्च्छंति कंडूयमानश्चताः
खंडयति नखक्षतं वा शिरसि स्यात् यदि च क्षुरेण मुंडापयति कर्त्तर्या वा तदा आज्ञाभंगादिनव
स्था मिथ्यात्व संयमात्मविराधना षट्पदिका छेदन नापित पश्चात्कर्म शासनाः पश्चाज्जनादिदोषा
भवंति तस्मात् लोचएव श्रेयान् यदिवा असहिष्णुर्लोचं न क्षमते ज्वरादिर्वा स्यात् बालो वा रुद्यात् तथ
र्मं वा त्यजेत् तत्तो न तस्य लोचः कार्यः इत्याह आर्येण साधुना क्षुरमुंडेन वा लुंचितशिरोजेन वास

८
कल्प॰ चितव्यं स्यात् लुंछन्ति लुंचिताः शिरोजाः केशा यस्य स लुंचितशिरोजस्तेन अपवादतो बालग्ला
नादिना क्षुरमुंडेन उत्सर्गतो लुंचितशिरोजेनेत्यर्थः केवलं प्रासुकोदकमात्मना गृहीत्वा शि
रः प्रक्षाल्य नापितस्यापि प्रासुकपानीयेन करौ प्रक्षालयति अथ यस्य क्षुरेणापि क्षारयितुम
क्षमो व्रणादिमच्छिरा वा तस्य केशाः कर्त्तर्या कल्पनीयाः पक्खियारोवणत्ति पाक्षिकं बंधदा
नं संस्तारकदवरकाणां पक्षे २ बंधामोक्तव्याः इति लेखितव्या इत्यर्थः अथवा आरोपणा प्रा
यश्चित्तं पक्षे २ आरोप्य सर्वकाले वर्षासु विशेषतः अत्र लोचाधिकारमध्ये पक्खियारोवणत्ति पदं सू
त्रमध्ये वर्त्तते इति कृत्वा व्याख्यातं परमत्रानु पयोगिकमिव प्रतिभाति पश्चात्परमार्थो गीतार्थग
म्यः अथ कियता कालेन को लोचः कारयि तव्य इत्याह मासिए खुरमुंडेत्ति मासे २ अस
हिष्णुना मुंडनं कारणीयं १ अद्धमासिए कत्त रिमुंडेत्ति यदि कर्त्तर्या कारयति तदा पक्षे २ मुं
डं कारणीयं क्षुरकर्त्तर्योश्च लोचे प्रायश्चित्तं नि। शीथोक्तं यथासंख्यं लघुमासो १ गुरिमाई लघुमा
स एकाशनेचादयं छम्मासिए लोए षाण्मासिको लोचः संवत्सरिए थेरकप्पेत्ति स्थविराणां वृद्धानां जरा
जर्जरत्वेन असामर्थ्यात् दृष्टिरक्षार्थं च अथवा तरुणानां चातुर्मासिकः संवत्सरो वर्षारात्रः संवच्छरं वावि परं
पमाणं बीयं च वासं न तत्थ सिज्जा इति वचनात् ततः संवत्सरे वर्षासु सवः सांवत्सरिको वा लोचः स्थविर १९५
कल्पे स्थविरकल्पस्थितानां वर्षासु दिः जिनकल्पिकस्थविरकल्पिकानां ध्रुवो लोच इति वाशब्दो विकल्पा
र्थः अपवादतो नित्यलोचाकरणेपि पर्युषणापर्वणि अवश्यं लोचः कार्य इति सूचयति अथवा एषः स

र्वः आसन्नवासिक्षागमनविकृतिग्रहणादिर्मात्रकावसानः सांवत्सरिको वर्षाकालसंबंधी स्थविरक
ल्पः स्थविरमर्यादा वा शब्दः किंचिज्जिनकल्पिकानामपि सामान्यतां सूचयति परं प्रायः स्थविराणा
मेवायं कल्प इत्यर्थः॥ इति द्वाविंशतितमा सामाचारी॥ २२॥ अथ अधिकरणानुदीरणाधिकार
रूपां त्रयोविंशतितमां सामाचारीमाह॥ तत्सूत्रं॥ वासावासं नो कप्पइ निग्गंथाण वा २ परं पज्जोसव
णाउ अहिगरणं वइत्तए जे निग्गंथाण वा २ परं पज्जोसवणाउ अहिगरणं वयइ सेणं अकप्पेणं अ
ज्जो वयसीति वत्तव्वं सिया जे निग्गंथाण वा २ प रं पज्जोसवणाउ अहिगरणं वयइ सेणं निज्जूहि
यव्वे सिया २३ व्या०॥ वर्षाकाले स्थितानां नि र्ग्रंथानां च नो कल्पते परं पज्जोसवणाउ अहिग
रणं वइत्तए पर्युषणातः परं अधिकरणं राटि कलहवचनमपि अधिकरणं वदितुं अथ यो निर्ग्रं
थादिः पर्युषणातः परं अधिकरणं वदति तस्मै कं वक्तव्यमित्याह सेणं अकप्पेणं अज्जो वत्तव्वं
सिया हे आर्य अकल्पेन अनाचारेण वदसीति वक्तव्यः स्यात् यतः पर्युषणादिनतोऽर्वाक् पर्यु
षणादिने एव वा यदधिकरणं उत्पन्नं तत्पर्युषणायां क्षामितव्यं यत्त्वं पर्युषणातः परमप्यधिकर
णं वदसि सोयमकल्प इति भावः पुनर्यो निर्ग्रंथादिः पर्युषणातः परं अधिकरणं वदति स निज्जूहियव्वे सि
या इति निर्यूहितव्यः तांबूलिकपत्रदृष्टांतेन गच्छान्निष्कास्यः स्यात् उपशांतोपस्थितस्य च मूलं दातव्यं
इति त्रयोविंशतितमा सामाचारी २३ अथ परस्परक्षामणाधिकाररूपां चतुर्विंशतितमां सामाचारीमा
ह॥ तत्सूत्रं॥ वासावासं इह खलु निग्गंथाण वा २ अज्जेव कक्खडे कडुए वुग्गहे समुप्पज्जिज्जा सेहेरा

८
कल्पल॰ खलियं खामिऊण राइणो विसेसं खामिया १२०० खमियव्वं खमावियव्वं उवसमियव्वं उवसमावियव्वं
सम्मुइसंपुच्छणाबहुलेण होयव्वं जो उवसमइ तस्स अत्थि आराहणा जो न उवसमइ तस्स नत्थि आराह
णा तम्हा अप्पणा चेव उवसमियव्वं से किमाहु भंते उवसमसारं खु सामन्नं २४ व्या०॥ वर्षाकाले स्थितानां
निर्ग्रंथानां २ च इह प्रवचने अद्यैव पर्युषणादिने कर्कशः उच्चैः शब्दः कटुकः तिक्तकटुको जकारमकारादि
रूपो युग्मदेवत्ति विग्रहो कलहो यदि समुत्पद्यते तदा शैक्षो लघुः रात्निको रात्निकं रत्नाधिकं क्षामतिय
द्यपि रात्निकः प्रथमं सामाचारी वितथाकरणेऽ पराधस्तथापि शैक्षेण रात्निकः क्षामणीयः अ
थ शैक्षोऽदुष्टधर्मा तदा रात्निकस्तं प्रथमं क्षा मयति तस्मात् क्षमयितव्यं स्वयमेव क्षमयित
व्यः परः अव्यक्तत्वात् तत्त्वसकत्वे किं तस्मात्ता सेज्ञातमिति तथा उपशमयितव्यं आत्मनाउ
पशमः कर्त्तव्यः उपशमयितव्यः परः इं अच्छियं स मीपत्तणेहिं तवनियमवंभमइएहिं माऊत्तयं क
लहंता उण्णिं च हसागए तेहिं १ पुनः इं अकिज्जियं चरि त्तं देसूणाविपुव्वकोडीए तंपियकसाइयमित्तो हारेइ
नरो मुहुत्तेणं २ इत्यादि शिक्षोपदेशैः पुनः सम्मुइसंपुच्छणाबहुलेण होयव्वं इति संमुख्या रागद्वेषरहितामति
स्तया संपृच्छना सूत्रार्थेषु स्वास्थ्यानास्वास्थ्यानां वा तद्बहुलेन साधुः रागद्वेषौ विहाय येन सह अधिकरणमासी
त् तेन सह सूत्रार्थ संप्रश्नः कार्यः तत्र इदं तत्त्वं बोद्धव्यः यद्येकतरस्य क्षमयतोऽप्येको न उपशाम्यति तदा किमित्याह
जो उवसमइ त्ति यः उपशाम्यति उपशमयति वा कषायान् तस्य अस्ति आराधना ज्ञानादीनां यश्च नोपशाम्यति तस्य
नास्ति आराधना तस्मादात्मनाएवोपशमः कर्त्तव्यः कुतएवमित्याह उवसमसारं खु सामन्नं खुर्निश्चयेन श्रामण्यं श्र
मणत्वं उपशमसारं उपशमप्रधानं सामन्नमणुचरंतस्स कसाया जस्स उक्कडा हुंति मन्नामि उच्छुपुप्फं व निप्फलं तस्स सामन्नं
॥१इतिवचनात्॥ इति चतुर्विंशतितमा सामाचारी॥ २४॥ १९६

॥२४॥ अत्र समितिगुप्तिक्रोधमानमायालोभादीनां दृष्टांता वाच्याः॥ वर्षाकाले विशेषतः साधूनां स
मित्यादयः पालनीयाः ईर्यासमितौ वरदत्तो मुनिर्दृष्टांतः॥ इंद्रेण वरदत्तमुनेः प्रशंसा कृता अश्रद्द
धतैकेन देवेन अहो ज्ञानकोऽपि ईर्यासमितिपालकः स्वतो देवेन परीक्षार्थमागत्य गजरूपं कृत्वा सुमार्गे
न आकाशे उच्छालितः अधश्च सूक्ष्ममंडूकाः पृथिव्यां विकुर्विताः तेनाधः पतता चिंतितं मम मरणस्यं
नास्ति परं अहो सूक्ष्ममंडूकीडीव विराधना भविष्यति इति चिंतयन् तुष्टेन देवेन क्षामितः १ भाषा
समितौ संगतः साधुः सशत्रुरुद्धान्नगरान्निर्ग तः वैरिभिः पृष्टः सो नगरमध्ये सैन्यस्य बलाब
लं कीदृशं तदा साधुः प्राह बहुं सुणेहिं कन्नेहिं बहुं अच्छीहिं पिच्छई न य दिट्ठं सुयं सव्वं भिक्खू
अक्खाउमरहई १ एवं पुनः सर्वंनि परेस्तांषा तसनन्ति तदापावग्रहि लइति कृत्वा मुक्तः २
॥ एषणासमितौ नंदिषेणदृष्टांतो वसुदेवजीवः सर्वसवे नंदिषेणो ग्लानवैयावृत्त्याभिग्रही प्रष्टकर्त्रा
इंद्रप्रशंसायां देवेन अतीसारसाधुविकुर्वणं कृ त्वा तन्निमित्तं पानीयार्थं विहरणगमने कलस्य अशु
द्धिताकरणं देवस्य असावधानत्वे जलविहरणं ग्लानसाधुस्कंधारोपणं अशुचिना खरंटनं देवस्कृत्यादि
करणं च प्रसिद्धं॥ ३ आदानादौ प्रतिलेखनाकरणे सोमिलः साधुर्यथा क्वापि संध्यायां विहारकरणे सा
धुभिर्गुरुवचनेन सत्काले प्रतिलेखना कृता स्थितौ च पुनः काले प्रतिलेखना कृता गुरुभिः प्रोक्तं सो सोमि
ल त्वमपि प्रतिलेखनां कुरु तेन प्रोक्तं पुनः प्रतिलेखना किमर्थं क्रियते मध्ये किं सर्पा उत्पन्नाः संति इति उ

ल्लेववचनं लापितं तेन प्रभाते प्रतिलेखनासमये त्रिक्षिकामध्यात् कस्माद्देवेन सर्पं निःकास्य लापितः साधुर्न
ष्ठागुरुसमीपे गत्वा सर्पनिर्गमनस्वरूपं प्राह गुरुभिः प्रोक्तं भो साधो शर्वत्वया उल्लेववचनमुक्तं एवं नोच्यते प्रति
लेखनायां तु महती निर्जरास्ति श्रेष्ठिसुनो रिवसद्दिपञ्जितः अत्रियं देवजग्राह यथासर्वेषां साधूनां देव
कामया प्रतिलेख्यरजहरणं दातव्या एवं च कुर्वन् प्रत्यहं तत्कर्मक्षपयामास सोपि जोपितथैव कुर्वन् कर्मक्षप
ता॥४ उच्चारप्रश्रवणसमितो गुप्तनाचार्यशिष्यकः सद्दिपञ्जितो गुरुणा प्रोक्तं भो स्थंडिलानि कुरुसंन
करोति वक्ति च किं तत्र जंतवः स्थिताः संतीति रात्रौ मात्रकं परिष्ठापयन् उग्ररूपेण देवतया त्रासितः।
गुरुणा प्रोक्तं अहष्टस्थंडिले मात्रकादि अत्य जतं देवतासादाय्यं स्यात् यथा अत्रैव गच्छेत्य
प्रतिलेखितस्थंडिले अत्यजन् कायिक्याबाधितः देवतया उद्योते कृते अपाक्षीत् पुनरंधकारे जा
ते देवकृतं सर्वस्वरूपं ज्ञात्वा पश्चादालोच्य सिद्धः सो पि कृतनैकस्थैवं अकरोत्॥५ एवं पंचसमितयो
वर्षासु विशेषतः प्रतिपालनीयाः॥५ ॥ अथ गुप्तित्रयस्वरूपं मनोगुप्तौ कोंकणकः साधुः कायोत्सर्गस्थितो गु
रुभिः प्रोक्तं बह्वी वेला जाता भोः किं ध्यायसि तेन प्रोक्तं मया जीवदया ध्याता का जीवदया स कथयेत् पुत्रा
णां दयया क्षेत्रसूदनं वल्लीदहनादि ध्यातं गुरुणा प्रोक्तं मिथ्यादुःकृतं देहि एवं न ध्यातव्यं महानारंभो १५७
लगति सोपि तथैवाकरोत् १॥ वचने गुप्तदत्तसाधुः सद्दिश्री उरेश्वनवतीपुत्रः सांसारिकवंदापनाय ग
च्छन् कुत्पां(ध्या)वयं नज्ञाप्या इति वाचं लात्वा चौरैर्मुक्तः स्वस्थाने गतः सर्वं मातृपितृप्रमुखं सांसारिकवर्गं वं

दाप्य पुनस्तयैव जनन्या सार्द्धं चलितः सन् तस्मिन् स्थाने प्राप्तस्तदा तैरेव चौरा उक्ता स्तैर्जन्यास
र्वं मुषिता सर्वं गृहीतं तदा चौरै[illegible]रुक्तं एषः स एव साधुर्य आत्मनिर्जन्या ज्ञापन विषये वारितोऽभू
त् इति तेषां वचनं जनन्या श्रुतं तस्या हृदये महादुःखं जातं अनेन साधुना पुत्रेणापि चौरा ज्ञाताः।
परमस्माकमग्रे न ज्ञापितं तेनाहं अस्योपरि स्वोदरे छुरिकां प्रक्षिप्य मरिष्यामि इति चौरैर्ज्ञातं अ
स्य साधोरेषा जननी धन्योयं साधुर्येन जनन्या अपि न ज्ञापितं तातायचनादिकं चौरैर्लुंटितमा
सीत्तत्सर्वं प्रत्यर्पितं तदनु जनन्या याश्च सर्वेषां प्रमोदो जातः॥२ कायगुप्तौ अरहन्नकसाधु
र्यथा॥ अरहन्नो साधुर्विहारं कुर्वन् क्वापि स्थाने वाहलकं प्राप्य विचारितवान् नीरम
ध्ये पादक्षेपणेन मम अप्कायविराधना भविष्यति तेन कूर्दयित्वा द्वितीयतटे प
तितः आज्ञाभंगाद्देवतया पादच्छेदः कृतः प श्चाद्देवतया त्रिःक्षादत्रा पानीयमध्ये गम्यते
परं एवं न कर्त्तव्यं इति शिक्षां दत्वा पादः सज्जीकृ तः। इति गुप्तित्रयदृष्टांताः॥ तथा अस्मिन् श्री
पर्युषणापर्वणि समागते महावैरमपि त्याज्यं विरोधे जाते क्षामणायां कृतायामेव प्रतिक्रमणं शु
ध्यति अत्र प्रथमं अचार्यउदायनदृष्टांतस्तथाहि॥ चंपायां नगर्यां कुमारनंदिनामा एकः स्वर्ण
कारो वसति परं स कीदृशः आजन्म स्त्रीलोलुपस्तेन पंचशतस्त्रीणां पतिः संजातः एकदा
कुत्रचित् कुमारनंदिस्वर्णकारेण हासाप्रहासानाम्नो देव्यो दृष्टे तयो रूपेण मोहितः सन् प्रार्थ
नां कृतवान् ताभ्यां प्रोक्तं आवयोः पतिर्देवो विद्युन्माली स च्युतस्तेन पतिं गवेषयावः ततस्त्वया पंचशैल

७
कल्पल.

कनाम्नि द्वीपे आगंतव्यं यथा भोगयोगो भवेत् इत्युक्त्वा ते हासाप्रहासे देव्यौ स्वस्थाने गते अथ सडनं
दिना तत्र गमनाय समुत्कंठितेन पटहो वादितो यो मां पंचशैलद्वीपे प्रापयति तस्मै कोटिद्रव्यं ददामि
तत एकेन वृद्धनाविकेन तन्मार्गज्ञेन द्रव्यलोभेन अंगीकृत्य प्रोक्तं सो अर्थं सांप्रतं मम पुत्रादीनां देहि अ
र्द्धं पश्चाद्द्वयोः ततस्तथैव कृते प्रवहणे चलितः अग्रे समुद्रमध्ये हृदमेकोवटो दृष्टो सडनंदिनः प्रोक्तं
भोऽयं प्रवहणं अग्रे दृश्यमानवटस्याधो निस्सरिष्यति तत्र महान् आवर्तोऽस्ति तत्र वाहनं संस्फुटति प
रं त्वया वटशाखां गृहीत्वा वटे स्थातव्यं तत्र चरा त्रौ भारंडपक्षिणः समेष्यंति तत्पादे त्वया बंधने
न देहो बंधनीयस्तैश्च तत उड्डीय पंचशैलद्वी पे चूणिनिमित्तं यास्यंति त्वयापि तत्र गत्वा बं
धछोटनेन देहं मोचयित्वा हासाप्रहासापा र्श्वे गंतव्यमित्युक्ते तत्र स्थाने समं वाहनं।
स्वर्णकारोऽपि तथैव कृत्वा गतो हासाप्रहासा समीपे कृता भोगार्थं प्रार्थना ततस्ताभ्यां प्रो
क्तं भो अनेन अशुचिदेहेन न आवाभ्यां सह भोगो भवति ततस्ताभ्यां सडनंदी चंपायां उ
द्याने आनीय मुक्तः अथ लडनंदिकुमारेण तत्प्राप्तिनिमित्तं अग्निनीमरणं अज्ञानकष्टं प्रारब्धं।
तन्मित्रेण नागिलश्रावकेण वार्यमाणोऽपि न तिष्ठति स्म ततो हासाप्रहासाध्यानं कुर्वन् अज्ञानक
ष्टात् तत्पतिर्देवत्वेनोत्पन्नः ताभ्यां सह स्वेप्सितभोगान् भुंजानस्तिष्ठति अथ कदाचिन्नंदीश्वरद्वी
पे देवयात्रार्थं इंद्राश्चतुर्विधदेवनिकायसहिताश्चलिताः इंद्रादेशेन हासाप्रहासा अपि तयो
र्यः पतिः स्यात्तस्य अधिकारोऽस्ति इंद्रादिदेवानामग्रे मृदंगं वादयन् निस्सरति तेन ताभ्यां तस्य ग १९८

ले मृदंगो निक्षिप्तः प्रोक्तं च अयं वादनीयः ततस्तेन गलादुत्तार्य हस्ते निक्षिप्तः नाहं वादयिष्या
मि मृदंगश्च पुनः २ गले एवागत्य पतति ततस्ताभ्यां प्रोक्तं अस्मत्पतेरधिकारोऽस्ति गले पतितो मृ
दंगो वादितव्य एव त्रुटिर्नान्यथा हासाप्रहासानामादल गलइंध्याव जाम्या त्रुटीजइं इति लोक
वाक्यं च ततो जातं।। ततो विद्युन्माली हासाप्रहासासहितो मृदंगं वादयन् मार्गे गच्छन् महर्द्धि
कसुरान् दृष्ट्वा अल्पर्द्धिकमात्मानं निंदन् नागिलजीवेन अच्युत१२देवलोकोत्पन्नेन देवेन प्रो
क्तं भो मां जानासि ततउपयोगदानेन ज्ञातं प्रो क्तं च हा मित्र नागिल मया त्वया वारितेनापि
तुच्छभोगकृते मनुष्यजन्म हारितं येनेदृशी मवस्थां प्राप्तः अथ किं करोमि नागिलदेवे
नोक्तं भो गोशीर्षचंदनमयीं श्रीमहावीर देवप्रतिमां कृत्वा पूजय यथा बोधिबी
जं प्राप्स्यसे तेन तथैव कृत्वा कियंतं का लं प्रतिमा पूजिता ततः आयुःक्षये प्रतिमा
गर्भां पेटीं कृत्वा पोतवणिजां दत्त्वा प्रोक्तं इयं देवाधिदेवप्रतिमा वीतभयपत्तने गत्वा श्रीउ
दायनस्य राज्ञो देया ततस्तैः सा पेटी आनीय सभायां राज्ञोऽग्रे मुक्ता कथितं च देवाधिदेवप्रति
मास्ति अन्यैर्ब्रह्मविष्णुमहेश्वराणां नामग्राहं उद्घाटिता परं नोद्घटति ततो राज्ञो भोजन
वेलायां अतिक्रमे प्रभावत्या आगत्य प्रोक्तं देवाधिदेवोऽर्हन् श्रीवीतराग एवेति तत उद्घा
टिता पेटी देवतावसरे स्थापिता प्रभावती श्राविका तां सदा पूजयति एकदा प्रभावत्या पूजां कु
र्वत्या श्वेतवस्त्राणि आचितानि दास्यादत्तानि परं प्रभावत्या दृष्टिभ्रमेण रक्तानि ज्ञात्वा दासीतर्जि

८
कल्पल.

ता क्षणांतरे श्वेतान्येव दृष्टानि ज्ञातं ममायुः षण्मासमध्ये ततो दीक्षार्थं राज्ञा प्रार्थितो राज्ञा प्रो
क्तं त्वं देवो भविष्यसि मम विषमवेलायां सान्निध्यं करोषि तदा आदेशं ददामि ततो गीकृते आ
देशो दत्तो दीक्षा गृहीता देवो जातो राज्ञा योगिवृंदमारणेन साधुवृंदरक्षणेन च श्रावकः कृतः
अथ तां प्रतिमां दीक्षाग्रहणप्रोक्तवचनानुरोधेन देवदत्ता दासी पूजयति एकदा गंधारश्राव
कः प्रतिग्रामं प्रतिपुरं देवान् वंदमानः श्रीदेवाधिदेवप्रतिमां देवतादत्तां वंदितुं वीतभये आज
गाम पूजिता प्रतिमा परं तस्य एकदा ज्वरश्चटि तो दास्या सारशुद्धिकरणेन सज्जीकृतो जा
तो नीरोगः तेन गच्छता उपकारिणीति दास्यै गु टिकाशतं सप्रभावं दत्तं माहात्म्यमपि कथि
तं अनया भक्षितया दिव्यं रूपं भावि अ नया भक्षितया यः स्वाभीष्टः स त्वां आ
दरिष्यति एवं कथयित्वा तस्मिन् गते एकां तां भक्षयित्वा दिव्यं रूपं कृतं नाम्ना स्वर्णगुलि
का जाता द्वितीयस्मरणे लोकमुखात् श्रुतो लो त्तुपं चंडप्रद्योतनं स्वरूपचितं हृदि दध्यौ स व
रो मम भवत्विति ततो गुटिकाधिष्ठितदेवतया उज्जयिन्यां गत्वा चंडप्रद्योतनाय दासीरूपस्वरू
पं सर्वं ज्ञापितं ततो राज्ञा अनलगिरिहस्त्यारूढो वीतभये समागत्य रात्रौ स्वर्णगुलिकामाका
रयति स्म दास्या च प्रोक्तं अहं प्रतिमां विना नेष्यामि तत्रस्थाने च तत्सदृगिव स्थाप्या ततस्तामला १८८
त्वा परावृत्य उज्जयिन्यां गत्वा नवीनप्रतिमां लात्वा पुनर्वीतभये गत्वा प्रतिमासहितां स्वर्णगुलि
कां लात्वा प्रतिमास्थाने नवीनप्रतिमां स्थापयित्वा गत उज्जयिन्यां चंडप्रद्योतनो राजा ततः प्रभाते

स्वकीयहस्तिनां त्रासान्मदगलनाच्च अनलगिरिसमारूढचंडप्रद्योतनागमनं १ प्रतिमा पुष्पमा
लम्लानतः प्रतिमासहितदासीसंहरणं च ज्ञातं जातक्रोधो दशमुकुटबद्धराजान् सहलात्वा उज्ज
यिन्यां अभिमुखं चचाल उदायनो राजा आगतो जेसलमेरसमासन्न पुष्करसरःस्थाने परं तत्र पानी
यं न प्राप्यते चिंतातुरेण राज्ञा प्रभावती स्मृता तया तत्र अकूपं पानीयं कृतं अद्यापि तत्र तथैवास्ति
एवं पुष्करस्थानेपि उदायनसैन्यमागत्य उज्जयिनीसीम्नि पतितं मार्गिता प्रतिमा परं न ददाति
स तां ततश्चंडप्रद्योतनोपि चतुर्दशमुकुटब द्धराजपरिवृतः सर्वसैन्यं लात्वा आगत्य संमु
खं स्थितः अनलगिरिहस्तिनं विना युद्धं स्थापितं कृते युद्धे सन्नद्धश्चंडप्रद्योतस्ततो भ्रष्ट
प्रतिज्ञोऽनलगिरिहस्तिनमारुह्य पुन र्युध्यति स्म तत उदायनराजेन पदातिना स
तो अनलगिरिं अधो गत्वा बाणैर्विध्यते स्म। अनलगिरिणा उपरिष्टादधः क्षिप्तस्ततो जीव
न् बद्धो निगडादिभिः ललाटे अक्षराणि लिखि तानि मम दासीपतिरयं इति दासीनष्टा प्रति
माग्रहणे देववाणी जाता मामत्रैव रक्षा मा वीतभये नय तत्र धूलिकोट्टो भविष्यति ततो राज्ञा प्र
तिमां तत्रैव मुक्त्वा स्वयं तु चंडप्रद्योतनं लात्वा चलितो मार्गे श्रीपर्युषणापर्व समागतं राज्ञा तत्र त
द्दिने स्थित्वा उपवासश्चक्रे सूपकारस्य च प्रोक्तं यद्रोचते तच्चंडप्रद्योतनराज्ञे भोजनं दातव्यं रा
ज्ञो उज्जितस्नानादि धर्मकृत्यं कर्तुं लग्नः ततः सूपकारेण विज्ञप्तश्चंडप्रद्योतनः का रुचिरद्य भव
तां राज्ञा प्रोक्तं या उदायनराजस्य सूपकारेण प्रोक्तं अद्य तेषामुपवासः श्रीपर्युषणापर्वत्वात्

८५
कल्प०
तेन सोऽस्पृते ततश्चंडप्रद्योतनेन विचारितं अद्य इष्टचक्ररसवतीकरणेन विषप्रदानेनापि मरण
मीत्याकथितं वयमप्यद्योपवासं करिष्यामो वयमपि श्रीउदायनराजस्य साधर्मिकाः स्मः एतद्वचनं
राज्ञा सूपकारमुखात् श्रुत्वा अहो धूर्त्तसाधर्मिकोप्ययं साधर्मिकः साधर्मिके च बद्धे न मम प्रतिक्रम
णं शुद्ध्यतीति विचार्य चंडप्रद्योतनमाहूय निगडादीनि बंधनानि छ्रीकृत्य ललाटे स्वर्णपट्टं बंधयि
त्वा मुक्तश्चंडप्रद्योतनः क्षामितश्च सम्यक्त्वमुक्तोऽवंतीदेशो उदायनराजावत् अन्येनापि क्षामणा
कर्त्तव्या क्रोधश्च मोच्यो यथा आराधकत्वं स्यादि ति तथा अपराधं कृत्वा तस्मिन् अक्षामिते अनर्थ
परंपरा स्यात् तत्रार्थे दृष्टांतस्तथाहि॥ एक स्मिन् ग्रामे कुंभकारो भांडैः शकटं भृत्वा नगरम
ध्ये विक्रेतुं आगच्छति ततएकं वृषभं दृष्ट्वा कृतमनस्कैः कैश्चिद्ग्रामीणधूर्त्तैर्भणितं
अहो एकवृषभाग्रगामी एकेन बलीवर्द्देन गंत्री याति लोकैरपि श्रुतं कुंभकारेणापि वि
चारितं नूनं एते दुष्टा मम एकं वृषभं हरिष्यंति। एते प्रपतोहराः यतः संतमपि मम वृषभं अ
संतं कुर्वंति ततः कुंभकारो यावत् भांडविक्रयेण व्यग्रचित्तो जातस्तावत्तैः वृषभो हृतः स्वस्थ
चित्तः सन् वृषभं अदृष्ट्वा बुंबापातं चक्रे अहो मम द्वितीयो वृषभः केनापि हृतः लोका अपि वदंति
अस्माभिः श्रुतमासीदेकेन वृषभेन गंत्री आयाता ततो दुःखितो गतः स्वस्थानं परं तेन कुंभकारे
ण क्रोधेन सप्तवर्षाणि यावत् क्षेत्रखलानि धान्यसहितानि ज्वालितानि ततो ग्रामवृद्धैर्ग्रामीणैर्मिलि
त्वा लोके पटहघोषः कारितः अन्नमस्माकं यो दहति स प्रकटीभवतु ततः स कुंभकारो वेषविप १००

र्ययं कृत्वा प्रोवाच एगवइल्लागामी पासह तुम्भे विइज्जइ खलाइं ततो लोकैर्वृषभस्य हरणकारणं
ज्ञात्वा प्रोक्तं भो दीयतां कुंभकारस्य वृषभो नो चेदन्यान्यपि सप्तवर्षाणि धान्यानि धक्ष्यति ततो द
त्तो वृषभः क्षामितः कुंभकारः तस्मात्सर्वैरपराधो न कार्यः कृते च क्षामणं श्रेयः अन्यथा अन
र्थपरंपरा स्यात् इति क्रोधोपरि कुंभकारदृष्टांतः॥ तथा अस्मिन् पर्व्वणि यः क्रोधं न मुंचति स
संघाद्बहिः कार्यः त्रोटितनागवल्लीपत्रवत् अत्रार्थे दृष्टांतः॥ कोपि षिदवास्तव्यो द्विजो हलेन
कृषिकर्म्म कारयन् बलीवर्द्दो दुर्बलो गलितं वहति तोत्रादिभिः कदर्थयितुं प्रारब्धः स तथा
पि न वहति ततस्तेन अतिक्रोधात् मृत्पिंडैः राहत्य रुद्धमरणेन मारितो गोहत्यापातकं
लग्नं महाकुरुषपार्श्वं प्रायश्चित्तं पृष्टं दीयतां मम यथा शुद्धो भवामि तैरुक्तं को
पोगतो द्विजेनोक्तं चेत् तं पश्यामि तदा गृ तमपि मारयामि तदा तैरयं प्रोक्तः यः कृतोऽ
योग्यत्वात् एवमनुपशांतकोपः साधुरपि। अपराधे जाते मृगावतीवन्मनःशुद्ध्या मिथ्या
दुःकृतं देयं तत्संबंधलेशो यथा॥ एकदा श्रीमहावीरदेवः कौशांबीनगर्यां समवसृतः तदा तत्र चंद्र
सूर्यौ स्वकीयमूलविमानेन वंदितुं समागतौ तदा चंदनामृगावत्यौ प्रमुखा अपि आसन् चंदना तु अस्त
समयं ज्ञात्वा ततः उत्थाय स्वकीयोपाश्रये गता मृगावती तु भगवद्देशनामोहिता स्थिता ततश्चंद्रसूर्य
योः स्वस्थानं गतयोः अंधकारः सर्वत्र प्रसृतः ततो मृगावत्यपि चंदनामपश्यंती एकाकिनी भीतास
ती उपाश्रये समागता ईर्यापथिकीं प्रतिक्रम्य शयनस्थां प्रवर्त्तिनीं चंदनां प्रणम्य पादौ विश्रामयंती

८ कल्पल·

प्रोचे ममापराधं क्षमस्व तां चंदनापि तां प्रोचे हे भद्रे उत्तमकुलोत्पन्नेन त्वया ईदृशं कर्त्तुं ततो मृगाव
ती प्रोचे मया पापं कृतं मिथ्या मे दुःकृतं अतःपरं नेदृशं कर्म करिष्यामि इत्युक्त्वा पादयोः पपात तत
श्चंदनायाः निद्रा समागता मृगावत्याः शुभमनः शुद्ध्या मिथ्यादुःकृतं ददत्या केवलज्ञानं समुत्पन्नं अंध
कारे घोरे सर्पं आगच्छंतं ज्ञात्वा चंदनाहस्तं उत्क्षिप्य संस्तारके मुक्तः ततः प्रबुद्धया चंदनया प्रोक्तं कि
मिति मृगावत्योक्तं मा सर्पस्पर्शो भवत्विति चंदनयोक्तं क्व सर्पो मृगावत्योक्तं एष याति चंदनाह।
अहं न पश्यामि त्वं पश्यसि किं तव सातिशयं। ज्ञानं तयोक्तं ओमिति किं केवलज्ञानं तयोक्तं
मेवमेव चंदनाया अपि अहो मया केवलिन्या आशातना कृता अनित्यसावनं सावद्यं।
त्या केवलज्ञानमुत्पन्नं एवं मिथ्यादुःकृतं देयं परं न कुंभकारक्षुल्लकयोरिव तत्
संबंधो यथा॥ कोपि क्षिप्रो लघुबालस्वभावे न वं चलत्वात् कुंभकारस्य भाजनिकाणीकुर्व
न् वारितोपि न तिष्ठति उपालंभे दत्ते मिथ्यादुः कृतं ददाति ततः कुंभकारोपि कर्णयोः कर्क
रिकां क्षिप्त्वा दृढं निःपीड्य मिथ्यादुःकृतं ददाति एवं बहवः कुंभकार क्षुल्लको एवमेव कुर्वाति।
एवमेव मिथ्यादुःकृतं ददाते अनेन मिथ्यादुःकृतदानेन कापि अर्थसिद्धिर्न किं तर्हि कर्त्तव्यमित्या
ह॥ श्वश्रूजामातृवत् अलिया गलिया इति कर्त्तव्यानि यथा काचिद्गोसिनी विधवा हवा स्त्री आ २०१
सीत्तस्याश्च धनं बहुतरं पुत्रो नास्ति परमेका पुत्री कुमारिका वर्त्तते सा कस्यचित्कुलपुत्रकस्य प
रिणायिता परं लोभत्वात् जामातुर्बहुतरं अधिकारापन्नो दत्ते तेन रुष्टो जामाता एवं होलिका

दीपालिकादीवासादिसर्वपर्वसु न आत्मगृहे निमंत्रितो न जामाता श्वश्रूगृहे गतः ततो लोकैः
प्रोक्तं रे हृष्टे पापिनि लोभिनि त्वं बहुतरं पापा जामाता न तं तोषयसि धनेन किं करिष्यसि ततो लो
कात् त्रुटितया जामाता सोत्कृष्टनाम्ना निमंत्रितः प्रोक्तं च एकाकित्वेन आगंतव्यं तस्य मित्रैः प्रोक्तं
सो अद्य तव श्वश्रूः सर्वधनं दास्यतीति ततो जामाता आगतः श्वश्रूगृहे तोक्षुद्रमुपविष्टः परिवेषिता कै
रेयी परं वाद्दमीनाले स्तंभं सदकं क्षिप्रमस्ति परिवेषणवेला बहवी लगति अथ च घृतं स्तोकं निस्स
रति सा तु षंमोनयमानार्थं अपवरिकामध्ये गता त दा जामात्रा श्वश्रूलक्षणानि ज्ञात्वा वाद्दमीना
लात् सतत्तुं सदकं निःकास्य चुल्लिकायां रे निःक्षिप्तं तया आगत्य वाद्दमीनालेन घृतं
परिवेषितं वाद्दमीनालं च वर्षतिमेघे च दृष्टणालवज्जातं तस्या उदरे धुसकः पति
तो ऽहो किं जातं ततस्तया बंधपरिवेषणा नंतरं प्रोक्तं हे जामातर अद्य एकत्र जेमनेन
हर्षणकं संपद्यते इत्युक्त्वा सोत्कृष्टनाम्न्या एकत्र त स्मिन्नेव स्थाले जामात्रा सह उपविष्टा जामा
त्रा च स्थालकोणस्य ईषत् अधः करणेन घृतमात्मसन्मुखं कृतं श्वश्रूजनेन अहो गतं घृतं किं करो
मि अतः सदा नयनार्थं अपराधं रवतिरेखां करोति कैरेयी मध्ये वह्नि च अहो जामातः स्तवपते अ
पराधाः त्वं होलिकायामाकारितो नागत एवं दीपालिकायां एवं दीवासापर्वणि इति रेखाः कृ
त्वा घृतं सर्वमपकर्षितं मात्मसन्मुखमानीतं च जामात्रा विचारितं अहो श्वश्रूजनेन बुध्या उपा
यं कृत्वा घृतं सर्वमपकर्षितं अथ किं कर्त्तव्यं ततो जामात्रा हे श्वश्रु सर्वे अपराधा गता आवयो

८५
कल्प.ल.

र्मनोपि मिलितं अथ सा सुङमाईबालां अलियांगलियां कर्त्तव्यानि इत्युक्त्वा क्रुद्धा श्वश्रूर्घृतखंडघृतस्था
लमध्ये हस्तं क्षिप्त्वा सर्वत्र भ्रामयित्वा त्रयमपि एकीकृत्य तस्यां मुक्तं गतं दूषणकं एवं धर्मार्थिभिरपि
कथंचिद्रागद्वेषौ उत्पन्नौ तथापि तौ पर्वणि मुक्त्वा परस्परं शल्यं मुक्त्वा मनःशुद्ध्या मिलनीयं मिथ्याडु
ष्कृतं च देयं॥ एवं क्रोध १ मान २ माया ३ लोभ ४ परि ४ पल्लीपति १ अच्चंकारी भट्टा २ ऐरावणी ३ घृतपांडुलाय
४ मङ्गुरामंगुध प्रमुखाणां बहवो दृष्टांताः संति परं ग्रंथविस्तरभियान लिखिताः॥ तथा चतुर्मास्यां
स्थितानां निर्ग्रंथानां २ च विशेषतः क्रोधमान माया लोभै राहारग्रहणं न युक्तं तत्र श्रीभद्र
बाहुस्वामिकृत पिंडनिर्युक्तिगतं संबंधं च तुष्टयं प्रोच्यते तत्र प्रथमं क्रोधपिंडग्रहणे
परिहर्त्तव्यः क्षपकदृष्टांतो यथा हस्तिकल्पे नगरे एकः साधुर्मासक्षपणपारणे तिद्दा
हिंडन् ब्राह्मणगृहे मृतकसंखड्यां प्रविष्टः तत्र ब्राह्मणानां घृतपूरा दीयंते साधुस्तत्र
अनाद्रियमाणश्चिरं स्थितः परं न कोपि साधवे अदात् ततो रुष्टः साधुः द्वितीयमृतकसंख
ड्यां दास्यतीत्युक्त्वा गतो नान्यथा ऋषिभाषितमिति हेतो द्वितीयो मृतस्तस्य संखड्यामपि गतः परं न किमपि
दत्तं ततोऽतिकोपेन तृतीयमृतकसंखड्यां दास्यतीत्युक्त्वा गतः तृतीयोपि मृतः पुनः साधुर्गतः परं न
किमपि दत्तं ततोऽतिचंडकोपेन पुनरन्यमृतकसंखड्यां दास्यतीति वदन् केनापि स्थविरेण द्वारपा
लेन श्रुतः ततस्तेन स्वामिनः प्रोक्तं सोऽयं साधुः घृतपूरदानेन सुप्रसन्नः कार्यो नोचेदन्योपि मरि
ष्यतीति ततो गृहस्वामिना आकार्य घृतपूरैः साधुः प्रतिलाभितः एवंविधा नेन साधुना क्रोधेन घृ २०२

तपूरा गृहीतास्तथा अन्येन न ग्राह्याः १ पुनर्माने सेवइया साधुस्तथाहि॥ कोशलादेशे गिरि
पुष्पकं नाम नगरं तत्र सेवइया पर्वणि तरुणश्रमणानां एकेन साधुना प्रोक्तं लो अद्य त्रिकावेलायां स
र्वैरपि सेवइया सक्तं प्रचुरं लब्धं तत्र कालब्धिः कथं अद्य सेवइया पर्व वर्त्तते परं सलब्धिपात्रेयः प्रातेघृ
तखंडसहितं सेवइयासक्तं आनयति साधूनां च प्रतिलाभयति तदा एकेन चेल्लकेन अभिमानेन अ
हं आनयिष्यामि प्रतिज्ञामिति कृत्वा द्वितीयदिने दृष्टक्रराणि पात्रकाणि लात्वा गत इभ्यगृहे दृष्टाश्च
तत्र तादृशाः लाषिता गृहस्वामिनी देहि मे तया। लोलिन्या बाढं हक्कयित्वा निःकासितो गृहात् ते
न चेल्लकेन अभिमानं कृत्वा प्रोक्तं पत्रपत्वं म याएताः अवश्यं गृहीतव्या येन तेन प्रकारेण।
तयापि प्रोक्तं यदि त्वं एता गृह्णासि तदा। मम नासिका वर्द्धनं ज्ञेयमिति ततः साधु
र्निर्गत्य गतो गच्छता च दृष्टं लोकाः इदं कस्य गृहं गृहस्वामी च कुत्र सांप्रतं वर्त्तते केनापि
प्रोक्तं देवदत्तस्य गृहं सोपि सभायां सांप्रतं वर्त्तते। ततो गतश्चेल्लकः सभायां दृष्टाः सभापुरु
षाः लोभवत्तां मध्ये देवदत्तः कस्तैः प्रोक्तं किं प्रयोजनं चेल्लकेन प्रोक्तं तत्पार्श्वात् किमपि याचिष्ये
तदा तैर्भणितं किं तेन कृपणेन याचितेन वयं याचितव्याः यथा अर्थसिद्धिर्भवेत् ततो देवदत्तेन भ
णितं यत्त्वं याचिष्यसे तदहं दास्यामि ततः साधुना सभासमक्षं प्रोक्तं लो देवदत्त यदि त्वं एतेषां ष
ण्णां स्त्रीवशवर्त्तिनां पुरुषाणामन्यतमो न भवसि तदा याचे तैर्भणितं के ते चेल्लकेन भणितं श्वेतांगु
लः १ बकोड्डायी २ किंकरः ३ तीर्थस्नातः ४ गृद्धावरंखी ५ हदन्नपयद ६ एतेषां पुरुषा अधमाः का

५
कल्पल·

षिताः तत्र श्वेतांगुलिसंबंधो यथा॥ एकेन निजभार्यावशवर्त्तिना कुलपुत्रकेण क्षुधातुरेण प्र
भाते एवं भणितं हे भार्ये अन्नपाकं कुरु यदि तव रोचते येन अहं भुंजे ततस्तया शय्यास्थितया एवं भ
णितं यदि त्वं क्षुधितोसि तदा चुल्हीतो रक्षां निःकाशय बहिर्निक्षिप इंधनमानय अग्निं प्रज्वालय चु
ल्हीमस्तके दंतिकां स्थापय तन्मध्ये पानीयं क्षिप पुनः कोष्टकादानीय तंडुलान् प्रक्षिप ततोऽन्नपा
कं कृत्वा मम कथयेः येनाहं उत्थाय तवान्नं परिवेषयामि तेन प्रोक्तं हे प्रिये यत्त्वया आज्ञप्तं तत्प्र
माणं ततस्तथैव सर्वमकरोत् अत एवं प्रत्यहं तस्य कुर्वतः प्रभाते चुल्हीतो रक्षां बहिर्निक्षिपतो
रक्षया कृत्वा अंगुलयः श्वेता दृश्यन्ते तेन लो कैः श्वेतांगुलिरिति तस्य नाम दत्तं चेल्लको वक्ति
सो हि देवदत्त त्वमपि यदि एतत्सदृशोऽसि तदा न प्रार्थयामि अन्यथा प्रार्थयामि देवदत्तेन
प्रोक्तं न भवामि एतादृशः॥१ ततः पार्श्ववर्त्ति तरुणपुरुषैः प्रोक्तं बकोड्डायीको द्वितीयस्तं सं
बंधं ब्रूहि चेल्लकः प्राह श्रूयतां एकः कोपि कुलपु त्रकः स्त्रीवशवर्त्ती आसीत् शय्यासुप्तया स्त्रि
या भणितं पानीयं नानयिष्यामि त्वमुत्तिष्ठ प्रतिदिनं सरोवरात्पानीयमानय तेन अत्यंतप्रेमपरव
शेन अंगीकृतं परं दिवसे लज्जमानो रात्रिपश्चिमप्रहरे सर्वलोकेभ्यः पूर्वं घटं मस्तके स्थापयित्वा पा
नीयार्थं सरोवरे याति तत्र बकान् स्वेच्छया स्थितान् उड्डाययति प्रत्यहं एवं बकान् उड्डाययतो दृष्ट्वा लो
कैर्बकोड्डायीति नाम भणितं त्वमपि एतादृशोऽसि तदा न याचे देवदत्तेनोक्तं नहि २ पुनस्त
रुणैरुक्तं वद ३ किंकरः कः चेल्लकः प्राह एकः कुलपुत्रकः परं स्त्रीवशवर्त्ती अत्यंतप्रेमातुरः

२०३

कः प्रभाते एव शयनतः उत्थाय अंजलिं योजयित्वा आदेशं याचते हे प्रियतमे वद किं करोमि तया
भणितं पानीयं कूपतः आनय आनीतं पुनर्भणितं अथ किं करोमि तंदुलान् खंडय खंडिताः पुन
र्भणितं किं करोमि तया भणितं सर्वं अन्नपाकं कुरु कृतं पुनर्भणितं किं करोमि तया भणितं आसनं मं
डय मंडितं पुनर्भणितं किं करोमि तया भणितं मां बाहौ गृहीत्वा आसने उपवेशय उपवेशिता पुनर्भ
णितं किं करोमि तया भणितं रसवतीं परिवेषय परिवेषिता पुनर्भणितं किं करोमि तया भणितं या
वत्कालं भुंजे तावत्कालं मक्षिकावारणं कुरु॥ कृतं पुनर्भणितं किं करोमि तया भणितं मम म
लमूत्रमत्रके परिष्ठापय परिष्ठापितं पुनर्भणि तं किं करोमि तया भणितं अहं शये त्वं मम पा
दौ विश्रामयेति एतादृशोऽसि तदा न याचे तेनोक्तं नाहं एतादृशो यत्त्वं याचिष्यसे तद्दा
स्यामि एवं अन्यत्संबंधत्रयं श्रीपिंडविशुद्धिवृ त्तितो ज्ञेयं ततः सर्वतरुणैः प्रोक्तं सो चेल्ल
क स्त्रीवशवर्त्तिनो दोषाः सर्वेपि अस्मिन् देवदत्ते व र्त्तंते इति उपहासे कृते देवदत्तः प्राह सो भगवन्
मा एतेषां वचनं शृणु याचस्व यत्ते रोचते चेल्लकेन भणितं देहि मे घृतखंडसहिताः श्वेतवर्त्तिकाः ततो द
दामीत्युक्त्वा तेन साधुं गृहीत्वा गृहाय चलितः गृहद्वारागमने चेल्लकेन भणितं सो तव भार्यया समं मम क्ले
शो जातोऽस्ति पूर्वं तेन विचार्य तदा देवदत्तेन प्रोक्तं सो त्वं बहिरेव तिष्ठ अहं गृहमध्ये गत्वा सुखं चेत्कृ
त्वा आकारयामि तदा आगच्छेः तथैव कृत्वा गृहमध्ये गत्वा दृष्टा भार्या अद्य ये ब्राह्मणा निमंत्रिताः सं
ति तान् समाकारयामि जाता सोऽद्य न सामग्री तया प्रोक्तं उमिति देवदत्तेन ज्ञातं अस्यां सत्यां न दातुं

९
कल्प॰

शक्नोमीति प्रोक्तं निःश्रेण्यां चटित्वा उपरिष्टात् घृतगुडादि प्रचुरमानय सा चटिता उपरि आकारितः
साधुः साधुनोक्तं लोदेवदत्त इमां निःश्रेणीं दूरे कुरु यथा स्वेच्छया निःश्रेणीतो विदधामि तेन तथा कृते सा
धुना स्वेच्छया घृतगुडसहिता अटिताः श्वेतवर्तिकाः सा उपरिस्था पश्यति दुःखं करोति कोलाहलं क
रोति परं न किमपि कर्तुं शक्नोति साधुरपि तालिःपात्राणि भृत्वा निःसृतो निर्गच्छंश्च तस्याः सन्मुखं वि
लोक्य नासिकाया उपरि अंगुलिभ्रामणं चक्रे स्थापितं चैतद्वचनं कर्त्तनं ज्ञानमस्ति ततः उपाश्रये समा
गत्य सर्वेऽपि साधवो लोडिताः एवमेतद्वत्मानपि दोन ग्राह्यः ॥ ३ ॥ मायायां आषाढसूतिदृष्टांत
ः सूत्रे प्रसिद्धत्वान्न लिखितः ३ ॥ लोभे सिंह केसरिक साधुदृष्टांतो यथा ॥ चंपानगर्यां उ
त्सवदिने पारणायां एकेन क्षपक साधुना अभिग्रहो गृहीतो मया अद्य सिंहकेसरि
कमोदकाः गृहीतव्याः ततः प्रतिगृहं भ्रमतस्त स्य मोदकान् न कोऽपि ददाति अन्यच्च न लाति
ततस्तस्य अलभमानस्य संक्लिष्टपरिणामेण चित्तं नष्टं ततः प्रतिगृहं धर्मलाभं भणन् अर्द्धरात्रौ ग
तः कस्यचित् श्रावकस्य गृहे तेन गंभीरेण मार्गपि समानेन धर्मलाभश्रवणात् ज्ञातं कोऽपि कर्म
वशगः साधुस्तेन श्राद्धेन वंदितः प्रोक्तं भगवन् किं विलोक्यते तेनोक्तं सिंहकेसरिकमोदकास्ते
न प्रोक्तं गृहाण बहवः संति निर्दोषास्ततस्तेन दत्तास्तेन गृहीताश्च साधोर्मनसि स्वास्थ्यं ज्ञातं ततः श्रा २०४
वकेण पृष्टं भगवन् मया पुरिमार्द्धप्रत्याख्यानं कृतं मासी त्वं पूर्णं न वा मुनिना उपयोगदानेन गगनं दृ
ष्टं आकाशो निर्मलास्तारा इति नक्षत्रश्रेणिशोभितं चंद्रमंडलं विलोक्य प्रत्यागता चेतना हा मया किं

कृतं कोऽमभाचार इति पश्चात्तापं कुर्वन् निर्गतो नगरात्सूत्रोक्तविधिना मोदकान् परिष्ठापयन्
अहो कर्माणि दुर्ज्ञेयानि अहो कर्मणां परिपाको हा मया दुष्टं कृतं इत्यादि पश्चात्तापपूर्वं शुभ
ध्यानेन केवलज्ञानं प्राप अत्रायं भावो यथा अनेन लोभेन सिंहरिमोदका गृहीतास्तथा न ग्राह्या ×केस×
ः एवमत्र अनेके दृष्टांताः संति परमस्माभिः कियंतो लिखिताः अन्ये दृष्टांता अन्यैरन्यशास्त्रेभ्यो ज्ञे
या वाच्याश्च ॥ २४ सामाचारी ॥ अथ उपाश्रयाधिकाररूपां पंचविंशतितमां सामाचारीमाह ॥ तत्र
सूत्रं ॥ वासावासं नो कप्पइ निग्गंथाण वा २ तउ उवस्सगा गिण्हित्तए तंजहा वेउव्विया पडिले
हा साइज्जिया पमज्जणा २ व्या॰ ॥ वर्षाका ले स्थितानां निर्ग्रंथानां २ च त्रय उपाश्रया व
र्षासु गृहीतुं कल्पंते संसक्ति जलप्लावना दिदोषसंभवात् तं इति पदं तत्रार्षे संभाव्य
ते विउव्विया पडिलेहा कचित् वेउव्विया पडिलेहा इति दृश्यते तत्र यत्रापि पुनः २ इ
ःस्पर्शः साइज्जिया पमज्जणा इति आर्षं ज्ञेति खंदस्स कम्मं करेइ करेंतं वा साइज्जति इति
वचनात् साइज्जिधातुरास्वादने वर्त्तते तत उपभुज्यमानो य उपाश्रयः सः कथयमाणेक्कदे इति
न्यायात् साइज्जितत्ति संपद्यते तत्संबंधिनी प्रमार्ज्जना साइज्जिया यस्मिन्नुपाश्रये साधवः स्थि
ताः संति तं उपाश्रयं प्रातः प्रमार्जयंति १ पुनर्भिक्षां गतेषु साधुषु २ पुनर्मध्याह्ने ३ पुनः प्रति
लेखनाकाले तृतीयप्रहरांते ४ इति वारचतुष्टयं प्रमार्जयंति वर्षासु ऋतुबद्धे त्रिवारं अयं
च विधिरसंसक्ते संसक्ते तु पुनः २ प्रमार्जयंति शेषोपाश्रयद्वयं प्रतिदिनं प्रतिलेखितं प्रत्य

वेलंते मा कोपितत्रस्यास्यति ममत्वं का करिष्यतीति तृतीयदिवसे नपादप्रोंछकेन प्रमार्जयंति।
अतएव उक्तं विउद्धिया पडिलेहणिहइ प्पते तत्रापि प्रतिलेखना प्रमार्जनयोरेकविवक्षया सएवार्थः अत्रे
दं रहस्यं उपाश्रया त्रयः प्रोक्ताः तत्र एक उपभुज्यमानः कोर्थः यत्र साधवः स्थिताः संति २ द्वौ उपाश्रयौ अ
न्यौ तौ प्रतिदिनं दृशा विलोकनीयौ तृतीयदिने तु प्रमार्जनीयौ तेषां नाम सूत्रमध्ये नास्ति सूत्रमध्ये तु तेषां
क्रियाप्रोक्तास्ति इति पंचविंशतितमा सामाचारी॥२५॥ अथ गोचरचर्यादिगमने दिक्ज्ञापनाधिकार
रूपां षड्विंशतितमां सामाचारीमाह॥ तत्र सूत्रं। ।वासावासं कप्पइ निग्गंथाणवा २ अन्नयरिं दि
सिं वा अणुदिसिं वा अवगिज्झिय २ भत्तपाणं ग वेसित्तए से किमाहु भंते उसन्नं समणा भगवं
तो वासासु तवसंपउत्ता भवंति तवस्सी दुब्ब लेकिलंते मुच्छिज्ज वा पवडिज्ज वा तामेव दि
सं अणुदिसं वा समणा भगवंतो पडिजागरंति। २६॥ व्या०॥ वर्षाकाले स्थितानां निर्ग्रंथानां च
अन्यतमां दिशं पूर्वादिकां अनुदिशं विदिशं आ ग्नेय्यादिकां अवगृह्य २ उद्दिश्य २ अदमुकां
दिशं अनुदिशं वा यास्यामीति अन्यसाधुभ्यः कथयित्वा वा भक्तपानं गवेषयितुं विहर्तुं कल्पते से
किमाहु भंते इति किमत्र कारणं भदंत तत्र आचार्य आह॥ उसन्नंणंति प्रायेण श्रमणा भगवंतो व
र्षासु तपःसंप्रयुक्ता भवंति प्रायश्चित्तवहनार्थं संयमार्थं स्निग्धकाले मोहजयार्थं वा षष्ठादितप
श्चारिणो भवंति ते च तपस्विनो दुर्बला स्तपसैव कृशांगाः अतएव क्लांताः संतो मूर्छेयुर्वा प्रपते
युर्वा तत्र मूर्छा इंद्रियमनोवैकल्यं प्रपतनं दौर्बल्यात् प्रस्खलद्भूमौ पतनं तामेव दिशं अनुदि २०५

शं वा श्रमणा भगवंतः प्रतिजाग्रति प्रतिचरंति गवेषयंति अयं भावार्थः तक्राद्यर्थं ग्रामादौ यस्यां
दिशि विदिशि वा गच्छेत्तु स्तां गुर्वादिभ्यः कथयित्वा गच्छेति येन तेषां तत्र गतानां तपः क्लमादि मूर्छिता
नां प्रपतितानां वा पाश्चात्याः साधवस्तस्यां दिशि विदिशि वा अस्येत्पसारां कुर्वंति अथ कथयित्वा उ
गतानां द्विगपरिज्ञानात्कथं ते सारां कुर्युरिति षड्विंशतितमा सामाचारी॥२६॥ अथ ग्लानादिका
र्थं गत्वा पुनरागमनाधिकाररूपां सप्तविंशतितम सामाचारीमाह॥ तत्र सूत्रं॥ वासावासं कप्पइ
निग्गंथाणवा २ जाव चत्तारि पंच जोयणाइं गंतुं। पडिनियत्तए अंतरा वि यसे कप्पइ वत्थए नो
कप्पइ तं रयणिं तत्थेव उवाइणावित्तए २७ व्या ०॥ वर्षाकाले स्थितानां निर्ग्रंथानां २ च वर्षा
कल्पौषधवैद्यार्थं ग्लानसारकरणार्थं वा यावच्चत्वारि पंच वा योजनानि गत्वा प्रति
निवर्तेत तस्मान्नो तद्दिव व्याघुट्येन नतु यत्र ल ब्धं तत्रैव वसेत् स्वस्थाने प्राप्तुमक्षमश्चेत्तदा अं
तरापि वसेत् नतु तत्रैव वसेत् एवं द्वितीयादि र आराधितो भवति यत्र दिने वर्षाकल्पादि ल
ब्धं तद्दिनरात्रिं तत्रैव नातिक्रमेत् यस्यां वेलायां लब्धं तस्यामेव वेलायां ततो निर्गन्त्य बहिस्तिष्ठेत्
कारणे तु तादृशि तत्रापि वसेदिति हृदयं इति सप्तविंशतितम सामाचारी॥२७॥ अथ सामाचारी
पालनस्य फलरूपां अष्टाविंशतितमसामाचारीमाह॥ तत्र सूत्रं॥ इच्चेइयं संवच्छरियं थेरकप्पं।
अहासुत्तं अहाकप्पं अहामग्गं अहातच्चं सम्मं काएण फासित्ता पालित्ता सोहित्ता तीरित्ता किट्टि
त्ता आराहित्ता आणाए अणुपालित्ता अत्थेगइया समणा निग्गंथा तेणेव भवग्गहणेणं सिज्झंति बु

झंति बुज्झंति परिनिव्वाइंति सव्वदुक्खाणमंतं करिंति अत्थेगइया दुच्चेणं भव २ अत्थेगइया तच्चे
णं भव ३ जाव सत्तट्ठभवग्गहणाइं नाइक्कमंति॥२८॥ व्या०॥ इच्चेइयत्ति इतिरुपदर्शने एवंसूत्रो
क्तं सांवत्सरिकं वर्षारात्रिकं स्थविरकल्पं यद्यपि किंचिज्जिनकल्पिकानामपि सामान्यं तथापि
भूम्ना स्थविराणामेवात्र सामाचारी स्थविरकल्पमर्यादां यथासूत्रे भणितं न सूत्रव्यपेतं तथा कुर्वतः
कल्पो भवति अन्यथा तु अकल्प इति यथाकल्पं १ एवं कुर्वतश्च ज्ञानादित्रयलक्षणो मार्ग इति य
थामार्गं २ यथातथ्यं यथैव समुपदिष्टं भगवद्भिः ३ यथासम्यग् यथास्थितं ४ कायेनेति।
उपलक्षणत्वात् कायवाङ्मनोभिः अथवा कायशब्देनैव योगत्रयं व्याख्यायते तथा
हि कायेन शरीरेण के गौरे शब्दे कायते उच्चार्यते अनेन कायो वचनं तेन कं ज्ञानं
तदेव आत्मा स्वरूपं यस्य तत्कात्मा मनः बुध्यात्मकत्वान्मनसः तेन ततश्च कायवाङ्म
नोभिः स्पर्शः स्पृष्ट्वा आसेव्य पालयित्वा अतीचारेभ्यो रक्षित्वा शोधयित्वा दोषदूरीकरणात्
शोभयित्वा विधिवत्करणेन तीरयित्वा यावज्जीवमाराध्य यावज्जीवं आराधनेन अन्तं नीत्वा वा
कीर्त्तयित्वा अन्येभ्यः उपदिश्य न तु विराध्य यथावत्करणात् आज्ञया भगवदुपदेशेन अनु
पाल्य पूर्वैः पालितात्पश्चात्पालनेन तस्यैवं पालितस्य फलमाह॥ अत्थेगइयत्ति संत्येके ये अत्युत्तम २०६
तया तत्पालनतया तस्मिन्नेव भवग्रहणे भवे सिध्यंति निष्ठितार्था भवंति बुध्यंते केवलज्ञानेन मुच्यं
ते भवोपग्राहिकर्मांशेभ्यः परिनिर्वांति कर्मकृतसकलसंतापविरहाच्छीतीभवंति किमुक्तं भवति

सर्वदुःखानां शारीरमानसानां अंतं विनाशं कुर्वंति उत्तमतया अनुपालनया द्वितीये भवे मध्य
मया तृतीयभवे जघन्ययापि अनुपालनया सप्त अष्टौ वा भवग्रहणानि नातिक्रामंति इति अष्टा
विंशतितमा सामाचारी॥ २८॥ अथ न चैतत्स्वबुद्ध्या उच्यते किंतु भगवदुपदेशपारतंत्र्येणेत्या
ह॥ तत्र सूत्रं॥ तेणं कालेणं २ समणे भगवं महावीरे रायगिहे नगरे गुणसिलए चेइए बहूणं
समणाणं बहूणं समणीणं बहूणं सावयाणं बहूणं सावियाणं बहूणं देवाणं बहूणं देवी
णं मज्झगए चेव एवमाइक्खइ एवं भासइ एवं पन्नवेइ एवं परूवेइ पज्जोसवणाकप्पो नामं
अज्झयणं सअट्ठं सहेउयं सकारणं ससुत्तं सअट्ठं सउभयं सवागरणं भुज्जो२ उव
दंसेइत्तिबेमि॥ पज्जोसवणाकप्पो दसासुयक्खंधस्स अट्ठमं अज्झयणं सम्मत्तं॥
व्याख्या॥ तस्मिन्काले चतुर्थारकप्रांते तस्मिन्समये श्रमणो भगवान्महावीरः राज
गृहे नगरे गुणसिलचैत्ये बहूनां श्रमणानां ब० श्रमणीनां ब० श्रावकाणां ब० श्राविका
णां ब० देवानां ब० देवीनां च मध्यगतः चेवत्ति अवधारणे मध्यगत एव न तु नरेकांते अनेन उ
द्ध्यासशिरा इत्युक्तः एवमाख्याति यथोक्तं कथयति १ एवं भाषते वाग्योगेन २ एवं प्रज्ञाप
यति अनुपालितस्य फलं ज्ञापयति ३ एवं प्ररूपयति दर्पणतल इव प्राति रूपं श्रोतॄणां हृदये
संक्रामयति ४ इदानीं आख्येयस्य नामधेयमाह॥ पर्युषणाकल्पनामाध्ययनं भूयो२ वारं२
विस्मरणशीलश्रोतॄणामनुग्रहार्थं उपदर्शयति अनेकशः प्रदर्शयति किं विशिष्टं पर्युषणा

९
कल्पल॰

कल्पाध्ययनंसार्द्धत्रयोदशनसूत्रं नवनवरेतगतिकं टकशाखामर्दनवदभिधेयशून्यं तथा विधवर्षा
सुस्त्वीमात्रव्रतं १ सहेतुकं हेतुदोषदर्शनं अननुपालयतोऽमी दोषा इति यथा सवीसइराए मासे व
इक्कंते इत्युक्ते को हेतुः पाएणं अगारीणं अगाराइं इत्यादिकः सकारणं कारणमपवादो यथा अं
तराविकप्पइ से कप्पइ पज्जोसवित्तए तेन सहितं सकारणं सकृत्त्वं साहं सोसयमिति पदत्रयं प्रतीतं अर्द्ध
सार्द्धकत्वं कथमध्ययनस्य तच्च त्रटीकादाविव अर्थः एषव्याख्यातोस्ति सत्यं सूत्रस्य अर्थेन
अंतरीयकत्वाददोषः तथा सव्याकरणं एष एष्टार्थकथनं व्याकरणं तत्सहितमिति इति बे
मि त्ति इति ब्रवीमि इति तद्वा जंबूस्वामीस्वशि ष्यानुवक्ति श्रुते नेदं स्वमनीषिकया ब्रवीमि किं
तु तीर्थकरगणधरोपदेशेनेति इतः स्व रात्रस्येश्च ह्रिरिति सूत्रेण इलोपे तकारस्य
चहित्वे अवदंसेत्ति रूपं पज्जोसवणाकप्पो सम्मत्तोत्ति पर्युषणाकल्पः समाप्त इति पर्युष
णा वर्षासु एकक्षेत्रनिवासस्तत्संबंधी कल्प :सामाचारी साधूनां प्रतीत्य विधिप्रतिषेधरूपा
कर्त्तव्येति तदभिधेययोगादध्ययनमपि पर्युषणाकल्पः रत्नपरीक्षागजशिक्षादिवत् सच श्रीदा
शाश्रुतस्कंधादिसिद्धांतस्य अध्ययनमष्टमं समाप्तः समर्थितइति॥ व्याख्यानं कल्पसूत्रस्य नवमं सुग
मं स्फुटं शिष्यार्थं पावकाश्वर्तुः समयादिमसुंदराः १ ९ ॥श्रीशासनाधीश्वरवर्द्धमानो गुणैरनं
तैरतिवर्द्धमानः यदीयतीर्थं खखखबाणनेत्र २१००० वर्षाणि यावद्विजयि प्रसिद्धं १ तदीयशिष्या २०७
गणभृच्च पंचमः सुधर्मनामास्य परंपरायां बहुवशाखाकिल वज्रनाम्नी चांद्रकुलं चंद्रकुले व निर्म

लं २ तत्र गच्छे त्वभिधानतः खरतरे यैः स्तंभनाधीश्वरो द्रुमध्यात्प्रकटीकृतः पुनरपि स्नानोदका
त्सुगता स्थानांगादिनवांगसूत्रविवृतिर्व्यातितव्या कृता श्रीमंतोऽभयदेवसूरिगुरवो जा
ता जगद्विश्रुताः ३ यो योगिनीस्तोऽकृतदेवदीव वरान् वरान् ज्ञायदनेकविद्यः पंचापि पीरा
न् स्ववशीचकार युगप्रधानो जिनदत्तसूरिः ४ पुनरपि यस्मिन् गच्छे बहुव जिनकुशलनाम
सूरिवरः यस्य स्तूपनिवेशाः सुयशः पुंजा इवासंति ५ तत्पट्टानुक्रमतः श्रीमज्जिनचंद्रसूरि
नामानः ज्ञातायुगप्रधाना दिल्लीपतिपातिसा हिकृताः ६ अकबररंजनसर्वं द्वादशास
बेषु सर्वदेशेषु स्फुटतरममारिपटहः प्रवा दितोयैश्च सूरिवरैः ७ यद्वारे किलकर्मचं
द्रसचिवः श्राद्धोसवह्वीलिमान् येन श्री गुरुराजनंदिमहसिद्धव्ययो निर्ममे
कोटेः पादयुजः शराग्निसमये दुर्भिक्षवेला कुले सत्राकारविधानतो बहुजनाः संजी
विताश्चेनच ८ यद्वारे पुनरत्र सोमजिशिवा। श्राद्धो जगद्विश्रुतो यात्रां राणपुरस्य १ रैव
तगिरेः २ श्रीअर्बुदस्य ३ स्फुटं गौर्मीध श्रीविमलाचलस्य च महान् संघोनघः कारितो गच्छेलं
लनिकाकृता प्रतिपुरंस कार्द्धमेकं पुनः ९ तेषां श्रीजिनचंद्राणां शिष्यः प्रथमतोऽभवत् गणिः
सकलचंद्राख्यो रीहमाद्वयभूषणं १० तच्छिष्यसमयसुंदरसदुपाध्यायैर्विनिर्मिताध्यायैः
कल्पलता नामाद्यं ग्रंथश्चक्रे प्रयत्नेन ११ प्रक्रियाहैमसाध्यादि पाठकैश्च विशोधिता हर्षनंद
नवादीन्द्रैश्चिंतामणिविशारदैः १२ क्वचित्सूत्रहत्यारनावबोधतो वा १ क्वचित्सूत्रपाठांतरस्था

तिमत्वात् क्वचिद्बुद्धिमांद्याज्जिनाज्ञाविरुद्धं मया वाचि मिथ्यास्तु तद्दुःकृतं मे १३ विषमं संस्कृतं
संस्कृतं सुगमं च मया कृतं सर्वत्र न कृतः संधिः स्वल्पसर्वसुखबोधये १४ सत्सु समस्तं व्याख्यानं क
ल्पसूत्रस्य दुःकरं केषांचिदल्पबुद्धीनां वस्तुपायवालोकनात् १५ कृत्वा तदनुकंपां तां मया
कल्पलता कृता सुगमा तत एतस्यामेकस्यामेव कथ्यतां १६ लूणकर्णसरे ग्रामे प्रारब्धा कर्तु
मादरात् वर्षमध्ये कृता पूर्णा मया वेषारिणीपुरे १७ राज्ये श्रीजिनराजसूरिसुगुरोर्भाग्याद्भि
तस्वर्गुरो र्द्भाग्यं सुविलोकविस्मयकरं सौ भाग्यमत्यद्भुतं कीर्त्तिस्फारसरीसरीति ज
गति प्रोद्दप्रतापोदया दाज्ञाकुत्रतमा कृपा तनुभृतां दारिद्र्यदुःखापदा १८ श्रीमज्जा
नवदेवकुंदरगिरौ श्रीमेदतायां पुनः श्री पल्लीनगरे च लोद्रनगरे प्रौढाप्रतिष्ठा
कृता द्रव्यं भूरितरं व्ययीकृतमहो श्राद्धैर्मह त्युत्सवे राज्यं ते जिनराजसूरिगुरवस्तेसां प्र
तं भूतले १९ युवराजो जिनसागरसूरिवरो वि जयिनि प्रकृतिसौम्ये यत्सौभाग्ययशोभि र्ध
वलीकृतभूतलं भाति २० तद्गुरूणां प्रसादेन मया कल्पलता कृता कल्पसूत्रमिदं यावत् तावन्
दतु सापिहि २१ इति श्रीसमयसुंदरोपाध्यायविरचिता कल्पलता नाम्नी कल्पसूत्रटीका समा
प्ता॥ श्रीरस्तु शुभं भवतु॥ ग्रंथाग्रसंख्या ७७०० ॥ संवत्यंगनिधिमुनींदुप्रमिते मासोत्तममा सं०१७९६ २०८
सि सद्सि वलक्षपक्षे त्रयोदश्यां तिथौ गुरुवासरे श्रीमज्जैसलमेरुदुर्गमहादुर्गे जंगमयु
गप्रधानभट्टारकश्रीमज्जिनसागरसूरीणां पट्टप्रभाकरभट्टारकयुगवरश्रीमज्जिनधर्मसूरि

वराणां शिष्यदक्षमहोपाध्यायश्रीसिद्धिवर्द्धनगणिवराणां विनेयवरैः श्रीगुणविलासोपाध्यायै
र्लिपीकृता प्रतिरियं वाच्यमाना चिरं नंद्यात्॥ राउलश्री अखैसिंहजीविजयराज्ये॥ श्रीः॥

॥कल्पेल
नापत्र
३६९
१००००

B. 9
159

३०९